म० म० शिवकुमारशास्त्रि-ग्रन्थमाला

[तृतीयं पुष्पम्]

नागेशभट्टविरचिता

वैयाकरणसिद्धान्तमञ्जूषा

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः

म. म. शिवकुमारशास्त्रि-ग्रन्थमाला

[तृतीयं पुष्पम्]

नागेशभट्टविरचिता

वैयाकरणसिद्धान्तमञ्जूषा

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः

M. M. ŚIVAKUMĀRAŚĀSTRĪ-GRANTHAMĀLĀ

[Vol. 3]

Chief Editor

DR. BHĀGĪRATHA PRASĀDA TRIPĀṬHĪ 'VĀGĪŚA ŚĀSTRĪ'

Director, Research Institute,

Sampurnanand Sanskrit Vishvavidyalaya,

Varanasi

VAIYĀKARAṆA-SIDDHĀNTAMAŃJŪṢĀ

by

NĀGEŚA BHATTA

Edited by

Dr. KĀLIKĀ PRASĀDA ŚUKLA

Reader, Department of Vyākaraṇa

Sumpurnanand Sanskrit Vishvavidyalaya

VARANASI

1977

Published by—
Director, Research Institute,
Sampurnanand Sanskrit Vishvavidyalaya
Varanasi.

Available at—
Publication Section,
Sampurnanand Sanskrit Vishvavidyalaya,
Varanasi-221002.

First Edition: 1100 Copies
Price Rs.: 36/-

Printed by
Tara Printing Works
Varanasi.

म० म० शिवकुमारशास्त्रि-ग्रन्थमाला

[तृतीयं पुष्पम्]

मुख्यसम्पादकः

डॉ० भागीरथप्रसादत्रिपाठी 'वागीशः शास्त्री'

अनुसन्धानसंस्थाननिदेशकः

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः

नागेशभट्ट-

विरचिता

वैयाकरणसिद्धान्तमञ्जूषा

सम्पादकः

डॉ० कालिकाप्रसादशुक्लः

उपाचार्यः, व्याकरणविभागे

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः

वाराणस्याम्

२०३४ तमे वैक्रमाब्दे १८९९ तमे शकाब्दे १९७७ तमे खैस्ताब्दे

प्रकाशकः—
निदेशकः
अनुसन्धानसंस्थानस्य,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयै,

प्राप्तिस्थानम्—
प्रकाशनविभागः,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयेः,
वाराणसी–२२१००२ (उ० प्र०)

प्रथमं संस्करणम् : ११०० प्रतिरूपाणि,

मूल्यम्—३६=०० रूप्यकाणि

मुद्रकः
रमाशङ्करपण्ड्या
व्यवस्थापकः,
तारामुद्रणालयस्य
कमच्छा, वाराणसी

प्रास्ताविकम्

पाणिनीयव्याकरणस्य नूतनविचारप्रचाराम्बरे द्युमणिरिव राजते नागोजिभट्टः सकलशास्त्रपारावारगः। व्याकरणस्य प्रक्रियात्मकः दार्शनिकश्च पक्षौ सुपुरातनौ। द्विपर्णो व्याकरणखगो व्याप्नोति त्रिलोकीं सुपर्णवत्। नैतादृशी गतिर्भवति शास्त्रान्तरस्य पक्षद्वयाश्रयात्मिका। पाणिनिना पूर्ववर्तीनि व्याकरणानि निर्मथ्य मुख्यतः पदसाधुत्वलक्षणं व्याकरणाष्टकं निबद्धम्। द्वितीया व्याकरणदर्शनधारा तदस्पृष्टैव। औदुम्बरायण-स्फोटायन-यास्कादीनां शब्दनित्यत्वानित्यत्वादिरूपा व्याकरणस्य दार्शनिका विचारा व्याडिना लक्षश्लोकसंख्यात्मके संग्रहग्रन्थे संदृब्धाः। पतञ्जलिना स्वकीये सर्वन्यायबीजे संग्रहप्रतिकञ्चुके महाभाष्ये व्याकरणस्य धाराद्वयी समावेशिता। व्याकरणदर्शनस्य सर्वाणि तत्त्वानि तत्र संनिवेशितानि दृश्यन्ते पूर्ववर्तिभ्यो व्याकरणदर्शनग्रन्थेभ्यः समहृतानि स्वोपज्ञानि च। भर्तृहरिणा महाभाष्यमाधारीकृत्य दार्शनिकतत्त्वगुम्फितं यद् वाक्यपदीयं निरमायि कारिकामयं तदंशतः स्मारयति विलुप्तं संग्रहग्रन्थम्। ततःपरं भरतमित्रेण 'स्फोटसिद्धिः' इत्याख्यो व्याकरणदर्शनग्रन्थो व्यरचि। स्फोटसिद्धिन्यायविचाराख्यः कारिकामयो ग्रन्थः स्फोटसिद्धेः परवर्ती। एवमेव 'स्फोटप्रतिष्ठा', 'स्फोटतत्त्वम्', 'स्फोटचन्द्रिका', 'स्फोटनिरूपणम्', 'स्फोटवादः' इत्यादयो ग्रन्था व्याकरणदर्शनस्य मुख्यं प्रतिपाद्यविषयमाख्यान्ति। 'शब्दविनायकम्' इत्याख्यो ग्रन्थस्तु व्याकरणदर्शनस्य संक्षेपतः सर्वान् पक्षान् स्पृशति कारिकामयः।

षोडशख्रीस्तशताब्दे वैयाकरणतल्लजेन भट्टोजिदीक्षितेन प्रक्रियात्मिकया दर्शनात्मिकया च दृशा पाणिनीये व्याकरणे समुद्बोधात्मकः कोऽप्यभिनवो वर्त्मा प्रदर्शितः। अष्टाध्यायीं व्याख्यातवता भट्टोजिदीक्षितेन शब्दकौस्तुभे महाभाष्यपस्पशाह्निकसरणिः समाश्रिता। तत्र च न्यायमीमांसादिमतान्यालोच्य व्याकरणदर्शनसिद्धान्तः प्रतिपादितः। तत्रत्यमेव निर्णीतमर्थं संक्षेपेण कारिकाभिः प्राचीकटत् दीक्षितः। कौण्डभट्टेन कारिका इमाः समाश्रित्य वैयाकरणभूषणरूपो व्याकरणदर्शनग्रन्थो विनिर्मितः। तत्र धात्वर्थ-लकारार्थ-सुबर्थ-नामार्थ-समासशक्ति-शक्ति-नञर्थ-निपातार्थ-भावप्रत्ययार्थ-स्फोटादिनिर्णयाय सफलः प्रयासो विहितः।

सप्तदशे ख्रीस्तशताब्दे महती खलु वैयाकरणप्रतिभा पदवाक्यप्रमाणपारावारीणा नागेशभट्टाख्या प्रादुरभूत्। महाभाष्यप्रदीपव्याख्यानम्, भट्टोजिदीक्षितकृताया वैयाकरणसिद्धान्तकौमुद्या व्याख्यानरूपं शब्देन्दुशेखरम्, व्याकरणदर्शनग्रन्थरूपतया सुप्रथितां चेमां वैयाकरणसिद्धान्तमञ्जूषाम-

रोरचन्नागेशः। यद्यपि वेदान्तसाहित्यधर्मशास्त्रादिविषयानधिकृत्य नागेशभट्टेन बहूनि व्याख्यानानि प्रणीतानि। ग्रन्थाश्च रचिताः, तथापि परिभाषेन्दुशेखरसहितमुक्तं तदीयं ग्रन्थत्रयमेव शब्दविद्यापण्डितमण्डलीषु गाढमध्ययनाध्यापनपदवीमधिरोहति।

वैयाकरणसिद्धान्तमञ्जूषा स्वोपज्ञो ग्रन्थो नागेशस्य। नूनमिह वैयाकरणभूषणं तत्प्रेरकम्, तथापि मञ्जूषायास्तुलां नार्हति तत्। मञ्जूषायास्त्रयो भेदा दृश्यन्ते सम्प्रति। 'वैयाकरणसिद्धान्तलघुमञ्जूषा' प्राप्तप्रचाराऽध्ययनाध्यापनयोः परीक्षासु च। तत्रैव कुञ्चिका-कलेत्यादयष्टीकाः प्रकाशिताः सन्ति। लघुमञ्जूषायाः कलाटीकायां यत्तु, किञ्च, केचित्तु, यद्यपीत्यादिशब्दैः प्रकटितानि मञ्जूषामतानि स्फोरितानि। तेन ज्ञायते नागेशकृतं पदे पदे शब्दकौस्तुभभूषणप्रत्याख्यानम्।

नागेशभट्टशिष्येण वैद्यनाथपायगुण्डेमहाशयेन कलाटीकायां गुरुमञ्जूषायाः समुल्लेखः कृतः 'इत्यन्यत्र विस्तरः' इति मञ्जूषोक्तिविवरणावसरे—'गुरुमञ्जूषादावित्यर्थः' इति। पायगुण्डेमहोदयानुशीलिताऽऽसीद् गुरुमञ्जूषेति तदुक्त्या विज्ञायते। किन्तु शताब्दत्रयानन्तरमपि तदप्रकाशितैवातिष्ठतेत्याश्चर्यविषयः। लघुमञ्जूषापेक्षया गुरुत्वाद् गुरुमञ्जूषेति व्याहारः। वस्तुतस्तु तत्र गुरुशब्दो नास्ति प्रयुक्तः। यथेह प्रेक्षिष्यन्ते दोषज्ञाः। लघुमञ्जूषातो भिन्ना प्रतिपादनशैली, भिन्नं च विषयवस्त्विह 'वैयाकरणसिद्धान्तमञ्जूषाख्य' गुरु-मञ्जूषायाम्। क्वचित् कथञ्चित् साम्यं भजते ग्रन्थद्वयम्। लघुमञ्जूषा गुरुमञ्जूषाया नास्ति संक्षेप इत्युभयोः परामर्शनेन बाढं प्रतिपद्यते। क्वचिद् गुरुमञ्जूषाया अस्याः केचन तादृशा अपि विषयाः सन्ति, ये लघुमञ्जूषातोऽपि संक्षिप्ततरा निरूपिताः। परमलघुमञ्जूषाया विषयेऽपीत्थमेवाभ्युपगन्तव्यम्।

इह पूर्ववर्तिनां सर्वेषां व्याकरणदर्शनग्रन्थानां विषयाः प्रतिपादिताः। वेदान्तन्यायमीमांसाकाव्यशास्त्रादीनां सिद्धान्ता इह पर्यालोचिता व्याकरणसिद्धान्तसमीक्षया सार्द्धमित्यस्या मञ्जूषाया वैशिष्ट्यम्। इह पर्यालोचनप्रकारप्रदर्शकाः केचन शब्दा नयनातिथीकरणीयाः—यत्तु, नवीना वैयाकरणास्तु, इति मीमांसकमतमपास्तम् (१० पृ०), प्रकाशकृत्, परे तु, कश्चित्, अपरे तु, नव्यास्तु, केचित्तु (२६ पृ०), अन्ये तु, यदि तु, यत्तु मीमांसकाः, प्रकाशाद्युक्तमसंगतम् (३०पृ०), अत्र प्राभाकराः(३९ पृ०), यत्तु मण्डनमिश्रमतानुयायिनः, यत्तु प्राचीननैयायिकाः (४३ पृ०), वैयाकरणनयेऽपि, मीमांसकोक्तिः संगच्छते (५४ पृ०), प्रपञ्चितं शब्देन्दुशेखरे (६१ पृ०), यद्वा, ये तु, यत्तु नैयायिकाः, इत्यन्ये, अत्राहुः, मीमांसकास्तु, किञ्च, वस्तुतः, अपि च, एवं च, इति तन्नव्यतराः, तन्त्रान्तरे, क्वचित्तु, नैयायिकनव्योक्तमपास्तम् (११० पृ०), यत्तु नैयायिकाः, यत्तु भाट्टाः,

भाष्यकृतस्तु (१२७; २०५ पृ०), परे तु (१३४), यदा तु, यदपि (१५३ पृ०), यत्तु मीमांसकाः (१६१; २०८; २१४; २४४; २५७; २७१; २८८), अत्र केचित्, मीमांसोपयोगस्तु (२८० पृ०), तच्चिन्त्यम् (१७२ पृ०), शूलपाण्यादयः (१७२), नव्यतराः (१७३ पृ०), व्यपेक्षावादिनस्तु (२२० पृ०), इति कैयटः, उपाध्यायैः (२५२), ये तु (२५३), शब्देन्दुशेखरे द्रष्टव्यम्, क्वचित्तु, इति प्राञ्चः (२६७ पृ०), यत्तु वदन्ति (२७०), इति वैयाकरणमतोन्मज्जने दीक्षिताः (२८१), तदपरे (२८३), तेव तु (२८५), काव्यप्रकाशे (२९८) इति।

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयेन वैयाकरणसिद्धान्तमञ्जूषाया अमुद्रितपूर्वाया अस्याः प्रकाशनमष्टभ्यो वर्षेभ्यः प्राङ्निर्धारितमासीत्। अस्यैव विश्वविद्यालयस्य व्याकरणविभाग उपाचार्यपदम् अध्यक्षपदञ्चालङ्कुर्वाणेन विद्यार्थिव्रजे लब्धकीर्तिना शेषश्रीकृष्णपण्डितवल्लक्ष्यलक्षणयोस्तुल्यगतिना डॉ० कालिकाप्रसादशुक्लमहोदयेन टिप्पण्यादिसंयोजनपूर्वकं संशोध्य रत्नाभरणमञ्जूषासंसाधनवदियं सुसम्पादिता वैयाकरणसिद्धान्तमञ्जूषा कस्य सहृदयस्य हृदयाह्लादकारिणी न भवेत्। वैयाकरणभूषणेन सहास्यास्तुलनात्मकानुशीलनं परमायोपकाराय सम्पत्स्यते। इत्थं म०म० शिवकुमारशास्त्रि ग्रन्थमालायां तृतीयप्रसूनतया प्रस्फुटितेयं मञ्जूषा विद्वज्जनप्रीणनाय जिज्ञासूनां चोपकाराय सेत्स्यतीति ध्रुवं प्रत्येति।

कार्तिककृष्णाष्टम्यां
२०३४ वै०, भृगुवासरे
(४-११-७७ खीस्ताब्दे)

भागीरथप्रसादत्रिपाठी 'वागीशः शास्त्री'
निदेशकः
अनुसन्धानसंस्थानस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः।

प्रस्तावना

विद्योतितं येन समस्तविश्वं
विद्योतमानं स्वयमेव शश्वत् ।
शब्दाय तत्त्वाय चिदात्मकाया-
द्वैताय तस्मै महसे नमः स्यात् ।।

पाणिनीयशब्दशास्त्रस्य शब्दानुशासनसार्वभौमत्वम्—

अद्यत्वे समुपलभ्यमानेषु शब्दानुशासनेषु पाणिनीयं शब्दशास्त्रं सर्वाङ्गसम्पन्नं सर्वप्राचीनमिति विदन्ति शब्दविद्येतिहासविदो विद्वांसः । भगवता शब्दविद्याचार्येण **पाणिनिना** विरचितमष्टकं वैपुल्येन क्रमिकान्वाख्यानेनानितरसाधारणकल्पनेन च समुपलभ्यमानं निखिलमपि शब्दानुशासनमतिशेते, चमत्करोति च चेतोऽवगतशब्दविद्यातत्त्वानां सुमेधसाम् । महामुनिनाऽनेनामोघेनातुलेन प्रयत्नेनामरगवी अमरतां नीता । आर्षदृशा तेन व्याकरणस्य तादृशं निर्माणपरिपाटीपाटवं प्रकटितम्, येन संस्कृतभाषायाः सकलान्यपि शरीराणि प्रकाशितान्यभूवन् । पाणिनिनिर्मितशब्दशास्त्रस्य सोपानस्य साहाय्येन दुरवगाहात् शब्दसागरात् तानि तानि दर्शनादिरत्नानि समधिगन्तुं न केनापि मनागपि काठिन्यमनुभूयते । अद्यत्वे संस्कृतभाषायां प्रभूतः प्रभावः पाणिनेरनुलक्ष्यत इत्यत्र नास्ति विप्रतिपत्तिः प्रेक्षावताम् । मन्ये, तस्यैव विमलमानसस्य वीतकल्मषस्य महामुनेः माहात्म्येनामरभारती कालकवलिता नाभूत् ।

विश्वविश्रुतयशस्कस्य महर्षियास्कस्य पश्यत एव वैदिकभाषायुगं प्रायः समाप्तिमगात् । अभिनवा ग्रन्थाः, प्रत्यग्रा अध्ययनविषयाः, किम्बहुना; शब्दा अपि नवनवाः सर्वतः प्रादुरभूवन् । गद्यपद्यमयी नवीनैव काचन भाषापद्धतिः प्रभूतप्रसारां शक्तिमासादयन्ती समुन्मिषन्ती सचेतसां चेतसि चमत्कृतिं समुत्पादयन्ती दृष्टिगोचरतामगात् । तदात्वे संस्कृतभाषा प्रतीच्यामाकम्बोजादाकच्छसौराष्ट्रात्; अवाच्याया अश्मकात्; गोदावरीतटादिति यावत्, प्राच्यामाकलिङ्गसूमसात् असमप्रान्तस्य सूरमानदीसमीपपर्वतप्रदेशपर्यन्तमित्यर्थः; उदीच्यामाहिमालयाच्च विस्तृताऽऽसीत् ।

एतत्सर्वं पाणिनीयाष्टकस्य भौगोलिकनिर्देशेन पर्याप्तं परीक्षितुं शक्यते । सम्भाव्यते चैतदपि यत् तावति विशाले भूभागे तत्तत्प्रदेशस्यापि तदानीं केचन वाग्व्यवहारा जनैराद्रियमाणाः स्युरेव, किन्तु चक्रवर्तित्वं देवगिर एवासीदित्यत्र नास्ति मनागपि विमतिर्मनीषिणाम् ।

इत्थं संस्कृतभाषायास्तत्साहित्यस्य च प्रौढप्रभावे साम्राज्ये स्थापिते सति आर्षाक्षस्य भाषाव्यवस्थायां समासादितनैपुणीकस्य कर्णधारस्य पाणिनेराचार्यस्य तद् विहितस्याधृष्यवर्ष्मणः कलितानुकरणीयललितपरिपाटीपाटवस्य शास्त्रस्य च समुद्गमोऽभूत् । यद्यपि ततः प्राक्तनैरपि शब्दविद्याचार्यैः समासादितसार्वभौमपदवीं संस्कृतभाषां नियन्तुं सर्वतोभावेन प्रयतितमासीत्, तथापि तेषां नियमा नहि सर्वाङ्गसम्पन्ना आसन्, सम्भवतः परस्परविरोधमावहन्तोऽप्यासन् । अतस्ते नियमा विदुषां मानसानि सम्यङ् नावर्जयन्, अनधिगतपरमप्रतिष्ठाश्चासन् ।

आचार्यपाणिनिस्तु संज्ञादिविधायकानि सूत्राणि विभज्य, उत्सर्गापवादयोर्विषयविभागं विधाय, परस्परसम्भाव्यविरोधं पर्यालोच्य परिहृत्य च सूत्राणि प्राणयत् । अतोऽत्र न ते दोषा निभाल्यन्ते । समर्थितञ्चैतन् महर्षिणा पतञ्जलिना —**'प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचावकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म । तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुम्, किम्पुनरियता सूत्रेण'** [म० भा० पा० सू० १।१।१] इत्यादिना ।

पाणिनोयं शब्दशास्त्रमनधिगततलस्य सङ्ख्यातीततालूरत्नूषितस्य दुरवगाहस्य संस्कृतवाङ्मयरत्नाकरस्य दृढं निर्वाधं विशालं सोपानायते, यदवलम्बेन तत्र तत्र निगूढान्यपि शब्दतत्त्वान्यनायासेनासादयितुं शक्यन्ते शालीनमतिभिरपि । पाणिनिराचार्यो विमलया त्रिकालदर्शिन्या परमप्रतिभया परितः पर्यालोच्य शब्दानुशासनं व्यरचयत्, येन संस्कृतभाषायास्तात्कालिकी सर्वाऽपि समस्या साधु समाधीयत । अत एव प्राप्तशब्दशास्त्रप्रावीण्येनाचार्यपतञ्जलिना मुक्तकण्ठं शास्त्रमिदं समुपश्लोकि यत् **'पाणिनीयं महत् सुविहितम्'** [म० भा० पा० सू० ३।२।३] ।

पाणिनीयशब्दानुशासनस्य दार्शनिकपरिपाट्या परिशीलनपद्धति :—

तस्यैतस्य निखिलमपि भरतभूवलयं व्याप्तस्य विशालस्य संस्कृतसाहित्यस्य समधिगमायापेक्ष्यमाणसकलसामग्रीसम्भृतमन्यानतिशयितरचनापरिपाटीकं सर्वावयवानवद्यं पाणिनीयमष्टकमुपजीव्य कतिपये महर्षयो महर्षिकल्पा आचार्यास्तत्तद्विषयपरिष्करणायानेकान् ग्रन्थान् व्यरचयन् । तेषु च ग्रन्थेषु पाणिनीयाष्टकनिगूढव्याख्यासापेक्षविषयस्फोरकः कात्यायनप्रणीतवार्त्तिकत्वेन लब्धप्रतिष्ठो ग्रन्थः सर्वप्रथमतया समुपलभ्यते ।

तदनु संस्कृतभाषाविषयकसम्भावितसकलसमस्यासमाधायकं सर्वाङ्गसम्भृतं पातञ्जलं महाभाष्यं गोचरताङ्गच्छति । मन्ये, तदानीं यावत् संस्कृतभाषायां समुत्पन्नाया असमाहितायाः सर्वस्याः समस्याया अपि समाधानं तत्र विहितं विद्यते । भाविन्या अपि तस्याः समाधानायानेके पन्थानो निर्दिष्टाः, य इष्टिपदेन

व्यवह्रियन्ते विबुधैः। वस्तुगतिस्तु इयमस्ति यत् संस्कृतभाषाव्याकरणविषयक-पाणिनीयाष्टकसहोदरं मूलग्रन्थरत्नम्, फणिभाषितभाष्यनिभं तद्व्याख्यानभूतञ्च ग्रन्थरत्नं विश्वस्य कस्यामपि भाषायामिदानीं यावन्नोपलभ्यते। भूरिभागधेयं संस्कृतसाहित्यस्य यदधुनापि अनुसम्प्रदायमिमे ग्रन्थरत्ने अध्ययनाध्यापनविषय-त्वेन विद्वज्जनैराद्रियेते।

किम्बहुना, अन्ये चाप्यनेके ग्रन्था व्याकरणविषयका बुधवरैर्निबद्धाः, ये संस्कृतभाषायाः समृद्धिं समेधयन्ति। तेषु च भाष्यभाषितशरणाः पदसाधुत्वा-साधुत्वप्रकारा एव विशेषतः प्रतिपादिता दृष्टिगोचरतां गच्छन्ति, न तु दर्शन-शास्त्रपरिशीलितपद्धतयः, शाब्दबोधविशिष्टपद्धतयश्च। शाब्दबोधौपयिक-तत्तत्पदवृत्तिवृत्तिस्वरूपनिरूपणम्, वृत्तिविशेषलक्षणनिरूपणम्, पदार्थानां परस्पर-सम्बन्धप्रतिपादनम्, शब्दानां नित्यत्वमनित्यत्वं वा? शाब्दबोधसहकारिकारणानि कानि कानि जगदिदं कस्य परिणामः, विवर्तो वा? कस्य व्यावहारिकसत्यत्वम्, कस्य प्रातिभासिकसत्यत्वम्, कस्य च पारमार्थिकसत्यत्वम्; इत्यादिदार्शनिक-विचारजातमनुलक्ष्य वेदान्तिमीमांसकतार्किकप्रभृतिभिः सुधीभिः स्वस्वसिद्धान्ताभि-निवेशेन परश्शता ग्रन्था निबद्धाः।

किम्बहुना, शुनि-श्वपाके-गवि-हस्तिनि चापि परमतत्त्वगवेषके शाश्वतिक-शान्तिपरेऽस्मिन् भरतभूवलये ऋते अध्यात्मशास्त्रान्नान्यस्य शास्त्रत्वम्, न च तस्याभ्यासश्रमः सम्यक् सफलः। अत एव सुकुमारमतिहितैकपरा आलङ्कारिका अपि काव्यानुभूतरसस्य ब्रह्मानन्दसहोदरत्वं ब्रह्मानन्दस्वरूपत्वं वा समर्थयमाना बलात् स्वल्पमपि दर्शनशास्त्रविषयं स्वशास्त्रे प्रावीविशन्।

शाब्दिकानामप्यात्मनो दार्शनिकत्वप्रतिष्ठापनमन्तरा पण्डितपरिषदि प्रतिष्ठाप्रापणमाकाशकुसुमायितमेवासीत्। शाब्दिकानाञ्च सविधे च नासीत् कश्चन तादृशो निबन्धः, यत्र मुख्यतयाऽध्यात्मविषयो निरूपितो भवेत्। यद्यपि माहभाष्ये तत्र तत्र प्रसङ्गात् समागतान् निगूढान् दार्शनिकविषयान् सङ्गृह्य स्वकीये वाक्यपदीयाभिधे ग्रन्थे भर्तृहरिणा निबद्धान् दर्शं दर्शमनुसन्धातारोऽ-नुसन्दधति यत् शाब्दिका अपि दार्शनिकेषु प्राप्तप्रतिष्ठा भवेयुरेव। परमगाधात् तस्मात् प्रत्याख्येयदर्शनान्तरतर्कयादोजटिलतया रत्नाकरादिव महार्हं राद्धान्तरत्नं समासादयितुं कः साहसं समाचरेत्।

पदवाक्यप्रमाणपारावारीणैः श्रीमद्भट्टोजिदीक्षितैर्भाष्यं वाक्यपदीयञ्च सम्यक् समालोच्य कौस्तुभ इव शब्दकौस्तुभे विशदीकृतवैयाकरणसिद्धान्तान् संक्षिप्य शाब्दप्रतीतिप्रकारप्रदर्शिका प्रकृतिप्रत्ययादीनां काल्पनिकत्वप्रकाशिका वृत्तिविवेचिका दर्शनान्तररीतिनिरासिकाः शाब्दिकसिद्धान्तसमर्थिकाः काश्चन कारिका निरमायिषत। भाष्याब्धितलनिगूढा एव सिद्धान्ता यथायथं शब्दकौस्तुभे

सङ्गृहीताः, परसंशीतिनिरासाय प्रमाणैः परितः परीक्षिताश्च । ततो विहितवस्तुतत्त्वावधारणाः प्रकृतिप्रत्ययाद्यर्थरूपास्ते वैयाकरणसिद्धान्ताः कारिकावलिभिर्भट्टोजिदीक्षितैरेव प्रतिपादिताः । तथा चोक्तम्—

फणिभाषितभाष्याब्धेः शब्दकौस्तुभ उद्धृतः ।
तत्र निर्णीत एवार्थः सङ्क्षेपेणेह कथ्यते ।।

[वै० भू० सा० का० १]

परमेते व्याकरणसिद्धान्तसारभूताः कतिचित् सिद्धान्ता गौतमवचनव्याख्यातृभिर्वात्स्यायनप्रभृतिभिः प्राचीनैः, रघुनाथशिरोमणिभिश्च नव्यैर्नैयायिकैः; मीमांसासूत्रप्रवचनकारैश्शबरस्वामिभिः, कुमारिलभट्टप्रभाकरादिभिर्वाक्यविद्भिश्च दूषिताः सचेतसां चेतस्सु कण्टकाकीर्णपाटलपुष्पाणीवाभूवन् । तेषां दोषाणामुपपत्तिभिरपाकरणाय शाब्दिकनिर्दुष्टसिद्धान्तसमर्थनाय च वैयाकरणभूषणकारस्य प्रयासः परिलक्ष्यते । प्रतिपादितञ्चैतत् स्वयमेव भूषणकृता—

पाणिन्यादिमुनीन् प्रणम्य पितरं रङ्गोजिभट्टाभिधं
द्वैतध्वान्तनिवारणादिफलिकां पुम्भाववाग्देवताम् ।
दुण्ढि गौतमजैमिनीयवचनव्याख्यातृभिर्दूषितान्
सिद्धान्तानुपपत्तिभिः प्रकटये तेषां वचो दूषये ।।

[वै० भू० सा० का० ३]

पुरस्कृतनैयायिकप्रतिपादनपरिपाटीके सुवर्णभूषण इव शब्दकौस्तुभकारिकाव्याख्यानभूते भूषणाभिधे ग्रन्थे कोविदकुलकैरवकलाधरोऽयं कौण्डभट्टोऽप्रतिमोपपत्तिसम्पत्तिपरम्पराभिर्दर्शनान्तरीयान् सिद्धान्तानपास्य वाक्यपदीयस्य दुरधिगमार्थं गिरिगह्वरशब्दगर्ते निगूढान् शाब्दिकसिद्धान्तान् स्वप्रतिभाप्रकाशेन प्रकाश्य स्वसिद्धान्तसमापतितान् दोषान् दूरीकृत्य च शब्दशास्त्रस्य दर्शनशास्त्रत्वं व्यवस्थापयन् दार्शनिकशिरोमणीनां संयपति स्थातुं दुर्भेदहेतियुक्तिततिभृतं व्यधादिति नास्ति परोक्षं प्रेक्षावताम् ।

शाब्दिकानां दार्शनिकग्रन्थेषु वैयाकरणसिद्धान्तमञ्जूषाग्रन्थस्य गौरवम्

यद्यपि भूषणे विविधोपपत्तिसम्पत्तिभिः परापसिद्धान्ता नितरां निरस्ताः, स्वसिद्धान्ताश्च सम्यक् समर्थिताः, तथापि सृष्टिक्रमः; तद्बीजभूता माया; ब्रह्मणः सत्यत्वम्; जगतो मिथ्यात्वम्; ख्यातय इत्यादयो विवेचनीया अपि विषया दार्शनिकदृशा अस्पृष्टा एवासन् । नैतावदेव, मानवसुलभभ्रमप्रमाददोषवशात् क्वचित् क्वचिदपसिद्धान्ता अपि सिद्धान्तत्वेन व्यवस्थापिताः ।

यथा बोधजनकतारूपा शक्तिः; ज्ञानार्थकधातूनां सकर्मकत्वोपपादनाय फलव्यापारोभयनिरूपिता शक्तिः स्वीकर्त्तव्या । आवरणभङ्गरूपं फलं

धातुवाच्यम्। प्रत्यक्षस्थलेऽन्तःकरणं चक्षुरादीन्द्रियप्रणालिकया विषयदेशं गत्वा तत्तदाकारेण परिणमति। सैव वृत्तिरित्युच्यते। ज्ञानपदव्यवहर्त्तव्यया तया चावरणभङ्गो जायते। आवरणञ्च विषयावच्छिन्नचैतन्याच्छादिका ज्ञाननिष्ठावरकशक्तिः। अयमेवावरणभङ्गः फलम्, ज्ञानञ्च व्यापारः **'फलव्यापारयोर्धातुः'** इत्यादिकारिकाव्याख्यानावसरे **'फलव्यापारयोः'** इति द्विवचनेन फलनिरूपिता व्यापारनिरूपिता च धातोः पृथक् शक्तिः, 'एकवृन्तगतफलद्वय'न्यायेन पृथगुपस्थितिप्रयोजिका खण्डश एकैव शक्तिः; इत्यादयोऽनेकेऽपसिद्धान्ता वाचोयुक्तिभिः शाब्दिकसिद्धान्तत्वेन भूषणग्रन्थे समावेशिताः। तत्र समापतितान् दोषान् दूरीकृत्य, श्रुत्यङ्गत्वेन साधितस्यापि शब्दानुशासनस्य धूलिधूसरां दर्शनशास्त्रपद्धतिं शब्दविद्यावदातमानसानामन्येषाञ्च दार्शनिकानां वाक्यपदीयादिनिर्दिष्टदिशा नयनातिथीकृत्य तर्कैकजालजटिलमतिभिस्तार्किकप्रभृतिदर्शनशास्त्रप्रणेतृभिस्तत्त्वतया समर्थितमतत्त्वं निराकृत्य शब्दशास्त्रस्य पारमार्थिकरूपं निरूपयितुं नागेशभट्टेन **'वैयाकरणसिद्धान्तमञ्जूषा'** मणिमञ्जूषेव निरमायि।

एतद्ग्रन्थद्वारा गभीरभाष्याब्धितलतिरोहितानि व्याकरणतत्त्वरत्नानि बहिरानीय भृशं शाब्दिककुलमुपकृतं ग्रन्थकृता। पदार्थपरिष्करणेऽभिनवा चारुविचारचातुरी गोचरीक्रियते। अद्भुतबुद्धिवैभवेन सकलदर्शनशास्त्रसिद्धान्ताः समासतः समीक्षिताः, महताऽऽडम्बरेणापसिद्धान्ता अपहस्तिताः, अभिमतञ्चोपपत्तिभिः समर्थितम्। प्रकृतपुस्तकपरिशीलनप्राप्तपाण्डित्यप्रकर्षाः शब्दशास्त्रनैपुणीका अप्रत्याख्येययुक्तिसम्पत्तिभिः केषामपि दार्शनिकानां प्रतिवादिनां पुरः शिरोमणीयेरन्। नागेशभट्टस्य प्रौढपाण्डित्यस्य परां काष्ठां प्रकाशयन्तः; अपरिमेयप्रतिभामवभासयन्तः; फणिभाषितभाष्यफक्किकाकुण्डलनां सम्मार्जयन्तः शब्देन्दुशेखरादयो विविधविषयकाश्च बहवो ग्रन्था विद्वन्मानसानि आवर्जयन्तो विराजन्ते। विशिष्टवैदुष्यसम्पादकानेकग्रन्थसम्भृतमपि शाब्दिककुलं चक्रवाकसारसादिविहगकुलसङ्कुलं सरो मरालमालयेव मञ्जूषयैव दर्शनयोग्यतां दधाति।

यद्यपि परमप्राचीनेऽपि काले व्याडिकृते लक्षश्लोकपरिमिते व्याकरणमूर्द्धन्यग्रन्थे संङ्ग्रहे व्याख्याता अनेके दार्शनिका विषयाः श्रुतिविषयतां भजन्ति। तथाहि—शब्दानुशासनकरणप्रयोजनप्रतिपादनावसरे **'ध्वनिव्यङ्ग्यो वर्णात्मकः शब्दो नित्यः'** इति मीमांसकमतम्; **'ध्वनिरेव शब्दः, स च कार्यः'** इति वैशेषिकमतम्; **'वर्णव्यतिरिक्तः पदस्फोटः'** इति कतिपयवैयाकरणमतम्; **'वाक्यस्फोटः'** इति शाब्दिकसिद्धान्तमतं च प्रदर्शयन् महाभाष्यकार आह—**'सङ्ग्रह एतत् प्राधान्येन परीक्षितम्—'नित्यो वा स्यात्, कार्यो वेति', तत्रोक्ता दोषाः प्रयोजनान्यप्युक्तानि। तत्र त्वेष निर्णयः—यद्येव नित्यः, अथापि कार्यः, उभयथापि लक्षणं प्रवर्त्यमिति'**। [१।१।१ पस्पश०]

पाणिनीयाष्टकेऽपि तत्र तत्र दार्शनिकतत्त्वानि नितरां निभाल्यन्ते 'जात्याख्यायामेकस्मिन् वहुवचनमन्यतरस्याम्' [१।२। ५८] । अनेनाकृतेः पदार्थत्व प्रतिपाद्यते । "सरूपाणामेकशेषः" [१।२।६४] इत्यनेन व्यक्तेः पदार्थत्वं प्रदर्श्यते। अयञ्च दार्शनिकविचारप्रवाहो वार्तिके महाभाष्ये चापि अबाधगत्या प्रवहति। तद्यथा जातिस्फोटलक्षणो व्यक्तिस्फोटलक्षणो वा शब्दो नित्यः । कार्यशाब्दिकानामपि नये प्रवाहनित्यतया शब्दो नित्यः । जातिलक्षणोऽर्थोऽपि नित्यः । व्यक्तिपदार्थपक्षेऽपि सर्वशब्दानामसत्योपाध्यवच्छिन्नं ब्रह्मतत्त्वं वाच्यमिति नित्यत्वम्, प्रवाहनित्यतया वा नित्यत्वम् । सम्बन्धस्यापि व्यवहारपरम्परयाऽनादित्वान्नित्यता तदाह—**'सिद्धे शब्दार्थसम्बन्धे'** इति [पस्पशा० वा० ख० १] । एवमन्येऽपि दार्शनिका विचारा व्याकरणाकरग्रन्थेषु तत्र तत्र विशकलिता उदन्वति मणय इव विलोक्यन्ते, येन स्फुटं प्रतीयते यत् प्राक्तना अपि शाब्दिकाः शब्दशास्त्रव्याख्याने आदित एव दार्शनिकेभ्यो मनागपि न्यूनं पदं नाप्तवन्त आसन् ।

तथापि प्राक्तनानां शाब्दिकानां ग्रन्थेषु दार्शनिकविषयिणी चर्चाऽनुषङ्गतः परापतिता । तस्याः प्राधान्यं नास्ति । प्राधान्यन्तु प्रक्रियाया एव । मञ्जूषायान्त्वस्यां दार्शनिकविषयनिरूपणमेव प्रधानमुद्देश्यं समवलोक्यते । न केवलमत्र सृष्टेः स्वरूपं कारणञ्च निरूपितं वर्तते; प्रत्युत, परतन्त्रेषूपवर्णिताः सिद्धान्ता अपसिद्धान्तत्वेन युक्तिततिभिर्व्यवस्थापिताः । अत्र कश्चनांश एव समुद्ध्रियतेअद्वैतमतावलम्बिभिः **'परत्र पूर्वदृष्टावभासोऽध्यासः'** इति अध्यासलक्षणं निरूप्याविद्या तु तदतिरिक्तेति काभिश्चनोपपत्तिभिः सिद्धान्तितम् । नागेशेन तु **'तमेतमेवं लक्षणं पण्डिता अविद्या इति ब्रुवते'** इति भाष्यादध्यासविषयकपर्यनुयोगसमाधिवदविद्याविषयकपर्यनुयोगसमाधानानुपलब्धेश्चेइत्यादि हेतुभिः **'अध्यास एव अविद्या'** इति सिद्धान्तितम् ।

अथ च **अविद्याया अजन्यत्वं'** विनाशित्वञ्चाङ्गीकृतमद्वैतिभिः । तदसङ्गतम्; **'एकेन विज्ञातेन सर्वं विज्ञातं भवति'** इति प्रतिज्ञाभङ्गप्रसङ्गात्, ब्रह्मातिरिक्तस्याजन्यत्वासम्भवात् । वियदादीनामजन्यत्वे **प्रतिज्ञाहानिरव्यतिरेकाच्छब्देभ्यः'** [वे० द० अ० २ पा० ३ सू० ६] इति सूत्रेण प्रतिज्ञाभङ्गापादनाच्चेति मञ्जूषाकारेण प्रतिपादितम् ।

अनिर्वचनीयत्वलक्षणप्रस्तावेऽद्वैतिभिः **'सदसद्विलक्षणमनिर्वचनीयम्'** इत्यगादि ।

अत्र नागेशः—सदसदविलक्षणस्य तृतीयस्य पदार्थस्य प्रसिद्धिरेव नास्ति । अतोऽनिर्वचनीयमुभयरूपमेव । तत्र सत्त्वमारोपितम्, असत्त्वन्तु वास्तविकमेवेति न तयोर्विरोधः । इत्थं तदभिमतानिर्वचनख्यातिः प्रत्याख्याता नागेशेन ।

नव्यनैयायिकैर्ज्ञानलक्षणप्रत्यासत्तिः स्वीक्रियते। नागेशेन तु—अविद्यमानस्य प्रत्यासत्तित्वमेव न सम्भवति। ज्ञानविषयत्वस्य प्रत्यासत्तित्वे तु विषयताया ज्ञानविषयोभयरूपत्वमते ज्ञाननाशे तस्याः प्रत्यासत्तित्वं न सम्भवेत्; इत्येवंरूपेण प्रत्याख्यायते।

तार्किकाभिमतमनुव्यवसायस्य ज्ञानग्राहकत्वमपि न्यायादनपेतमेव। यतो हि ज्ञाने सति **'जानामि न वा'** इति संशयो नानुभूयते। **'घटं जानामि'** इतिवत् **'ज्ञानं जानामि'** इत्यनुभवश्च न भवति, अनवस्था चापतेत्। अतो ज्ञानस्य स्वतःप्रकाशत्वमेवेति सिद्धान्तयति नागेशभट्टः।

तार्किकैः संयोगस्य सम्बन्धत्वं महतोल्लासेन स्वीक्रियते। परं नैतद्रोचते मञ्जूषाकृते। यतः सम्बन्धः पदार्थं संयोजयति, संयोगश्च स्वतः पदार्थ एव। न हि कश्चनात्मनात्मानं योजयति। सम्बन्धश्च सांसर्गिकविषयत्वेन पदात् प्रतिपाद्यो न भवति, किन्तु षष्ठ्यादिविभक्त्या वाक्येन वा बोध्यते। एवञ्च संयोगस्य सम्बन्धत्वं दुरुपपादम्।

अथ च नैयायिकैः द्रव्यगुणकर्मस्वेव जातिरभ्युपगम्यते। सा च सत्तारूपा, घटत्वादिनानारूपा चेति।

अत्र नागेशः प्रतिविधत्ते—**'सामान्यं विशेष इति बुद्ध्यपेक्षम्'** इति कणादवचनात् **'समानप्रसवात्मिका जातिः'** इति गौतमसूत्राच्चानुगतप्रतीतिरेव जातिसाधिकेति सामान्यस्यैकत्वं सर्ववृत्तित्वञ्च समुचितम्। एकैव जातिर्गवादिप्रतिनियतव्यञ्जकव्यञ्जिता तत्तत्कार्यसाधिका भवतीति "मतुप्" सूत्रे **'न सत्तां पदार्थो व्यभिचरति'** इति भाष्यात् सत्ताविशिष्टघटादीनामेव घटादिप्रातिपदिकार्थतया 'अस्ति' 'नास्ति' इत्यादिप्रयोगानापत्तेः, गतार्थत्वात्, सत्तया विरोधाच्च। शब्दवृत्तिवृत्त्या बोध्योऽप्यर्थो बुद्धिस्थ एव न तु बाह्यः।

किञ्च, **'शशशृङ्गं नास्ति' 'बन्ध्यासुतो नास्ति'** इत्यादिवाक्यजन्यबोधेऽभ्रमत्वस्य सर्वानुभवसिद्धत्वात् प्रातिपदिकत्वसिद्धये बौद्धार्थस्वीकार आवश्यकः। अत एव **'बुद्धिसिद्धं तु तदसत्'** [न्या० द० अ० ४, आ० १, सू० ५०] इति गौतमोक्तिः सङ्गच्छते। इत्येवं रीत्या बौद्धार्थः साधितः।

अन्येऽपि बहवः पदार्थाः दर्शनान्तरे स्ववासनाकल्पितप्रमाणैः प्रसिद्धिं नीता मञ्जूषाकृता शाब्दिकसम्मतयुक्तिततिहेतिभिः खण्डिता इति तत एव तत्त्वान्वेषणपरैः सुधीभिरवलोकनीयम्।

स्फोटशब्दप्रयोगस्रोतः

सृष्टिक्रमनिरूपणप्रस्तावे जगत्कारणीभूतस्य नैयायिकनये परमाणोरिव, वेदान्तिमते ब्रह्मण इव च शाब्दिकसिद्धान्ते स्फोटस्य महती चर्चा श्रवणविषयतां

भजते, तत्र तत्राकरग्रन्थेषु । शाब्दिकानां दार्शनिकत्वप्रासादस्तु स्फोटभित्तिमेव विशेषतोऽवलम्बते सत्स्वनेकदार्शनिकतत्त्वविचारसाधनेष्वपि । परन्तु स्फोटवादः कुतः प्रादुरभूत्, कश्च तस्याद्यः स्मर्ता, कश्च तस्य स्मरणप्रसङ्ग इत्यादयोऽनेके प्रश्ना अद्यत्वेऽपि समाधिमर्हन्ति । शाब्दिकानामपीतिवृत्तस्य पृष्ठानि मौनमेवावलम्बन्ते । परन्तु सूक्ष्मेक्षिकया पर्यालोचनेनानुमातुं शक्यते यत् **'वागेव विश्वा भुवनानि जज्ञे,'** **'ओमित्येतदक्षरमिदं सर्वम्'** **'वाचो ह वाक्'** इत्यादिभिर्वचनैर्वेदब्राह्मणवारिधिवर्तमानैः स्रोतोभिः स्फोटस्य सम्बन्धं स्थापयन्तो भवेयुः शाब्दिकाः ।

परन्तु वेदब्राह्मणादिग्रन्थेषु गोवागादिशब्दाः शब्दपर्यायत्वेन प्रयुज्यमानास्तत्र तत्र नितरां निभाल्यन्ते, स्फोटपर्यायत्वेन तु क्वचनापि नोपलभ्यन्ते । अतो वादत्वेन स्फोटस्य कदा प्रारम्भ इत्ययं प्रश्नोऽद्यापि समर्धि समभिलषति ।

पाणिनीयसम्प्रदाये **"अवङ् स्फोटायनस्य"** [६।१।१२३] इति सूत्रे सर्वतः प्राक् स्फोटशब्दः समुपलभ्यते शाब्दिकैः । हरदत्तोऽमुं स्फोटायनशब्दं विवृणोति— **'स्फोटोऽयनं पारायणं यस्य स स्फोटायनः, स्फोटप्रतिपादनपरो वैयाकरणाचार्यः'** [काशि० पद० ६।१।१२३] ।

वैयाकरणसिद्धान्तमञ्जूषाया अन्ते स्फोटवादे स्फोटायन ऋषेरेव सिद्धान्तः स्फोटवादत्वेन प्रसिद्धिं गत इति नागेशभट्टेन भणितम्—

वैयाकरणनागेशः स्फोटायन ऋषेर्मतम् ।
परिष्कृत्योक्तवांस्तेन प्रीयतां जगदीश्वरः ॥

[पृ० ३०३, श्लो० २]

यास्काचार्योऽपि निरुक्तस्य प्रारम्भे शब्दानित्यत्वं व्यवस्थापयतामाचार्यौदुम्बरायणानां मतं प्रत्याख्याय शब्दस्य नित्यत्वं व्यापकत्वमणुत्वञ्च व्यवस्थापितवान् । तथाहि—**'व्याप्तिमत्त्वात्तु शब्दस्याणीयस्त्वाच्च'** [निरुक्त १।२] । अनेन च निरुक्तेन शाब्दिकाभिमतं स्फोटस्वरूपं साधु संवदति, परन्त्वत्र स्फोटशब्दोल्लेखो नास्ति ।

प्रायः समेषु दर्शनेषु स्फोटस्य महती चर्चा श्रूयते । स्फोटममुं समुद्दिश्य विभिन्नेषु शास्त्रेषु शास्त्रकाराणां विभिन्नानि मतानि विलोक्यन्ते, तानि च मतानि ज्योत्स्नाभिधटीकासंवलितपरमलघुमञ्जूषाया भूमिकायां मया विस्तरेण प्रतिपादितानि । अतः पिष्टपेषणभिया न तान्यत्र पुनरावर्त्यन्ते तत एवावगन्तव्यानि । एवञ्च स्फोटस्येतिहासः परमप्राचीनः सन्नपि वादस्यास्य स्फोटशब्देनाभिधाने किं विनिगमकमासीदिति जिज्ञासा पुनः पुनरुदेतीति तत्र किञ्चिन्निवेद्यते—

शतपथब्राह्मणे सर्गनिरूपणप्रसङ्ग उपाचरितम्—**'असद् वा एतदग्र आसीत्, स च ऋषिः। ऋषिश्च प्राणा अभूवन्'** (श०ब्रा० ६।१।१।१), **'सतो बन्धुमसति निर्विन्दन्'** (ऋ० १०।१२९।४)।

मैत्रायण्याम् (१।५।११) उक्तम्—**'प्राणा वै सप्त ऋषयः'**, ऐतरेये च (२।२७) **'प्राणा वै ऋषयो दैव्यासः। मध्यस्था इमे प्राणाः'**, शतपथे 'इन्द्र' इत्यभिहिताः (श० ब्रा० ६।१।१।२) 'योऽयं मध्ये प्राणः एष एव इन्द्रः'। त (ऋषयः) एव तप्ताः, फलतश्च तैः प्रतिव्यक्तिभिन्नाः सप्त पुरुषाः सृष्टाः (श० ब्रा० ६।१।१।२) एभ्य एव चान्ततः प्रजापतिराविर्बभूव (श० ब्रा० ६।१।१।३६)।

प्रजापतिरेष बहुरूपो भवितुं तपस्तेपे—तपोऽतप्यत। तप आचरता तेन प्रजापतिना सर्वादौ **'ब्रह्मत्रैविद्या'** आविर्भाविता। परं ततस्तेन वागधिष्ठानाद् आप आविष्कृताः—'सोऽपोऽसृजत। वाच एव लोकात्' (श० ब्रा० ६।१।१।९)।

प्रजापतिश्च त्रैविद्यासहितः अपः प्राविशत्। तद् द्वयम् 'अण्डत्वम् आपेदे' **'सोऽनया त्रय्यया विद्यया सहापः प्राविशत्। तत आण्डं समवर्तत'** (श० ब्रा० ६।१।१।१०)। ततो ब्रह्मैव प्रथममसृज्यत। त्रयी एव विद्या—**'तस्मादाहुर्ब्रह्मास्य सर्वस्य प्रथमजम्'** इति (श० ब्रा० ६।१।१।१०)। पश्चात् तदण्डं प्रास्फुटत्, ततश्च सृष्टिरियं कृत्स्ना प्राभवत्। एतत् सर्वमधिशतपथं प्रावर्णि (श० ब्रा० ६।१।१।२, ६।१।१।३)।

माध्यन्दिनेऽपि (१२।४) व्याहृतम् **'सुपर्णोऽपि गरुत्मांस्त्रिवृत्ते शिरो गायत्रं चक्षुर्बृहद्रथन्तरे पक्षौ। स्तोम आत्मा, छन्दांसि अङ्गानि, यजूंषि नाम। साम ते तनूर्वामदेव्यम्। यज्ञा यज्ञं पुच्छम् धिष्ण्या शफाः'**। एवमेव तैत्तिरीये (३।१।१०), काठके (१६।८), मैत्रायण्याम् (२।७।८), कापिष्ठलेऽपि द्रष्टव्यम्। आहुश्च बाह्वृचाः—**'विसुपर्णो अन्तरिक्षाण्यख्यत्'** (ऋ० १।३५।७)।

अत्रेदं ध्यातव्यम्—

मन्त्रोऽयं सौपर्णाग्निचयने विनियुक्तः। चयनेऽत्र प्राणभूतेष्टिका यदा आधीयन्ते, तदा शाट्यायनिनोक्तम्—सुपर्णस्यास्य पक्षयोर्यदा स्फोटो जातस्तदा श्रवणगोचरतां गतः—**'अपि ह स्माह—शाट्यायनिः। स्फोटतोर्हैकः पक्षयोरुपशुश्राव'** (श० ब्रा० ८।१।४।९)।

इमे हि प्राणभृदिष्टिकागताः प्राणा एव पूर्वदेव-(मिथक)कथायाम् ऋषय आसन्। नैतज्जातुचिदपि विस्मर्तव्यं यत् प्राणानामेव प्रतिमास्वरूपः पुरुषः प्रजापतिः सुपर्णः, इदमीयमेव सर्वविद्यामयरूपं तत्तदुक्तर्चेषु स्फुटमुक्तम्।

एष सर्वविद्यावपुःस्फोट एव वैयाकरणः स्फोट इति शाब्दिकसमयः। आतश्च—'वाण्येव सौपर्णीत्यपरामाख्यां भजते' (श० ब्रा० ३।६।२।२)।

किञ्च प्रजापतिः पुरुषश्च सुपर्णौ एव—'प्रजापतिर्वै सुपर्णः' (श० ब्रा० १०।२।२।४, ऋ० १०।१४९।३), 'पुरुषः सुपर्णः' (७।४।२।५।)।

'यो ह्येव सविता स प्रजापतिः' (श० ब्रा० १२।३।५।१)। अन्यत्रापि **गोपथे** पूर्वभागे (५।२२), तैत्तिरीयेऽपि **'प्रजापतिः सविता भूत्वा प्रजा असृजत'** इति, (तै० ब्रा० १।६।४।१)।

एवञ्च अयमेव वैदिकस्फोटः स्फोटायन-ऋषिणा सिद्धान्तत्वेनाङ्गीकृतः। स च सिद्धान्तस्तदुत्तरकालिकैश्शाब्दिकैः सृष्टिप्रलयादिमूलकारणत्वेन स्वीकृतः। एवञ्च स्फुटत्यर्थो यस्मादसौ स्फोट इत्यन्वर्थनामधेयता स्फोटस्य। तदनु स एव स्फोटः नागेशभट्टेन परिष्कृतः परिबृंहितश्च।

श्रीभट्टरामकण्ठाभिमतनादविनादः

नादस्थापनप्रसङ्गे श्रीभट्टरामकण्ठेन नादकारिकायां महताऽऽडम्बरेण वर्णव्यतिरेकेण स्फोटस्य सत्ता प्रत्याख्याता। तथा हि—वर्णव्यतिरेकेण स्फोटस्य तद्ग्राहकयोर्मध्ये स्थितिर्नोपपद्यते। यतः स वर्णेभ्यो भिन्नो वा स्यादभिन्नो वा? न तावद् भिन्नः, शशविषाणादेरिव वर्णव्यतिरेकेण तस्योपलब्धिलक्षणप्राप्तस्यानुपलब्धेः। न चानुमानात् स्थितिरुपपद्यते, प्रत्यक्षनिराकृतत्वात्। न च तस्या उपलब्धिप्राप्तत्वं सिद्धमिति वाच्यम्, ज्ञापकत्वात्; कारको हीन्द्रियादिश्शक्त्यैवाज्ञातोऽकार्यं जानाति करोति संस्कारवद् बीजादिवच्च। ज्ञापकस्याक्षिनिकोचादेरिव ज्ञापकत्वस्यासम्भवान्नानुमानादनवस्था। नाज्ञापकश्च स्फोटोऽभ्युपगन्तव्यः, अक्षिनिकोचादिवदग्रतः संबन्धस्य अज्ञापकत्वादिति कथमसाविन्द्रियादिवदनुपलम्भो विकल्पयितुं शक्यते, यदाऽभिन्नः तदा वर्ण एव स्फोटः, न तु तेभ्यो भेदेनावस्थित इति हस्तः कर इतिवत् स्फोटो वर्ण इति समाश्रुतिः। एकार्थाभिधानात्ततो न तद्भेदादत्रार्थभेदः। तेन चार्थबुद्धिरुपपद्यते। यदप्युक्तं वर्णव्यङ्ग्य इति तदप्ययुक्तम्। स्फोटो हि बहुभिर्वर्णैरभिव्यक्तोऽर्थप्रतीतिहेतुः स्यात्, एकैकेन वा। यदि बहुभिरभिव्यङ्ग्यः तदा तेषामुच्चरितध्वंसत्वेन विसर्जनीयकाले गकारोकाराभावान्न विसर्जनीयमात्रात्तदभिव्यक्तिरिति पूर्वोक्तो दोषः। अथ पूर्वसंस्कारसहितोऽन्त्यो वर्णः तद्व्यञ्जक इष्यते, तत्रापि स एव दोष इति केन हेतुनात्यन्ताप्रसिद्धः स्फोटः कल्प्यते। अथ द्वितीयः। गकारादिना गोगवयगगनादिस्फोटानां बहूनामभिव्यक्तितो विशेषाभावाद् अनेकार्थप्रतिपत्तिप्रसङ्गः।

किञ्च-विभुत्वे चास्यैकपुरुषोच्चारितैर्वर्णैरभिव्यक्तिमत्त्वे सति विशेषाभावाद् देशान्तरेऽपि प्रमातृणामर्थप्रतिपत्तिः स्यात्। तथा कालान्तरेऽपि नित्यत्वेनाधेया विशेषत्वादिति (नादकारिका पृ० ५-६)।

अत्रोच्यते—स्फोट एव शक्त्याश्रयः, न च वर्णातिरिक्तस्य तस्यानुभवविषयत्वाभावः, 'गौः' इत्येकं पदम्, 'गामानय शुक्लाम्' इति एकं वाक्यमिति

नानावर्णातिरिक्तैकपदवाक्यावगतेः सार्वजनीनत्वात्। न चायमसति बाधके एकपदवाक्यानुभवः शक्यो मिथ्येति वक्तुम्। नाप्यौपाधिकः, उपाधिः खल्वेकधी-ग्राह्यता वा स्याद् एकार्थधीहेतुता वा। न तावदेकधीगोचराणां धवखदिरपलाशा-नामेकनिर्भासः प्रत्ययः समस्ति। तथा सति धवखदिरपलाश इति जातु न स्यात्। नाप्येकार्थधीहेतुता, तद्धेतुत्वस्य वर्णे व्यासेधात्। तद्धेतुत्वेन तु साहित्यकल्पनेऽ-न्योन्याश्रयप्रसङ्गः, साहित्यात्तद्धेहुत्वं तद्धेतुत्वाच्च साहित्यमिति।

किञ्चैवं '**तज्जातीयं पदम्**' इति व्यवहारापत्तिः '**तदेवेदं पदम्**' इति व्यवहारासिद्धिश्च। अपि चोपाधिना 'एकं पदम्', 'एकं वाक्यम्' इति बु्युपपादने 'एकः पटः' इत्यादिबुद्धेरप्युपाधिनैवोपपत्तावययवादतिरिक्तस्यावयविनोऽसिद्ध्या-पत्तिश्च, तस्मादयमबाधितोऽनुपाधिश्च पदवाक्यगोचर एकनिर्भासो वर्णा-तिरिक्तमेकं शक्त्याश्रयं कञ्चनावलम्बते, स एव स्फोट इति।

तत्र स्फोटत्वञ्च—स्फुटति-व्यक्तीभवत्यर्थोऽस्मादिति व्युत्पत्त्याऽर्थप्रकाश-कत्वम्, प्रकाशश्च ज्ञानम्। तथाच-अर्थनिष्ठविषयताप्रयोजकं शक्तिमत्त्वरूपं स्फोटत्वं पर्य्यवस्यति। स च स्फोटः प्रतिनियतव्यञ्जकाभिव्यक्त एवार्थं प्रत्या-ययति। तस्य च निरुपाधिकस्य ब्रह्मण इव ज्ञानाविषयत्वमेवेति वर्णपदादिरूप-व्यञ्जकरूपरूषितस्यैव ज्ञानविषयता, अर्थविषयकबोधजनकता चेति वर्णपदादिभ्यः पार्थक्येनोपलब्धिविषयत्वाभावेऽपि न क्षतिः। ब्रह्मात्मकस्य तस्यैकत्वेऽपि व्यञ्जक-वर्णाद्यात्मध्वनीनामानन्त्यादानन्त्यम्।

ननु स्फोटेषु ध्वनिरूपप्रतिबिम्बनासम्भवः, प्रयोजकाभावादिति चेत्, न, स्थिरस्यान्तःकरणसंस्कारस्यैव प्रतिबिम्बप्रयोजकस्य सत्त्वात्। न च तत्तत्कालिक-तत्तद्वैखरीरूपव्यञ्जकभेदेन स्फोटस्य नानात्वात्तदनुगमाय स्फोटवादिनामपि तत्र जातिकल्पनेति लाघवाभाव इति वाच्यम्, सहस्रदीपाभिव्यक्तपटस्येव, अनेकजपा-कुसुमाभिव्यक्तस्फटिकस्येव च स्वतो नानात्वाभावात्। उपाधिभिन्नव्यञ्जका-भावान्न तद्रहितस्य प्रत्यक्षम्।

ननु वर्णानां व्यञ्जकत्वे 'रसः', 'सरः' इत्यादौ तुल्यानामेव व्यञ्जकानां सत्त्वेन पर्य्यायतापत्तिरिति चेत्, न, संस्कारस्यापि सहकारित्वेन येन क्रमेणान्तःकरणे वर्णसंस्कारस्तेनैव क्रमेण व्यञ्जकरूपरूषितत्वस्वीकारात्।

ननु कालस्यैक्येन क्रमानुपपत्तिरिति चेत्, न, प्रतिबिम्बे उत्तरत्वग्रहस्य चित्तरूपदेशकृतत्वेन पौर्वापर्य्यसम्भवात्, एकदेशस्थघटपटकुड्यादिवत्। नन्वेवं क्रमिकसंस्कारसत्त्वे सर्वपदार्थबोधापत्तिरिति चेत्, न, अर्थाकारावृत्तौ सत्यां तत्प्रतिबिम्बनाशात्।

नन्वेवं घटकलशपर्यायाभिव्यक्तस्यैकस्यैव स्फोटस्य सत्त्वे, एकपर्यायावच्छेदेन गृहीतशक्तिकस्य पुंसोऽपरपर्यायाभिव्यक्तस्फोटादप्यर्थबोधापत्तिरिति चेत्, न,

व्यञ्जकरूपरूषिते एव स्फोटे शक्तिग्रहनियमात्। तथा च तत्र शक्तिज्ञानरूपकारणाभावादेव शाब्दबोधाभाव इति भावः।

एतस्य चान्यतरस्यैव बोधकत्वेऽपि वैखरीसंस्कृतान्तःकरणग्राह्यत्वान्न श्रोत्रग्राह्यवैखरीं विनोपलब्धिः, स्फोटस्य प्रत्येकवर्णव्यङ्ग्यत्वेऽपि नैकवर्णेन द्राक् स्फुटाभिव्यक्तिः, किन्तु यथाऽनेकवारदर्शनेन रत्नपरीक्षकाणां रत्नतत्त्वज्ञानं जायते, तद्वद् द्वित्रपञ्चषदर्शनजनितसंस्कारपरिपाकान्तःकरणलब्धजन्मनि चरमे प्रत्यये विशदं चकास्ति स्फोटतत्त्वम्। तत एव च बोध इति नोत्तरेषां नापि प्राचां ध्वनीनामानर्थक्यम्।

न च पदप्रत्ययवत्प्रत्येकमव्यक्तामर्थधियमाधास्यन्ति प्राञ्चो वर्णाः, चरमस्तु तत्सचिवः स्फुटतरामिति युक्तम्, व्यक्ताऽव्यक्तावभासितायाः प्रत्यक्षज्ञाननियमात्, स्फोटज्ञानस्य च प्रत्यक्षत्वात्। अर्थधियस्त्वप्रत्यक्षाया मानान्तरजन्मनो व्यक्त एवोपजनः, न वा स्यात्, न पुनरस्फुट इति न समः समाधिः।

तिमिरततितिरोहितस्स्तम्भः यथा प्रभोदयसमकालमेवोपलभ्यते, तद्व्यतिरेकेण केनापि-उपलब्धुं न शक्यते। यद्यपि तत्रेदमपि वक्तुं शक्यते यत् स्पर्शादिनापि तस्य विद्यमानतावगन्तुं शक्येत, तर्हि अत्रापि योगाभ्यासादिना स्फोटसत्ता समुपलभ्येतैव। योगप्रक्रिया च योगशास्त्रे निरूपितैव वर्तते। अतः शशविषाणादिदृष्टान्तं प्रदर्शयता रामकण्ठेन यदुक्तं वर्णव्यतिरेकेण 'स्फोटः' अलीक एव स्यात्-तदप्येतेन पराहतम्।

यद्यपि स्फोटप्रत्याख्यानपराणां समेषां दार्शनिकानामाचार्याणां मतं नागेशादिभिः स्फोटवादसमर्थने प्रत्याख्यातम्, तथापि रामकण्ठनामोल्लेखो न कुत्रापि कृतः, इति केषाञ्चिद् विदुषां भ्रमोऽयं वर्तते-यत् रामकण्ठमतं कुत्रापि शाब्दिकैर्न प्रत्याख्यातम्। अतोऽयं प्रसङ्गो मयात्र उत्थापित इति सहृदयैः शाब्दिकैः मदीयेयं चर्वितचर्वणाऽवश्यं क्षन्तव्या।

ग्रन्थस्यास्य नामकरणविषये किञ्चिन्निवेदनम्

ग्रन्थस्यास्यान्ते 'इति **श्रीमदुपाध्यायोपनामकशिवभट्टसुतनागेशभट्टकृतो वैयाकरणसिद्धान्तमञ्जूषाख्यः** स्फोटवादः समाप्तः' इत्यत्र **'वैयाकरणसिद्धान्त-मञ्जूषा'** इत्येवाभिधानं समुपलभ्यते। तदनन्तरम्—

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम्॥

[गी० अ० ९। श्लो० २७]

इति स्मृतिवचनाद् नागेशभट्टः साम्बशिवाय स्वकृतिसमर्पणकाले लिखति—

वैयाकरणसिद्धान्तमञ्जूषा या कृता मया।
तया श्रीभगवान् साम्बः शिवो मे प्रीयतामिति॥

अत्रापि 'वैयाकरणसिद्धान्तमञ्जूषा' इत्येव ग्रन्थस्याभिधानं लिखितमस्ति।

नागेशभट्टविदुषा नत्वा साम्बसदाशिवम्।
वैयाकरणसिद्धान्तमञ्जूषेयं विरच्यते॥

[वै० सि० म० पृ० १]

इत्यत्र मङ्गलश्लोकेऽपि '**वैयाकरणसिद्धान्तमञ्जूषा**' इत्याकारक एव शब्दः समुपलभ्यते। अतः प्रमाणैरेभिरिदं निश्चेतुं शक्यते यत् प्रकृतग्रन्थस्य '**वैयाकरणसिद्धान्तमञ्जूषा**' इत्येव नामधेयं नागेशभट्टाभिमतं स्यात्।

यद्यपि **लघुमञ्जूषादौ** 'इत्यन्यत्र विस्तरः' इत्यादि नागेशपङ्क्ति व्याचक्षाणाः केचन पण्डिताः 'अन्यत्र' इत्यस्य '**बृहन्मञ्जूषायाम्**, इत्यर्थं व्याचक्षते। अनेन च सम्प्रति ग्रन्थममुमनेके विद्वांसः '**बृहद्वैयाकरणसिद्धान्त-मञ्जूषा**' इति पदेन व्यवहरन्तः श्रूयन्ते तथापि निरुक्तप्रमाणैरापातरमणीयोऽयं व्यवहारः प्रतीयते। प्रकृतग्रन्थस्य नामनिर्देशे नागेशभट्टप्रयुक्तं '**बृहत्**' पदं न श्रूयते। अतोऽनुमातुं शक्यते यत् '**लघुमञ्जूषा**' इत्यत्र '**लघु**' पदम्, '**परमलघु-मञ्जूषा**' इत्यत्र '**परम**' पदञ्च वीक्ष्य '**बृहत्**' पदमत्र योजयन्ति कतिपये शालीन-शेमुखीजुषः।

किञ्च-ग्रन्थस्यास्य परमलघुमञ्जूषालघुमञ्जूषातः प्रागरचितत्वेनापि नाम्नि '**बृहत्**' पदं कस्य व्यावर्तकं स्यात्?

किञ्च—एषां त्रयाणां ग्रन्थानां प्रायो भिन्नविषयकत्वेनास्य ग्रन्थस्य संक्षिप्तोऽशो लघुमञ्जषा, ततोऽपि संक्षिप्ततरोंऽशः परमलघुमञ्जूषेति नायं प्रकारस्तेनापि अत्र '**बृहत्**' नोपयोगिपदम्। एतेन भाविन्योर्बुद्धिस्थयोरनयोर्व्या-वर्तकत्वेन बृहत्पदमुपन्यस्तमत्रेति व्याहरन्तः समाहिता एवेति दिक्।

अस्य ग्रन्थस्य लघुमञ्जूषातो भेदः

(क) ग्रन्थोऽयं लघुमञ्जूषातः पूर्वं रचितः। स्फोटप्रकरणे वर्णस्फोट-निरूपणे पदवाक्यस्फोटप्रकरणे स्फोटनिरूपणशैली वैयाकरणभूषण-पथमनुहरति, परं तस्यैव विस्तरस्तु नागेशेन स्वरीत्याऽऽडम्बरेण कृतः। न च तथा लघुमञ्जूषायाम्।

(ख) अत्र तार्किकमीमांसकमते यथाविस्तरं समीक्षिते, न च ते तथा लघुमञ्जूषायाम्।

(ग) लघुमञ्जूषायाः शक्त्याश्रयप्रकरणमत्र स्फोटप्रकरण एव समा-वेशितम्।

(घ) लघुमञ्जूषायां स्फोटवाद आगमसिद्धान्तमनुसरति, अत्र भर्तृहरि-कैयटादिसिद्धान्तम् ।

(ङ) अत्र शक्तिप्रकरणे अर्थबोधजनकतारूपा शक्तिः, परमलघुमञ्जूषायां वाच्यवाचकभावापरपर्याया शक्तिः ।

(च) लघुमञ्जूषायां शक्यतावच्छेदकारोपरूपा लक्षणा, अत्र सा केवलम् अप्रसिद्धा शक्तिः ।

(छ) व्यञ्जनाप्रकरणेऽत्र मम्मटानन्दवर्धनमतानि भूय उद्धृतानि, न लघौ तथा ।

(ज) लघौ बौद्धार्थवादो भगोरथप्रयासेन साधितः, अत्र तु नामापि न श्रूयते ।

(झ) लघुमञ्जूषायां नागेशेनाप्राकरणिकमनल्पं व्याहृतम्, अत्र तु कृत्स्नमपि विचारजातं तत्तत्प्रकरणानुकूलम्—इति दिक् ।

ग्रन्थस्यास्य सम्पादने प्रवृत्तिबीजम्

चिररात्राय अप्रकाशितग्रन्थप्रकाशनकौतूहलकवलितमानसेन मया वैयाकरणकुलपारम्परीप्रशंसितस्य तत्तद्व्याख्याव्याख्यातृवचोविस्तरास्पदस्य ग्रन्थ-रत्नस्यास्य प्रकाशनाय स्वमनो निवेशितम् । ततः सम्पूर्णानन्दसंस्कृतविश्व-विद्यालयीयसरस्वतीभवनस्था एका मातृका मद्रासपुस्तकालयतश्चान्या मातृका मया सङ्गृहीता । प्रकाशिततत्तद्ग्रन्थराजिकेनापि मया असन्तुष्टेनास्य ग्रन्थस्य प्रकाशनाय भारोऽङ्गीकृतः । अदसीया हस्तलिखिता लिपिः, या तु मद्रासतः प्राप्ता सा तु नितरां भ्रष्टा, नष्टा, जीर्णा, शीर्णा, बहुलनिर्विभक्तिकपदजुष्टा । आतश्च पठितुं बोद्धुञ्च दुष्करा आसीत् । तच्छोधने परैस्तर्कितुमप्यशक्तः श्रमोऽ-स्मान् व्याकुलयकरोत् । सरस्वतीभवनस्था लिपिस्तु ततः शुद्धतराऽपि न खलु सर्वथा विद्वन्मनोऽनुकूला, परमथापि ततः प्राप्तसौविध्योऽहमभवम् । अन्या अपि काश्चन हस्तलिखिता लिपयोऽधिगताः, परं तास्तु नितरां शोच्या एवेति न ताभ्यः किमपि साहाय्यमलम्भि ।

यदा ग्रन्थस्यास्य हस्तलिखिता लिपिरधिगता तदा तत्पुस्तकं दर्शं दर्शं तत्तत्स्थलेषु सिद्धान्तरत्नानि ज्ञायं ज्ञायम्, वैयाकरणनिकायेषु तदुपयोगिता बोधं बोधं तत्प्रकाशने बद्धपरिकरोऽहं जातः । एतत्सम्पादने इदम्प्रवृत्तिबीजम् ।

कार्तज्ञ्यज्ञापनम्

प्रथमं तावत् प्रातःस्मरणोयानां विविधविद्यावगाहनविशुद्धान्तःकरणा-नाम, अन्तेवासिनिवहसभाजितपादपङ्कजानां गुरुचरणानां श्रीमतां सभापतिशर्मो-

पाध्यायमहाशयानां चरणाभ्यां सनति कुसुमाञ्जलिं वितरामि, यतो व्याकरण-ज्ञानलवमवाप्य ग्रन्थस्यास्य सम्पादने प्रावर्तिषम्—

शास्त्रे शाब्देऽप्रतिहतगतिर्न्यायशास्त्रे नदीष्णो
मीमांसायामनुपममतिर्वादिवृन्दे मृगेन्द्रः ।
व्याख्या मान्या विधबुनिवहैर्यस्य रत्नप्रभाख्या
मञ्जूषायास्स जयति गुरुः श्रीसभापत्यभिख्यः ॥१॥

ग्रन्थस्यास्य सम्पादने प्रसङ्गादापतितान् अन्तरायान् दूरीकृत्य **यैर्महत्सौकर्यं** सम्पादितम्, अतस्ते अस्माकं विश्वविद्यालयस्य कुलपतिपदं **विभूषयन्तः** श्रीमत्करुणापतित्रिपाठिमहेच्छा धन्यवादशतपत्रैर्विभूष्यन्ते—

प्रच्छायामरभारतीततलता मूलालवालो दृढो
विद्वद्वृन्दविभावितस्सहृदयश्छात्रावलीवन्दितः ।
सद्विद्यः कुलशीलविश्रुतयशाः सौजन्यरत्नाकरः
शब्दैः श्रीकरुणापतिः कुलपतिः सम्भाव्यते साधुभिः ॥ २ ॥

अतः परमेतद्ग्रन्थसम्पादनप्रसङ्गे व्याकरणविभागाचार्यपदं **मण्डयन्तः** साम्प्रतं ततो निवृत्ताः, व्याख्यानपाटवपटहवधिरीकृतवादिवृन्दाः, पाण्डित्यप्रताप-परितापितवावदूकाः, पण्डितश्रीभूपेन्द्रपतित्रिपाठिमहोदयाः **साधुवादैः** सम्भाव्यन्ते—

पाण्डित्यप्रभयाविभासितदिशो वाक्चातुरीचर्चितः
सद्वंशप्रभवः प्रभूतमहिमा शिष्यैः प्रशिष्यैस्तथा ।
वाणी यस्य सदा सदर्थसहिता हास्ये विनोदेऽपि च
श्रीभूपेन्द्रपतिः समन्वयमतिः सम्मान्यते सादरम् ॥ ३ ॥

तदनु कुलसचिवपदं सभाजयन्तो विविधविद्यानवद्यगद्यपद्यविद्याविनोद-मेदुरशेमुषीकाः, अनवरतप्रशासननिरता अपि कविताकामिनीविलासिनः, स्वतः-प्रवृत्तप्रयत्नशतानेकविहितोपकारैकलक्ष्याः, वाक्चातुरीतुरीप्रीतव्यवहारपटपटवः, अस्मत्प्रियसुहृदः, अन्वर्थनामभाजः श्रीविश्वम्भरनाथत्रिपाठिमहाभागाः साधुवादै-स्संयुज्यन्ते । येषां सत्प्रयत्नैरेव ग्रन्थोऽयं झटिति प्राकाश्यमागतः । यतो ह्युपदश वर्षेभ्यः प्राक् सम्पादितोऽप्ययं ग्रन्थः प्रकाशनोपेक्षातितिमिरतिरस्करिणीतिरस्कृत एवासीत् । न केवलं मुद्रणे प्रत्युत एतन्मञ्जूषागतविषयाणां विस्फोरणेऽपि महदानुकूल्यमाचरितमेभिः—

वेदे भूरिपरिश्रमाय नितरां साहित्यविद्याविदे
नीतौ स्फीतधिये कुशाग्रमतये ख्याताय वाक्पाटवे ।
श्रीविश्वम्भरनाथशर्मविदुषे मित्राय सद्भाषिणे
ग्रन्थस्यास्य परिष्कृतौ सहयुजे कार्तज्ञ्यमावेदये ॥ ४ ॥

ततो विश्वविद्यालयस्यास्यानुसन्धानसञ्चालकस्य डॉ० भागीरथप्रसाद-त्रिपाठिमहाशयस्य कृतज्ञतां प्रकाशयामि, येन हि ग्रन्थस्यास्य मुद्रणे संशोधने च समये समुचितः परामर्शोऽदायि—

वाणी यस्य सुधावधीरणपटुः शाब्दाम्बुधेः पारगो
योगे युक्तमतिः गवेषणरतिः साहित्यविद्याबुधः ।
विद्यावंशविभूषितोऽतिविनतो हृद्यैर्गुणैर्मण्डितः
श्रीभागीरथकोविदो विजयतां सञ्चालको धीरधीः ॥५॥

काशीहिन्दूविश्वविद्यालयकलासंकाये प्राध्यापकेन डा० जयशङ्करलाल-त्रिपाठिनाऽस्मत्स्नेहभाजनेन परिशीलितव्याकरणसाहित्यादिशास्त्रेणापि अनेकैः साधनैः सम्पादने आनुकूल्यमाचरितमतस्सोऽपि नितरामाशीर्वादास्पदीक्रियते—

काशीहिन्दुपदाञ्चिते निरूपमे श्रीविश्वविद्यालये
यः प्राध्यापकलक्षणो निजगुणैश्छात्रेषु सम्मानितः ।
शास्त्राध्यापनचातुरीसुयशसे प्रज्ञाविशुद्धात्मने
सस्नेहं जयशङ्कराख्यविदुषे स्वस्त्यस्तु तस्मै सदा ॥ ६ ॥

अस्मद्विश्वविद्यालयीयप्रकाशनाधिकारिणा शब्दशास्त्रे कृतभूरिपरिश्रमेण गवेषणानिपुणेन डॉ० हरिश्चन्द्रमणित्रिपाठिनापि मुद्रणसौविध्यं सम्पादितमतस्सोऽपि भूयो भूय आशीर्वचोनिचयैरुपचाय्यते—

स्फीता मतिर्यस्य गवेषणायां
शाब्दे प्रवीणस्सुधियां प्रियो यः ।
ख्यातो हरिश्चन्द्रमणिस्सुशीलः
तस्मै शुभाशंसनमातनोमि ॥ ७ ॥

तदनु गोयनकासंस्कृतमहाविद्यालयस्य व्याकरणाध्यापकः स्नेहभाजनमस्मच्छात्रान्यतमः श्रीमनुदेवभट्टाचार्यः आशिषां शिखाभिः संयोज्यते, येन मत्सन्निधौ यथाकालं बहुकालञ्च स्थायं स्थायं पाठसंशोधनेन, विषयपरिष्कृत्या क्वचिट्टिप्पण्यादिसंयोजनेन चानुपमं साहाय्यं समकारि—

श्रीमद्गोयनकाख्यसंस्कृतमहाविद्यालयाध्यापकः
श्रद्धाभक्तिसमेधमानधिषणश्छात्रः प्रियो मेऽस्ति यः ।
भट्टाच्चार्यपदाङ्किताय मनुदेवाख्याय तस्मै मया
विद्यावारिधिमन्थनाय सतताऽऽशीराशिरेषोऽर्प्यते ॥ ८ ॥

पालिसाहित्याचार्येण श्रीमता परमेश्वरपाण्डेयेन प्राग्रूपसंशोधने ग्रन्थसौष्ठवसम्पादने च महत्साहाय्यमाचरितमतस्सोऽपि साधुवादार्हः—

प्राग्रूपशुद्धौ विहितश्रमाय
ग्रन्थस्य सौन्दर्यविवर्धकाय ।
साहित्यपालिद्वयपण्डिताय
शुभाशिषः श्रीपरमेश्वराय ।। ६ ।।

तदनु डा० हिन्दकेशरी-आर्यः, श्रीगिरिजेशकुमारदीक्षितः, श्रीकमलेशकुमारद्विवेदी, सर्वेऽपि व्याकरणाचार्याः, अस्मत्प्रियान्तेवासिनः सौवस्तिकैश्शब्दैः संयुज्यन्ते, यैर्महता परिश्रमेण ग्रन्थस्य पाण्डुलिपिकरणे, संशोधने, पाठसंवादसंयोजने च पारेकल्पनं साहाय्यमाचरितम् ।

तारामुद्रणालयाधिकारिणः मुद्रकाश्च धन्यवादानर्हन्ति, यैः कार्यान्तरं विहायास्य ग्रन्थस्य मुद्रणं मङ्क्ष्वेव कृतम् ।

अन्ते विशेषमनःप्रणिधानेन संशोधितेऽप्यस्मिन् यत्र कुत्रचिद् मानवसुलभभ्रमप्रमाददोषदर्शनेन विमलमानसानां विदुषां कोपभाजनं न भवेयम्, यतो हि—

कादम्बसारसमयूरकुलैर्विभातः
पद्मावलीसुरभिशीतजलैः समृद्धः ।
दैवात् समापतित शैवलमञ्जरीभि-
र्नोद्बीजयेत् सहृदयान् विमलस्तटाकः ।।

श्रीराधाष्टमी,
वै० सं० २०३४
[२०।९।१९७७ ई०]

डॉ० कालिकाप्रसादशुक्लः,
उपाचार्यः
व्याकरणविभागे
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः,
वाराणसी ।

वैयाकरणसिद्धान्तमञ्जूषायाः प्रकरणानां विषयाणाञ्च अनुक्रमणिका

इति वैयाकरणसिद्धान्तमञ्जूषानुक्रमणिका

नागेशभट्टविरचिता

वैयाकरणसिद्धान्तमञ्जूषा

वैयाकरणसिद्धान्तमञ्जूषा

नागेशभट्टविदुषा नत्वा [1]साम्बसदाशिवम् ।
वैयाकरणसिद्धान्तमञ्जूषेयं विरच्यते[१] ॥१॥

अथ वर्णस्फोटसामान्यनिरूपणम्

तत्राष्टौ स्फोटा इति सिद्धान्तः। वर्णस्फोटः, पदस्फोटः, वाक्यस्फोटः, अखण्डपदवाक्यस्फोटौ; एते पञ्च व्यक्तिस्फोटाः। व्यक्तिस्फोटत्वञ्चैषाम्—जात्यनवच्छिन्नस्यैव तदवच्छिन्नस्य वा, [२]केवलं प्रकृतिप्रत्ययपदादेर्वाचकत्वात्। यथा चैतत्, तथाऽग्रे निरूपयिष्यामः। वर्णपदवाक्यभेदेन त्रयो जातिस्फोटाः; इत्यष्टौ।

तत्र स्फुटत्यर्थोऽस्मादिति स्फोटो वाचक इति यावत्। एवञ्च वर्णस्फोटादिपदानां वर्णादयो वाचका इत्यर्थः। [३]अत्र वर्णशब्देन प्रकृतिप्रत्ययौ[2]। तत्र[४] 'रामः', 'भवति', इत्यादौ[५] तत्तदानुपूर्व्यवच्छिन्नवर्णसमुदायरूपाः, प्रकृतिप्रत्ययभागाः प्रयुज्यमानपदवाक्यादौ श्रूयमाणा वा वाचकाः, न तु तैः स्मृता आदेशिन इति वर्णस्फोटपक्षः। सरो रस इत्यादावविशेषवारणाय तत्तदानुपूर्व्यवच्छिन्नेति।

1. साम्बमिति लघुमञ्जूषादौ। 2. ग्राह्यौ इति शेषः।

१. क विलिख्यते। २. ख नास्ति। ३. ख नास्ति। ४. ख नास्ति।
५. ख तत्रादावानु०।

प्रयुज्यमानपदान्तर्गता वर्णा वाचका न वा इति विप्रतिपत्तिशरीरम् । अत्र विधिकोटिः परेषाम्, निषेधकोटिरस्माकम् । स्यादेतत्—प्रयोगसमवाय्यादेशभूततिबादीनां बहुत्वादनन्तशक्ततावच्छेदककल्पनापत्तेर्न वाचकत्वम्; किन्तु तैः स्मृताः स्थानिभूता लादय एव, तत्र हि लत्वस्य जातिरूपस्यैकस्यैव शक्ततावच्छेदकत्वात् । न च [1]'भू—ल्' इत्यतोऽपि बोधः स्यादिति वाच्यम्, बोधे 'भवति' इति समभिव्याहारस्य कारणतायाः 'भू—ति' इत्यतो बोधवारणाय तवाप्यावश्यकत्वेन दोषाभावादिति चेत्, न, लकारमविदुषां बोधानापत्तेः । न च तिङ्क्ष्वेव शक्तिभ्रमाद्बोधः, पदतदर्थघटितशक्तेर्भ्रमस्योपपादयितुमशक्यत्वात्, भ्रमत्वे मानाभावाच्च, व्याकरणभेदेन कटचडादिभेदैः 'रामः' इत्यादौ सु-सि-वादिभेदैश्च स्थानिनामप्यनन्ततयाऽनन्तशक्ततावच्छेदककल्पनापत्तेस्तदवस्थत्वाच्च । न चैक एव तेषु शक्तः, विनिगमनाविरहात् । न च वेदाङ्गतया पाणिनीयव्याकरणबोधितस्थानिनां वाचकत्वमिति वाच्यम्, अन्याध्ययनवतामेतदप्यजानताञ्च[2] बोधानापत्तेः । यत्तु, 'रामः' इत्यादौ सु-सि-रु इत्यादेशिभेदाद्येन सर्वं व्याकरणमधीतं तस्य विनिगमनाविरहेण बोधप्रतिबन्धः स्यादिति । तत्, न; स्मारकलिपेरिव स्मर्यस्मारकाननुगमस्यादोषत्वात्, यस्यैवोद्बोधकसामग्री, तेनैव स्मृतेन बोधसम्भवात् । यत्र तु बहूनां सा, तत्र सर्वैस्तैरित्यदोषात् ।

किञ्च, शक्तिग्राहकशिरोमणिना व्यवहारेण श्रूयमाणेष्वेव [3]शक्तिग्रहो न[4] स्थानिषु ।

अपि च, 'भू—ल्' इत्यतो बोधवारणाय समभिव्याहारस्य कारणत्वावश्यकत्वे लाघवात्तत्समभिव्याहारविषयवर्णेष्वेव शक्तिकल्पनोचिता ।

अपि च, आदेशिनां स्मरणकल्पनायां यदस्माकं वाचकतावच्छेदकम्, तत्तत्र मते स्मारकतावच्छेदकं वाच्यम्, येन केनचिद्रूपेण स्मारकत्वेऽतिप्रसङ्गात् । तथा च 'तद्धेतोः' इतिन्यायेन तेषां वाचकतावच्छेदकत्वमेवोचितम् । 'पपाच' इत्यादावनेकेषां स्मारकतावच्छेदकत्वापत्तेश्च ।

किञ्च, स्थानिनां वाचकत्वे तिङ्क्षु कृतिवाचकत्वम्, शत्रादिस्थले कर्त्रादिवाचकत्वम्; इति मीमांसकनैयायिकसंमता व्यवस्था न सिध्येत् । न च "कर्त्तरि कृत्" [३।४।६७]इत्यनुशासनाच्छानजादीनां[5] कर्त्तार्थ इति वाच्यम्, तस्य तद्विधाव-

१. ख 'भू तल्ल' इत्यत्रेत्यधिकः पाठः । २. ख नास्ति । ३. ख शक्तिग्रहात् ।
४. ख 'न स्थानिषु' इति नास्ति । ५. ख शानच्त्वादिना ।

प्रवृत्तेः[१]। अन्यथा कर्मणि शानचो दौर्लभ्यापत्तेः। न च नामार्थयोर्भेदेनान्वयायोगात् 'चैत्रः पचमानः' इत्यादौ अनन्वयवारणाय तत्र लस्य कर्त्ता वाच्य इति वाच्यम्, "लः कर्मणि" [३।४।६९] इति सूत्रस्य वैरूप्यापत्तेः। न च लत्वस्य शक्ततावच्छेदकत्वेऽपि तिबाद्यादेशजन्यलकारोपस्थितेरेव कृत्युपस्थापकत्वान्न; शत्रादिस्मारितात्; स्वरूपेणोच्चारिताद्वा तत्प्रतीतिरिति वाच्यम्, यत एवं वदता शत्रादिस्थले किमादेशानां वाचकत्वमभ्युपेयते, उत स्थानिनाम्? नाद्यः, अर्धजरतीयापत्तेः। नान्त्यः, वैरूप्यापत्तेः। नचादेशानामेव वाचकत्वे "लः कर्मणि०" [३।४।६९] इत्यनुशासनासंगतिः, वस्तुतस्तिङादिनिष्ठाया एव शक्तेरनुशासनलाधवाय कल्पिते लकारे कल्पितत्वात्तदुपपत्तेः।

अत्रेदं बोध्यम्—अत्र पक्षेऽर्थबोधानुकूला वृत्तिर्वर्णसमूह एव पर्याप्ता, न प्रत्येकम्। तथा सति प्रत्येकमर्थवत्त्वात्प्रातिपादिकत्वा[1]द्यापत्तौ 'धनम्, वनम्' इत्यादौ 'न'लोपाद्यापत्तेः।

किञ्च, प्रत्येकं शक्तिमत्त्वे प्रत्येकं वर्णादर्थबोधापत्तिः। किञ्च, द्वितीयादिवर्णोच्चारणस्य वैयर्थ्यापत्तिः। न च प्रत्येकं वर्णैरर्थस्मरणमात्रं जन्यते, चरमेण पुनः स्पष्टं जन्यते, प्रत्यक्ष इव स्मृतावपि वैजात्यस्वीकारे बाधकाभावादितिवाच्यम्, प्रतिवर्णमर्थस्मरणस्यानुभवविरुद्धत्वाद्, गुरुत्वाच्च। न च प्रत्येकावृत्तेः कथं समुदायवृत्तित्वम्, द्वित्वादिवदुपपत्तेः। अत एव 'अर्थवन्तो वर्णाः' इति प्रघट्टके "हयवरट्" [मा० सू० ५] सूत्रे 'धातुप्रातिपदिकप्रत्ययानामेकवर्णानामर्थदर्शनात् प्रातिपदिकान्येकार्थानि[2]—आभ्याम्, आभिः, एषु;' इति भाष्य उक्तम्। स्पष्टन्तु "अर्थवत्" [१।२।४५] सूत्रे भाष्ये—'प्रकृतिः प्रकृत्यर्थे वर्तते, प्रत्ययः प्रत्ययार्थे' इति ग्रन्थे।

चरमवर्ण एव शक्तः, पूर्वपूर्ववर्णानुभवजसंस्काराश्चरमेणार्थधीजनने सहकारिण इति न तन्मात्रादर्थधीः, नापि प्रतिवर्णं प्रातिपादिकत्वापत्तिरित्येकदेशिनः।

इति वर्णस्फोट[3]मान्यनिरूपणम्।

---

1. आदिना सुबुत्पत्तिः। 2. तत्रत्या भाष्यानुपूर्वी तु 'प्रातिपदिकान्येकवर्णान्यर्थवन्ति-आभ्याम्, एभिः, एषु'। 3. अत्र सामान्यनिरूपणमिति युक्तः पाठः।

---

१. ख तद्विधायकत्वानापत्तेः।

अथ शक्तिनिरूपणम्

अत्र घटादिपदादुपस्थिताकाशादेः शाब्दविषयत्ववारणाय शाब्दबोधे वृत्तिग्रहजन्योपस्थितिर्हेतुरिति सिद्धान्तः[1]। वृत्तिश्च त्रिधा—शक्तिर्लक्षणा, व्यञ्जना च। वृत्तित्वं शाब्दबोधहेतुपदार्थोपस्थित्यनुकूलपदपदार्थ[1]सम्बन्धत्वम्। बोधकत्वेन पदविषयकसंकेतरूपतात्पर्यस्य वृत्तित्ववारणाय पदार्थोपस्थित्यनुकूलेति। तच्च साक्षादेव शाब्दोपयोगि न पदार्थोपस्थितिद्वारेति बोध्यम्।

तत्र शक्तिः कः पदार्थ इति चेत्, अत्र नैयायिकाः[2] अस्माच्छब्दादयमर्थो बोध्य इत्याकारा, इदं पदमिममर्थं बोधयत्विकारा वा ईश्वरेच्छा शक्तिः। तस्याश्च यद्यपि विषयत्वलक्षणः सम्बन्धः पदे चार्थे च, तथापि तस्यां बोधजनकत्वेन; बोधनिष्ठजन्यतानिरूपकत्वेन; वा विषयो वाचकः। बोधविषयत्वेन तस्यां विषयो वाच्यः। तेन पदं न वाच्यम्, अर्थो न वाचकः।[3] एतेनेश्वरेच्छाया अतिप्रसक्तत्वात्

1. अयमाशयः—शब्दानां समवायेनाकाशे वर्तमानत्वात् 'एकसम्बन्धिज्ञानमपरसम्बन्धिनं स्मारयति' इति नियमेन घटपदेनाकाशस्याप्युपस्थित्या आकाशस्यापि शाब्दबोधे भानं स्यात्। तच्च नेष्टम्, इति तद्विषयकशाब्दबोधं प्रति तत्पदनिष्ठवृत्तिज्ञानजन्योपस्थितिः कारणमिति कार्यकारणभावः स्वीकर्त्तव्यः। एवञ्चाकाशस्य वृत्त्याऽनुपस्थितत्वात् शाब्दबोधे भानं न भवति।

2. तत्र ईश्वरेच्छारूपा शक्तिरितिमतं प्राचीननैयायिकानाम्। तेषां नये आधुनिकसंकेतेऽपि शक्तिरस्त्येव, 'एकादशेऽहनि पिता नाम कुर्यात्' इति ईश्वरेच्छायाः तत्रापि सत्त्वात्। सम्प्रदायविदस्तु, आधुनिकसंकेते न शक्तिरिति मन्यन्ते। गदाधरभट्टाचार्यास्तु, इच्छामात्रं शक्तिः, नत्वीश्वरेच्छा, एवञ्च आधुनिकसंकेतेऽपि शक्तिरस्त्येव।

मीमांसकमते तु, शक्तिः पदार्थान्तरम्। सा च पदपदार्थयोर्वाच्यवाचकभावनियामिका। वैशिष्ट्याख्यसम्बन्धेनार्थनिष्ठा सा शक्तिः, प्रतियोगित्वसम्बन्धेन च पदनिष्ठेति।

प्राचीनवैयाकरणास्तु, बोधजनकतां शक्तिमाहुः। तथा चोक्तं भूषणे दीक्षितैः—

'इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा।
अनादिरर्थैशब्दानां सम्बन्धो योग्यता तथा॥'
शक्तिनि० ३७ का०

इन्द्रियाणाम् = चक्षुरादीनाम् स्वविषयेषु = चाक्षुषेषु घटादिरूपेषु, यथाऽनादियोग्यता = तदीयचाक्षुषादिकारणता, तथा शब्दानामपि अर्थेन सह तद्बोधकारणतैव योग्यता, सैव शक्तिरित्यर्थः।

नागेशमते तु, वाच्यवाचकभाव एव शक्तिरिति अनुपदमेव स्फुटीभविष्यति।

---

१. ख. पदार्थं। ३. ख. एतेन अदोषात्, नास्ति।

न तत्र शक्तित्वमिति परास्तम्, तत्तद्विषयविशेषितायास्तादृशविलक्षणविषयतासम्बन्धेन तत्तत्पदनिष्ठायास्तत्तत्पदशक्तित्वाभ्युपगमेनादोषात्। सा चेयं साधुशब्दनिष्ठैव, नापभ्रंशादिनिष्ठा, तेषां शक्तत्वव्यवहाराभावात्, साधुत्वापत्तेश्च।

नन्वपभ्रंशादपि शक्तिभ्रमेणार्थप्रत्ययाङ्गीकारात् सन्मात्रविषयके[1] भगवत्संकेते[2] तेषामपि विषयत्वावश्यकतया च शक्तत्वापत्तिः, अन्यथा भगवदिच्छायाः सन्मात्रविषयकत्वोच्छेदापत्तिः। एवं लाक्षणिकगङ्गादिपदस्यापि तीरादिवाचकत्वापत्तिः, उक्तयुक्तेः[3]। न च तादृशेच्छया भगवदुच्चरितत्वं शक्तिरपभ्रंशादयश्च नार्थप्रत्यायनेच्छया भगवदुच्चरिता इति तेषु नातिप्रसङ्ग इति मिश्रोक्तं युक्तमेवेति वाच्यम्, वेदस्थलाक्षणिकेषु शक्त्यापत्तेः। किञ्च, आधुनिकसंकेतितमैत्रादिपदेऽव्याप्तिः, 'द्वादशेऽह्नि पिता नाम कुर्यात्' इत्यादिवेदस्थनामपदस्य मैत्रादिपदपरत्वेऽपि देवदत्तेत्यादिस्वरूपाणां भगवदनुच्चारितत्वात्। न च नामपदेन सर्वेषामुच्चारितत्वमस्त्येवेति वाच्यम्, 'नापभ्रंशितवै' इत्यादिनाऽपभ्रंशत्वेनापभ्रंशानामपि तदुच्चारितत्वादिति चेत्? न; तत्पदबोध्यत्वप्रकारतानिरूपितविशेष्यतासम्बन्धेन भगवदिच्छावत्त्वमेव शक्तिः, तस्याश्च पदार्थस्मृत्यन्यथानुपपत्त्या कल्प्यमानसम्बन्धत्वस्यावश्यकत्वात् साधुसंस्कृते एव कल्पनम्, नापभ्रंशलाक्षणिकादौ, आरोपेणैवोपपत्तेः, वृत्त्यन्तरेण निर्वाहाच्च। किञ्च, यथा समवायैक्यमते[1] एकस्मिन्नेव रूपप्रतियोगिकत्वानुयोगिकत्वोभयसत्त्वेऽपि तन्निष्ठसामानाधिकरण्यमात्रं न त्ववच्छेद्यावच्छेदकभाव इति न वाय्वादेरूपादिमत्त्वम्, तथा गङ्गादिपदजन्यबोधविषयत्वप्रकारतानिरूपितविशेष्यताया ईश्वरेच्छाप्रतियोगिकत्वतीरानुयोगिकत्वोभयवत्त्वेऽपि न तयोरवच्छेद्यावच्छेदकभाव इति न तीरादेर्गङ्गादिपदवाच्यत्वम्। यद्वा, तीरादौ गङ्गादिपदजन्यबोधविषयतासत्त्वेऽपि तदंशे शुद्धविषयत्वत्वादिनैव तादृशविषयत्वादिप्रकारकत्वमीश्वरेच्छाया उपगम्यते, न तु गङ्गादिपदजन्यबोधविषयत्वत्वादिनापि तत्प्रकारकत्वम्, मानाभावात्।

---

1. अयं भावः—समवायस्य एकत्ववादिनां तार्किकाणां मते स्पर्शसमवायस्य रूपसमवायस्य चैक्यात् सम्बन्धसत्त्वस्य सम्बन्धिसत्त्वनियामकतया 'रूपवान् वायुः' इत्याकारकं प्रत्ययनं स्यात् इति रूपवान् वायुरिति प्रत्यक्षे रूपप्रतियोगिकस्य समवायसम्बन्धस्य सत्ता अपेक्ष्यते, न तु समवायमात्रस्य, एवं च वायौ समवायस्य सत्त्वेऽपि रूपप्रतियोगिकसमवायस्य अभावात् न दोषः। समवायस्य नानात्ववादिनां मते तु दोषलेशोऽपि नास्ति।

---

१. ख. सन्मात्रविषकेच्छेति। २. ख. नास्ति। ३. ख. नास्ति।

तदनभ्युपगमेऽपि तस्याः सर्वविषयत्वा[1]व्याघातात्। न च तथा सति बोधांशे गङ्गादिपदजन्यतानवगाहितया सर्वविषयकत्वानुपपत्तिः, तीरादिविशेष्यता-निरूपितप्रकारतावच्छेदकघटकतया तदनवगाहित्वेऽपि बोधांशे स्वातन्त्र्येण तदवगाहि [तया सर्वविषयकत्वान] त्वोपगमात्। एवञ्च तत्पदजन्यबोधविषयता-त्वावच्छिन्नप्रकारतानिरूपितविशेष्यतासम्बन्धेनेश्वरेच्छावत्त्वस्य ईश्वरेच्छा-निरूपिततादृशविशेष्यतावत्त्वस्य[2] वा तत्पदशक्यत्वरूपस्य संस्कृतनिरूपितस्यैव प्रवाहादावेव च स्वीकारेण नातिप्रसङ्गः। न च[1] विनिगमनाविरहः, प्रसिद्धत्वादेः सर्वदेशीयशिष्टपरिगृहीतत्वादेश्च विनिगमकस्य सम्भवात्। न चैवमपीश्वरेच्छायाः शक्तित्वे ईश्वरमविदुषां[2] बोधानापत्तिः, संकेतत्वेनैव तस्याः शाब्दबोधोपयोगित्वे क्षत्यभावात्। अत एवापभ्रंशादपि शाब्दबोधः, आधुनिकसंकेतस्य सत्त्वात्। न च ईश्वरसंकेतस्यापि गृहीतस्यैव तत्त्वं वाच्यम्, अन्यथा व्युत्पन्नानां बोधापत्तेः, तद्ग्रहश्चास्मदादिव्यवहारादित्यावश्यकत्वादस्मदाद्युपदेशरूपसंकेत एव शक्ति-रस्तु, किमीश्वरसंकेतकल्पनयेति वाच्यम्, एकार्थनिरूपितैकपदनिष्ठा नाना-पुरुषीया नाना संकेता विनिगमनाविरहेण तावतां शक्तित्वकल्पनापेक्षयैकस्मिन्नी-श्वरसंकेत एव तत्त्वकल्पनस्योचितत्वात्। सृष्ट्यादिव्यवहारे भगवद्व्यवहारस्यैव [3]शक्तिग्राहकत्वेनावश्यकतया तत्संकेत एव शक्तित्वकल्पनस्य युक्तत्वाच्च, नियत-शक्तिसाधुत्वानुरोधेन तस्यैव तत्त्वकल्पनाच्च। तादृशेश्वरसंकेतितत्वञ्च साधुत्वम्। तत्परिच्छेदकञ्च व्याकरणकोशादिकम्[3]; अतो नापभ्रंशानां साधुत्वम्। तज्ज्ञानञ्च शाब्दबोधे कारणमतः 'ग्राम ग्राम' इत्यादितो न बोधः। लाक्षणिकानामपि क्वचिच्छक्तिसत्त्वादस्त्येव तत्त्वमित्याहुः।

ज्ञानप्रयत्नाभ्यां विनिगमनाविरहेण परिशेषे मानाभावात्, सर्वेषां तत्त्वे गौरवाच्च पदपदार्थयोः सम्बन्धान्तरमेव शक्तिः। सा च प्रागुक्तयुक्त्या संस्कृत एव, प्रवाहादिनिरूपितैवेति नापभ्रंशलाक्षणिकादीनां शक्तत्वम्।

---

1. एकतरपक्षपातिनी युक्तिर्विनिगमना। 2. मीमांसकानां बौद्धादीनां च।
3. आबिना शिष्टव्यवहारः।

---

१. ख. विषयत्वव्याघातात्। २. ख. 'विशेष्यतावत्त्वस्य वा' इत्यस्याग्रे 'यद्वा शक्तित्वेनैव तद्ग्रहकारणम्। अतिरिक्तशक्तिवादिमते तत्त्वेनैव तद्ग्रहात्' इत्यानुपूर्वीकः प्रकृतग्रन्थेनासम्बद्धः पाठो दृश्यते।

३. ख. 'शक्तिग्राहकत्वेन इत्यत आरभ्य 'तस्यैव' इत्येतत्पर्यन्तः पाठो नास्ति।

किञ्च, संस्कृतस्य सर्वदेश एकत्वाद्, भाषाणाञ्च प्रतिदेशं भिन्नत्वात् गौरवेण संस्कृतैः सह पर्यायतापत्त्या च न तासु शक्तिः। न च कल्प्यमानधर्मस्यापि ज्ञानादिभिर्विनिगमनाविरहतादवस्थ्यम्, कल्पनस्य वैयर्थ्यापत्त्योपजीव्यविरोधेन कल्प्यमानधर्मँस्तदनङ्गीकारात्।

यत्तु, ईश्वरसंकेतितत्वादिरूपं शक्तत्वमेव साधुत्वमित्युक्तम्। तत्, न; संकेतितत्वाद्यज्ञानेऽपि साधुत्वव्यवहारात्। समासादौ साधुशब्दे संकेतादिसत्त्वे तस्यैव शक्तित्वेन शक्तत्वापत्तेश्च, प्रकृतिप्रत्ययसमुदाये शक्त्यभावेन तस्यासाधुतापत्तेश्च। प्रत्येकशक्तिमादाय साधुत्वे च 'बाधते' इत्यादिवद् 'बाधति'इत्यस्यापि साधुत्वापत्तेः, द्योतकेषु निपातेष्वव्याप्तेश्च। औषसंदानिकी शक्तिरेव द्योतनेति चेत्, प्रोत्तरजित्वो-[द्यो]त्तरटत्वयोरविशेषेण विनिगमनाविरहाच्छक्ततापत्तौ व्यासज्यवृत्ति[1]शक्तौ विश्रान्त्या अट्द्विर्वचनाद्यव्यवस्थापत्तिः। एतेन 'वृत्तिमत्त्वं तत्' इत्यादि परास्तम्, समासाद्यव्यापनात्। न च जातिविशेषस्तत्, कत्वादिना सङ्करापत्तेः। किन्तु व्याकरणनिष्पाद्यत्वम्।

तज्ज्ञानं शाब्दबोधे कारणमित्यप्ययुक्तम्, तदजानतामपि बोधात्। किन्त्वसाधुत्वनिश्चयः प्रतिबन्धकः। अत एव साधुतोऽप्यसाधुत्वनिश्चये न बोधः। न चैवमपभ्रंशानामशक्तत्वेनासाधुत्वेन च ततो बोधानापत्तिः, व्युत्पन्नस्य साधुस्मरणात्, अव्युत्पन्नस्य शक्तिभ्रमादेव ततो बोधात्।

व्युत्पन्नाश्च द्विविधा—तत्तद्वाचकसंस्कृतविशेषज्ञानवन्तः, तद्विकलाश्च। तत्राद्यानां साधुस्मरणं स्पष्टमेव। द्वितीयानां सर्वनामस्मृतेस्तदर्थज्ञापकत्वेन रूपेण साधुस्मृतेर्वा बोध इत्यूह्यम्। न च पामराणां [१]शक्त्यग्रहे कथं तद्भ्रमः, पूर्वपूर्वभ्रमादुत्तरोत्तरभ्रमोपपत्तेः। न चातिरिक्तशक्त्यङ्गीकारेऽपि किं सा सर्वेषां शब्दानां सर्वैरर्थैः समं स्वीक्रियते, उत, कस्यचित्केनचिदेव। नाद्यः, शब्दार्थव्यवस्थानुपपत्तेः। नान्त्यः, आर्यम्लेच्छानां नियमाभावप्रसङ्गात्। तथा हि—आर्या यवशब्दं दीर्घशूके प्रयुञ्जते, तमेव च बुध्यन्ते, म्लेच्छास्तु प्रियङ्गौ प्रयुञ्जते, तमेव च बुध्यन्ते; इत्येवं नियमो न स्यात्। नहि दीपो रूपप्रकाशनशक्तो रसमपि प्रकाशयतीति वाच्यम्, क्वचिच्छब्दस्य संकेतादपि बोधकत्वेन दोषाभावात्। एवञ्च म्लेच्छानां संकेतादेव

1. अनेकाधिकरणवृत्तित्वं व्यासज्यवृत्तित्वम्।

१. ख. 'शक्तिग्रहे' इति पाठः, स च नितान्तं प्रकृतेऽपार्थकः।

बोध इति न दोषः । न च क्वचित्संकेतस्य, क्वचिच्छक्तेर्ज्ञानं कारणमिति व्यभिचारादेकस्यापि तत्त्वानापत्त्या; गौरवेण च लाघवात्संकेतज्ञानत्वेनैव हेतुतेति वाच्यम्, विनिगमनाविरहेणातिरिक्तपदार्थसिद्धेः प्रामाणिकत्वे तत्प्रयुक्तगौरवस्यादोषत्वात्, अव्यवहितोत्तरत्वादिनिवेशेन व्यभिचारस्याप्यभावात्, म्लेच्छानां शक्तिभ्रमेणैव बोधाच्चेति ।

नवीना वैयाकरणास्तु, गौरवान्नातिरिक्ततत्सिद्धिः, इच्छाविशेषणतया प्रथमोपस्थितत्वेन ज्ञानस्यैव शक्तित्वसम्भवेऽतिरिक्ततत्कल्पने मानाभावाच्च[1] । किञ्च, अतिरिक्तपदार्थस्याश्रयभेदेन विषयभेदेन च भिन्नत्वेनानन्तपदार्थकल्पनायां विपरीतगौरवापत्तेः । अन्यथा सर्वेभ्यः सर्वबोधापत्तिर्दुर्वारा । 'पटपदं घटत्वविशिष्टघटनिरूपितशक्तिमत्' इति व्यवहारापत्तेश्च । न च घटत्वविशिष्टघटनिरूपितत्वविशिष्टशक्तेर्न पटपदे सत्त्वमिति वाच्यम्, विशिष्टस्यानतिरिक्तत्वात् । अत एव नव्यमते समवायनानात्वसंसिद्धिः ।

एतेन, तद्वाचकत्वं तद्विषयकशाब्दधीजनकतावच्छेदकधर्मवत्त्वम् । स च धर्मो वह्न्यादौ दाहाद्यनुकूलशक्तिवत् पदार्थान्तरमेव । तथाहि—तृणारणिमणीनां वह्नित्वावच्छिन्नं प्रति कारणत्वे व्यभिचारात्, जन्यतावच्छेदकतया वह्निनिष्ठवैजात्यत्रयमभ्युपगम्य कार्यकारणभावत्रयाभ्युपगमे गौरवात्, एकातिरिक्ता वह्निकारणतावच्छेदिका शक्तिस्तृणादौ यथा स्वीक्रियते तथेहापि नानापर्यायैरेकार्थबोधनात् तेषां तदर्थबोधत्वावच्छिन्नं प्रति कारणत्वे व्यभिचारात्, अव्यवहितोत्तरत्वसम्बन्धेन [1]तत्तत्कारणवैशिष्ट्यनिवेशे गौरवात् सकलपर्यायेष्वेकाऽतिरिक्ततदर्थबोधकारणतावच्छेदकशक्तिसिद्धिः ।

इयांस्तु विशेषः—दाहाद्यनुकूलशक्तेः स्वरूपसत्या एवोपयोगः, अस्यास्तु ज्ञाताया एवेति तज्ज्ञाननिष्ठशक्त्यैव तद्वाचकत्वव्यवहारान्नातीतानागतपदादौ दोष इति मीमांसकमतमप्यपास्तम् ।

---

1. ज्ञानजन्या भवेदिच्छा हीच्छाजन्या कृतिर्भवेत् ।
कृतिजन्या भवेच्चेष्टा चेष्टाजन्यं भवेत् फलम् ॥
इति क्रमदर्शनाद् ज्ञानस्य प्राथम्यं सिद्धम् ।

---

१. ख. 'तत्तत्कारणवैशिष्ट्यनिवेशे गौरवात् सकलपर्यायेष्वेकाऽतिरिक्ततदर्थबोधः' इति पाठस्त्रुटितः ।

किञ्च, लाक्षणिकस्यापि शाब्दबोधजनकत्वेन तत्रापि तादृशधर्मकल्पनापत्तौ तस्यापि शक्तत्वापत्तिः। न च लाक्षणिकं नानुभावकम्, किन्तु लाक्षणिकपदघटित-वाक्ये तद्घटकार्थान्तरवाचकमेव पदं स्वार्थस्येव तदन्वयप्रतियोगिलक्ष्यार्थस्याप्यनुभावकम्, अतो न दोष इति वाच्यम्, तर्हि घोषादिपदस्य गङ्गातीरादिरूपार्थानुभावकतावच्छेदकशक्तिमत्त्वेन तद्वाचकतापत्तेः। शक्तपदाघटितवाक्यस्यानुभावकतानापत्तेः[1]श्च। न च लक्ष्यार्थस्य न शाब्दबोधे प्रवेशः, अपि तु स्मृतस्य तस्य समभिव्याहृतपदार्थेऽसंसर्गाग्रहमात्रम्, अतो न दोष इति वाच्यम्, सर्वत्रैवमेवापत्तौ शाब्दबोधोच्छेदापत्तेः, लक्ष्यार्थोपरागेण 'शाब्दयामि' इत्यनुव्यवसायानापत्तेश्च, विशिष्य तत्पदार्थान्वितत्तत्तदर्थबोधे तत्तत्पदसाकाङ्क्षततत्पदज्ञानत्वेनावश्यक्लृप्तकारणतयैवोपपत्तौ तद्विषयकशाब्दत्वावच्छिन्नं प्रति शक्तिपुरस्कारेण [२]यत्किञ्चिद्वाचकपदज्ञानस्य हेतुत्वे मानाभावाच्च। तस्माल्लाक्षणिकमप्यनुभावकमेव। किञ्च, तृणादीनामेकशक्तिमत्त्वेन हेतुत्वेऽरणिसम्बन्धसत्त्वे फूत्कारसत्त्वे मन्थनासत्त्वे वह्नित्वावच्छिन्नोत्पत्त्यापत्तेः। तादृशजातित्रयमभ्युपेत्य प्रत्येकं कार्यकारणभावत्रये तु तृणत्वावच्छिन्नेन फलजनने एव फूत्कारस्य सहकारित्वाभ्युपगमान्न दोषः। एवं दार्ष्टान्तिकेऽपि घटपदीयशक्तिग्रहे कुम्भपदादगृहीतशक्तिकादपि बोधापत्तिः।

यदि तु, 'शक्तिमत्त्वेन गृहीततत्तत्पदज्ञानत्वेन हेतुता इत्युच्यते, तर्हि, अनन्तकार्यकारणभावापत्तिः, व्यभिचारवारणाय [1]यत्नश्चावश्यक इत्यन्यत्र विस्तरः।

न च तर्हीश्वरज्ञानमेव तथाऽस्तु, एकस्यैव भगवज्ज्ञानस्य सर्वविषयकत्वेन, शब्दार्थव्यवस्थानुपपत्तेः। प्रागुक्तरीत्या वारणन्तु न युक्तिसहम्, प्रसिद्धेरनियतत्वात्, लाक्षणिकेषु सर्वदेशशिष्टपरिगृहीतत्वाच्च, तत्तद्देशनियतसंस्कृतेषु सर्वदेशशिष्टपरिगृहीतत्वाभावेन शक्तिसिद्ध्यनापत्तेश्च। किञ्च, ज्ञानस्य शक्तित्वे बोधकत्वविशेषप्रकारकज्ञानत्वेन हेतुत्वं वाच्यम्, तदपेक्षया बोधकत्वज्ञानत्वेन हेतुत्वे लाघवात्, लौकिकानां गवादिपदेभ्यस्तादृशे ज्ञानग्रहाभावेऽप्यर्थशाब्द-

1. घटपदश्रवणाव्यवहितोत्तरजायमानकम्बुग्रीवादिमदर्थं प्रति घटपदस्य कारणता, कलशपदश्रवणाव्यवहितोत्तरजायमानकम्बुग्रीवादिमर्थं प्रति कलशपदस्य कारणता, इत्याकारकाव्यवहितोत्तरत्वनिवेशरूपः।

१. ख. अनुभावकतापत्तेश्च। २. ख. तद्वाचकपदज्ञानस्य।

धीजनकत्वग्रहानन्तरमेव बोधाच्च तद्विषयकबोधजनकत्वमेव शक्तिः[1]। न चाधुनिकदेवदत्तादिपदे संकेतज्ञानादेव बोधक एतत्कारणताया व्यभिचारः, विशेषणतया तच्छाब्दधीजनकत्वस्यापि तत्रावगाहनेनादोषात्। न च स्वातन्त्र्येण तज्ज्ञानमावश्यकम्, अन्यथा 'नेदं तद्धीजनकम्' इति जानतः, 'अस्माच्छब्दादयमर्थो बुद्धोऽनेन' इति जानतस्तद्बोधापत्तेरिति वाच्यम्, तत्र बाधेन तद्धीजनकत्वस्यानवगाहनात्। अन्यथा 'नेदं रजतम्' इति जानतो भ्रान्तिज्ञस्य पुरोवर्तिनि तुल्ययुक्त्या रजतत्वभाने भ्रान्तत्वापत्तेः। संकेतज्ञानाद् बोधस्थलेऽपि कार्यकारणभावलाघवानुरोधेन मानसस्य तद्धीजनकत्वज्ञानस्य कल्पनान्न दोष इत्यपरे।

न च जनकत्वम् अनन्यथासिद्धत्वे सति पूर्ववर्तित्वम्। अन्यथासिद्धत्वञ्च—अवश्यकल्प्यपूर्ववर्तिन एव कार्यसम्भवे तत्सहचरितत्वम्। तेन दण्डरूपरासभादीनां न कारणत्वम्। नियतत्वांशनिवेशे तु न फलम्, तद्व्यावर्त्यस्य रासभादेरन्यथासिद्धत्वेनैव वारणात्। अन्वयव्यतिरेकौ चास्य ग्राहकौ, व्यभिचारज्ञाने सति अन्वयव्यतिरेकाग्रहणप्रयुक्तकारणत्वाग्रह इति तस्यानेकपदार्थघटितस्य कारणतावच्छेदकत्वे गौरवमिति वाच्यम्, तवापीच्छाविशेषणतया तस्य प्रविष्टत्वेन गौरवस्य तुल्यत्वात्, जनकत्वस्य अखण्डोपाधिरूपस्य स्वीकाराच्च[2], शब्दत्वसमानाधिकरणजनकतासम्बन्धेन बोधस्यैव शक्तित्वाच्च। पूर्वोक्तसम्बन्धेन शक्तिमान् शक्त इत्युच्यते, पूर्वोक्तसम्बन्धावच्छिन्नबोधविषयः शक्य इत्युच्यते। तस्य च तत्तत्पदार्थविषयस्य प्रतिपदं भिन्नस्य क्लृप्तस्यैव शक्तित्वं कल्प्यत इति न किञ्चिन्मे कल्प्यम्। तव तु धर्मधर्मिणोर्द्वयोरपि कल्प्यत्वाद् गौरवं स्पष्टमेव। कारणतावच्छेदकभेदात् तस्य भिन्नत्व आवश्यके लाघवात् कारणतावच्छेदकधर्मस्वरूपैव कारणता। न चैवं सत्यभेदे अवच्छेद्यावच्छेदकभावानुपपत्तिः, एकरूपेण तदनुपपत्तावपि कारणतात्वेनावच्छेद्यत्वस्य स्वरूपतोऽवच्छेदकत्वस्य चाभ्युपगमे क्षत्यभावात्। कारणतात्वस्यातिरिक्तस्य सर्वैरप्यङ्गीकारादिति मतेऽपि नास्माकं क्षतिः, कारणतावच्छेदकधर्मस्य यत्कारणतात्वेन ज्ञानं तदेव शक्तिज्ञानमिति स्वीकारात्।

---

१. ख. 'न च पदस्यार्थधीजनकत्वमर्थेन सम्बन्धं विनाऽनुपपन्नमिति क्लृप्तत्वात् संकेतमेव तत्त्वेन कल्पयतीति वाच्यम्, दरडावपि घ, इत्यधिकः पाठः। स च प्रकृताननुकूलोऽस्पष्टाक्षरश्चेत्युपेक्षितः।

२. ख. 'शक्तित्वस्यैव कारणतावच्छेदकत्वाच्च। तत्त्वन्तु अखण्डोपाधिरूपम् इत्यधिकः पाठः।

एवञ्चेदृशजनकत्वस्यापभ्रंशेष्वपि सत्त्वेन तेषामपि शक्त्यव बोधकत्वम् ।

यत्तु, साधुस्मरणाच्छक्तिभ्रमाद्वा बोध इति तत्, न साधुस्मरणं विनापि व्युत्पन्नानां बोधानुभवात् । भवदुक्तसंस्कृतैरयमर्थो न बुद्धः, किन्त्वेतदुक्तभाषयेति व्युत्पन्नव्यवहाराच्च ।

तत्तत्पदपदार्थघटितेश्वरेच्छाया घटादिपदवृत्तित्वेन गृहीताया विभिन्नानुपूर्वीकत्वरूपविशेषदर्शनसत्त्वेन साधारणधर्मदर्शनाभावेन च गगरीपदादौ भ्रमानुपपत्तेश्च । अत एव तत्तत्पदार्थघटितव्याप्तेर्न भ्रम इति तत्र तत्र **नैयायिकाः**। अतिरिक्तपदार्थरूपाया अपि तस्या घटत्वविशिष्टघटादिरूपार्थबोधनिरूपिताया घटादिपदवृत्तितया गृहीतायाः प्रागुक्तयुक्त्यैव गगरीपदादौ एकत्वेन तत्र शक्तेर्भ्रमोऽनुपपन्नः[1] । किञ्च, विनिगमनाविरहादपि भाषायां शक्तिः सिध्यति । न च भाषाणामनेकत्वम्, संस्कृतवन्महाराष्ट्रभाषायाः सर्वदेश एकत्वेन तत्र शक्तेर्दुष्परिहरत्वात् । एतेन भाषान्तरैर्विनिगमनाविरहान्नैकत्र शक्तिरित्यपास्तम्, संस्कृतस्यापि प्रत्येकभाषाभिर्विनिगमनाविरहात् । न च सकलदेशशिष्टपरिगृहीतत्वं विनिगमकम्, एवं हि दुश्च्यवनशब्दस्य इन्द्रेऽनेडमूकादिशब्दानां मूकवधिरादौ शक्तिसिध्यनापत्तेः शिष्टैस्तदप्रयोगात् । अत एवाप्रयुक्तत्वदोषावसरे दुश्च्यवनादिशब्दानुदाजहार **प्रकाशकृत्** । न च कोषप्रामाण्येन तत्र तत्कल्पनम्, शक्तिभ्रमेण कोशकृतां तत्पाठ इत्यस्यापि कल्पयितुं शक्यत्वात्, वाचकस्य व्यञ्जकत्वे आलङ्कारिकाणां प्राकृतादिभाषोदाहरणबलेन तत्रापि शक्तिसिद्ध्यापत्तेश्च, तत्तद्देशीयशिष्टानां तत्तद्भाषासु जायमानस्य निर्विचिकित्सशक्तत्वप्रत्ययस्य बाधकं विना भ्रमत्वायोगाच्च, भ्रमस्यासंभवाच्च । किञ्च लाघवेन जनकत्वस्यैव शक्तित्वे सिद्धे तस्य चापभ्रंशेष्वपि सत्त्वात् शक्तत्वं दुर्वारम् । अपभ्रंशाद् बोधस्य त्वयाप्यङ्गीकारात् । शक्तिग्राहकव्यवहारादेस्तुल्यत्वाच्च । एतेन, 'साधुशब्दमात्रनिष्ठं बोधकत्वं शक्तिः' इत्यपास्तम् । न च तेष्वसाधुत्वनिश्चयेन ततो बोधानापत्तिः, असाधुत्वनिश्चयस्य तत्प्रतिबन्धकत्वादिति वाच्यम्, तत्सत्त्वेऽपि संस्कृतमविदुषां प्राकृतादितो बोधेन तस्याप्रतिबन्धकत्वात् । न च तत्र मानसो बोधः, अन्यत्रापि तथात्वापत्त्या

---

१. ख. 'यदि तु केनचित् गावीति बंढुवेत्यादिवत् गौरिति साधुशब्दस्मरणात् प्रयोज्यस्य बोधे घटस्थस्य गाविशब्दादे वारयबोध इति भ्रमेण शक्तिमपपादयितुं शक्यते तन्मूलन्यषामपि इत्युच्यते तथापि' इत्यधिकः पाठः ।

शब्दप्रामाण्योच्छेदप्रसङ्गात्। तत्सिद्धमपभ्रंशानां वाचकत्वम्, साधुत्वन्तु परं नास्ति।

ननु किमिदं साधुत्वम्, यदपभ्रंशेषु नास्ति। न च व्याकरणनिष्पाद्यत्वम्, अनुकरणे शब्दमात्रस्य व्याकरणनिष्पाद्यत्वेन सर्वत्र साधुत्वापत्तौ साध्वसाधुविभागोच्छेदापत्तेः। न च यः शब्दो यत्रार्थे व्याकरणव्युत्पन्नः, स तत्र साधुः, तद्व्युत्पन्नग्रहश्च क्वचित् स्पष्टोपलभ्यमानव्याकरणात्, क्वचिच्छिष्टप्रयोगकोशादिभिरनुमानात्। तस्य च बाहुलकादिना संग्रहः। यथा पुष्पवन्तपदं साहित्यावच्छिन्नोभयविषयकार्थबोध एव साधु; नैकतरार्थमात्रबोधे। यथा वा दारशब्दो बहुवचनान्त एव साधुः, नैकवचनान्तः। यथा वा वच्धातुः तिप्तसोः साधुः, नान्तिपर इति वाच्यम्, लाक्षणिकानां तत्तदर्थे व्युत्पादनविरहेण तदर्थे तेषां साधुत्वानापत्तेः, इति चेत्? न; शिष्टप्रयोगादिभिस्तत्तदर्थेऽपि तेषां व्याकरणव्युत्पाद्यत्वानुमानेनाक्षतेः। आधुनिकलाक्षणिकानान्त्वसाधुत्वमिष्टमेवेत्याहुः।

परे तु, शक्यसम्बन्धित्वेन गृहीतार्थबोधकत्वस्य लक्षणात्वेन शक्यार्थबाधज्ञानस्य लक्षणाजन्यबोधे कारणत्वेन च लक्षणास्थले प्रथमं शक्यबोधस्यावश्यकतया तमर्थमादाय साधुत्वोपपत्तेः। अत एव 'गङ्गायां घोषः' इत्यादौ गङ्गापदस्य तीरपरत्वेऽपि स्त्रीप्रत्ययादि संगच्छते, प्रथमोपस्थितान्तरङ्गार्थमादायैव शास्त्रप्रवृत्त्याऽन्तरङ्गत्वात् स्त्रीत्वादिप्रयुक्तकार्यस्यैव प्रवृत्तेरित्याहुः।

न चेदृशसाधुत्वस्य क्वोपयोगः? तज्ज्ञाने शाब्दहेतुतायाः, तदभावनिश्चये तत्प्रतिबन्धकताया वा; प्राङ्निरासादिति वाच्यम्, 'एकः शब्दः सम्यक् ज्ञातः, सुप्रयुक्तः, स्वर्गे लोके कामधुग्भवति, साधूनेव प्रयुञ्जीत' इत्यादिबोधितपुण्यजनने तदुपयोगात्। तत्तदर्थे व्याकरणबोधिततत्तद्व्युत्पत्तिज्ञानपूर्वकं साधुशब्दप्रयोगाद्धि धर्म इति सिद्धान्तः। एवञ्च पुण्यजनकतावच्छेदकं तत्तदर्थे व्याकरणव्युत्पाद्यत्वं साधुत्वमिति फलितम्। इदमेवाभ्युदययोग्यतापदेनोच्यते।

यद्वा, व्याकरणव्यङ्ग्यः शब्दनिष्ठः पुण्यजनकतावच्छेदको जातिविशेषः साधुत्वम्। अत एव 'यदिह परिनिष्ठतं तत्साध्वित्यर्थापत्तिलभ्यवाक्यात्साधुत्वबोधकं व्याकरणम्' इति तत्र तत्र भाष्याद्युक्तं संगच्छते। नहि व्याकरणव्युत्पाद्यत्वस्य साधुत्व इदं सङ्गच्छते, तस्य शास्त्रबोध्यत्वासंभवात्। एवञ्च व्याकरणव्युत्पत्तिज्ञानपूर्वकसाधुत्वेन ज्ञातसाधुशब्दप्रयोगाद्धर्म इति लभ्यते।

अन्यथा शास्त्रेण साधुत्वबोधनस्य वैयर्थ्यं स्पष्टमेव। इदमेवाभिप्रेत्य 'समानाया-मर्थावगतौ शब्दैश्चापशब्दैश्च शास्त्रेण धर्मनियमः'[म० भा० प० वा० ४, ४८] इत्यादि भाष्याद्युक्तं सङ्गच्छते। न च कत्वादिना सङ्करः, गुणगतजातौ तस्यादोषत्वात्। तथाहि—यस्य देवदत्तादेरनोष्ठ्या वर्णाः पूर्वं श्रुताः, तस्य कुड्यादिव्यवहितस्यौष्ठ्यवर्णेषु श्रुतेषु यदनुमानं जायते, तदोष्ठ्यानोष्ठ्यसाधारणतदनुमापकजात्यङ्गीकारे सत्येव घटते, न तु तत्तद्व्याप्यनानाजातिस्वीकारे, ओष्ठ्यमात्रवृत्तिजातेः[1] प्रागगृहीतत्वेनानुमितिसामग्रीवैकल्यात्।

वस्तुत उपाधिसङ्करवदेव जातिसङ्करोऽपि सर्वत्रास्तु, दूषकताबीजानिरुक्तेः[2] अखण्डोपाधिरेव वास्तु।

केचित्तु, यत्रार्थे योऽनादिप्रयुक्तः, स तत्रार्थे साधुः। न चेदमाधुनिकसंज्ञास्वव्याप्तम्,

व्यवहाराय नियमः सञ्ज्ञायास्सञ्ज्ञिनि क्वचित्।
नित्य एव तु सम्बन्धो डित्थादिषु गवादिवत्॥

इत्यादि गोत्रसंज्ञासूत्रस्थ[४।१।१६२]भाष्यादिसंमतपक्षे[1] तासामप्यनादित्वेन दोषाभावात्। स्वेच्छया सञ्ज्ञाः क्रियन्त इति पक्षे तु आधुनिकसञ्ज्ञानां साध्वसाधुबहिर्भाव एव। न चासाधुबहिर्भावः[3] कथम्, तत्तदर्थेऽनादिप्रयुक्ते शक्तिवैकल्यादिनाऽन्यथोच्चारणविषयत्वस्यैवासाधुत्वपदार्थत्वात्। अत एव सकलदेशशिष्टा यज्ञादिषु तत्तदाधुनिकसाङ्केतिकनामग्रहणे प्रत्यवायं न मन्यन्ते। अन्यथा 'साधूनेव प्रयुञ्जीत, न साधून्, इत्यादिनिषेधसद्भावात् तदापत्तिर्दुर्वारा। एषैव च देशभाषानुसारेण क्रियमाणानाम् 'कूची' 'मंची' 'अप्पि' 'कोंडा'इत्यादिनामधेयानां गतिः। ध्वनितं चेदम् "ऋलृक्" [मा० सू० २] सूत्रे भाष्य इत्याहुः।

नन्वेवं भाषाशब्दानामर्थवत्त्वात्प्रातिपदिकत्वे सुबुत्पत्तौ व्याकरणव्युत्पाद्यत्वात् साधुत्वप्रसङ्ग इति चेत्? न; लोकतोऽर्थबोधार्थं प्रयुक्ते शब्दे हि शास्त्र-

1. 'पौत्रप्रभृतेर्गोत्रसंज्ञायां यस्यापत्यविवक्षा, तस्य पौत्रप्रभृतेर्गोत्रसंज्ञा भवतीति वक्तव्यम्। गर्गोऽपि हि कञ्चित् प्रति पौत्रः कुशिकोऽपि तत्र माभूदिति। तर्हि वक्तव्यम्। न वक्तव्यम्। समर्थानां प्रथमाद् वा समर्थानां प्रथमस्य यदपत्यं पौत्रप्रभृतीति विज्ञायते' इति हि तत्रत्यं भाष्यम्।

१. ख. ओष्ठ्यसाधारणजातेः। २. ख. 'दूषकता……निरुक्तेः' नास्ति।
३. ख. 'न चासाधुबहिर्भावः' इति नास्ति।

प्रवृत्तिः। एतन्मूलकमेवानभिधानान्न भवतीत्यादिकम्। स्पष्टञ्चेदम् "सिद्धे शब्दार्थसम्बन्धे" [१।१।आ० १ ख० १] "लोकतोऽर्थप्रयुक्ते" [१।१।आ० -१ख० १] इत्यादिवार्त्तिकभाष्यादौ। नहि प्रकृतिप्रत्ययसमुदायरूपेण वचन्तीत्यादिवद् भाषाशब्दानां प्रयोगः शिष्टानाम्। किञ्चैवम्भाषाशब्देभ्यः सुबुत्पत्तौ भाषात्वस्यैव भङ्गापत्तिरितिदिक्।

तत्सिद्धं शब्दनिष्ठतत्तदर्थविषयकधीजनकत्वमेव शक्तिः। यथा चैवं सति न लक्षणाद्युच्छेदः, तथानुपदमेव निरूपयिष्याम इति प्राहुः।

नन्वगृहीतशक्तिकस्य बोधादर्शनात् प्राङ्निरूपितशक्तिग्रहो बोधे सहकारी वाच्यः, तत्र तद्ग्रहः कथमिति चेत्, प्रथमतः प्रयोज्यप्रयोजकवृद्धव्यवहारात् तद्ग्रहः, अनन्तरञ्च कोशव्याकरणाप्तवाक्यादितोऽपीत्यन्यत्र विस्तरः।

सा चेयं शक्तिस्त्रिधा—रूढिः, योगः, योगरूढिश्च। तत्र यत्पदे यदर्थनिरूपितं समुदायमात्रे बोधकत्वम्, तत्पदे सा तदर्थनिरूपिता रूढिः। समुदायमात्रेबोधकत्वञ्च तद्घटकावयवानां पृथक् स्वार्थानुपस्थापकत्वम्। यथा "मणिनूपुरादौ"। यत्पदीयावयवानामेव यदर्थबोधकत्वम्, सा योगशक्तिस्तदर्थनिरूपिता। यथा पाचकादिपदे। अश्वगन्धादिपदे त्वौषधिविशेषरूपार्थबोधनिरूपिता रूढिः। अश्वसम्बन्धवत्तया वाजिशालादिबोधे तु योगमात्रम्। इदमेव यौगिकरूढमित्युच्यते[1]। यत्र तद्घटकीभूतावयवबोध्यार्थान्वितार्थनिरूपितं समुदायनिष्ठबोधकत्वम्, सा योगरूढिः। यथा पङ्कजादिपदे। तत्र पङ्कजनिकर्तृत्वरूपावयवार्थान्वितपद्मत्वविशिष्टबोधकतायाः समुदाये स्वीकारात्। अन्यथा पङ्कजपदान्नियमेन तदुपस्थितिर्न स्यात्। न च तद्घटकावयवस्य डप्रत्ययरूपस्य पद्मत्वविशिष्टे लक्षणैवास्ताम्, युगपद् वृत्तिद्वयस्य 'गङ्गायां मीनघोषौ स्तः' इत्यादौ परैरपि स्वीकारात् किं समुदायशक्त्या? इति वाच्यम्, अवयवेषु विनिगमनाविरहात्। किञ्च, पङ्कजपदोत्तरविभक्त्यर्थस्य पद्मत्वविशिष्टेऽन्वयानापत्तिः, प्रत्ययानां हि प्रकृत्यर्थान्वितस्वार्थबोधकत्वम्, न संनिहितार्थगततद्बोधकत्वमिति प्रपञ्चयिष्यते। किञ्चैकाक्षरकोशावधृतशक्तिककखादिवर्णानां लक्षणयैवोपपत्तौ वकनखादिशब्दानामपि समुदायशक्तिर्विलीयेत। शिष्टानां निर्विचिकित्सशक्तत्वप्रत्ययात्तत्र तथेति चेत्, प्रकृतेऽपि तुल्यम्। न च कदाचिद्योगशक्त्या पङ्कजनि-

---

1. नैयायिकमते शक्तेश्चातुर्विध्यमनुश्रित्य चतुर्धा पदम्—यौगिकम् रूढम् योगरूढम् यौगिकरूढमिति, तदनेन प्रत्युक्तम्।

कर्तृत्वमात्रस्य, समुदायशक्त्या च पद्मत्वविशिष्टमात्रस्य; बोधापत्तिः, अश्वगन्धादिपदात् केवलौषधिविशेषकेवलवाजिशालादिबोधवदिति वाच्यम्, आनुभविक्याः शक्तेः फलबलेन विशिष्टबोधनिरूपिताया एव स्वीकृत्या प्रत्येकविषयान्वयबोधापत्त्यसम्भवात्।

यत्तु, 'रूढेः प्रतिबन्धकत्वान्न केवलयौगिकार्थबोधः' इति। तस्यायम्भावः—अवयवशक्त्या पङ्कजपदजन्यपद्मत्वानवच्छिन्नविशेष्यताकपङ्कजातत्वान्वयबोधे शक्तं पङ्कजपदमित्येवं रूढिज्ञानस्य विरोधित्वम्। अत एव तादृशरूढिज्ञानकाले कर्दमजादिशब्देभ्यः कुमुदबोधेऽपि पङ्कजपदाच्च शक्तिभ्रमादिभिः पङ्कजातत्वेन कुमुदबोधेऽपि कुमुद एव पद्मत्वेन रूढिभ्रमदशायां तेन रूपेण कुमुदबोधेऽपि च न दोष इति तत्, न; 'पद्मवत् कुमुदमपि समुदायशक्यम्' इति धीदशायां पङ्कजातं कुमुदमिति अन्वयबोधानापत्तेः।

किञ्च, अवयवशक्त्युपस्थितिदशायामपि केवलरूढ्यर्थबोधस्यानिवारितत्वेन तदानीमपि स्थलपद्मे 'पङ्कजम्' इति प्रयोगापत्तिः।

अथ 'दृष्ट्वा सहस्रनयनो न वृषापि तृप्तः' इत्यत्र वृषपदस्य पौनरुक्त्यापत्तिः, सहस्रनयनपदेनैव योगरूढेन तेन रूपेणापि बोधात्। 'कह्लारकैरवमुखेष्वपि पङ्कजेषु' इत्यादौ कुमुदादिविशेष्यकपङ्कजनिकर्तृत्वबोधानापत्तिः। 'भूमौ पङ्कजमुत्पन्नम्' इत्यादौ केवलरूढ्यर्थस्य च बोधानापत्तिरिति चेत्; अत्राहुः—तत्तत्तात्पर्यग्रहस्य तत्तत्पदसमभिव्याहारस्य वा तत्तद्रूढ्यर्थयोगार्थबोधे प्रतिबन्धकत्वस्वीकारात्; तत्तत्समभिव्याहारस्य केवलतत्तदर्थबोधे कारणत्वस्वीकाराद् वा न दोषः। न चैवमपि 'सहस्रनयनो वृषा' इत्यत्र पौनरुक्त्यनुद्धारः, एकेनैव शक्तिभ्रामुभयार्थबोधसम्भवादिति वाच्यम्, एवं हि सहस्रनयनत्वस्य रूढ्यर्थे विशेषणतयोद्देश्यस्यावलोकनप्रकर्षस्य पङ्कजाक्षीत्यादौ पङ्कजनिकर्तृत्वप्रतीतिकृतनिन्दाया इवाप्रतीत्यापत्तेः। एवञ्च प्राधान्येन सहस्रनयनत्वप्रतीत्यर्थं तथोक्तिरिति न दोषः। स्थितस्येयं गतिः। यत्र तु केवलयोगरूढस्यैव प्रयोगः, प्रकरणादितस्तादृशातिशयादिप्रतीतिश्च, तत्र पर्यायान्तरानुपादानपूर्वकं तत्प्रयोगसामर्थ्येन तदवगतिर्बोध्या। अत एव पङ्कजाक्षीत्यादौ निन्दाप्रतीतिर्नापाद्या, उपमानत्वेन प्रसिद्धत्वादित्याहुः।

'अन्यतरार्थमात्रपरत्वे लक्षणा' इत्यपि **कश्चित्**।

सा चेयं शक्तिः संयोगादिभिर्नानार्थशब्देषु नियम्यते। यथा 'सशङ्खचक्रो हरिः' इत्यादौ शङ्खचक्रसंयोगाद्धरिशब्दस्य विष्णौ।' तत्र नियमनं नाम उपस्थितयोर्द्वयोर्द्वयोरर्थयोरेकतरमात्रार्थविषयकतात्पर्यनिर्णयद्वारा तन्मात्रार्थविषयकशाब्दबोधजननम्, नानार्थशब्दजशाब्दबोधे तात्पर्यनिर्णयस्य हेतुत्वादित्येके।

प्रकरणादेरपरार्थोपस्थितिप्रतिबन्धकतेति तु **कश्चित्**।

अपरे तु, नियन्त्रणं नाम अपरार्थस्य प्रथमतः शाब्दबोधजननम्, तदनन्तरमस्यापि। न च द्वयोर्बोधे तात्पर्यज्ञानस्य कुत्रोपयोगः, 'अस्मिन्नर्थेऽयं शब्दः प्रमाणम्, अयमर्थः प्रमाणवेद्यः' इति निर्णयद्वारा प्रवृत्तौ तदुपयोगः, न तु शाब्दबोध इति गृहाण। अत एवास्मादर्थबोधद्वयं जायते, वक्तुः परं क्व तात्पर्यमिति न विद्म इत्यनुभवः।

एतेन प्रकरणादिवशात् प्राकरणिकेऽर्थे तात्पर्यविषयतया निर्णीतेऽतात्पर्यविषयीभूतद्वितीयार्थबोधो व्यञ्जनयेत्यपास्तम्, प्रागुक्तरीत्या शक्त्यैवोपपत्तौ तत्र व्यञ्जनाकल्पनस्य गुरुत्वात्। यत्र तु द्वितीयार्थस्य नैव बोधः, तत्र तदीयशक्त्यंशेऽनुद्बुद्धसंस्कारत्वान्न दोषः। एतेन 'सुरभिमांसं भुङ्क्ते' इत्यादेः श्यालकादिप्रयुक्तादेव द्वितीयाश्लीलार्थबोधः, न पुत्रादिप्रयुक्तादिति व्यवस्थाप्युपपन्ना।

किञ्च, व्यञ्जनावादिनापि सर्वस्य द्वितीयार्थबोधवारणाय वक्तृबोद्धव्यादिवैशिष्ट्यप्रतिभादीनामवश्यं व्यङ्ग्यप्रतिभाहेतुत्वमङ्गीकार्यम्, अस्माभिश्च तेषां द्वितीयार्थशक्त्युद्बोधकत्वमङ्गीकार्यमिति प्राहुः।

इति शक्तिनिरूपणम्।

अथ लक्षणानिरूपणम्

ननु वैयाकरणानां बोधकत्वस्यैव शक्तित्वे गङ्गादिपदे तीरादिबोधकताया अपि सत्त्वेन शक्त्यैवोपपत्तौ लक्षणाद्युच्छेद इति चेत्, अत्राहुः—यस्य [स्थितित्वेनैव हेतुत्वान्न कार्यकारण[1]]पदार्थस्य स्वविषयकबोधजनकत्वज्ञानाद् बोधस्तदर्थनिरूपितबोधकत्वं शक्तिः। यस्य पदार्थस्य स्वसम्बन्धिबोधजनकत्वज्ञानाद् बोधः, तत्पदार्थनिरूपिततादृशबोधकत्वं लक्षणेति व्यवस्थाङ्गीकारात्[2]। नहि गङ्गादौ तीरादिबोधकत्वसत्त्वेऽपि तज्ज्ञानाद् बोधः, किन्तु स्वसम्बन्धिप्रवाहबोधकत्वज्ञानादेवेति।

अपरे तु, गङ्गादिपदजन्यतीराद्यर्थशाब्दबोधे स्वसम्बन्धिप्रवाहादिबोधकत्वज्ञानस्य कारणत्वापेक्षया लाघवेन स्वबोधकत्वज्ञानस्यैव कारणत्वं युक्तम्।

---

1. कोष्ठान्तर्गतः पाठः प्रकृताननुकूलः।

2. अत्र नैयायिकाः—शक्यसम्बन्धो लक्षणा। लक्षणायां च तात्पर्यानुपपत्तिरेव बीजम्। स्वनये वाक्ये शक्तेरभावात् शक्यसम्बन्धरूपा लक्षणापि नास्ति। यत्र 'गभीरायां नद्यां घोषः' इत्युक्तम्, तत्र नदीपदस्य नदीतीरे लक्षणा, गभीरपदार्थस्य नद्या सहाभेदेनान्वयः, क्वचिदेकदेशान्वयस्यापि स्वीकृतत्वात्। यदि तत्रैकदेशान्वयो न स्वीक्रियते, तदा नदीपदस्य गभीरनदीतीरे लक्षणा, गभीरपदं तात्पर्यग्राहकम्। सा च लक्षणा तात्स्थ्यादिनिमित्तिका।

मीमांसकास्तु—वाक्यशक्त्यस्वीकारेण 'गभीरायां नद्यां घोषः' इत्याद्यनुरोधेन 'स्वबोध्यसम्बन्धो लक्षणा'। गभीरायां नद्यामिति वाक्यस्य बोध्या गभीराभिन्ना नदी, तत्सम्बन्धस्तीरे इति वाक्येऽपि लक्षणा। अत्र मते वेदस्यापौरुषेयत्वेन कस्यापि तात्पर्यस्याभावात् 'यजमानः प्रस्तरः, आयुर्वै घृतम्' इत्यादौ अन्वयानुपपत्तिरेव लक्षणाबीजम्।

वैयाकरणेषु—कौण्डभट्टस्य लक्षणाऽसम्मतैव। लक्षणास्वीकारे वृत्तिद्वयमवच्छेदकद्वयञ्च कल्पनीयं भवति। शाब्दबोधे लक्षणाजन्योपस्थितेः पृथक् कारणत्वं वक्तव्यम्। एवं पदार्थोपस्थितावपि तज्ज्ञानस्य हेतुत्वं स्वीकार्यम्, तथा च गौरवम्; अतो गङ्गापदात्तीरप्रत्ययार्थं गङ्गापद एव शक्तिद्वयं स्वीकार्यम्-एका प्रसिद्धा; अपरा अप्रसिद्धा। एवञ्च लक्षणया प्रतिपिपादयिषितस्वार्थस्याऽप्रसिद्धशक्त्यैव बोधनिर्वाहे लक्षणा पृथङ्नाङ्गीकार्या इति परमलघुमञ्जूषाकाराः।

गङ्गापदं तीरबोधकमिति ज्ञाने सति विनापि तज्ज्ञानं तीरोपस्थितितच्छाब्दबोधयोः सर्वानुभवसिद्धत्वेन तज्ज्ञानकारणताया आवश्यकत्वाच्च, शक्तिभ्रमेण लाक्षणिकानां बोधकत्वस्य त्वयाप्यङ्गीकाराच्च ।

न च यत्र स्वसम्बन्धिप्रवाहादिबोधकत्वज्ञानादेव तीराद्युपस्थितिशाब्दबोधौ, तदनुरोधेन तज्ज्ञानकार्यकारणभावोऽप्यावश्यक इति वाच्यम्, गङ्गापदात् तीरं बोद्धव्यमिति वक्तृतात्पर्यज्ञानस्य लाक्षणिकबोधे कारणतायावश्यकत्वेन तज्ज्ञाने गङ्गापदीयतीरबोधकत्वस्यापि विषयत्वेन मदुक्तकारणस्यापि सत्त्वाददोषः ।

किञ्च, लाघवेन स्वबोधकत्वज्ञानस्य कारणत्वे सिद्धे तत्र व्यभिचारवारणाय पूर्वोक्तस्थले मानसस्वबोधकत्वज्ञानकल्पनान्न दोषः । न च ज्ञानव्यक्त्यन्तरकल्पना दोषः, फलमुखत्वात् ।

किञ्च, प्रत्यक्षादिजन्योपस्थितेः शब्दबोधानङ्गत्वात्तत्तच्छाब्दबुद्धित्वावच्छिन्नं प्रति शक्तिजन्योपस्थितेर्लक्षणाजन्योपस्थितेश्च कारणत्वे कार्यकारणभावद्वयापत्तौ गौरवापत्तेः । मम तु बोधजनकत्वज्ञानजन्योपस्थितित्वेनैव कारणतेत्येक एव स[1] इति लाघवम् । एवं पदार्थोपस्थितिं प्रत्यपि शक्तिज्ञानत्वेन लक्षणाज्ञानत्वेन च हेतुता वाच्येति गौरवान्तरम्[2] ।

किञ्च, कार्यकारणभावे व्यभिचारवारणाय कार्यतावच्छेदककोटावव्यवहितोत्तरत्वसम्बन्धेन तत्तदुपस्थितिवैशिष्ट्यस्य निवेशे सुतरां गौरवम् । न चोपस्थितिं प्रति वृत्तिज्ञानत्वेन शाब्दबोधं प्रति च तज्ज्ञानजन्योपस्थितित्वेनैव हेतुत्वान्न कार्यकारणभावद्वयकल्पनमिति वाच्यम्, शक्तिलक्षणान्यतरत्वरूपस्य शाब्दहेतुपदार्थोपस्थित्यनुकूलपदपदार्थसम्बन्धत्वरूपस्य वा वृत्तित्वस्य कारणताच्छेदकत्वापेक्षयाऽखण्डोपाधिरूपस्य बोधजनकत्वस्य तत्त्वे लाघवात् । एतेन तीराद्यशक्तत्वे सति तीरादिसम्बन्धिशक्तत्वं तीरलक्षणेत्यादिकमपास्तमिति प्राहुः ।

यत्तु, शक्यादशक्योपस्थितिर्लक्षणा । सा च स्वरूपसती हेतुः । एकसम्बन्धिज्ञानविधया पदजशक्तिप्रयोज्यशक्यज्ञानजन्याशक्यतानवच्छेदकावच्छिन्नोपस्थितिरिति हि तदर्थः । गङ्गापदेन प्रवाहोपस्थितौ मुख्यार्थबाधसहकृतैकसम्बन्धिज्ञानात् प्राग् गृहीतसम्बन्धकस्योपस्थितस्य तीरादेः शाब्दबोधे भानम् । शाब्दबोधे च पदप्रयोज्यैवोपस्थितिस्तन्त्रम्, न तु पदजन्यैवेति नियम इति न दोषः ।

---

1. कार्यकारणभाव इत्यर्थः ।　　2. अन्यमते इति शेषः ।

आकाशपदशक्यस्याप्याकाशस्य यदाकाशपदादेव समवायसम्बन्धेनोपस्थिति-स्तत्सम्बन्धाच्चान्योपस्थितिः, तस्य शाब्देऽन्वयवारणाय शक्तिप्रयोज्येति। घटरूपार्थदर्शनेन शक्तिसम्बन्धादुपस्थितघटपदात् समवायेनोपस्थिताकाशस्य शाब्देऽन्वयवारणाय शक्यज्ञानजन्येति। नानार्थस्थल एकार्थसम्बन्धेन स्मृतापरपदार्थस्य शाब्देऽन्वयवारणायाशक्येति। सामान्यशब्दस्य विशेषे लक्षणास्थले उपस्थिति-विषयस्य विशेषप्रकारावच्छिन्नस्यार्थस्य शक्यार्थभिन्नत्वाभावात् तत्सङ्ग्रहाय शक्यतानवच्छेदकावच्छिन्नेति तदर्थकरणम्। एवञ्च शक्यतानवच्छेदकविशेष-रूपावच्छिन्नत्वात् तत्सङ्ग्रहः। न चैवं तादृशोपस्थितेः स्वरूपतो न मुख्यार्थबाधा-धीनत्वम्, स्वन्धिज्ञानादिरूपोद्बोधकसत्त्वे तमनपेक्ष्यैव संस्कारेण मुख्यार्थस्येव तस्याप्युपस्थितेः सम्भवात्।

तथा च लक्षणायां मुख्यार्थबाधाधीनत्वव्यवहारानुपपत्तिरिति वाच्यम्, तज्जन्यशाब्दानुभवस्य तदधीनत्वेन तस्या अपि तत्त्वव्यवहारात्। अत एव 'वर्णसमुदायशक्तं पदपदम्' इति जानतः पदपदाच्छक्त्योपस्थितवर्णसमुदायेन स्वाश्रयतयोपस्थिताकाशादेरन्वयबोधापत्तिरिति निरस्तम्, मुख्यार्थबाधज्ञाना-भावात्। तत्सत्त्वे सति च तात्पर्ये इष्टापत्तेः। शाब्दकारणतावच्छेदकं च प्रागुक्त-तादृशोपस्थितित्वमेवेत्याहुः। तत्, न; एतदपेक्षया बोधकत्वज्ञानस्य हेतुत्वे लाघवात्।

किञ्च, शाब्दबोधहेतुपदार्थोपस्थित्यनुकूलपदपदार्थसम्बन्धरूपवृत्तिभूत-लक्षणाया नेदं लक्षणं योग्यम्। उपस्थितिहेतोर्हि वृत्तित्वम्, न तूपस्थितेरेव। किञ्चैवम् 'लाक्षणिकं पदम्' इति व्यवहारस्य गौणत्वापत्तिरिति दिक्। तस्माद् अप्रसिद्धशक्यसम्बन्धित्वेन गृहीतार्थविषयबोधजनकत्वं लक्षणात्वेन व्यवह्रियते। प्रसिद्धार्थविषयञ्च तच्छक्तित्वेनेत्येव साम्प्रतम्। प्रसिद्धत्वञ्च प्रचुरप्रयोग-विषयत्वम्। तज्ज्ञानञ्च[1] शक्तिग्राहकव्यवहारात् क्वचित्, क्वचिद् व्याकरण-कोशादितः, क्वचिच्छिष्टप्रयोगादि[2]त्याद्यूह्यम्।

शक्त्यादिनियामकतया प्रसिद्ध्यादेस्तवाप्यावश्यकत्वात्। तत्र लक्षणा-ज्ञानजन्यशाब्दबोधेऽन्वयव्यतिरेकाभ्यां मुख्यार्थबाधज्ञानं कारणम्। मुख्यार्थ-

---

1. प्रसिद्धत्वज्ञानञ्च।
2. अन्यथा वदन्तीत्यस्य निवृत्तिः, पिक-नेम-तामरसादीनाञ्च सङ्ग्रहो न स्यात्।

बाधश्च समभिव्याहृतपदतात्पर्यविषये तात्पर्यविषयान्वये वा मुख्यार्थतावच्छेदक-रूपेण मुख्यार्थासंसर्गरूपः। तेन 'छत्रिणो यान्ति', 'कुन्तान् प्रवेशय', 'काकेभ्यो दधि रक्ष्यताम्' इत्यादौ छत्रिकुन्तकाकानां मुख्यार्थानां समभिव्याहृतक्रियासु कर्तृत्व-कर्मत्वाबाधत्वैरन्वयाबाधेऽपि तत्तात्पर्यविषयीभूतेषुच्छत्र्यच्छत्रिगमनभोजनार्थ-प्रवेशदध्युपघातकावधिकरक्षणेषु मुख्यार्थतावच्छेदकरूपेण तदन्वयबाधोऽस्त्येवेति न दोषः।

केचित्तु, लक्ष्यार्थतात्पर्यग्राहकतया तस्योपयोगः। तथा हि--समभिव्याहृत-पदार्थासंसृष्टमुख्यार्थकत्वेन भ्रमादिरूपदोषरहिताप्तपुरुषोच्चरितत्वविशिष्टेन मुख्यार्थपरत्वाभावानुमानपूर्वकं सामान्यतात्पर्यग्राहकसहकारेण तदन्यपरत्वग्रह-जननादित्याहुः।

एवं मुख्यार्थसम्बन्धज्ञानमपि तथा अन्वयव्यतिरेकाभ्यामेव रूढिप्रयोजना-न्यतरदपि तत्कारणं बोध्यम्, अनुभवबलात्।

नन्वेवं सर्वेषां पदानां नानार्थत्वादक्षादिपदवदर्थसन्देहः स्यात्। किञ्च, नानार्थजबोधे तात्पर्यज्ञानस्य कारणत्वावश्यकत्वेन 'गङ्गायां काष्ठमस्ति' इत्यादिवाक्यजप्रवाहबोधेऽपि तात्पर्यज्ञानस्य त्वन्मते कारणत्वकल्पने गौरवम्। संकेतशक्तिवादिनस्तु तन्नेति लाघवम्। अपि च, तात्पर्यस्य संकेतात्मकत्वेन संकेतज्ञानकार्यकारणभावोऽपि तवावश्यक इति चेत्, न; प्रसिद्धनानार्थविषयक-बोधजनकत्वस्यैव नानार्थत्वेनाक्षतेः। एतेन **'अन्याय्यश्चानेकार्थत्वम्'** इति न्यायविरोध इत्यपास्तम्। न चैवम् 'सर्वे सर्वार्थवाचकाः' इति वैयाकरणसिद्धान्त-विरोधः, सर्वबोधे स्वनिरूपितबोधकत्वज्ञानस्यैव हेतुत्वाभिप्रायेणौपचारिकतया व्यवहारादिति दिक्[1]।

सा द्विविधा—शुद्धा, गौणी च। सादृश्यातिरिक्तसम्बन्धेन शक्यसम्बन्ध्यर्थ-प्रतिपादिका शुद्धा। स्वनिरूपितसादृश्याधिकरणत्वसम्बन्धेन शक्यसम्बन्ध्यर्थप्रति-पादिका गौणी।

यत्तु, गौणी न लक्षणान्तर्गता, विशिष्टबुद्धियोग्यसम्बन्धे सत्येव लक्षणा-प्रवृत्तेः। न हि संयोगसम्बन्धेन 'दण्डी देवदत्तः' इतिवत् सादृश्यसम्बन्धेन

1. दिगर्थस्तु—योगिनामेव सर्वपदात् सर्वेषामर्थानां बोधः, न त्वस्मदादीनाम्ः, अतो नायं, पक्षो युक्त इति। स्पष्टञ्चैतल्लघुमञ्जूषायां लक्षणाप्रारम्भे।

'सिंहवान् देवदत्तः' इति भवतीति। तत्, न; विशिष्टबुद्ध्ययोग्यत्वेऽपि विपरीतलक्षणास्थले स्वनिरूपितविरोधाधिकरणत्वसम्बन्धेऽपि तस्याः क्लृप्तत्वात्।

ते च प्रत्येकं द्विविधे— अजहत्स्वार्था, जहत्स्वार्था च। शक्यार्थापरित्यागेनेतरार्थलक्षणमाद्या। शक्यार्थापरित्यागश्च शक्यार्थस्य येन केनापि रूपेण लक्ष्यार्थान्वयिनान्वयित्वम्। अतः 'छत्रिणो यान्ति', 'कुन्तान् प्रवेशय', 'काकेभ्यो दधि रक्ष्यताम्' इत्यादौ न दोषः, अच्छत्र्यादिसाधारणरूपेण च्छत्र्यादेः कुन्तवद्विशेषणतया कुन्तादेर्दध्युपघातकत्वादिना काकादेश्च लक्ष्यार्थान्वयिक्रियान्वयित्वात्। स्वार्थपरित्यागेनेतरार्थलक्षणं द्वितीया। अतः 'गां वाहीकं पश्य,' इत्यादौ न दोषः। अत्र गोसदृशे लक्षणायामपि न गोस्तदन्वयिदर्शनक्रियान्वयित्वम्। तत्र शुद्धा आद्या यथा 'शुक्लमानय' इत्यादौ गुणशक्तानां शुक्लादिपदानां तद्वति द्रव्ये।

सा द्वितीया यथा 'त्वचा ज्ञातम्'इत्यादौ त्वगादिशब्दानां त्वगिन्द्रिये। गौणी द्वितीया यथा--लवणत्ववाचिनो लावण्यशब्दस्य हृदयङ्गमत्वसादृश्याच्छोभाविशेषे। गौणी आद्या तु नास्त्येव, सादृश्यसम्बन्धेन लक्षणायां मुख्यार्थस्य लक्ष्यार्थान्वयिनानन्वयात्। गोवाहीकोभयपरे 'गाव एते समानीयन्ताम्'इत्यादौ गोवाहीकसमुदायश्छत्रिन्यायेन लक्ष्यते, न तु गोसदृशत्वेन, स्वस्मिन् भेदघटितस्वसादृश्याभावादिति प्राञ्चः[1]।

यत्तु, मुख्यार्थविशेषणिका लक्षणा अजहत्स्वार्था। सा च गौण्यपीति। तत्, न; 'चित्रगुः' इत्यादावपि परमते जहत्स्वार्थापत्तेः।

नव्यास्तु, यदा यत्किञ्चिद् गोसदृशत्वेन गोवाहीकसमुदायप्रतिपिपादयिषया 'गाव एते यान्ति'इति प्रयुक्तम्, तदा गौण्यप्याद्या दुर्वारैव। वस्तुतो रूपके भेदाघटितसादृश्यस्यैव सम्बन्धत्वादेर्वक्ष्यमाणतया सा दुर्वारैवेति **प्राहुः**।

प्रागुक्तोदाहरणादिगताश्च लक्षणा रूढिलक्षणात्वेन व्यवह्रियन्ते। रूढिः प्रसिद्धिः। न चैषामर्थानां प्रसिद्धत्वे शक्तिरेवास्तु, अश्वगन्धादिपदाना-

---

1. वैयाकरणनये सादृश्यं भेदघटितमेवेति न नियमः, 'नञिवयुक्तमन्यसदृशाधिकरणे तथाह्यर्थगतिः'' (परि० ३।७५) इति परिभाषायाम् 'अन्यसदृश' इति पदेन भेदाघटितस्यापि सादृश्यस्य सूचनात्। सादृश्यस्य भेदघटितत्वनियमाङ्गीकारे सदृशपदादेव भेदार्थलाभेऽन्यपदवैयर्थ्यापत्तिः।

मिवौषधिविशेषादाविति वाच्यम्, सप्रयोजनलक्षणास्थलीयलक्ष्यार्थापेक्षयाऽस्य प्रसिद्धत्वेऽपि तत्पदशक्यार्थान्तरापेक्षयाऽप्रसिद्धत्वस्यैव सत्त्वेनाक्षतेरित्याहुः। वस्तुतो येषामेकार्थसम्बन्ध्यपरार्थबोधकत्वम्[1], तदर्थबाधप्रतिसन्धानपूर्वकमेव तेषु प्रयोजनाभावे निरूढलक्षणेति व्यवहारः। अन्यत्र रूढिशक्तिरेव। एवञ्च यदि कुशलादिपदे मुख्यार्थबाधप्रतिसन्धानपूर्वकं दक्षबोधः प्रामाणिकानुभवसिद्धः, तदा लक्षणा, अन्यथा रूढिशक्तिरेवेति दिक्।

एवञ्च लक्षणा प्रकारान्तरेणापि द्विधा सम्पन्ना, रूढा प्रयोजनवती च। तत्र रूढोदाहृता। प्रयोजनवती शुद्धा अजहत्स्वार्था। यथा—'कुन्ताः प्रविशन्ति'। अत्र भीतिपलायमानवाक्ये कुन्तानां तात्पर्यविषयकुन्तिप्रवेशान्वयबाधात् कुन्तपदस्य तत्संयुक्तपुरुषे लक्षणा। लक्ष्येषु कुन्तगततैक्ष्ण्यप्रतीतिः प्रयोजनम्। पुरुषविशेषणतया कुन्तानां प्रवेशनक्रियान्वयः स्पष्ट एव। सा जहत्स्वार्था। यथा—'गङ्गायां घोषः' इत्यादौ। अत्र हि प्रवाहे घोषाधिकरणत्वबाधाद् गङ्गापदेन तीरं लक्ष्यते। न च प्रवाहस्य तदन्वयिनान्वयित्वम्। गङ्गागतशैत्यपावनत्वादिप्रतीतिश्च प्रयोजनम्।

एषा गौणी जहत्स्वार्था। यथा—'गौर्वाहीकः' इत्यादौ। अत्र वाहीके गोत्वबाधाद् गोपदेन गोसदृशो लक्ष्यते। सादृश्यातिशयमहिम्ना भिन्नधर्मप्रकारकोपस्थितावप्यभेदप्रतीतिः प्रयोजनम्। अत्र प्रयोजनभूताभेदप्रतीतिर्मानसी, [1]आहार्याभेदस्योपस्थितेरिति **केचित्**।

विषयविषयिपदाभ्यां तत्तद्धर्मप्रकारेण तयोरुपस्थितौ प्रसिद्धत्वादिना झटिति तत्सादृश्योपस्थितौ लक्षणया सदृशप्रकारकबोधे सादृश्यातिशयमहिम्ना गोत्ववाहीकत्वयोः सामानाधिकरण्यसम्भावनया जातस्यापि भेदज्ञानस्य तिरोधानेन बाधबुद्धेरभावेनानाहार्यमेवाभेदज्ञानम्। किञ्च, बोधज्ञानसत्त्वे 'बोधो भवतु' इतीच्छानुभवाभावाद् बोधस्यैवानापत्तिः।

इयांस्तु विशेषः—यत्र प्रसिद्धः साधारणधर्मः, तत्र तदुपादानं न कर्त्तव्यम्। यत्र त्वप्रसिद्धः, यथा—'सकलकलं पुरमेतज्जातं सुधांशुबिम्बमिव' इत्यादौ। तत्र तदुपादानं विना साधारणधर्मानुपस्थितेस्तदुपादानमावश्यकमित्यपरे।

---

1. बाधज्ञानसमकालिकेच्छाजन्यं ज्ञानमाहार्यज्ञानम्।

---

१. ख. 'अपरार्थ' इति नास्ति।

अभेदप्रतीतेर्वैयञ्जनिकत्ववादिनां त्वनाहार्यत्वं स्पष्टमेव, वैयञ्जनिके बोधे बाधबुद्धेरप्रतिबन्धकत्वात्। वस्तुतस्तु शब्दप्रयोज्ये बोधे बाधज्ञानं न प्रतिबन्धकम्, बाधनिश्चयादेः सत्त्वेऽपि 'अस्य क्षोणिपतेः परार्धपरया लक्षीकृताः सङ्ख्यया,' 'एष बन्ध्यासुतो याति' इत्यादितो वाच्यार्थबोधदर्शनात्। किञ्च, एवम् 'वह्निना सिञ्चति' इत्यतोऽपि बोधानापत्तौ तद्वाक्यप्रयोक्तुः 'अद्रवेण वह्निना सेकं कथं ब्रवीषि' इत्युपहासः श्रोतृभिः क्रियमाणोऽसङ्गतः स्यात्। एतदर्थकद्रविडभाषाश्रवणोत्तरं पाश्चात्यस्येव मूकतैव च परन्तस्य स्यात्।

तेनैकपदार्थेऽपरपदार्थस्य प्रकृतसंसर्गवत्त्वं योग्यता। 'देवदत्तो गौः' इत्यत्र देवदत्ते स्वामित्वसम्बन्धसत्त्वाद् योग्यतावारणाय प्रकृते तज्ज्ञानं च शाब्दबोधे कारणम्। यद्वा, एकपदार्थनिष्ठात्यन्ताभावप्रतियोगित्वरूपायोग्यतानिश्चयः शाब्दे प्रतिबन्धकः। स च न स्वातन्त्र्येण, अनुमित्यादिसाधारणक्लृप्तबाधबुद्धिप्रतिबन्ध्यप्रतिबन्धकभावेन निर्वाहादित्यपास्तम्। न चात्र शाब्दबोधः, किन्तु पदार्थोपस्थितिमात्रमिति वाच्यम्, अन्यत्रापि तथात्वापत्तौ[1] शब्दप्रामाण्योच्छेदप्रसङ्गात्। न च प्रवृत्तिं प्रति विशिष्टज्ञानस्य हेतुत्वानुरोधेन शाब्दविशिष्टज्ञानसिद्धिः, दुःखद्वेषेच्छासुखादावपि तद्रीत्या तद्धेतुत्वेन सत्यपि बाधनिश्चये मिथ्याभिशापगालिदानरूपादिकाव्य--'वह्निना सिञ्चति' इत्यादिवाक्यश्रवणजसुखदुःखो-[खेऽपि तद्रीत्या तद्धेतुत्त्वेन सत्यपि वा]पहासाद्यनुरोधेन तदावश्यकत्वात्। अन्यथाः व्युत्पन्नानां 'वह्निः करणत्वं सेकः' इत्याकारकवाक्यश्रवणोत्तरमपि तदापत्तिः, मुखत्वमाश्रयोऽभेदश्चन्द्रत्वमाश्रय इति वाक्यश्रवणोत्तरमपि 'मुखं चन्द्रः' इत्यादिवाक्यश्रवणोत्तरमिव चमत्कारापत्तिश्च। एतेनासंसर्गाग्रहमात्रेण तत्सिद्धिरित्यपास्तम्। किञ्च, असंसर्गाग्रहो नाम संसर्गाभावग्रहाभावः। तथा सति बाधज्ञानाभावेन विशिष्टबुद्ध्युदय एव स्यात्। न चैवम् 'वह्निना सिञ्च' इत्यादितो बोधे प्रवृत्तिरपि स्यात्। प्राक्तनबाधज्ञानेन जायमानज्ञानेऽप्रामाण्यशङ्काया जननात् तच्छून्यज्ञानस्यैव च प्रवृत्तावुपयोगित्वादक्षतेः। तदुक्तम्—'अत्यन्तासत्यपि ह्यर्थे ज्ञानं शब्दः करोति हि' इति। एवञ्च बाधबुद्धिप्रतिबन्ध्यतावच्छेदककोटौ शब्दप्रयोज्यान्यत्वं विशेषणं देयम्, अनुभवबलात्। एवञ्चानाहार्यत्वं स्पष्टमेवेत्यपि वदन्ति। यदि तु शब्दजन्यभेदकधर्मोपस्थितिकालिकत्वमात्रेणाहार्यत्वव्यवहारः, तर्ह्यस्तु, वाहीकाभि-

1. पदार्थोपस्थितिमात्रत्वापत्तौ।

प्रायेण प्रयुक्ते 'गां पश्य' इत्यादौ तात्पर्यविषये वाहीकदर्शने मुख्यार्थसंसर्गबाधाद् गोसदृशो लक्ष्यते। सादृश्यातिशयमहिम्ना लक्ष्ये शक्याभेदप्रतीतिः फलम्। एषा अनाहार्यैव। शब्दजभेदकधर्मोपस्थितिकालिकत्वाभावेनाधिकचमत्कारकारित्वम् 'शब्दज' इत्युक्तेर्मुख्यार्थबाधज्ञानविषयाभेदस्योपस्थितत्वेऽपि न क्षतिः। इदमेवाभि-प्रेत्य 'सर्वथैवाभेदावगमोऽत्र प्रयोजनम्, [का०प्र०, उ० २, पृ० ५२] इति प्रकाशकृतः। एवञ्च वाहीकत्वेनानुपस्थितिरेव, शुक्तौ रजतत्वारोपे शुक्तित्वेनेव।

केचित्तु, गोत्वेनैव वाहीकस्य बोधः, शक्यतावच्छेदकातिरिक्तरूपेण शक्यबोधे [1]लक्षणाया इव शक्यतावच्छेदकरूपेण शक्यान्यबोधेऽपि तस्याः प्रसरात्, न तु सदृशत्वेनेत्याहुः।

अन्ये[2] तु, गोत्ववाहीकत्वोभयधर्मप्रकारकवाहीकबोध एव, शक्यतावच्छेदक-लक्ष्यतावच्छेदकोभयप्रकारकबुद्धेरेवैतल्लक्षणाकार्यत्वात्। पृथक्पदजन्यवाहीकत्वा-नुपस्थितिरेव सारोपातोऽस्या भेदिकेत्याहुः। स्पष्टञ्चेदं मतम् "पुंयोगादा-ख्यायाम्" [४।१।४८] इति सूत्रभाष्ये।[1]

इदमेव भेदद्वयं सारोपासाध्यवसानात्वेनालङ्कारिकैर्व्यवहृतम्। शब्दजविषय-निष्ठासाधारणधर्मग्रहे सति यत्रान्यस्यान्यतादात्म्यप्रतीतिः सा सारोपा। तद्ग्रहेऽ-सत्यपि यत्रान्यस्यान्यतादात्म्यप्रतीतिः सा साध्यवसाना।

---

1. **तत्र भाष्यं तु—**

कथं पुनरयं प्रष्ठशब्दोऽकारान्तः स्त्रियां वर्तते? तस्येदमित्यनेनाभि-सम्बन्धेन। यथैव ह्यसौ तत्कृतान् स्नानोद्वर्तनपरिषेकान् लभते, एवं प्रष्ठ-शब्दमपि लभते। यद्येवम्, पुंयोगादाख्यायां तद्धितस्य लुग्वक्तव्यः। तस्येदम् इति प्राप्नोति। न तर्हीदानीमिदं भवति प्राष्ठ्य इमाः, प्राचर्य इमा इति। भवति च। विभाषा लुग्वक्तव्यः। यदा लुक् तदा प्रष्ठी, यदा न लुक् तदा प्राष्ठी। यद्येवं नार्थो लुका विभाषा तद्धितोत्पत्तिः। यदा तद्धितोत्पत्तिः, तदा प्राष्ठी। यदा न तद्धितोत्पत्तिस्तदा प्रष्ठी। एवमपि लुग् वक्तव्यः, नह्यन्तरेण लुकं पदार्थे शब्दो वर्तते·······नैष दोषः, नावश्यमयमेकाभिसम्बन्धो भवति तस्येदमिति अयमप्यभिसम्बन्धो भवति सोऽयमिति। कथं पुनरतस्मिन् स इत्येतद्भवति? चतुर्भिः प्रकारैरतस्मिन् 'सः' इत्येतद् भवति—तात्स्थ्यात् ताद्धर्म्यात् तत्सामीप्यात् तत्साहचर्यादिति।

---

१. ख. 'लक्षणायाः·······'बोधेऽपि' इति नास्ति।
२. ख. 'अन्ये तु·······इत्याहुः' इति नास्ति।

इदं भेदद्वयं शुद्धाया अपि। यथा—'जीवनं घृतम्' इत्यादौ। अत्र हि जीवनपदेन जीवनजनकं लक्ष्यते। इतरवैलक्षण्येन तज्जनकत्वप्रतीतिः फलम्। नन्वत्र किं बीजम्, एवम् 'गङ्गायां घोषः' इत्यादौ गङ्गागतशैत्यपावनत्वादिप्रतीतिरपि कथम्, बीजाभावात्। न च गङ्गादिशब्देन तटादिप्रतीतिरेव बीजम्, अन्यार्थशक्तपदेनान्यार्थबोधनस्यान्यार्थे स्वशक्यगतधर्मप्रतीतिफलकत्वादिति वाच्यम्, एवमपि प्रकृतेऽनुपपत्तेः। नहि प्रकृते जीवनगतधर्मप्रतीतिर्लक्ष्ये इति चेत्, न; तद्वाचकशब्दबोध्यत्वनिमित्तवशाद् लक्षणाज्ञानप्रयोज्याया वैयञ्जनिक्या वा शक्याभेदबुद्धेरपि जननेन तत्प्रतीत्युपपत्तेः। तस्याञ्च सत्याम् 'जीवनं घृतम्' इत्यादौ इदमेव जीवनरूपेण परिणमतीति बुद्ध्या इतरवैलक्षण्यप्रतीतिः फलति। एवम् 'जीवनमेवासौ भुङ्क्ते' इत्यादावव्यभिचारेण तज्जनकत्वप्रतीतिः। कारणकार्ययोर्भिन्नशब्दाभ्यां भेदेनोपस्थितौ हि व्यभिचारशङ्काऽपि स्यात्। इह तु तदभावात् साऽपि नेति। न चैवम् 'उपकृतं नाम' इत्यादौ विरोधिलक्षणालक्षितापकृतादौ तेनैव निमित्तेन उपकृताभेदबुद्धिरपि स्यादिति वाच्यम्, अस्त्येवोपकाराभेदबुद्धिरपकारेऽपि, उपकाराभेदबुद्ध्यैव साधुत्वं व्यङ्ग्यमित्याहुः। एवम् 'राजकीयः पुरुषो राजा' इत्यादौ राजस्वामिकादौ लक्षणा बोध्या। न च जनकत्वसादृश्यादिः शक्यस्य लक्ष्ये न सम्बन्धः, तस्य च लक्ष्यतावच्छेदकत्वं कथम् 'गङ्गायां घोषः' इत्यादावदर्शनात् तीरत्वेनैव तत्र तीरबोधादिति वाच्यम्, बाधकाभावेन तदवच्छिन्नेऽपि लक्षणाग्रहस्य सम्भवात्।

अपरे तु, सर्वत्रैव लक्षणाज्ञानस्य लक्ष्यतावच्छेदकशक्यतावच्छेदकोभयप्रकारकशाब्दत्वं कार्यतावच्छेदकम्, तथैवानुभवात्। एवञ्च गङ्गात्वादिनैव तीरस्य बोधः। एवञ्च शैत्यपावनत्वादिप्रतीतये मध्ये शक्याभेदविषयकं ज्ञानान्तरं नाङ्गीकार्यमिति लाघवम्। एतेन 'कचतस्त्रस्यति वदनं वदनात् कुचमण्डलं त्रसति'इत्यादौ कचत्वादिना बोधे त्रासकरत्वानुपपत्तिरिति परास्तम्, 'कचत्वविशिष्टो राहुः'इति बोधेन तदुपपत्तेः, केवलराहुत्वेन बोधे चमत्कारानापत्तेः।

न चैवं प्रवाहत्वविशिष्टे घोषाभावज्ञानेन तीरादौ प्रवाहत्वाभावज्ञानेन च प्रतिबन्धात् कथं लक्ष्यार्थशाब्दबोधः, कथं वा प्राङ्मते शक्याभेदबुद्धिः, कथं वा 'गङ्गावृत्तिधर्माभाववत् तीरम्' इति ज्ञाने तद्गतशैत्यपावनत्वादिप्रतीतिरिति वाच्यम्, बाधबुद्धेः शाब्दबोधाप्रतिबन्धकत्वात्। न चैवमपि जायमानबोधप्रामाण्यशङ्काजनने ततश्चमत्कारानापत्तिरिति वाच्यम्, विषयतासम्बन्धेन शक्यतावच्छेदक-

तत्समानाधिकरणधर्मैतदन्यतरविषयकबाधग्रहजन्याप्रामाण्यज्ञानं प्रति जनकतारूपविषयनिष्ठप्रत्यासत्त्या लक्षणाज्ञानस्य प्रतिबन्धकत्वान्न दोषः। 'गौर्वाहीकः' इत्यादौ तु सादृश्यमहिम्नापि बाधबुद्धिस्थगनमित्युक्तमित्याहुः।

यत्तु 'गौर्वाहीकः' इत्यादौ गौण्यां साधारणधर्माश्रयो जडादिर्जडत्वेन लक्ष्यः। गोवृत्त्यसाधारणजडत्वप्रतीतिः फलमिति तत्, न; 'गौर्वाहीको जडः' इत्यादौ पौनरुक्त्यापत्तेः। न चोपात्तधर्मातिरिक्तधर्ममुखेन लक्षणेति वाच्यम्, तदतिरिक्तधर्मास्फुरणेऽपि वाक्यार्थप्रतीतिदर्शनात्, 'अक्षसङ्घाताङ्किताानि; शरीराणि, कमलानि' 'सकलकलं पुरं सुधांशुबिम्बम्' इत्यादौ श्लेषलब्धधर्मं विना धर्मान्तरस्य सर्वथैवास्फुरणाच्च।

ननु 'गौर्वाहीकः' इत्यादिसारोपास्थले सदृशत्वेन लक्षणेति त्वदुक्तमप्ययुक्तम्। तथा सति सादृश्यस्य शब्दोपात्तत्वेनोपमालङ्कारस्य प्रसङ्गेन 'गौरिव गवयः' इत्यत्रोपमा, 'गौर्वाहीकः' इत्यत्र रूपकमित्यालङ्कारिकसिद्धान्तभङ्गापत्तिः। नहि सादृश्यस्य वाच्यत्व एवोपमा, 'पद्मप्रतिपक्षमाननम्' इत्यादौ लक्ष्यत्वेऽपि तद्दर्शनात्।

किञ्च, 'वाहीकोऽयं न गोसदृशः, अपि तु गौरेव' इत्यादौ सादृश्यव्यतिरेकमिश्रिते सादृश्यबुद्ध्ययोग इति चेत्, न; भेदगर्भसादृश्यप्रतीतावुपमा, तदेव च सदृशादिपदवाच्यम्, तद्गर्भसादृश्यलक्ष्यतावच्छेदकमिति न दोषः। न च भेदगर्भसादृश्यवल्लक्षणायाम् 'गौर्वाहीकः' इत्यादावुपमापि स्यादिति वाच्यम्, अभेदप्रतिपिपादयिषाधीनलक्षणायास्तत्रासम्भवात्, भेदाभेदयोर्विरोधेन युगपद् बुध्युपारोहासम्भवात्।

न चैवमुपमितिसमासे 'मुखं चन्द्रः' इत्यादावुत्तरपदस्य सदृशलक्षणायामभेदप्रतीतौ रूपकापत्तिरिति वाच्यम्, भेदघटितसादृश्यवति तस्य निरूढलक्षणाभ्युपगमेन प्रयोजनानपेक्षत्वादित्याहुः।

नव्यास्तु—'गौर्वाहीकः' इत्यादौ न लक्षणा, किन्तु नामार्थयोरभेदान्वयरीत्या विषयविषयिणोरभेदेनैवान्वयः, प्रसिद्धत्वादिनोपस्थितसादृश्यमहिम्ना प्राग्वदेवाप्रामाण्यज्ञानानास्कन्दितानाहार्याभेदबुद्ध्युपपत्तौ लक्षणाया व्यर्थत्वात्।

किञ्च, लक्षणायाम् 'राजनारायणं लक्ष्मीस्त्वामालिङ्गति निर्भरम्' इत्यादौ विशेषणसमासायत्तं रूपकम्, उपमितसमासायत्तोपमा वेति सन्देहे 'यद्यत्रोपमा

स्यात्, तर्हि नारायणसदृशो राजेत्यर्थे नारायणसदृशे लक्ष्मीकर्तृकालिङ्गनसंसर्गबाध इति रूपकमेव'इत्यालङ्कारिकोक्तं विरुध्येत, रूपकेऽपि सदृशलक्षणायां राजाभिन्न-नारायणसदृशमित्यर्थे तत्तादवस्थ्यात् ।

यदि तु नारायणसदृशस्य लक्ष्यस्य शक्यतावच्छेदकनारायणत्वेन भानमित्यादि-मतेनायं दोषः, मतान्तरेऽपि भेदागर्भसादृश्यस्यैव लक्ष्यतावच्छेदकत्वान्न दोष इति विभाव्यते, तर्हि व्यर्थत्वमेव दोषः ।

स्वीकृता च 'शोणाभ्रसन्ध्याकालसदृशः काषायवसनो यतिः'इत्यादौ बिम्ब-प्रतिबिम्बभावेनोपमास्थले साधारणधर्मांशे विनापि लक्षणां सादृश्यातिशयमहिम्ना शब्दात् स्वसाधारणरूपेणोपस्थितयोरपि विषयविषयिविशेषणयोरभेदबुद्धिरा-लङ्कारिकैः 'गाम्भीर्येण समुद्रोऽयं राजा'इत्यादौ ज्ञानजन्यज्ञानप्रकारत्वं तृतीयार्थः, तस्य च स्वविषयज्ञानजन्यविषयत्वसम्बन्धेन समुद्रेऽन्वयः, 'वह्निमान् धूमात्' इत्यादौ तथा क्लृप्तत्वात् ।

लक्षणापक्षेऽप्येवमेवोचितम् । लक्ष्यमाणैकदेशसादृश्ये प्रयोजनत्वरूपस्या-भेदस्य वा तृतीयार्थस्यान्वये 'पदार्थः पदार्थेनान्वेति, न तु तदेकदेशेन'इति व्युत्पत्ति-भङ्गापत्तिः[1] । किञ्च, सादृश्ये प्रयोज्यत्वमपि स्वज्ञानजन्यज्ञानविषयत्वमेव वाच्य-मित्याहुः ।

अत्रेदं बोध्यम्—'वाहीकोऽयमपरो गौः'इत्यादावपरादिपदैः प्रसिद्धगोर्भेद-प्रतिपादनेन विरोधान्नाभेदबोधो वाच्ययोः, किन्तु तत्सदृशे लक्षणैव । लक्षणायाश्च न शक्याभेदबुद्धिः फलम्, किन्तु सादृश्यातिशयबुद्धिः ।

एवञ्च सकलतत्कार्यकारित्वं फलति । एवम् 'अपूर्वो गौः'इति वाहीकाभि-प्रायेण प्रयुक्तेऽपि बोध्यम् । तत्रापि न प्रसिद्धगवाभेदो लक्षणाफलम्, अपूर्वपदेन तिरस्कारात् । वाहीकत्वाद्यप्रतीतिकृतश्चाधिकचमत्कारः ।

इदमेवाभिप्रेत्य 'गौर्वाहीकः' इत्यादावभेदरूपकातिशयोक्ती । ईदृशस्थले च ताद्रूप्यरूपकातिशयोक्ती इति कुवलयानन्दकृतः ।

---

1. घटत्वगोत्वादावन्वयेन नित्याभिन्नं यद् घटत्वम्, नित्याभिन्नं यद् गोत्वम्, तद्वान् घटः, तद्वान् गौरिति तात्पर्येण नित्यो घटः, नित्यो गौरित्यस्य प्रामाण्यवारणाय व्युत्पत्तिरियं स्वीक्रियते । स्वीकृतायाञ्चास्यां घटत्व-गोत्वयोः पदार्थैकदेशत्वात् तत्र नित्यपदार्थस्यान्वयाभावेन नैतादृशः प्रयोगः प्रामाण्यमर्हति ।

न चैवमुपमाया अपि रूपकत्वापत्तिः, यत्र सादृश्यप्रतीतिकृतश्चमत्कारः, तत्रोपमा; यत्र त्वभेदप्रतीतिकृतः सादृश्यातिशयप्रतीतिकृतश्च[1], तत्र रूपकम्।

चमत्कारनिदानभेदकृतो ह्यलङ्काराणां परस्परं भेद इति स्पष्टमस्मत्कृत-**षट्पदाख्यकुवलयानन्दटिप्पणे**।

यत्तु मीमांसकाः—'गौर्वाहीकः' इत्यादौ गोशब्देन स्वशक्यगतजाड्यादि-गुणसदृशजाड्यादय एव लक्ष्यन्ते, तैश्च [2]जातिशक्तिनये आक्षेपेण व्यक्तिलाभवत् स्वाश्रयव्यक्तिलाभ इति। तत्, न; 'जडो गौर्वाहीकः' इत्यादौ पुनरुक्त्यापत्तेः।

किञ्च, स्वरूपतो जातिविषयशक्तिज्ञानं स्वरूपतो जातिं स्मारयद् व्यक्तिं स्मारयतीति युक्तम्, व्यक्तिमविषयीकृत्य स्वरूपतो जातेर्भानस्यानुभवसिद्धान्त-विरुद्धत्वात्। जाड्यादेश्च रूपान्तरेणैव भानात् तस्य विशेष्यतयापि भानसम्भवेन धर्मिस्मारणे मानाभावात्। न चैवं गुणिबोधकशुक्लादिपदानां गुणे एव शक्तिः, गुणिनो बोधश्चाक्षेपादिति 'जात्यादिः' [का० प्र०, उ०२, सू० १०]इत्यादिना **प्रकाशा**द्युक्तमसङ्गतं स्यादिति वाच्यम्, इत एवास्वरसात् तत्र 'जातिरेव वा' [का० प्र० उ० २, सू० १०] इति पक्षान्तरस्योक्तेरदोषात्। न च[3] धर्मशक्तिज्ञानं तत्तदाश्रयोभयबोधकमिति कार्यकारणभावे को दोष इति वाच्यम्, 'शुक्लम्' इत्यादिगुणपरादपि धर्मिबोधापत्तेः। वस्तुतो धर्मिणि लक्षणेत्येव तदाशयः।

इयांस्तु विशेषः—जातिशक्तघटादीनां केवलजातिबोधकतया न क्वापि प्रयोगः, शुक्लादीनां तु केवलगुणबोधकतयापीति। एवञ्च न कश्चिद् दोष इति दिक्।

केचित्तु, 'ग्रामो दग्धः, पुष्पितं वनम्'इत्यादिप्रयोगे ग्रामादिपदस्य स्वार्थैक-देशपरित्यागेन तदेकदेशे वृत्तिः। तत्र जहदजहल्लक्षणाख्योऽन्योऽपि भेदः, दग्ध-भूयस्त्वादिद्योतनं फलमित्याहुः।

इति लक्षणानिरूपणम्।

---

1. चमत्कार इति शेषः।
2. अयं भावः—मीमांसका जातिं पदार्थं मन्यन्ते। गौरित्यत्र गोशब्दस्य गोत्वमर्थः, आश्रयमन्तरा जातिः क्व तिष्ठेदिति 'येन विना यदनुपपन्नम्, तत्तेनाक्षिप्यते' इति न्यायाद् व्यक्तेराक्षेपाद् बोधः।
3. एवञ्च गौरित्यस्य गोत्वाश्रयोऽर्थः फलति।

---

१. ख 'धर्मविषयवृत्तिज्ञानम्' इति पाठः।

अथ व्यञ्जनानिरूपणम्

मुख्यार्थसम्बद्धासम्बद्धसाधारणमुख्यार्थबाधग्रहाद्यप्रयोज्याप्रसिद्धाद्यर्थविषयक-धीजनकत्वं व्यञ्जना। सा चेयं शब्दतदर्थपदैकदेशवर्णरचनाचेष्टादिषु सर्वत्र, तथैवानुभवात्, 'अनया कटाक्षेणाभिलाषोऽभिव्यञ्जितः' इति सर्वजनप्रसिद्धेस्तस्यां चेष्टावृत्तित्वस्याप्यावश्यकत्वाच्च। एतेनार्थादीनां न व्यञ्जकत्वम्, किन्तु पदस्यैवेत्यपास्तम्।

'रतिकाले विलोक्य श्रीर्नाभिपद्मे पितामहम्।
रसाकुला छादयते दक्षिणं नयनं हरेः॥'

इत्यादौ हरिपदेन दक्षिणनयनस्य सूर्यात्मकत्वे तन्निमीलनेन सूर्यास्तमयः, तेन पद्मसंकोचः, तेन पितामहस्थगनम्, तेनाप्रतिबद्धं रतिविलसितमिति क्रमेण व्यङ्ग्येषु प्रतीयमानेषु तत्तदर्थप्रतीत्युत्तरमेव व्यङ्ग्यप्रतीतेरर्थस्यापि व्यञ्जकत्वावश्यकत्वात्।

'पश्यात्र नलिनीपत्रे बलाका दृश्यतेऽचला।
रम्ये मारकते पात्रे शुक्तिकेव च निर्मला॥'

तत्रापि निश्चलत्वेन शुक्त्युपमाया चाश्वस्तत्वम्। तेन तस्य निर्जनत्वम्, तेन तदेवावयोः संकेतस्थानमित्यादिषु क्रमेण प्रतीयमानेषु तत्तदर्थव्यङ्ग्येष्वपि बोध्यम्।

अनया चार्थबोधे जननीये वक्तृबोद्धृवाच्यादिवैशिष्ट्यज्ञानं प्रतिभा च सहकारि। तद्धीजनकत्वज्ञानजनकमेव वा। अतो नातिप्रसङ्गः। प्रतिभा च नवनवोन्मेषशालिनी बुद्धिः। तदुक्तम्—'प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता' इति। नवोन्मेषो जन्मान्तरीयतद्धीजनकत्वज्ञानजन्यसंस्कारोद्बोधः। वक्त्रादिवैशिष्ट्य-सहकारेण तज्जनिका बुद्धिः प्रतिभेति फलितम्।

एवञ्च शक्तिरेतज्जन्मगृहीतैवार्थबोधिका, व्यञ्जना तु जन्मान्तरगृहीतापीत्यपि शक्तेरस्या भेदकम्। इदमेवाभिप्रेत्य व्यञ्जना स्वरूपसती हेतुरिति प्रवादः।

यद्यपि प्रागुक्तरीत्या लक्षणातोऽपि भेदः सिद्धः, तथापि प्रकारान्तरेणापि भेदं वक्तुं मुख्यार्थेत्याद्युक्तम्। 'पश्यात्र नलिनीपत्रे' इत्यादौ वक्तृतात्पर्यविषयीभूतवाच्यार्थबाधाभावेऽपि तज्ज्ञानाभावेऽपि प्राग्दर्शितव्यङ्ग्यप्रतीतेर्मुख्यार्थबाध-ज्ञानसत्त्वे तदप्रतीतेश्च न वैयञ्जनिकबोधे तस्य सहकारित्वम्।

एवम् 'गतोऽस्तमर्कः' इत्यादेः शिष्येण सन्ध्यावन्दनादेः कर्तव्यत्वाभिप्रायेण गुरुं प्रति प्रयुक्ताद् वक्तृतात्पर्याभावेऽपि प्रतिवेश्यादीनामभिसरणोपक्रमादिबोधस्य वाच्यार्थप्रतीतिपूर्वकस्य वाच्यार्थबाधज्ञानेऽजायमानस्य लक्षणयोपपादयितुमशक्यत्वाच्च ।

यत्तु, 'गतोऽस्तमर्कः' इत्यादौ न व्यञ्जना, एकसम्बन्धिदर्शनादपरसम्बन्धिस्मरणवदुपपत्तेरिति । तत्, न; 'गतोऽस्तमर्कः' इत्यादिश्रवणोत्तरम् 'सन्ध्यावन्दनकर्तव्यत्वं मया स्मृतम्' इत्यनुव्यवसायाभावात्, 'एतदुक्तपदादयमर्थो बुद्धः' इत्यनुव्यवसायाच्च, तत्रानुल्लेखाच्च, 'इदं पदमेतदर्थस्य न वाचकम्, नापि लक्षकम्, नापि स्मारकम्, अपि तु व्यञ्जनया बोधकम्'इति प्रामाणिकव्यवहारेणाप्यतिरिक्ततत्सिद्धेश्च ।

एतेन तत्तदर्थानां वक्त्रादिवैशिष्ट्यप्रतिभादिसहकृतमनसैव विशिष्टधीसम्भवात्, चमत्कारं प्रति शाब्दस्येव मानसस्यापि चेष्टानुरोधेन हेतुतायाः क्लृप्तत्वाच्च व्यञ्जनासत्त्वे न मानम् । प्रतिभा च तत्तत्पदार्थविषयसंस्कारोद्बोधको बुद्धिविशेषः । तत्र च तत्तत्पदतत्तदर्थज्ञानं वक्त्रादिवैशिष्ट्यज्ञानं च सहकारि इति परास्तम् ।

व्यङ्ग्योऽर्थोऽनुमेय इति त्वयुक्तमेव । विरुद्धानैकान्तिकेभ्यो व्याप्तिपक्षधर्मतादिनिर्णयाभावेऽपि व्यङ्ग्यार्थप्रतीतेः । किञ्च, सिद्धिसत्त्वेऽपि व्यङ्ग्यार्थबोधदर्शनेन तत्प्रतिबन्ध्यतावच्छेदककोटौ तत्तद्भेदनिवेशेऽतिगौरवापत्त्या वैयञ्जनिकबोधस्यातिरिक्तत्व एव लाघवम् । अन्यथा शब्दप्रामाण्यस्याप्युच्छेदापत्तिरित्यन्यत्र विस्तरः ।

बोधकत्वस्य चेष्टायां सत्त्वेऽपि तन्निष्ठबोधकत्वं न शक्तिः, 'चेष्टा शक्ता' इति प्रामाणिकव्यवहाराभावात् । किन्तु तज्जन्यबोधे तज्ज्ञानस्य कारणत्वं बोध्यम् । तत्तद्वाचकशब्दस्मरणद्वारा चेष्टया बोध इत्यपि कश्चिदिति सर्वेष्टसिद्धिः ।

इति व्यञ्जनानिरूपणम् ।

वृत्तिविचारः सम्पूर्णः[1]

---

1. अथेदानीं तत्तदाचार्याणां मतप्रदर्शनपुरस्सरं शब्दवृत्तिः समासेन समीक्ष्यते—

श्रुतिमन्तः सङ्ख्यातीताञ्छब्दान् प्रतिदिनं शृण्वन्ति, परन्तु सम्यक् श्रुता अपि समे शब्दा नैव सर्वानर्थान् बोधयन्ति, अपि तु केचनैव कांश्चिदेव क्वचनैव । यथा—साधु श्रुतादपि घटशब्दात् कम्बुग्रीवादिमदर्थव्यक्तेरेवावगमो भवति,

न तु प्रवाहस्य नापि पटस्येति घटशब्दस्य कम्बुग्रीवादिमदर्थेन कश्चन सम्बन्धो वर्तते, न प्रवाहेण, नापि पटेन; अन्यथा तावपि प्रबोधयेत्।

एवञ्च शब्दार्थयोः परस्परं कश्चन सम्बन्धो वाच्यः, येन शब्दः सम्बद्धमेवार्थं प्रकाशयति, नासम्बद्धम्, प्रदीपवदिति कल्प्यते; परन्त्वेवं सति शब्दानां समवायेनाकाशे सम्बद्धत्वात् 'शब्दाश्रयत्वमाकाशत्वम्' इति सिद्धान्ताद् एकसम्बन्धिज्ञानमपरसम्बन्धिनं स्मारयतीति घटादिपदेनाकाशस्यापि बोधः स्यात्। स च नेष्टः, तादृशस्य बोधस्याननुभवादिति पदपदार्थयोः समवायादिविलक्षणः कश्चन सम्बन्धः कल्पनीयः। स च ज्ञात एवापेक्ष्यते, नाज्ञातः; अन्यथाऽज्ञातेऽपि तस्मिन्नर्थबोधः स्यात्।

अयमेव सम्बन्धो वृत्तिपदेन शब्दव्यापारादिपदेन चोच्यते। एवञ्च शाब्दबोधौपयिकः, अर्थप्रतियोगिकः पदानुयोगिकः, पदप्रतियोगिकोऽर्थानुयोगिको वा सम्बन्धो वृत्तिः। अथवा वृत्तिपदव्यवहार्यत्वं वृत्तित्वमिति। येन शब्दव्यापारेण झटित्यर्थबोधो भवति, सोऽभिधाख्यव्यापार इत्युच्यते।

भट्टलोल्लटप्रभृतयस्त्वभिधारूपामेकामेव वृत्तिं मन्वते। तयैव च सर्वविधस्यार्थस्य बोधो भवति।

तेषामयमाशयः—यथा बलवता प्रेरित एक एव इषुरेकेनैव वेगाख्येन व्यापारेण रिपोर्वर्मच्छेदम्, मर्मभेदं प्राणहरणञ्च विधत्ते, तथा सुकविप्रयुक्त एक एव शब्द एकेनैवाभिधाख्यव्यापारेण पदार्थोपस्थितिम्, अन्वयबोधं व्यङ्ग्यप्रतीतिञ्च विधत्ते। अतो नास्ति वाच्यादन्योऽर्थस्तेषामिति। तथा चोक्तं काव्यप्रकाशे—'सोऽयमिषोरिव दीर्घदीर्घतरोऽभिधाव्यापारः' (का० प्र०, उ० ५, पृ० २२५) इति कतिपये विद्वांसः। 'गङ्गायां घोषः' इत्यादौ भगीरथरथखातावच्छिन्नपयःप्रवाहार्थं प्रत्याय्य विरतव्यापाराया अभिधाया गतेरभावात् तीरबोधो न स्यादिति शब्दे तदन्यमपि लक्षणाख्यव्यापारं मन्वते नैयायिकाः। ते चाभिधां संकेतमपि प्रतिपादयन्ति। तथा चोक्तं शक्तिवादे—'संकेतो लक्षणा चार्थे पदवृत्तिः' इति।

एवञ्च तत्तत्पदेन जायमानेऽर्थबोधे तत्तत्पदवृत्तेर्ज्ञानात् पदार्थोपस्थितिरन्वयव्यतिरेकाभ्यां कारणमिति वृत्तिज्ञानाभावे श्रुतोऽपि शब्दो नार्थबोधं जनयति। घटपटादेश्चाकाशादौ वृत्तेरभावाद् नैव तद्विषयको बोधः। अत एव वृत्त्या पदप्रतिपाद्य एव पदार्थ इत्यभिधीयते।

तत्राधुनिकसंकेतः परिभाषा। तथा चार्थबोधकं पदं पारिभाषिकम्, यथा शास्त्रकारादिसंकेतितनदीवृद्ध्यादिपदम्। ईश्वरसंकेतः शक्तिः। तथा चार्थबोधकं पदं वाचकम्। यथा गोत्वादिविशिष्टबोधकं गवादिपदम्, तद्बोध्योऽर्थो गवादिर्वाच्यः। स एव मुख्यार्थ उच्यते इति गदाधरभट्टाचार्यः।

जगदीशतर्कालङ्कारस्तु—उभयावृत्तिधर्मविशिष्टसंकेतवती सञ्ज्ञा पारिभाषिकी। यथाऽऽकाशडित्थादि। शब्दवत्याकाशे व्यक्तौ नित्यसंकेतवती आकाशेति सञ्ज्ञा। दारुमयहस्तिव्यक्तौ आधुनिकसंकेतवती डित्थेति सञ्ज्ञा। आकाशडित्थादिसञ्ज्ञा हि द्वितयावृत्तिधर्मणैव शब्देन दारुमयहस्तिवृत्तितद्व्यक्तित्वेन च रूपेण शब्दाश्रयं दारुमयहस्तिवृत्तितद्व्यक्तित्वाश्रयं च प्रतिपादयति।

घटत्वादिजातेरनेकवृत्तित्वाद् घटत्वादिजात्याश्रयवाचकं घटपदं न पारिभाषिकम्। आकाशादिपदस्य शब्दाश्रयत्वविरहिते केवले गगनादौ सङ्केतकल्पने तु पटादीनामपि पारिभाषिकत्वं स्यादित्यादि। तत्रापि पटत्वविरहिते केवले पटे सङ्केतस्य कल्पयितुं शक्यत्वात्। एवञ्चातिव्याप्तिः पादलेष्टुका स्यात्।

यदि पटे संकेतितमपि पटपदम् 'न पटत्वजातिविशिष्टशक्तिमत्' इत्यादिनिश्चयानन्तरं पटादिपदशक्तिग्रहात् पटपदात् पटत्वजातिविशिष्टस्य पटस्याननुभवादवश्यं पटादिपदशक्तिः किञ्चिद् धर्मविशिष्टार्थनिरूपिता, न तु केवलव्यक्तिनिरूपिता; अन्यथा तद्धर्मप्रकारकतद्धर्मिविशेष्यकनिश्चये सति तद्धर्माभावप्रकारकतद्धर्मिविशेष्यकज्ञानं न भवतीति सिद्धान्तात् 'पटपदं न पटत्वजातिविशिष्टशक्तिमत्' इत्याकारकनिश्चयानन्तरं पटादिपदशक्तिग्रहात् पटपदात् पटस्यानुभव आपद्येत।

तव मते शक्तौ पटत्वस्य प्रकारतयाऽनिवेशात्, प्रतिबन्ध्यप्रतिबन्धकयोः समानप्रकारकत्वाभावादित्यवश्यं पटत्वावच्छिन्ने शक्तिरभ्युपगन्तव्येतीदमुच्यते, तर्हि तुल्ययुक्त्याऽऽकाशादिपदेऽपि कथं गजनिमीलिकाऽऽद्रियते। तत्रापि शब्दवति शक्तमप्याकाशपदम्—'न शब्दाश्रयशक्तिमत्' इति बाधनिश्चयदशायामाकाशादिपदान्न शब्दाश्रयत्वेन गगनस्य प्रतीतिरिति शब्दाश्रय एवाकाशस्य शक्तिरिति विभाव्यताम्।

एवञ्च—'पटत्वाद्युपलक्षिते धर्मण्येव, न तु पटत्वादिजातिविशिष्टे शक्तिग्रहस्य ताद्रूप्येण पटत्वादिना पटविषयकानुभवं प्रति हेतुत्वाद् मास्तु पटादिपदस्यापि पटत्वाद्यवच्छिन्ने शक्तिः। परन्तु पटत्वाद्युपलक्षितव्यक्तिष्वेव इति वदतो दीधितिकारस्यापि गेहे रजनीत्यहो विधेर्वैचित्र्यम्।

एकसम्बन्धेनानेकेषु वर्तमाना ये उपाधयो धर्मास्तद्विशिष्टे संकेतवती सञ्ज्ञा त्वौपाधिकी। यथा—भूतदूतादिः। सा हि सचेतनावृत्तिविशेषगुणवत्त्ववार्ताहारकत्वाद्यनुगतोपाधिपुरस्कारेणैव शक्ता भवति। शब्दाश्रयत्वादिकन्त्वखण्डत्वेनोपाधिरपि नानुगतो द्वितयावृत्तित्वात्, अतः पारिभाषिके गगनादिपदे नातिप्रसङ्गः।

नन्वेवं घटपदस्यापि नैमित्तिकत्वं न स्यात्, प्रत्युत घटत्वजातेरवयवसंयोगविशेषवृत्तितयौपाधिकत्वं स्यादिति चेत्, इष्टापत्तिः। यदि च स्वाश्रयाश्रयत्वरूपपरम्परासम्बन्धेन वैजात्यवत्त्वेन शक्तं घटपदम्, तदा नैमित्तिकमेवेति न व्यवहारविरोध इत्याह।

भर्तृहरिपादास्तु—यस्मिन्नर्थे यन्नामाधुनिकसंकेतवत् तदेव तत्र पारिभाषिकम्। एवञ्च यादृशानुपूर्वी यादृशार्थविशेष्यककिञ्चिज्जन्यबोधविषयत्वप्रकारकानित्यसंकेतविषयताविशेषावच्छेदिका तादृशानुपूर्वीमत्त्वं तादृशार्थे पारिभाषिकत्वमिति पर्यवसितम्। यथा पित्रादिभिः पुत्रादौ संकेतितं चैत्रादि, यथा वा शास्त्रकृद्भिः सिद्धयभावादौ संकेतितं पक्षतादि।

यस्मिन्नर्थे जात्यवच्छिन्नशक्तिमन्नाम नैमित्तिकम्; एवञ्च यादृशानुपूर्वी यादृशार्थविशेष्यकजात्यवच्छिन्नस्वशक्तिनिरूपकतावच्छेदिका तादृशानुपूर्वीमत्त्वं तादृशार्थनैमित्तिकत्वं पर्यवसितम्। यथा-गवि गोनाम, गवये च गवयादिनाम। यत्रार्थे यदुपाध्यवच्छिन्नशक्तिमन्नाम तदौपाधिकम्। तथा च यादृशानुपूर्वी यादृशार्थविशेष्यकसखण्डधर्मावच्छिन्नशक्तिनिरूपकतावच्छेदिका तादृशानुपूर्वीमत्त्वं तादृशार्थौपाधिकत्वं फलितम्। यथाऽऽकाशपद्मादि।

ननु आधुनिकसंकेतस्यापि शक्तिमत्त्वात् पारिभाषिकचैत्रादिशब्दानां नैमित्तिकत्वापत्तिः, नदीवृद्धयादिशब्दानामौपाधिकत्वापत्तिश्च। इष्टापत्तौ च तेन रूपेण विभागासम्भवः, मिथोविरुद्धधर्मस्यैव विभाजकतावच्छेदकत्वादिति चेत्, न; संकेतस्य शक्तित्वेनाधुनिकस्य संकेतस्य शक्तित्वाभावात्। तथाहि—

आजानिकश्चाधुनिकः संकेतो द्विविधो मतः।
नित्य आजानिकस्तत्र या शक्तिरित्यभिधीयते॥
कादाचित्कस्त्वाधुनिकः शास्त्रकारादिभिः कृतः॥

तत्र = तयोर्मध्ये, नित्यः संकेतः आजानिकः = न जनिरुत्पत्तिर्यस्यासौ अजनिः, अजनिरेवाजानिकः, स्वार्थे इकणिति आजानिकशब्दो यौगिकः। अन्ये तु, आजानिकः कालत्वव्यापक इत्यर्थः। तथा चाजानिकः शब्दः पारिभाषिक इत्याहुः। तत्, न; यौगिकसम्भवे पारिभाषिककल्पनाया अन्याय्यत्वात्।

न च प्रागभावाप्रतियोगित्वे सति ध्वंसाप्रतियोगित्वरूपस्य नित्यत्वस्य योगालभ्यत्वेन तद्बोधने तस्य कथं यौगिकत्वमिति वाच्यम्, प्रागभावातिरिक्तस्यानुत्पन्नवस्तुनो ध्वंसाप्रतियोगित्वनियमात्। नित्यपदस्यैवानुत्पन्नपरत्वाद् वा। न च तयोरेकार्थत्वेन पौनरुक्त्यम्, आजानिक इत्यस्याजानिकशब्दप्रतिपाद्यपरत्वात्। अत एव या शक्तिरित्यत्र यत्पदस्य नित्यसंकेतपरत्वेऽपि 'शक्तिरित्यभिधीयते' इत्यनेन शक्तिपदप्रतिपाद्यत्वकथनाद् न पौनरुक्त्यम्।

अत एव च 'प्रजावती भ्रातृजाया' 'श्यालाः स्युर्भ्रातरः पत्न्याः', 'सत्कृत्यालङ्कृतां कन्यां यो ददाति स ककुदः' इत्यादावपि न पौनरुक्त्यम्। कादाचित्कत्वम् = ध्वंसप्रतियोगित्वम्। आधुनिकः = आधुनिकशब्दप्रतिपाद्यः। स च क इत्याकाङ्क्षायामाह—शास्त्रकारादिभिरिति। आदिना म्लेच्छादिपरिग्रहः। यथा स्त्रीकृतेकारे नदीपदस्य, आरादिषु वृद्धयादिपदस्य संकेतः, कङ्गौ यवपदस्य संकेतः।

न च पित्रादिसंकेतिते चैत्रादिपदे नित्यसंकेतवत्त्वे मानमस्ति, द्वादशेऽह्नि पूर्वपूर्वप्रयुक्तत्वापाताच्च, तस्य तन्नियतत्वादित्युक्तत्वात्। चैत्रादिपदानामिव पारसीकादिशब्दानां संकेतवत्त्वाविशेषेऽपि न तेषां धर्मकर्मण्युपयोगः, "साधुभिर्भाषितव्यं नासाधुभिः, नापभाषितवै न म्लेच्छितवै" इति श्रुत्या तत्र तन्निषेधात्। म्लेच्छितवै = म्लेच्छमात्रसंकेतितैः, खरादिशब्दास्तु रासभादौ म्लेच्छैरिवार्य्यैरपि संकेतिता इत्याहुः।

शाब्दिकाः, व्यञ्जनामप्येकां तृतीयां वृत्तिमभ्युपगच्छन्ति। तथा चोक्तं नागेशेन—मुख्यार्थबाधग्रहनिरपेक्षबोधजनको मुख्यार्थसम्बद्धासम्बद्धसाधारणप्रसिद्धाप्रसिद्धार्थविषयको वक्त्रादिवैशिष्ट्यज्ञानप्रतिभाद्युद्बुद्धः संस्कारविशेषो व्यञ्जना। अत एव निपातानां द्योतकत्वं स्फोटस्य व्यङ्ग्यता च हर्यादिभिरुक्ता। द्योतकत्वञ्च क्वचित् समभिव्याहृतपदीयशक्तिव्यञ्जकत्वम्, इति वैयाकरणानामपि तत्स्वीकार आवश्यकः। एषा च शब्दतदर्थपदपदैकदेशवर्णरचनाचेष्टादिषु सर्वत्र, तथैवानुभवात्। वक्त्रादिवैशिष्ट्यादिज्ञानं व्यङ्ग्यविशेषबोधे सहकारीति न सर्वत्र तदपेक्षेत्यन्यत्र विस्तरः। (वैया० सि० ल० म०, पृ० १३३)

शाब्दिकैः सा स्मृतैकैव त्रिविधापि स्वरादिवत्।
अभिधा लक्षणा व्यक्तिरित्याख्या त्रितयं मतम्॥
(कोविदानन्दे पृ० १, श्लो० ४२)

त्रिविधा वृत्तिरेकैव वैलक्षण्येऽपि वस्तुतः।
इत्याहुः शाब्दिकास्तेषां भिन्नत्वे गौरवाद्भयम्॥
(कोविदानन्दे पृ० २६, श्लो० १६)

यथैक एव स्वरो ह्रस्वदीर्घप्लुतभेदेन त्रिविधो भवति, तथा शक्तिरेव शब्दवृत्तिरभिधालक्षणाव्यञ्जनाभेदेन त्रिविधा भवति। वृत्तीनां भेदे गौरवमस्ति इति तट्टीका।

अत्र वैयाकरणाः— 'शक्तिरेव शब्दवृत्तिः, तस्याश्च प्रसिद्धचप्रसिद्धिभ्यां शक्तिलक्षणाव्यपदेशः, व्यञ्जना तु तत्रान्तर्भवति दीर्घव्यापारात्' (त्रिवेणिका, पृ० ३६-३७) इति ।

एवञ्च शाब्दिका व्यञ्जनावृत्तिं नाभ्युपगच्छन्तीति वैयाकरणमतमभ्यूह्य प्रत्याख्याताऽऽशाधरभट्टेन कोविदानन्दे त्रिवेणिकायाञ्च । तस्यायं भावः स्यात्—यद् भाष्यादिप्राचीनतमेष्वाकरग्रन्थेषु क्वचिदपि व्यञ्जनाविषयको विशिष्टो विचारो नोपलभ्यते । टीकादिग्रन्थेषु च 'वृत्तिश्च शक्तिलक्षणाऽन्यतररूपा' (मनो० श० टिप्पणम्, पृ० २५, पा० सू० १-२-४५) इत्येव लिखितम्, न तु व्यञ्जनाभिप्रायेण 'अन्यतमरूपा' इति । लक्ष्यार्थस्य माणवकादेर्नियतोपस्थितिकत्वाभावेन सिंहादिपदरूपप्रातिपदिकार्थत्वाभावशङ्कां मनसि निधाय 'अन्वयानुपपत्तिपूर्विका लक्षणा पदे एव' (लघुशब्देन्दुशे०, पृ० ५१९ ; पा० सू० २-३-४६) इत्येव शेखरकारेणोक्तम्, न तु व्यञ्जनास्थलेऽपि शङ्कासमाधाने समुद्भाविते । व्यञ्जनास्वीकारे तु तत्रापि नियतोपस्थितिकत्वाभावे तयोरुद्भावनमवश्यं कर्तव्यमासीत् ।

यद्यपि स्फोटवादे ये श्रद्दधते, तैरवश्यं व्यञ्जनाङ्गीकर्तव्या । अन्यथा सकलशाब्दिकाभिमता तस्य व्यङ्ग्यता नैव सिद्धा भवेत् । अत एव नागेशभट्टेन व्यञ्जनास्वरूपं प्रदर्श्योक्तम्—'अत एव निपातानां द्योतकत्वं स्फोटस्य व्यङ्ग्यता च हर्यादिभिरुक्ता । द्योतकत्वञ्च क्वचित् समभिव्याहृतपदीयशक्तिव्यञ्जकत्वमिति वैयाकरणानामपि तत्स्वीकार आवश्यकः' (वै० सि० ल० म०, पृ० १३३) इति, तथापि तार्किकेषु शाश्वतिकविरोधानां शाब्दिकानां तार्किकमतप्रत्याख्यानमात्रफलको व्यञ्जनासमर्थनप्रयासो भवेत्, अन्यथा लक्षणायाः प्रत्याख्याने 'जघन्यवृत्तिकल्पनाया अन्याय्यत्वात्, वृत्तिद्वयावच्छेदकद्वयकल्पने गौरवात्, सति तात्पर्ये 'सर्वे सर्वार्थवाचकाः' इति भाष्याल्लक्षणाया अभावाच्च' (पर० ल० म०, लक्षणानि०, पृ० ६२) इत्यादयो यावन्तो हेतवो नागेशेन प्रदर्शितास्ते सर्वेऽपि व्यञ्जनां कथं न विरुन्ध्युः । व्यञ्जनया यावानर्थो व्यङ्ग्यो भवति तावान् सर्वोऽप्यप्रसिद्धशक्त्या व्यक्तो भविष्यति । व्यञ्जनावृत्तौ श्रद्धामावहतामालङ्कारिकाणां मते सहृदयैरेव व्यङ्ग्योऽर्थोऽवगम्यते, तादृशोऽर्थोऽप्रसिद्धशक्त्या वैयाकरणैर्भोत्स्यते, किं व्यञ्जनया ? तथा चोक्तं नागेशेन "शक्तिर्द्विधा, प्रसिद्धा अप्रसिद्धा च । आमन्दबुद्धिवेद्यात्वं प्रसिद्धात्वम्, सहृदयहृदयमात्रवेद्यात्वमप्रसिद्धात्वम् । तत्र गङ्गादिपदानां प्रवाहादौ प्रसिद्धा शक्तिः, तीरादौ चाप्रसिद्धेति किमनुपपन्नम् ।

ननु 'सर्वे सर्वार्थवाचकाः, इति ब्रूषे चेत्, तर्हि घटपदात् पटप्रत्ययः किन्न स्यादिति चेत्, न; सति तात्पर्ये, इत्युक्तत्वात् तात्पर्याभावादिति गृहाण। तात्पर्यञ्चात्रैश्वरं देवतामहर्षिलोकवृद्धपरम्परातोऽस्मदादिभिर्लब्धमिति सर्वं सुरुढम्' इति (परम-ल० म०, ल० नि०, पृ० ६३)। एवञ्च यथा लक्षणास्थले तात्पर्यवशादप्रसिद्धया शक्त्यैवेष्टार्थस्य लाभः, तथा व्यञ्जनास्थलेऽपि वक्त्रादिवैशिष्ट्यसहकारेणाप्रसिद्धशक्त्यैवेष्टार्थलाभो भविष्यति, किं व्यञ्जनया ? यदि हर्यादिभिर्निपातानां द्योतकत्वस्वीकारात्, स्फोटस्य व्यङ्ग्यत्वस्वीकाराच्च शाब्दिकैर्द्योतकतारूपा व्यञ्जना स्वीक्रियते, तर्हि प्रादीनां द्योतकत्वाङ्गीकारान्नैयायिकैरपि सा स्वीकर्तव्या भवेत्, न च तैः स्वीक्रियते। यद्यन्यदेव व्यञ्जकत्वं तेषां तर्हि शाब्दिकानामपि तद् अन्यदेव भवतु, किं लक्षणभेदेनाधिकतास्वीकारगौरवेण। एवञ्च शाब्दिकानां व्यञ्जनायामनास्था प्रतीयते।

परमलघुमञ्जूषा नागेशस्य कृतिर्नास्ति। वैयाकरणसिद्धान्तमञ्जूषायां यस्य सिद्धान्तस्य यया परिपाट्या प्रतिपादनमस्ति तस्य प्रतिपादनाय समादृता सा परिपाटी परमलघुमञ्जूषायां न दृश्यते। पदार्थानां तत्र तत्र विपर्यासोऽपि विलोक्यते। लक्षणाप्रत्याख्याने यावान् सन्नाहः परमलघुमञ्जूषायां निभाल्यते, न तावांस्तत्र। एवमनेके विचारभेदा अपि दृश्यन्ते द्वयोर्ग्रन्थयोरिति कथं तदाधारेण व्यञ्जना न स्वीक्रियते वैयाकरणैरिति निश्चेतुं शक्यत इत्यपि विदुषां प्रवादः। एवं सत्यपि आशाधरभट्टस्य युक्तयोऽप्युपेक्षितुं प्रेक्षावद्भिर्न पार्यन्ते। अत्रत्यं रहस्यं मत्सरशून्यैः शाब्दिकशार्दूलैः प्रणिहितचेतोभिश्चिन्तनीयम्।

अथ धात्वर्थविचारः

अथ सकलशब्दमूलभूतत्वाद् धात्वर्थो निरूप्यते।

अत्र प्राभाकराः[1]—फलमेव धात्वर्थः, भावना तु वाच्यैव न, तद्विषयकशाब्दबोधस्य विवादग्रस्तत्वात्। लिङ्येव परं सा आख्यातवाच्या। किं करोतीति कीदृशो यत्न इत्यर्थकप्रश्ने 'पचति' इत्युत्तरं तु पाकवाचकधातोस्तद्विषयत्वे लक्षणयाप्युपपन्नम्। कर्ममात्रविषयके 'किं करोति' इति प्रश्ने च पाकमात्रविषयकमुत्तरमप्युपपन्नम्। 'पाकं करोति' इति विवरणमपि अशब्दार्थकर्मत्वविवरणवदुपपन्नमिति न तद् भावनावाच्यत्वसाधकम्।

किञ्च, [1]स्वजनककृति[मत्त्व]सम्बन्धेन पाकश्चैत्रे विशेषणम्। एवञ्च संसर्गघटककृतेरेव तद्विवरणम्। अन्यथा द्वितीयाख्याताभ्यां कर्मत्वाश्रयत्वयोरपि

1. अत्र मीमांसकेषु मण्डनमिश्राः—फलमेव धात्वर्थः, अनुकूलव्यापारस्तु आख्यातार्थः, लडाद्यर्थवर्त्तमानत्वादीनां व्यापारेऽन्वयः, एकपदोपात्तत्वात्। फलस्याख्यातार्थव्यापारं प्रति विशेषणत्वम् इति।

अन्ये मीमांसकास्तु—व्यापारमात्रं धात्वर्थः, फलं च द्वितीयार्थ इति मन्यन्ते।

नव्यमीमांसकाश्च—फलव्यापारौ धात्वर्थः। उभयत्र खण्डश एका शक्तिः। तत्र जन्यजनकभावः संसर्गः। व्यापारमुख्यविशेष्यकश्च बोधः, तत्रैव कर्मातिरिक्तकारकाणामन्वयः, कर्मकारकस्य च कर्तृपदसमभिव्याहारे फलेऽन्वय इत्याहुः।

नैयायिकास्तु—फलव्यापारौ धात्वर्थः, आख्यातार्थः कृतिः, प्रथमान्तार्थमुख्यविशेष्यकश्च शाब्दबोध इत्यामनन्ति।

अत्र प्राचीनवैयाकरणाः—"फलव्यापारयोर्धातुः" इति द्विवचने फलनिरूपिता व्यापारनिरूपिता च धातोः पृथक् शक्तिः, अत एव फले स्तोकादिरूपकर्मणोऽभेदेन ग्रामादिरूपकर्मणश्च भेदेनान्वयः। विशिष्टे शक्तिस्वीकारे पदार्थैकदेशत्वे फले कर्माद्यनन्वयापत्तिः।

नागेशभट्टास्तु—फलविशिष्टव्यापारे, व्यापारविशिष्टफले च धातूनां शक्तिः, अन्यथा व्यापारोद्देश्यकफलविधेयकस्य फलोद्देश्यकव्यापारविधेयकस्य बोधापत्तिः, उद्देश्यविधेयभावेनान्वयप्रयोजिकायाः पृथगुपस्थितेः सत्त्वात्। फलावच्छिन्नव्यापारबोधे कर्तृप्रत्ययसमभिव्याहृतधातुजन्योपस्थितिः कारणम्। एवं व्यापारावच्छिन्नफलबोधे च कर्मप्रत्ययसमभिव्याहृतधातुजन्योपस्थितिः कारणमिति न सर्वत्र समबोधप्रसङ्ग इति।

---

१. ख० 'स्वाश्रयकृतिजन्यत्वसम्बन्धेन चैत्रः पाके विशेषणम्' इति पाठः।

विवरणेन तयोरपि वाच्यतापत्तेः। धात्वर्थप्रकारकबोधे प्रथमान्तपदजन्योपस्थितेरेव च हेतुत्वम्। अन्यथा 'धात्वर्थप्रकारकबोधे तिबादिजोपस्थितिर्हेतुः, तिबाद्यर्थबोधे च प्रथमान्तपदजन्योपस्थितिः' इति कार्यकारणभावद्वयम्, आख्यातस्य शक्तिश्च कल्प्येत्यतिगौरवं स्यात्।

अभेदातिरिक्तसंसर्गकनामार्थप्रकारकबोधे निपातसुबादिजोपस्थितेर्हेतुत्वान्न 'तण्डुलः पचति' इत्याद्यापत्तिः। आख्यातार्थस्तु सङ्ख्याकालावेव, कारकान्वयो धात्वर्थफल एव, 'काष्ठैः पाकः' इति त्विष्यत एवेत्याहुः, तत्, न; कृञोऽपि यत्नमात्रार्थकत्वे यतिवदकर्मतापत्तेः।

किञ्च, कर्मस्थक्रियत्वाभावात् कर्मकर्त्तरि यगादिकं न स्यात्। उत्पत्तेः कृञर्थत्वेऽप्युत्पद्यत इतिवदकर्मकतापत्तिः। किञ्च, धातूनां फलमात्रार्थकत्वे सकर्मकाकर्मकत्वविभागोच्छेदः; किञ्च, 'ग्रामो गमनवान्'इति प्रतीत्यापत्तिः। अपि च पाकानुकूलव्यापारारम्भेऽपि फलानुत्पत्तिदशायाम् 'पाको भवति' इत्यनापत्तिः, 'ग्रामचैत्रयोर्मिथः संयोगः'इतिवन्मिथो गमनमित्यापत्तिश्च, व्यापारविगमे फलसत्त्वे 'पाकोऽभूत्' इत्यनापत्तिश्चेति[1] दिक्।

यत्तु मण्डनमिश्रमतानुयायिनः—फलमेव धात्वर्थः, व्यापारः प्रत्ययार्थः, प्रत्ययार्थव्यापारव्यधिकरणफलवाचकत्वं सकर्मकत्वम्। तत्समानाधिकरणफलवाचकत्वञ्चाकर्मकत्वम्। कर्मत्वमपि प्रत्ययार्थव्यापारव्यधिकरणधात्वर्थाश्रयत्वमेव। 'घटं भावयति' इत्यादावपि णिच्प्रत्ययार्थव्यापारव्यधिकरणोत्पत्त्याश्रयत्वेन घटादेः कर्मत्वम्। अन्तर्भावितण्यर्थेऽपि प्रत्ययस्यैव णिजर्थे लक्षणेति न दोषः। प्रत्ययार्थव्यापाराश्रयत्वमेव कर्तृत्वम्। अत एव 'घटं भावयति' इत्यादौ कर्मणोऽपि घटस्य 'घटो भवति' इत्यादौ कर्तृत्वमेव। णिचः प्रयोजकव्यापारार्थकत्वेऽपि 'भवति' इत्यादावाख्यातस्य कर्तृव्यापारमात्रार्थकत्वात्।

एवञ्च कालस्य स्ववाचकाख्यातवाच्यव्यापारान्वितत्वमपि लभ्यत इत्यपरमनुकूलम्। 'जानाति'इत्यत्रापि ज्ञानजनकमनःसंयोगरूपप्रत्ययार्थव्यापारे एव

---

१. ख० 'व्यापार......अनापत्तिश्च' इति नास्ति। किञ्च, 'भावप्रधानमाख्यातम्' इति निरुक्ते प्रतिपादितस्याख्यातलक्षणस्य 'पचति' इत्यादावव्याप्तिः, धात्वर्थफलस्यैव धात्वर्थरूपक्रियात्वाङ्गीकारेण विशेष्यत्वाङ्गीकारे तु 'चैत्रः पचति' इत्यादौ भेदसम्बन्धेन नामार्थस्य धात्वर्थेऽन्वयो न स्यात्, उक्तयुक्तेः—इत्यधिकश्च पाठोऽस्ति।

तदन्वयो न धात्वर्थे। भावविहितघञादीनां व्यापारवाचकत्वाच्च न 'ग्रामो गमनवान्' इत्याद्यापत्तिः। घञर्थभावनान्वयादेव 'ओदनस्य पाकः' इत्यादौ कारकविभक्तयः। कर्तृकर्मकृताञ्च कारकभावनोभयवाचकत्वात् 'ओदनस्य पक्ता' इत्यादावपि न कारकान्वयानुपपत्तिः।

नन्वेवं जानातेः सकर्मकत्वानापत्तिः, धात्वर्थज्ञानव्यधिकरणव्यापारस्य देवदत्तादौ बाधादिति चेत्, न; फलतावच्छेदकविषयतासम्बन्धेन ज्ञानानधिकरण-वृत्तित्वरूपस्यैव वैयधिकरण्यस्य व्यापारे सत्त्वेनाक्षतेः। अन्यथा कालिकादि-सम्बन्धेन सर्वेषामेव फलसमानाधिकरणव्यापारवाचित्वेन बहूपप्लवः स्यात्।

न च व्यापारस्य धात्वर्थत्वे क्रियावाचकत्वे सति गणपठितत्वरूपधातुत्वानु-पपत्तिः। तत्र हि क्रियात्वं न व्यापारत्वम्, किन्त्वाख्यातार्थनिरूपितजनकता-नाश्रयत्वे सति लिङ्गसङ्ख्याद्यनन्वयित्वम्, अतो न दोषः। धात्वर्थत्वमेव वा तत्। न चान्योन्याश्रयः, यतो न प्रागुक्तं धातुत्वम्, क्रियात्वस्यैकस्याभावेनाननुगमात्। किन्तु सञ्ज्ञाविशेषः। सञ्ज्ञाशब्दाश्च जातिशब्दा एवेति जातिविशेष एव तत्।

यद् वा, सङ्केतविशेषसम्बन्धेन धातुशब्दवत्त्वमेव तत्। तत्परिचायकञ्च 'भूवादि' सूत्रम्। न च व्यापारस्याख्यातार्थत्वे 'क्रियाप्रधानमाख्यातम्'इति यास्क-विरोधः। तत्र ह्याख्यातशब्देनाख्यायते सर्वप्रधानीभूतोऽर्थोऽनेनेति व्युत्पत्त्या धातुरूपमुच्यते। 'नामाख्यातोपसर्गनिपाताः' इति प्रकृतीनामेव तत्रोद्देशात्, अग्रेऽपि तत्र 'नामान्याख्यातजानि' इति शाकटायनो नैरुक्तसमयश्चेति उक्तत्वात्[1]।

न ह्याख्यातप्रत्ययजं नाम सम्भाव्यते, किन्तु धातुजमिति वाच्यम्, आख्यातशब्देन तिङन्तस्यैव ग्रहणात्, तत्र 'एतन्नामाख्यातयोर्लक्षणम्' इत्युपक्रम्य 'भावप्रधानमाख्यातम्' इति यास्कोक्तेः। त्वद्रीत्या हि धातुलक्षणस्य कृत्प्रकृति-भूतधातावव्याप्त्यापत्तिः। अत एव भाव-काल-कारक-सङ्ख्याश्चत्वारोऽर्था आख्या-तस्य। तत्र 'भावः प्रधानम्' इति तद्भाष्यं सङ्गच्छते। कारकस्याख्यातार्थत्वकथनं च तदर्थाक्षिप्तत्वमात्रेण। अत एव 'देवदत्तः पचति' इत्यादौ सामानाधिकरण्यो-पपत्तिः। नामाख्यातोपसर्गेत्यत्र च धातुप्रकृतिकप्रत्ययान्तनामसाहचर्येणाख्यात-स्यापि तादृशस्यैव ग्रहणमुचितम्।

---

1. शब्दशास्त्रे आख्यातशब्देन क्वचिद् धातोः, क्वचिच्च तिङन्तस्य ग्रहणम्, व्युत्पत्तिबलात्।

अत एव भाष्ये "प्रशंसायां रूपप्" [५।३।६६] इति सूत्रे 'पचतिरूपम्, पचतोरूपम्, पचन्तिरूपम्' इत्याद्यसिद्धिमाशङ्क्य 'क्रियाप्रधानमाख्यातं द्रव्यप्रधानं नाम, यतः क्रियां पृष्टस्तिङाचष्टे—किं देवदत्तः करोति ? पचतीति द्रव्यं पृष्टम्, कृताचष्टे कतरो देवदत्तः, यः पाचकः' इत्युक्तं सङ्गच्छते। उपसर्गनिपातयोस्तु द्योतकत्वादक्रियासमभिव्याहारवशाच्च पृथगुक्तिः।

नामान्याख्यातजानीति तु लक्षणयाऽगत्या धातुपरम्। 'पच्यते तण्डुलः' इत्यादौ तण्डुलादेः स्वनिष्ठफलजनकत्वेन सम्बन्धेन व्यापारे एवान्वयः। अत एवौत्सर्गिकं प्रत्ययार्थप्राधान्यमप्यनुगृहीतं भवतीति प्राहुः, तत्, न; 'पचति, पक्ष्यति, पक्ववान्' इत्यादौ फूत्कारादीनां प्रतीतये तत्रानेकप्रत्ययानां शक्तिकल्पनापेक्षयैकस्य धातोरेव शक्तिकल्पनाया उचितत्वात्।

किञ्च, फूत्कारादेः प्रत्ययार्थत्वे 'गच्छति' इत्यादावपि तत्प्रतीतिवारणाय तद्बोधे पचिसमभिव्याहारः कारणं वाच्यमिति पचेरेव सा युक्ता। किञ्च, अस्त्यादौ सत्ताद्येव व्यापारः, अवच्छेदकतारूपा व्याप्तिः फलम्। अत एव 'मासमस्ति' इत्यादौ मासादेः कर्मत्वमिति भाष्यादौ स्पष्टम्। तथा च तत्र सत्तांशे क्लृप्तधातुशक्तित्यागे, अक्लृप्तप्रत्ययशक्तिकल्पने च महद् गौरवम्।

किञ्च, 'चैत्रेण सुप्यते' इति भावार्थकलकारे प्रत्ययस्य कालातिरिक्तार्थाभावेन चैत्रस्य कर्तृत्वानापत्तेः। 'क्रियाप्रधानम्' इत्याख्यातलक्षणाव्याप्तिश्च। अपि च, 'गुरुः शिष्याभ्यां पाचयति' इत्याद्यनापत्तिः। तत्र हि प्रयोजकव्यापारस्य णिजर्थत्वे स्थिते प्रयोज्यव्यापार आख्यातार्थो वाच्यः।

एवञ्च सङ्ख्यायाः स्ववाचकाख्यातार्थव्यापारेऽन्वयिन्येवान्वयात् शिष्याभ्यां द्विवचनानापत्तिः, 'पाचयति' इत्येकवचनानापत्तिर्वा, गुरोरनभिधानेन तत्र प्रथमाया अनापत्तेश्च, शिष्यशब्दात् तदापत्तेश्च, णिजर्थव्यापारस्याख्यातार्थप्रयोज्यव्यापारं प्रति प्रकृत्यर्थत्वात् प्राधान्यानापत्तिश्च।

न च तत्र फलं धात्वर्थः, व्यापारानुकूलप्रयोजकव्यापारो ण्यर्थः। तत्र फलस्यानुकूलतयाद्यव्यापारेऽन्वयः, तिङस्तु कालसङ्ख्ये प्रयोजकव्यापारश्चार्थः, 'द्वौ' इत्यादिवन्न बोधावृत्तिः, प्रधानत्वात् "लः कर्मणि" [३।४।६९] इत्यादिसौत्रानुवादबलाच्च प्रयोजकव्यापारेणैव धर्मिण आक्षेपः, "अनभिहिते" इत्यादेश्च

शक्त्याक्षेपसाधारणाबोधित इत्येवार्थ इति न दोष इति वाच्यम्, "हेतुमति च" [३।१।२६]इति सूत्रेण तथाऽलाभात्। अस्मद्रीत्याऽक्लेशेनैव सकलसामञ्जस्ये क्लिष्टकल्पनानुपयोगादिति दिक्।

यत्तु प्राचीननैयायिकाः—धातोः केवलव्यापार एव शक्तिः, फलं कर्मप्रत्ययार्थः, कर्मप्रत्ययापेक्षया बहूनां धातूनां फले शक्तिकल्पनस्य गुरुत्वात्। किञ्च, धातोः फलबोधकतामते नामार्थधात्वर्थयोराश्रयतासम्बन्धेन साक्षादन्वयासम्भवेन फलाश्रयत्वस्य प्रत्ययार्थत्वमभ्युपगत्य कर्मणि प्रकारतया भानस्योपगन्तव्यतया तत्संसर्गस्याधिकस्य भानकल्पनेन गौरवम्। फलस्य प्रत्ययार्थत्वे च तदाश्रयत्वं सम्बन्ध इति लाघवम्। संयोगरूपफलभाने 'गम्'समभिव्याहारस्य, विभागभाने 'त्यजि' समभिव्याहारस्य च कारणत्वान्न 'ग्रामं गच्छति, त्यजति'इत्यनयोर्विभागसंयोगबोधकत्वम्।

न चैवं त्यागो गमनमित्यनयोरविशेषापत्तिः, एकस्या एव संयोगविभागजनकत्वादिति वाच्यम्, अनादितात्पर्यवशेन कर्मपदासमभिव्याहृततादृशप्रयोगे विभागाद्यवच्छिन्ने व्यापारे धातोर्लक्षणास्वीकारेणादोषात्। स्वान्वितप्रत्ययार्थफलव्यधिकरणव्यापारवाचित्वं सकर्मकत्वम्। कर्मत्वञ्च धात्वर्थान्वितप्रत्ययबोध्यफलवत्त्वमेव। अकर्मकत्वञ्च तदभाव एव कर्मणि तादृशफलकृतविशेषवत्त्वमेव।

कर्मस्थत्वं क्रियाया इति क्रियत इत्यादौ कर्मकर्त्तरि यगादिसिद्धिः। सविषयकधातुस्थले विषयितयान्वयित्वमेव[१] सकर्मकत्वम्। अत एव 'करोति' 'जानाति' इत्यादेः कर्मणि प्रत्ययः। यतिस्तु न सकर्मकः, यतस्तदुपस्थापितयत्ने विषयत्वेन नान्वयः, किन्तूद्देश्यत्वेनैवेति न दोषः।

अत एवाभुञ्जानेऽपि 'भोजनाय यतते' इति प्रयोगः। फलान्वितस्वार्थबोधकत्वं च गम्यादेः स्वभावाधीनम्। तदभावात् स्पन्दिप्रभृतिष्वकर्मकत्वव्यवहार इति। तत्, न; गत्यर्थादिकर्मणि[1] द्वितीयाचतुर्थ्योर्विधानेन, 'ल्यब्लोपे कर्मणि'[वा० १।४।३१]पञ्चम्या विधानेन 'क्तस्येन्विषयस्य कर्मणि'[वा० २।३।३६]इति सप्तम्या विधानेनानेकसुपां तिङाञ्च फले शक्तिकल्पनापेक्षया फलविशेषबोधे तत्तद्धातुसमभिव्याहारस्य कारणत्वकल्पनापेक्षया च धातोरेव फलेऽपि शक्तिकल्पनाया उचितत्वात्।

---

1. गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि [२।३।१२]

---

१. ख. 'विषयित्वमेव सकर्मकत्वम्' इति पाठः।

मम तु कर्मविहितप्रत्ययजन्याश्रयबोधे धातुजन्यफलोपस्थितिर्हेतुरित्येक एव कार्यकारणभावः। 'ग्रामो गम्यते स्वयमेव' इत्यादिकर्मकर्तृप्रयोगानुरोधेन फलस्यापि धातुवाच्यत्वावश्यकत्वाच्च, 'ग्राममध्यास्ते' इत्यादावाश्रयस्य द्वितीयार्थतया क्लृप्तत्वाच्च। एवञ्च द्वितीयाया नानार्थत्वापत्तिः। किञ्च, 'या,गमि'प्रभृतीनामिव 'त्यजि, गमि'प्रभृतीनामपि पर्यायतेति भ्रमदशायाम्, 'याति, 'गच्छति'इत्यादिवत् 'त्यजति, गच्छति' इत्यादितोऽप्यविलक्षणबोधोत्पत्त्या धातुविशेषसमभिव्याहारस्य फलविशेषबोधनियामकताकल्पनाया असम्भवः। न च 'ग्रामं गच्छति' इति वाक्यज्ञानघटितसामग्र्याः समानविषयकानुमित्यादिप्रतिबन्धकतायां फलजनकत्वनिष्ठप्रकारतानिरूपितव्यापारविशेष्यताकधातुजन्योपस्थितेर्निवेश्यतया तस्यास्तादृशविशेष्यताशालित्वेन व्यापारविशेष्यतानिरूपितफलप्रकारताशालित्वेन वा निवेश इत्यत्र विनिगमनाविरहात् सामग्रीप्रतिबन्धकताधिक्यमवच्छेदकगौरवञ्च।

मन्मते द्वितीयाजन्यफलोपस्थितेः सामग्र्यन्तर्निवेशश्च भवन्मतसिद्धतज्जन्योपस्थितिस्थानीय इति न गौरवमिति वाच्यम्, धातोः फलावच्छिन्नव्यापारे द्वितीयायाश्चाश्रयत्वे शक्तिभ्रमवतो लाक्षणिकत्वग्रहवतश्च 'ग्रामं गच्छति' इत्यादिशाब्दसामग्र्यां तादृशानुमित्यनुदयेन तदनुरोधात् तादृशप्रतिबन्ध्यप्रतिबन्धकभावस्य तवाप्यावश्यकत्वात्। किञ्च, 'विष्णुं यजते, विष्णुर्यष्टव्यः' इत्यादौ चतुर्थ्यर्थविहितद्वितीयादेरुद्देश्यत्वेनैवान्वयबोधकत्वाद् यतिवद् यजेरप्यकर्मकत्वापत्तिः, विष्णोर्धात्वर्थकर्मत्वाभावेन तस्मिन् कर्मणि लतव्यादीनामनापत्तिश्च। उद्देश्यताख्यविषयतया विष्णुर्यागविषय इति चेत्, भोजनमपि यत्यर्थस्य तथेति तस्यापि सकर्मकत्वापत्तिः। किञ्चैवम् 'भोजनाय क्रियते' इत्यत्र भोजनमिति स्यात्, यतिवत् कृञोऽप्यकर्मकतापत्तेश्च। न चाकर्मकभिन्नत्वं सकर्मकत्वम्। तत्र च प्रयोगानुरोधात् कुञ्जानात्यादिभेदो न निवेश्य इति वाच्यम्, सकर्मकाणामप्यर्थान्तरेऽकर्मकत्वेनासम्भवापत्तेः। तुल्ययुक्त्याऽकर्मकत्वमपि सकर्मकान्यत्वमेव वाच्यम्, अन्यादृशस्य तस्य दुर्वचत्वात्। एवञ्चान्योन्याश्रयापत्त्या "लः कर्मणि" [३।४।६९]इत्यादेर्बोधकत्वानापत्तिः।

किञ्च, प्रत्ययार्थव्यधिकरणेत्यादिप्रागुक्तसकर्मकलक्षणं कर्मलक्षणञ्च 'घटं भावयति, एधयति' इत्यादिण्यन्तसकर्मकेषु तत्कर्मणि चाव्याप्तम्। तत्र फलस्यान्वयव्यतिरेकाभ्यां धातुलभ्यत्वेनान्यलभ्यत्वाद् गौरवाच्च प्रत्ययार्थत्वासम्भवादिति दिक्।

तस्मात् फलानुकूलो व्यापारो धात्वर्थः। द्वितीयार्थाश्रयान्वयस्तु "कर्मणि द्वितीया" [२।३।२] इत्याद्यनुशासनाद् व्युत्पत्तिवैचित्र्याच्चैकदेशेऽपि फले। एतेन 'गमनं न व्यापारः' इति प्रयोगः स्यादित्यपास्तम्, व्यापारभेदस्यैकदेशे फलेऽन्वये व्युत्पत्त्यभावात्[1]। अस्तु वा—फलव्यापारयोः पृथगेव शक्तिः। तत्र फलांश उत्सर्गतो व्यापारं प्रति विशेषणम्, जन्यत्वं संसर्गः प्रायेण। क्वचित् तु विषयत्वं संसर्गः। यथा पश्यत्यादेस्तत्पूर्वकदर्शने वृत्तिः। एवमन्येऽपि सम्बन्धा यथायथमूह्याः।

फलत्वञ्च कर्तृप्रत्ययसमभिव्याहारे तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतावत्त्वम्। एकपदोपस्थाप्ययोरपि कृतीष्टसाधनत्वयोः परस्परान्वयस्य परैरप्यङ्गीकारात्। कर्मप्रत्ययसमभिव्याहारे तु विशेष्यताऽपि। तत्रान्तरङ्गत्वात् फलमादौ व्यापारविशेषणतामनुभूयैवार्थान्तरेणान्वयि। अत एव 'गमनं न स्पन्दः' इति न, नञः समभिव्याहृतपदजन्यप्रतीतिविशेष्य एव स्वार्थान्वयव्युत्पत्तेरौत्सर्गिकत्वात्। कर्मकारकातिरिक्तसर्वकारकाणां व्यापारेऽन्वयः साक्षात् परम्परया वा, कर्मणस्तु फले। न च कारकाणां भावनान्वयनियमविरोधः, धात्वर्थस्यैव भावनात्वात्। अस्तु वा—तस्यापि फलद्वारा व्यापार एवान्वयः। व्यापारश्च फूत्कारादिः। अत्र क्रियाशब्दस्य सांकेतिकी शक्तिः,

यावत्सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते।
आश्रितक्रमरूपत्वात् सा क्रियेत्यभिधीयते॥
गुणभूतैरवयवैः समूहः क्रमजन्मनाम्।
बुद्ध्या प्रकल्पिताभेदः क्रियेति व्यपदिश्यते॥

इति भूवादि [१।३।१] सूत्रस्थभाष्यार्थप्रतिपादकहरिग्रन्थात् क्रमजन्मनामेषां व्यापाराणां समूहः स्वभावतो गुणभूतैः = तत्तद्रूपेण भासमानैरवयवैर्युक्तः सङ्कलनात्मिकयैकत्वबुद्ध्या प्रकल्पिताभेदः क्रियेति व्यवह्रियत इति द्वितीयकारिकार्थः। 'पचति' 'पक्ष्यति' इत्यादावसिद्धम्, 'अपाक्षीत्' इत्यादौ सिद्धं वा साध्यत्वेनाभिधीयमानं क्रिया। आश्रितेति योगप्रदर्शनम्। क्रियते = अवयवानां क्रमेणोत्पत्त्या क्रमेणोत्पाद्यते इति क्रियेत्यर्थः।

तत्र सिद्धत्वम्—उद्देश्यत्वावधित्वाभ्यामन्वययोग्यतावच्छेदकम्। लिङ्गाद्यन्वययोग्यतावच्छेदकञ्च यद्वैजात्यम्, तद्रूपम्। इदमेव च क्रियान्तराकाङ्क्षोत्थापकतावच्छेदकम्। साध्यत्वञ्च पूर्वापरीभूतावयवत्वसमानाधिकरणं कारकान्वयादि-

१. ख० 'नञर्थस्य समभिव्याहृतपदजन्यप्रतीतिविशेष्य एवान्वयानुपपत्तेः' इत्यधिकः पाठः।

योग्यतावच्छेदकं यद्वैजात्यम्, तद्रूपम्। तत्र सिद्धत्वम् 'पाकः' इत्यादौ घञा बोध्यते, साध्यत्वं तु सर्वत्रैव धातुप्रतिपाद्यम्।

यत्तु, उद्देश्यत्वादिनानन्वयित्वं लिङ्गाद्यनन्वयित्वं साधनत्वेनानन्वयित्वं क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकरूपवत्त्वं वा साध्यत्वम्। तद् न बोधे भासते, 'साध्यत्वेनाभिधीयते' इत्युक्त्या तत्प्रकारकबोधस्य प्रतिपादनात्, लिङ्गाद्यनन्वयित्वमेव कुतः इति प्रश्ने तन्नियामकवैजात्याङ्गीकारस्यावश्यकत्वाच्च।

यत्तु, उत्पाद्यमानत्वरूपं तद्भासते, अत एव क्रियाया न करणत्वेनान्वयः, उत्पन्नस्यैव लोके करणत्वदर्शनादिति। तत्, न; 'जायमानेन पाकेन वैरं कृतम्' इत्याद्यनापत्तेः, 'ज्योतिष्टोमेन यजेत' इत्याद्यनापत्तेश्च, 'कृष्णं नमेच्चेत् सुखं यायात्' 'भुक्त्वा तृप्यति' 'मानिनीं नत्वा मृदयति' इत्यादावसिद्धस्य साधनत्वेनान्वयाच्च। मम तु न दोषः, तादृशवैजात्येन तत्र फलांशाभावात्। व्यापारमात्रवृत्त्येव वा तद्वैजात्यम्। स व्यापार एव भावनेत्युच्यते। न च धातुतः क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकवैजात्येनार्थोपस्थितौ 'कृष्णं नमेत्' इत्यादावाकाङ्क्षाभावेऽन्वयो न स्यादिति वाच्यम्, यच्छब्दचेच्छब्दसमभिव्याहारप्रयुक्ताकाङ्क्षोत्थानात्। 'भुक्त्वा' इत्यत्रापि धातुसम्बन्धे विधीयमानक्त्वासमभिव्याहारात् सा। 'पचति भवति' इत्यादौ पचतीत्यस्याकाङ्क्षाभावेऽपि भवतीत्यादेः कर्त्राद्यपेक्षत्वाद्योग्यतावशादन्यतराकाङ्क्षयैवान्वयेनादोषात्। तत्र सकलसाधारणक्रियात्वं जातिः शक्यतावच्छेदिका। सकलसाधारणधातुत्वमेव शक्ततावच्छेदकम्, फलं विक्लितित्वादि तत्तद्रूपेण वाच्यम्। पचित्वादि च शक्ततावच्छेदकम्। तत्तद्रूपेण बोधस्तु तथा बोधे तत्तत्समभिव्याहारस्य कारणत्वेन निर्वाह्य इति प्राञ्चः।

नव्यास्तु—फूत्कारादिर्व्यापारः फूत्कारत्वाधःसन्तापनत्वादितत्तद्रूपेणैव वाच्यः, तथैव बोधानुभवात्, सकलसाधारणानुगतैकधर्मान्तरस्य वक्तुमशक्यत्वाच्च। न च विक्लित्त्याद्यनुकूलत्वं तथा, करणव्यापारस्यापि धात्वर्थापत्तावेकसञ्ज्ञाधिकारेण काष्ठादेः कर्तृत्वापत्तौ तस्य चोक्तत्वेन 'काष्ठैर्देवदत्तः पचति' इत्यादौ प्रथमापत्तेः।

न च निरवकाशत्वात् करणसञ्ज्ञा कर्तृसञ्ज्ञां बाधिष्यत इति वाच्यम्, गतेर्वक्ष्यमाणत्वात्। न च जातिविशेषः क्रियाशब्दशक्यतावच्छेदकत्वादिना सिद्धः, तथा जलशब्दशक्यतावच्छेदकतया जलत्वजातिसिद्धेर्लीलावत्युपाये दर्शनादिति वाच्यम्, तेन रूपेण बोधाननुभवात्, तत्तद्रूपेण बोधस्यैवानुभवाच्च। तथा कार्यकारणभावावश्यकत्वे कल्प्यमानधर्मेणापि कार्यकारणभावान्तरकल्पने गौरवापत्तेः। अन्यथा

सैन्धवादिपदशक्यतावच्छेदकतयाऽश्वलवणादिवृत्त्येकधर्मकल्पनापत्तेः। अश्वत्वादिनैव तत्प्रतीतिरनुभवसिद्धेति चेत्, प्रकृते समम्। अत एव विभुपदशक्यतावच्छेदकतया न विभुत्वजातिसिद्धिः, परममहत्परिमाणवत्त्वेनैव[1] ततो बोधात्। अत एव 'देवदत्तः पचति' इत्युक्ते 'देवदत्तः कृतिमान् न वा' इत्यादिसन्देहो न। न च नानार्थता, इष्टापत्तेः, बुद्धिस्थत्वादेः शक्यतावच्छेदकानां तदादाविवानुगमकस्य सत्त्वाच्च[2]। तत्र यदा यो बुद्धिस्थस्तदा सोऽभिधीयते, तदा च तदाश्रयः कर्ता। अत एव 'काष्ठानि पचन्ति' इत्युपपन्नम्। तद्व्यापारस्य धात्वर्थत्वाविवक्षायाम् 'काष्ठैः पचति' इत्यपि। शक्ततावच्छेदकं च पचित्वादिकमेव। धातुत्वं शक्ततावच्छेदकमिति तु न युक्तम्, धातुत्वमजानतोऽपि बोधात्।

एतेन फूत्कारादिकं विनापि चैत्रनिष्ठक्रियान्तरमादाय सिद्धज्वालया जायमाने ओदने 'चैत्रः पचति' इति प्रयोगानापत्तिः। तत्तद्व्यापारस्य तत्तद्रूपेण वाच्यत्वे यागः, इच्छा, ज्ञानं वेति वादिविप्रतिपत्त्यनुपपत्तिश्चेति **मीमांसकन**व्योक्तं परास्तम्। फूत्कार एव गृहीतशक्तिकस्य व्यजनेन वह्निप्रज्वालनदशायाम् 'पचति' इति प्रयोगो न भवत्येव। वादिविप्रतिपत्तिरपि स्वीयस्वीयतादृशबोधानुसारादेवोपपन्ना। न च फूत्कारस्यातीतत्वमात्रेण व्यापारान्तरवर्तमानतादशायाम् 'अपाक्षीत्' इत्यादिप्रयोगापत्तिः, भूतत्वादेः समुदाय एवान्वयस्य निरूपयिष्यमाणत्वादित्याहुः।

अन्ये तु कृत्यतिरिक्तव्यापारे पचित्वं शक्ततावच्छेदकम्, कृतेस्तु सर्वधातुष्वनुस्यूततया प्रतीयमानत्वेन तत्र सकलसाधारणधातुत्वमेव शक्ततावच्छेदकमाहुः।

नन्वेवमस्त्यादीनां धातुत्वानापत्तिः, तेषां सत्तामात्राद्यर्थत्वेन व्यापाररूपक्रियावाचकत्वाभावादिति चेत्, न; तत्रापि सत्ताद्यनुकूलव्यापारस्यैवार्थत्वात्। भावनाफलयोरेकनिष्ठत्वाच्च गच्छतीत्यादाविव स्पष्टं न प्रतीयते। न चैवम् 'किं करोति' इति प्रश्ने 'पचति' इत्यस्येव 'अस्ति' इत्यस्याप्युत्तरत्वं स्यात्। आसन्नविनाशं कञ्चिदुद्दिश्य 'किं करोति' इति प्रश्ने 'अस्ति' इत्युत्तरस्य सर्वसम्मतत्वात्। इतरत्र तु सुस्थतया निश्चिते 'किं करोति' इति प्रश्नः पाकादिविशेषगोचर एवेत्यवधारणात् 'अस्ति' इति नोत्तरम्। अस्तेः स्वस्वरूपधारणानुकूलव्यापारोऽप्यर्थः, धारणां चोत्तरकालसम्बन्धः, तेन 'आत्मास्ति' इत्यादौ नानुपपत्तिः। उत्पत्त्यनुकूलो व्यापारोऽपि 'घटो भवति' इत्यादौ। सकर्म-

१ ख० 'सर्वभूतसंयोगित्वेन वा' इत्यधिकः पाठः। २. ख० 'न च...सत्त्वाच्च' इति नास्ति।

कत्वं च व्यापारव्यधिकरणफलवाचकत्वम् । तत्समानाधिकरणफलवाचकत्वं चाकर्मकत्वम् । अत एवास्त्यादेरवच्छेदकतारूपव्याप्त्यनुकूलसत्तारूपव्यापारार्थकत्वे 'मासमास्ते' इत्यादौ सकर्मकत्वमपीति स्पष्टं भाष्य इत्याहुः ।

अन्ये तु—अस्त्यादौ व्यापार एवार्थः, न फलम् । स च सत्तादिरूप एव, तस्यैव प्रागुक्तवैजात्याक्रान्ततया भानात् । अत एव 'पश्यति भव.' इत्यादौ निवृत्तप्रेषणे विषयतारूपस्यैव फलस्य क्रियात्वमभ्युपगतम् । अतस्तदाश्रयस्य कर्तृत्वम् 'भवं पश्यति' इत्यादौ तु न विषयत्वस्य व्यापारत्वमिति न तदाश्रयस्य कर्तृत्वम्, कर्मसञ्ज्ञाया बाधाच्च । क्रियात्वं तद्धात्वर्थनिष्ठानुकूलतानिरूपकत्वानाश्रयत्वे सति तद्धातुजन्यशाब्दबोधविषयत्वमेव । इदञ्च 'भवं पश्यति' इत्यादौ विषयत्वस्य नेति न दोषः । केवलव्यापारवाचकत्वमकर्मकत्वम् । फलव्यापारोभयवाचकत्वं सकर्मकत्वमित्याहुः ।

नन्वेवं जीवनृत्यादेः सकर्मकत्वापत्तिः, प्राणधारणगात्रविक्षेपणादिरूपफलस्य सत्त्वात्, व्यापारव्यधिकरणत्वाच्चेति चेत्, न; फलाश्रयावाचकत्वे सत्यविवक्षाविरहविशिष्टफलव्यधिकरणव्यापारवाचित्वस्य सकर्मकत्वाददोषः । एतेषां हि प्राणगात्रादिरूपफलाश्रयवाचकत्वात् । अविवक्षितकर्मस्वतिव्याप्तिवारणाय **विवक्षाविरहविशिष्टेति ।**

पचेर्विक्लित्यनुकूलव्यापारोऽर्थः । **यत्तु**—तेजःसंयोगमात्रं पच्यर्थ इति । तत्, न; अग्निसंयोगानुकूलकृत्यभाववति भक्तविक्लित्यनुकूलाश्रयणकर्तरि 'पचति' इति प्रयोगानापत्तेः ।

ज्ञाधातोर्विषयतासम्बन्धेन ज्ञानं फलम्, आत्ममनःसंयोगो व्यापारः । यद् वा, आवरणभङ्गो विषयता वा फलम् । नष्टस्यापि बुद्ध्युपारोहात् फलशालित्वम् ।[2]

१. ख० 'अत्राद्यमतमेव युक्तम् । अन्त्यमते हि 'उत्तिष्ठति' इत्यादौ ऊर्ध्वदेशसंयोगरूप उत्थानाद्येवार्थः स्यात् । एवञ्चोर्ध्वदेशसंयोगादेर्विद्यमानत्वेन 'उत्थितः' इत्यादिप्रयोगानापत्तिः । मम तु तदनुकूलव्यापारस्यातीतत्वात् तस्य विद्यमानत्वेऽपि तथा प्रयोगो भवतीति तत्त्वम् ।
अपरे तु—अकर्मकत्वं व्यापाराव्याधिकरणफलवाचकत्वाभावः । स एवं स च क्वचित् सामानाधिकरण्याभावात्, क्वचित् फलांशाभावात् । एवञ्चास्त्यादौ केवलसत्ताद्येवार्थः, 'उत्तिष्ठति' इत्यादावुभयमिति न दोष इत्याहुः' इत्यधिकः पाठः ।

२. ख० 'घटं करोति' इत्यादावपि ।

सत्कार्यवादाभ्युपगमे तु न काचिद् दोषाशङ्का 'आत्मानं जानाति' इत्यादावप्यात्मभेदः कल्प्यः। एकः शरीरावच्छिन्नोऽपरोऽन्तःकरणावच्छिन्नः। तत्रान्तःकरणावच्छिन्नः कर्त्ता, शरीरावच्छिन्नः कर्मेति फलव्यापारयोर्भिन्ननिष्ठत्वाक्षतिः। स्पष्टं चेदम् "कर्मवत्" [३।१।८७] सूत्रे भाष्ये।[1]

जनेरुत्पत्तिमात्रम्, तत्समानाधिकरणव्यापारो वार्थः।

'नश्यति' इत्यत्र नाशानुकूलप्रतियोगिसहितनाशसामग्रीसमवधानरूपो व्यापारोऽर्थः।

पतेर्गमिवत् सकर्मकत्वमेव। अत एव "द्वितीयाश्रित"[२।१।२४]इति सूत्रे 'नरकपतितः' इत्युदाहरणं सङ्गच्छते। अकर्मकत्वमपि[2] व्यापारमात्रपरत्वे बोध्यम्।

कृञ उत्पत्तिव्यधिकरणस्तदनुकूलव्यापारोऽर्थः, यत्नमात्रार्थत्वेऽकर्मकत्वापत्तेः। ननु यद्धातूच्चारणे कर्माकाङ्क्षा नियता, स सकर्मकः। सा च समानार्थकेष्वपि धातुविशेषोपस्थापननिबन्धना यत्रास्ति, स सकर्मकः। एवञ्च कृञोऽपि यतेरिव यत्नमात्रार्थकत्वेऽपि न दोषः। कर्मत्वादिपदोपस्थाप्यस्य क्रियाकाङ्क्षत्वाभावेऽपि द्वितीयोपस्थाप्यस्य तत्साकाङ्क्षत्ववत् कृञुपस्थाप्यस्य यत्नस्य कर्माकाङ्क्षोपपत्तेः।

अविवक्षितकर्मणां सकर्मकत्वस्य वारणीयत्वे चाविक्षाभाववैशिष्ट्यमपि निवेश्यम्। एवमेकस्यैवार्थभेदेन सकर्मकत्वम्, अकर्मकत्वं चोपपन्नम्। यदर्थेऽविवक्षाविरहविशिष्टकर्माकाङ्क्षा यस्य, स तत्रार्थे सकर्मक इत्य(न)नुगतस्यैव लक्षणत्वादिति चेत्, न; गच्छत्यादिषु कर्माकाङ्क्षाविरहेणाव्याप्तेः। अत्रत्य 'कुत्र', 'किम्' इत्याकाङ्क्षायाः 'यतते', 'भवति' इत्यादिषु 'कुत्र' 'किम्' इत्याकाङ्क्षातुल्यत्वात्। किञ्च, कृञो यत्नमात्रार्थत्वे कर्मस्थभावकत्वाभावाद् यगादिकं न स्यादिति निरूपयिष्यामः। कृतिपदे तु कृञो लक्षणा बोध्या[१]। सकर्मकधात्वन्यतमत्वं सकर्मकत्वमिति तु न युक्तम्, एकस्यैवार्थभेदेन सकर्मकाकर्मकत्वव्यवहारादिति दिक्।

इति धात्वर्थविचारः

1. 'ननु 'हन्त्यात्मानमात्मा' 'आत्मना हन्यत आत्मा' इत्यादावेकस्यैव वस्तुनः कथं शब्दभेदमात्रेण भिन्नधर्मता इत्यर्थके "कः पुनरात्मानं हन्ति, को वात्मना हन्यते" इति प्रश्ने "द्वावात्मानौ शरीरात्मा, अन्तरात्मा च। अन्तरामा तत्कर्म करोति, येन शरीरात्मा सुखदुःखे अनुभवति। शरीरात्मा तत्कर्म करोति, येनान्तरात्मा सुखदुःखे अनुचवति" इत्युक्तम्।

2. 'पत'धातोरिति शेषः।

१. ख० 'धातूनामनेकार्थत्वाद् वा तत्र वृत्तिः' इत्यधिकः पाठः।

अथ निपातसामान्यार्थविचारः

नन्वेवम् 'अनुभूयते सुखम्', 'साक्षात् क्रियते गुरुः' इत्यादेः सकर्मकत्वं न स्यात्, अनुभवसाक्षात्काररूपफलयोर्निपातार्थत्वेऽपि धात्वर्थत्वाभावादिति चेत्, न; निपातानां द्योतकत्वेनादोषात् ।

यत्तु 'प्रजयति' इत्यादौ प्रकृष्टजयो नोपसर्गवाच्यः, अप्रकृत्यर्थत्वेनाख्यातार्थकृतावन्वयानापत्तेः । न च जयो धात्वर्थः, प्रकर्षः प्रशब्दार्थ[1] इति वाच्यम्, एवं हि 'प्रतिष्ठते' इत्यत्र गमनत्वेन रूपेण बोधो न स्यात्, धातोर्गतिनिवृत्त्यर्थत्वेऽभावस्य प्रशब्दार्थत्वेऽपि गत्यभावो नास्तीत्येव प्रत्ययापत्तेः । न च तथा बोधानुभवः, न च विशिष्टो जयो धात्वर्थः, अर्थान्तरस्येवोपसर्गं विनाप्येतदर्थप्रत्ययापत्तेः ।

किञ्च, प्रत्येकातिरिक्तविशिष्टाभावात् प्रत्येकमुभयत्र धातोः शक्तिर्वाच्या । एवञ्च धातोर्जये क्लृप्तशक्तेः प्रकर्षे शक्तावुपसर्गस्य शक्त्यवच्छेदकत्वं शक्ततावच्छेदके विशेषणत्वमात्रमेव तत्त्वम् । एवञ्च प्रोत्तरजित्वेन प्रकृष्टजये शक्तिः । न च जिपूर्वप्रत्वेन शक्तिरस्तु, अक्लृप्तशक्तिकल्पनापत्तेः, आख्यातार्थानन्वयप्रसङ्गाच्च ।

शक्त्यवच्छेदकत्वमेव च द्योतकत्वम् । यद्वा, धातोस्तत्र तत्रार्थे लक्षणा, उपसर्गास्तात्पर्यग्राहकाः । एतदेव द्योतकत्वम्, 'व्यतिसे' इत्यादौ तद्बोधस्तु लुप्तस्मारणात्, लोपमजानतो बोधस्तु न भवत्येव । यद्वा, शिष्यमाणं लुप्यमानार्थाभिधायीति प्रत्ययस्यैव तदर्थे लक्षणा ।

किञ्च, उपसर्गस्य तदर्थत्वे धातोरकर्मकत्वात् 'अनुभूयते सुखम्' इत्यादौ कर्मणि लकारो न स्यात्, स्वार्थफलव्यधिकरणव्यापारवाचकत्वस्यैव सकर्मकत्वात् । अन्यथा यत्किञ्चित् फलवैयधिकरण्यस्य सर्वत्र सत्त्वेनातिप्रसङ्गात् । एतेन विशिष्टार्थत्वमिति निरस्तम्, विशिष्टस्याप्यधातुत्वात्, धातुत्वेऽडादिव्यवस्थानापत्तिः । तस्मादुपसर्गाणां द्योतकत्वम्, चादयस्तु वाचका एव । 'साक्षात्क्रियते' इत्यादौ विषयतासम्बन्धेन प्रत्यक्षादिरूपतत्तत्फलवाचकं साक्षात्पदादिकमेव । तदुत्पत्त्यनुकूलो व्यापारो धात्वर्थः । अत एव "साक्षात्प्रत्यक्षतुल्ययोः" [अ० को०, का० ३, ना० व०, श्लो० २८२२] इत्यादिकोशः सङ्गच्छते । नमःपदेन

---

१. ख० 'नामार्थधात्वर्थयोर्विभक्त्यर्थमद्वारीकृत्य साक्षाद् भेदसम्बन्धेन नान्वय इति व्युत्पत्तिस्तु उपसर्गातिरिक्तविषया' इत्यधिकः पाठः ।

नमस्कारार्थत्वस्य लोकसिद्धत्वाच्च स्वस्वयुक्तनिपातान्यतरार्थफलव्यधिकरण-व्यापारवाचित्वस्य सकर्मकत्वात् । कर्मत्वमप्येतादृशफलाश्रयत्वमेव । एवञ्च कर्मणि लकारोऽप्युपपन्नः । न च साक्षात्पदार्थस्य साक्षाद्धात्वर्थेऽन्वयो न युक्तः, 'ओदनः पचति' इत्यादौ कर्मत्वसंसर्गेणान्वयबोधवारणायाभेदातिरिक्तसम्बन्धेन नामार्थ-प्रकारकशाब्दबोधं प्रति प्रत्ययजन्योपस्थितेर्हेतुत्वादिति वाच्यम्, निपातेतरत्व-विशेषणदानात् । न च 'कीदृशः समुच्चयः' इतिवत् 'कीदृशश्च' इत्यस्यापत्तिः । एवं 'शोभनः समुच्चयो द्रष्टव्यः' इतिवत् 'शोभनश्च द्रष्टव्यः' इत्यस्याप्यापत्तिरिति वाच्यम्, निपातैः स्वार्थस्य परविशेषणत्वेनैवोपस्थितेर्विशेषणान्वयाप्रसङ्गात् । न च 'घटश्च' इत्यादौ विना षष्ठीमनन्वयापत्तिः, प्रातिपदिकार्थयोर्विभक्त्यर्थमद्वारीकृत्य भेदेनान्वयायोगात् । अन्यथा 'राजा पुरुषः' इत्यतोऽपि 'राज्ञः पुरुषः' इतिवदन्वया-पत्तिरिति वाच्यम्, निपातातिरिक्तत्वविशेषणात् ।

किञ्च, चादीनां समुच्चिताभिधायकत्वान्न भेदनिबन्धना षष्ठी । 'समुच्चितो घटः' इत्यभेदेनैवान्वयः । स्वभावतश्च चाद्युपस्थाप्यस्यासत्त्ववाचकत्वम् । न च समुच्चिते धर्म्यंशे शक्तिकल्पनागौरवम्, प्रामाणिकत्वात् । एवं समुच्चयस्यैकदेश-त्वान्न तत्र सुन्दरादिविशेषणान्वयः ।

एतेन 'घटश्च' इत्यादौ विरुद्धविभक्त्यनवरुद्धप्रातिपदिकार्थत्वादभेदान्वया-पत्तिः 'घटसमुच्चययोः' इति परास्तम् । घटपदस्य घटप्रतियोगिके लक्षणयाऽभेदा-न्वयस्यैवाङ्गीकाराच्च ।

न च 'शरैरुस्रैरिवोदीच्यानुद्धरिष्यन् रसानिव' [रघु० ४, ६६] इत्यस्योस्र-दृशैः शरैः रससदृशानुदीच्यानुद्धरिष्यन्नित्यर्थः । तत्रेवशब्दार्थस्य करणत्वेऽप्युस्रस्या-करणत्वेनोस्रपदोत्तरतृतीयाया [1]नैरर्थक्यम् । इवशब्दात् तु तृतीयाभावेन सदृशस्य करणत्वालाभश्च । उस्रपदोत्तरतृतीयया तु न सदृशगतं करणत्वं बोधयितुं शक्यम्, अप्रकृत्यर्थत्वात् । द्योतकत्वे तु न दोष इति वाच्यम्, इवशब्दोत्तरतृतीयया तद्बोधात् । न च श्रवणापत्तिः, अव्ययत्वेन लुकः सत्त्वात् ।

न च सत्त्ववाचकत्वान्नाव्ययत्वम्, लिङ्गानन्वयित्वरूपासत्त्वस्याक्षतेः, चादौ पाठसामर्थ्यात् सत्त्वार्थेऽप्यव्ययत्वस्वीकाराच्च । 'उस्रैः' इत्यस्य सदृशे स्वप्रतियोगिक-सादृश्यसम्बन्धेनान्वयः । तृतीया तूपमानोपमेययोः समानविभक्तिकत्वस्य ज्ञापक-सिद्धत्वात् ।

---

१. ख० 'नैरर्थक्यम् । ....करणत्वालाभश्च' इति पाठस्त्रुटितः ।

किञ्च, द्योतकत्वे नञ्समासादावुत्तरपदार्थः प्रधानमिति व्यवस्था न स्यात्, पूर्वपदस्यानर्थकत्वात्। किञ्च, निपातेभ्यो विभक्त्युत्पत्तिर्न स्यात्, तेषामर्थवत्त्वाभावेन प्रातिपदिकत्वाभावादिति नैयायिकाः। तत्, न; उपसर्गाणामपि वाचकत्वापत्तेः। अर्थवत्त्वमपि द्योत्यार्थमादायैव। अर्थप्रतीतिजनकज्ञानविषयशब्दत्वमर्थवत्त्वम्, न तु शक्तिलक्षणान्यतरसम्बन्धेन बोधकत्वम्। उत्तरपदार्थप्राधान्यमपि द्योत्यार्थापेक्षयैव।

नन्वेवम् 'रामः' इत्यादौ 'रा' इत्यतोऽपि विभक्त्यापत्तिः, न च सङ्ख्यावाचकत्वाभावान्न सा, निपातेभ्योऽप्यनापत्तेः, औत्सर्गिकैकवचनस्यात्रापि दुर्वारत्वाच्च। न च 'एकाज्द्विर्वचन'न्यायेन[1] समुदायस्यैवेति वाच्यम्, समुदायकार्येणावयवाननुग्रहेण तदप्रवृत्तेः। न चोत्पन्नविभक्तेर्लुका लुप्तत्वान्न दोषः, 'धनम्' इत्यादौ नलोपापत्तेर्जस्त्वापत्तेश्च। न चास्तु समस्तमेकं रामपदम्, 'पन्थाः' 'पूः' इत्यादौ समासान्तापत्तेरिति चेत्, न; विषयतापर्याप्त्यधिकरणत्वस्य निवेशेन तस्य 'रा'शब्देऽभावात्, विशिष्ट एव तत्सत्त्वात्, प्रकृतेर्जयादौ क्लृप्तशक्तेर्जयतेर्लक्षणायां तात्पर्यग्राहकत्वस्य शक्तौ तदवच्छेदकताया वा स्वीकारेण तत्त्वमस्त्येव। अत एव केवलानां तेषामप्रयोगः।

वस्तुतस्तु शक्तिलक्षणाद्योतकतान्यतमसम्बन्धेन बोधकत्वमेव तदिति न दोषः। एतेन घटादिपदेष्वपि चरमवर्णस्यैव लक्षणा, अन्ये तात्पर्यग्राहका इत्यपास्तम्, प्रातिपदिकत्वाद्यापत्तेः। वाचकत्वे तेष्वतिरिक्तशक्तिकल्पनापत्तिश्च। तस्माद् द्योतकत्वमेवैषाम्। ननु वाचकत्वमेवास्तु, द्योतकत्वस्य निर्वक्तुमशक्यत्वात्। न च शक्त्यवच्छेदकत्वं तत्त्वम्, निपातधात्वादीनामानुपूर्व्याः शक्ततावच्छेदकत्वे गौरवात्, जयमात्रशक्तस्य प्रकर्षादिविशिष्टे लक्षणयोपपत्तौ गौरवग्रस्तोक्तकल्पनाऽयोगाच्च। न च लक्षणायां तात्पर्यग्राहकत्वमेव द्योतकत्वमस्तु, सुप्तिङामपि द्योतकत्वापत्तेः, धात्वादेः कर्तृकर्मादिविशिष्टे लक्षणायां तिङादेस्तात्पर्यग्राहकत्वसम्भवात्।

---

1. "एकाचो द्वे प्रथमस्य" [६।१।१] इति सूत्रे भाष्ये—'निज्, इज्, नि, इ' इति चत्वार एकाचः। तत्र इज्शब्दस्य, निशब्दस्य, इशब्दस्य वा द्वित्वे रूपासिद्धिः, 'नेनिजुः, नेनिजति' इत्यादौ जकारेण व्यवधानाज्जुसाद्यप्राप्त्या दोषश्च, इत्युक्त्वा 'सिद्धन्तु तत्समुदायैकाच्त्वात् शास्त्राहानेः' इति।

अस्यायमर्थः—समुदायस्यैकाच्त्वात् = एकाज्भावाद् द्विर्वचनं भविष्यति। एवं हि शास्त्रमहीनं भवति। अग्रे च—तत्र बहुव्रीहिनिर्देशेऽनच्कस्य द्विर्वचनं प्राप्नोतीत्याशङ्क्य तद्गुणसंविज्ञानपक्षमाश्रित्य समाहितम्। तदेवं चतुष्प्रकारकम् एकाच्त्वमेव द्विर्वचनन्यायतात्पर्यमिति बोध्यम्।

यत्तु, ज्यादेर्लाक्षणिकत्वे ततोऽनुभवानापत्तिः, लाक्षणिकस्याननुभावकत्वादिति। तत्, न; बोधकत्वेनैवानुभावकत्वात्। अत एवापभ्रंशादितः परमतेऽनुभवः।

वस्तुतोऽनुमितिशाब्दयोः 'अनुभूतम्' इत्यप्रत्ययादनुभवत्वं प्रत्यक्षत्वव्याप्यमेवेति न दोषः। शाब्दबोधोऽपि लाक्षणिकान्नेति तु वक्तुमप्यशक्यम्। किञ्च, धातोर्लक्षणास्वीकारे घटादिपदस्थचरमवर्णस्यैकाक्षरनिघण्टुवशात् तत्तदर्थकस्य घटत्वादिविशिष्टे लक्षणया बोधोपपत्तौ घटादिपदानामप्यवाचकत्वप्रसङ्गः। न चावयवशक्तिमविदुषोऽपि समुदायशक्तिज्ञानात् तथा बोधात् तेषां शक्तिकल्पनम्, धातोः शक्तिमविदुषोऽप्युपसर्गस्य तद्ग्रहवतो बाधात् तथात्वस्यावश्यकत्वात्। न च प्रकारतासम्बन्धेनाख्यातार्थविशेष्यकशाब्दं प्रति धातुजन्योपस्थितेर्हेतुत्वरूपाकाङ्क्षाविरहादुपसर्गशक्तिग्रहेऽपि न बोध इति वाच्यम्, तादृशकारणत्वग्रहशालिपुरुषीयशाब्द एव तस्य हेतुत्वात्। 'व्यतिसे' इत्याद्यनुरोधादाख्यातार्थविशेष्यकशाब्दं प्रति निपातजन्योपस्थितेरपि हेतुत्वकल्पनस्योचितत्वाच्च।

वैयाकरणनयेऽपि प्रकारतासम्बन्धेन धात्वर्थविशेष्यकबोधं प्रति निपातजन्याप्युपस्थितिर्हेतुरिति न दोषः। अन्याश्च व्युत्पत्तयो निपातातिरिक्तविषया इति नान्येऽपि दोषाः।

अस्तु वा, प्रकृष्टो धर्मी प्राद्यर्थः, तेनाभेदेनैवान्वयान्न दोषः। न च वाचकत्वे केवलानां प्रयोगापत्तिः, [1]प्रकृतिप्रत्ययवत् समाधानात्। किञ्च, तद्बोध्यप्रकर्षादेर्विना सम्बन्धिनमनन्वयात् केवलप्रयोगासम्भवः। समुच्चिताद्यभिधायकत्वेऽपि विशेषतस्तयोरुपस्थितिं विना प्रतीत्यपर्यवसानान्नित्यपरतन्त्रतयैव प्रयोगः। किञ्च, 'न' इत्येवोक्तेऽभावशाब्दबोधस्य सर्वसिद्धत्वात् पदान्तरसमभिव्याहाराभावे द्योतकत्वासम्भवः। अत एव "नञ्" [२।२।६] सूत्रे भाष्ये 'न न' इत्यत्राभावो नास्तीत्यर्थप्रदर्शनं कृतम्। अस्तीति क्रियायाश्चात्राध्याहारः। किञ्च, द्योतकत्वे पदान्तराणां तत्र वृत्तिः कल्प्या, चादिषु च द्योतकत्वशक्तिः कल्प्येति गौरवम्। अत एव

---

1. 'न केवला प्रकृतिः प्रयोक्तव्या, नापि केवलः प्रत्ययः' इति भाष्याद् यथा केवलायाः प्रकृतेः, केवलस्य च प्रत्ययस्य प्रयोगो न भवति, तथैव केवलानां निपातानामपि प्रयोगो न भवति।

इदमत्राकूतम्—लोके अर्थप्रत्यायनाय शब्दाः प्रयुज्यन्ते, लोके च यथा केवलया प्रकृत्या केवलेन च प्रत्ययेन नार्थबोधो भवति, तथैव केवलेन निपातेनाप्याकाङ्क्षाविरहाद् बोधो न भवति।

नञः पर्युदासे लक्षणेति **मीमांसकोक्तिः** सङ्गच्छते । तस्माद् वाचकत्वमेव युक्तमिति चेत्, न; अन्यलभ्ये शक्तिकल्पनायोगात् । अन्वयव्यतिरेकौ तु तात्पर्यग्राहकत्वेनान्यथासिद्धौ ।

वस्तुतस्तु निपातानां शक्तिं गृहीतवतो लक्षणाद्यज्ञानेऽपि बोधात् तच्छक्तिज्ञानकार्यकारणभाव आवश्यकः । एवं तच्छक्तिमजानतां लक्षणाज्ञानेनैव बोधात् तत्कार्यकारणभावोऽप्यावश्यक इति द्योतकत्वं शक्यत्वञ्चेत्युभयमपि निपातानामिति मतनिष्कर्षः । सर्वथा निपातानां वाचकत्वम्, उपसर्गाणां द्योतकत्वमित्यर्धजरतीयं नैयायिकोक्तं हेयमेव[१], शक्तिसम्बन्धेन निपातपदवत्त्वरूपस्याखण्डोपाधिरूपस्य जातिरूपस्य वा निपातत्वस्यैव सामान्ये प्रमाणानां पक्षपाताद् द्योतकतायाः शक्तताया वा अवच्छेदकत्वस्य युक्तत्वात्[२] । 'अथ शब्दानुशासनम्' [म० भा० प्रा०] इत्यत्रानुशासनशब्द एव तद्बोधकः, भाष्यकृतोऽपि द्योतकत्वपक्ष एव सम्मत इत्युपलभ्यते । **पस्पशायाम्**, "अधिरी अनर्थकौ" [१।४।९३] इत्यत्र "नञ्" [२।२।६] सूत्रे च तथा स्वरसादित्यलम् ।

इति निपातसामान्यार्थविचारः[1] ।

1. **इदमत्राकूतम्—निपातार्थविषये शास्त्रेषु पक्षत्रयं दृश्यते । निपातार्थानामनुभवादीनां धातुमात्रतो बोधाभावेनोपसर्गसम्बन्धात् तदवगम इत्युपसर्गाणां विशेषार्थद्योतकत्वमेव । यथा 'अनुभवति' इत्यत्रानुभवरूपस्यार्थस्य 'अनु'-शब्दो द्योतकः । तदुक्तं हरिणा—**

क्वचित् सम्भविनो भेदाः केवलैरनि[भि] दर्शिताः ।
उपसर्गेण सम्बन्धे व्यज्यन्ते प्र-परादिना ॥

[वा० २, १८९]

इति प्रथमः पक्षः ।

१. ख० 'हेयमेव' इत्यनन्तरम् 'न च निपातानां वाचकत्वे 'इवास्ति' इत्याद्यपि 'सादृश्यमस्ति' इत्यादिवत् स्यादिति वाच्यम्, प्रतियोग्युपमानादिपदोपादानेनैव बोधकत्वाङ्गीकारात्' इत्यधिकः पाठः ।

२. ख० 'युक्तत्वात्' इत्यनन्तरम् 'तत्तदर्थनिरूपितद्योतकत्वस्य वाचकत्वस्य वा तत्तन्निपातवृत्तितया तत्तद्वृत्त्यसाधारणधर्मस्यावच्छेदकताया आवश्यकत्वेनासामान्यधर्मस्यावच्छेदकत्वे मानाभावात्, निपातत्वाद्यजानतोऽपि बोधाच्च । द्योतकत्वस्य वाचकत्वाभावस्य वा सामान्यावच्छेदेन साधकहेतोरुभयवादिसम्मतस्याभावाच्च—इत्यधिकः पाठः ।

क्वचिच्चोपसर्गाणां वाचकत्वमपि, यथा—'प्रतिष्ठते' इत्यादौ धातोर्गतिनिवृत्तिवाचकत्वम्, 'प्र'शब्दस्य तु गतिवाचकत्वम्। तदुक्तं हरिणा—

स वाचको विशेषाणां सम्भवाद् द्योतकोऽपि वा।

[वा० २, १९०]

इति द्वितीयः पक्षः।

सम्भूय धातूपसर्गावर्थमाहतुः, उपसर्गस्तु शक्तिमात्रं कुरुत इत्यर्थाभिधाने सहकारिण उपसर्गाः। उक्तञ्च वाक्यपदीये—

शक्त्याधानाय धातोर्वा सहकारी प्रयुज्यते॥

[वा० २, १९०]

इति तृतीयः पक्षः।

उक्तेषु त्रिषु पक्षेषु कतमः पक्षः श्रेष्ठ इति मीमांसायामुपसर्गाणां द्योतकत्वमेव समुचितम्। 'प्रतिष्ठते' इत्यत्र धातूनामनेकार्थत्वात् 'स्था'-धातोरेव गतिरर्थः, प्रशब्दस्तु तस्यार्थस्य द्योतकः। तदुक्तं वाक्यपदीये—

स्थादिभिः केवलैर्यच्च गमनादिर्न गम्यते।
तत्रानुमानाद् द्विविधात् तद्धर्मा प्रादिरुच्यते॥ इति।

[वा० २, १९१]

अयमर्थः—तिष्ठतिर्गतिनिवृत्तिं प्रसिद्धचाऽभिदधाति। अतस्तेन केवलेन गमनं न प्रतिपाद्यते। 'अनेकार्था धातवः' इति कृत्वाऽनुमानाद् गतिवाचकत्वमपि तस्य व्यवस्थाप्यते। उपसर्गस्तु तद्द्योतक एव। धातूनामनेकार्थत्वमुपसर्गाणाञ्च द्योतकत्वमनुमानेन साधयन्नाह—तत्रेति। अनुमानप्रकारश्च—'धातुः अनेकार्थः, धातुत्वात्; उभयवादिसम्मतानेकार्थयजधातुवत्'। 'प्र'-शब्दो द्योतकः, 'प्र'शब्दत्वात्, 'प्रपचति' इत्यादिदृष्टप्रशब्दवदिति। एवं चादिनिपातेष्वपि पक्षत्रयं बोध्यम्। तदुक्तं हरिणा—

निपाता द्योतकाः केचित् पृथगर्थाभिधायिनः।
आगमा इव केऽपि स्युः सम्भूयार्थस्य वाचकाः॥ इति।

[वा० २, १९४]

अत्रापि द्योतकत्वपक्ष एव न्याय्यः, केवलानां चादीनामप्रयोगात्। यदि वाचकाः स्युः, तदा गवादिवत् केवला अपि प्रयुज्येरन्। तस्मात् 'चादयो न वाचकाः, केवलानामप्रयोगात्, प्रत्ययवत्' इत्यनुमानं फलितम्। तदुक्तं वाक्यपदीये—

चादयो न प्रयुज्यन्ते पदत्वे सति केवलाः।
प्रत्ययो वाचकत्वेऽपि केवलो न प्रयुज्यते॥ इति।

[वा० २, १९६]

एवञ्च प्रादीनां चादीनाञ्च निपातानां द्योतकत्वमेवेति हरीणां हृदयम् ।

नागेशभट्टस्यापि अयमेव पक्ष इष्टः, मञ्जूषायां पुनः पुनस्तस्यैव समर्थनात् ।

भट्टोजिदीक्षितप्रभृतयः प्राचीनवैयाकरणास्तु—निपातत्वावच्छिन्नानां सकलनिपातानां द्योतकत्ववाचकत्वे मन्वते ।

प्रादीनां द्योतकत्वं चादीनां वाचकमेवेति नैयायिकरीतिस्तु न साध्वी, वैषम्ये बीजाभावात् । अत एव द्योतकत्वपक्षं व्यवस्थाप्य—

निपातानां वाचकत्वमन्वयव्यतिरेकयोः ।

[वै० भू० निपातनि०, पृ० ३८०]

इत्यादिना वाचकत्वपक्षोऽपि समर्थितो भूषणादौ ।

उपसर्गातिरिक्तनिपाता वाचका द्योतकाश्चेति भगवान् भाष्यकारः । स हि "अव्ययं विभक्ति०" [२।१।६] इति सूत्रे भाष्ये 'सुमद्राः, सुमगधाः, सपुत्रः' इत्यादावव्ययीभावसमासमाशङ्क्य पूर्वपदप्रधानस्याव्ययीभावत्वेनात्र पूर्वपदप्राधान्यं नास्तीत्युक्त्वा 'अथवा नेमे समासार्था निर्दिश्यन्ते, किं तर्हि ? अव्ययार्था इमे निर्दिश्यन्ते। एतेष्वर्थेषु यदव्ययं वर्तते, तत्सुबन्तेन सह समस्यते' इत्यवोचत् । कैयटेन चाव्ययस्य श्रुतत्वादन्तरङ्गत्वात् तस्यैव विभक्त्यादयो विशेषणानि । तत्र यदोत्तरपदार्थावच्छिन्नाः समृद्ध्यादयः प्रतिपिपादयिषिताः, तदाऽव्ययं समृद्ध्यादीनां वाचकमिति तेषां तदर्थता भवति । सुमद्रा इत्यत्र तु मद्रशब्द एव समृद्धिविशिष्टमर्थमाह, सुशब्दस्तु समृद्धिद्योतकः, न तु वाचक इत्यादि व्याख्यातम् । अनेन भाष्यकैयटव्याख्यानेन स्पष्टमेव निपातानामुभयं प्रतिभाति, उपसर्गाणां तु द्योतकत्वमेव ।

स्पष्टञ्चैतत् "गतिर्गतौ" [८।१।७०] इति सूत्रभाष्ये । तत्रत्य-भाष्यं तु—'ननु पूर्वं धातुरुपसर्गेण युज्यते, पश्चात् साधनेन । नैतत् सारम्....' इत्यादि ।

अथ नञर्थविचारः

अथ प्रसङ्गान्निपातविशेषनञर्थो विचार्यते । स्यादेतत्—नञर्थो नाभावः, तथाहि—सत्यभावस्य प्रतियोगितानिरूपितविशेष्यतयैव भानस्य सर्वसिद्धत्वात् 'अघटः' इत्यादौ 'घटभिन्नः' इति बोधे उत्तरपदार्थप्राधान्यं तत्पुरुषस्य भज्येत । 'अतिसर्वाय' इत्यादिवत् 'असः' इत्यादौ सर्वनामकार्याभावापत्तिश्च; अभावे प्रतियोगिनो विशेषणत्वस्य सर्वसिद्धत्वेन गौणत्वात् । इतरपदार्थविशेषणत्वेनोपस्थितिविषयत्वं हि गौणत्वमिति चेत्, न; आरोपविषयत्वं नञर्थः, आरोप एव वा, विषयत्वं तु संसर्गः, तस्य च विशेषत्वात् 'आरोपितो घटः' इति बोधः ।

एवञ्च 'असः' इत्यादौ तत्पदार्थस्य विशेष्यत्वान्न गौणत्वमिति न दोषः । इदञ्च समासविषय एव, असमासविषये त्वभावोऽर्थः । स द्विविधः—भेदोऽत्यन्ताभावश्च । तत्रान्त्यः क्रियान्वय्येव, नञर्थात्यन्ताभावविशेष्यकबोधे भावनोपस्थितेर्हेतुत्वात् । अत एव 'अहं नास्मि' 'घटो नास्ति' इत्यादौ पुरुषव्यवस्था, 'घटौ न स्तः' 'घटा न सन्ति' इत्यादौ वचननियमश्चोपपद्यते, युष्मदादेस्तिङ्सामानाधिकरण्यात् । 'घटाभावोऽस्ति' इत्यन्वये च स न स्यात्[1] ।

---

१. ख० न च 'घटो नास्ति' इत्यादेः 'सत्ताश्रयत्वाभाववान् घटः' इति बोधात् पुरुषवचनव्यवस्था सिद्धेति वाच्यम्, सर्वानुभवसिद्धघटाभावबोधानुपपत्तेः । मम तु घटकर्तृकसत्ताभावस्य समनियतभावानामैक्येन घटाभावाभिन्नत्वेन तदुपपत्तेः, आख्यातोपस्थाप्यसङ्ख्याभावनान्वयिन्यन्वय इति नान्वयभङ्गापत्तेश्च, वक्ष्यमाणरीत्याऽऽख्यातार्थस्य धात्वर्थविशेषणत्वे तद्बोधासम्भवाच्च । न चाधिकरणालिङ्गिताभावबुद्धेरभावात् 'इह घटो नास्ति' इत्यादौ 'एतदधिकरणाभावप्रतियोगी घटः सत्ताश्रयः' इति बोधान्न तदनुपत्तिः, कारकाणां क्रियान्वय एव साधुत्वस्य व्याकरणसम्मततयेहेत्यादीनामसाधुतापत्तेः । तेषां सत्तायामेवान्वये तु यत्किञ्चिन्निष्ठाभावप्रतियोगी घटो नास्तीत्येव बोधः स्यात्, न तु घटाभावस्य ।

न च तेषां क्रियान्वयितत्समभिव्याहृतनञः सद्वृत्त्यभावे लक्षणाङ्गीकारान्न दोषः । एतद्देशवृत्त्यभावप्रतियोगिघटे एतद्वृत्तिसत्ताभावनिश्चयसत्त्वात् तत्र सत्ताश्रयत्वान्वयानुपपत्तेरिति यत् किञ्चिदेतत् ।

किञ्च, तिङोपस्थाप्यक्रियाया न भेदे प्रतियोगित्वेनान्वयः, 'न पचति गच्छति' इत्यादितस्तथा बोधाभावात् । अत एव तिङन्तसमभिव्याहृतनञोपात्ताभावार्थकत्वमेवेत्यपि बोध्यम् । एतन्मूलकमेव पर्युदासापेक्षया प्रसज्यप्रतिषेधस्य बलवत्त्वं वदन्ति ।

न चैवमसमस्तनञः क्रियान्वये 'यजतिषु ये यजामहं करोति, नानुयाजेषु' इत्यत्र वैकल्पिकत्वात् समासाभावेऽपि पर्युदास एव, लाघवान्न प्रसज्यप्रतिषेधः। तथा सति निषेधस्य प्राप्तिपूर्वकतया प्राप्तेश्चात्र शास्त्रतोऽन्यतोऽसम्भवाद् 'यजतिषु' इति शास्त्रादेव सा वाच्या। एवञ्च शास्त्रीयविहितप्रतिषिद्धत्वाद् विकल्पापत्तिः।

न च 'निषेधस्य विध्युन्मूलकत्वेन बलवत्त्वम्, उपजीव्यत्वेन विधेरपि बलवत्त्वात्' इत्यादिमीमांसासिद्धान्तो भज्येतेति वाच्यम्, असमासे प्रतिषेधार्थकनञ एव क्रियान्वयाभ्युपगमात्। प्रतिषेधपदेनात्यन्ताभावः।

अत एव "सुडनपुंसकस्य" [१।१।४३] इति सूत्रे नपुंसकस्य नेत्यर्थे नहि नपुंसकेन सामर्थ्यम्, केन तर्हि भवतिना' इति भाष्यं सङ्गच्छते। समासे 'असन्देहाः' 'अविवादः' इत्यादौ प्रतिषेधार्थकनञोऽप्यक्रियान्वयित्वात् 'असमासे' इत्युक्तम्।

न चात्र नित्याव्ययीभावापत्तिः, 'अद्रुतायाम्, असंहितम्, असन्देहाः, प्रयोजनम्' इति भाष्याभ्यामर्थाभावे उभयोरपि प्रवृत्तेर्ज्ञापनात्।

एवञ्च यत्पदोपस्थापितप्रतियोगिनोऽनुयोगिनि आधाराधेयभावसम्बन्धेनान्वयः, तत्र तदत्यन्ताभावबोधः। यथा 'भूतले घटो नास्ति' इत्यादौ, 'घटो नास्ति' इत्यादावप्येवम्, आख्यातार्थाश्रयस्य सत्तायामाधेयत्वेनान्वयात्। यद्वृत्तित्वेन च प्रतियोगिप्रत्ययः, तद्वृत्तित्वविशिष्ट एवात्यन्ताभावो नञा बोध्यते, समभिव्याहारबलादिति बोध्यम्। तेन यत्किञ्चिन्निष्ठाभावमादाय 'भूतले घटो नास्ति' इति न प्रत्ययः।

एतेन 'भूतले न घटः' इत्यादौ तात्पर्यवशात् कदाचिद् भूतलादौ घटाद्यभावः, कदाचिच्च घटादौ भूतलवृत्तित्वाभावः प्रतीयत इत्यपास्तम्, अत्यन्ताभावार्थकनञः प्रतियोगिभूतक्रियान्वयित्वनियमात्; कारकाणां क्रियान्वयित्वनियमाच्च।

किञ्चैवमव्ययीभावस्य नित्यसमासत्वाद् वाक्यस्यैव दुर्लभत्वापत्तिः। न चैवम् 'पृथिव्यां गन्धः, न जले' इत्यादौ प्रतीतेरेकविशेष्यकत्वानुभवो न स्यादिति

प्रधानीभूतक्रियान्वयित्वेन हि बलवत्त्वं पर्युदासे लक्षणेति। तत्, न; निपातानामेकार्थत्वेन तदनवसरात्।

यत्तु, भेदे शक्तस्य सामानाधिकरण्यानुरोधेन पर्युदासे भेदवति लक्षणेति, तदप्येतेन परास्तम्, भेदमात्रे नञः क्वाप्यप्रयोगेण तत्र शक्तिवैयर्थ्याच्च—इत्यधिकः पाठः।

वाच्यम्, इष्टापत्तेः, तथाऽनुभवस्यैवाभावात् । यत्र तु प्रतियोगिनोऽनुयोगिन्यभेदान्वययोग्यता, तत्रान्योन्याभावः, तद्वान् वा तदर्थः । [यथा] 'वटः पटो न' इत्यादौ । 'मैत्रस्येदं न चैत्रस्य' इत्यादौ तु स्वत्ववान् षष्ठ्यर्थः, तस्यापि शेषत्वात् । एवञ्च मैत्रसम्बन्धिस्वत्ववदिदं चैत्रसम्बन्धिस्वत्ववद् भिन्नमिति बोधः ।

एतेनात्र स्वत्वाभावस्य बोधात् प्रतिषेधार्थकनञः क्रियान्वयित्वमयुक्तमित्यपास्तम्[1] । अन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वं चात्र व्युत्पत्तिबललभ्यम्, नीलघटवति अत्र 'घटो नास्ति' 'नीलघटो न घटः' इत्याद्यव्यवहारात्, पीतघटवति 'नीलघटो नास्ति', 'पीतघटो न नीलघटः' इत्यादिव्यवहाराच्च । जातौ 'जातिर्नास्ति' इत्यादौ तु यद्यपि जातिकर्तृकजात्यधिकरणकसमवायसम्बन्धावच्छिन्नसत्ताऽप्रसिद्धेति कथं तदभावबोधनम् ? तथापि खण्डशः प्रसिद्धिसत्त्वान्न दोषः, स्वरूपसत्पदार्थसत्ताया बोधेऽनपेक्षणाच्चेत्यादि प्रपञ्चितमन्यत्र ।

'न घटोऽस्ति' इत्यादौ घटभिन्नोऽस्तीति बोधः, निपातातिरिक्तनामाव्यवहितपूर्ववर्तिनञः प्रायेण पर्युदासबोधकत्वात् । 'न खलु न खलु बाणः सन्निपात्योऽयमस्मिन्' [अभि० श०, अ० १] इत्यादौ तत्प्रतीतिवारणाय निपातातिरिक्तेति । इदमेवाभिप्रेत्य 'स्रजं न काचिद् विजहौ' इति श्लोके नञोऽस्थानत्वमुक्तं काव्यप्रकाशकृता । 'काचिद् भिन्ना विजहुः' इति विरुद्धार्थस्यापि प्रत्ययादित्यवधेयम् । अन्योन्याभावत्वात्यन्ताभावत्वे चाखण्डोपाधी इत्याहुः ।

यत्तु 'घटो नास्ति' इत्यादावप्यारोपिता घटकर्तृका सत्तेत्यादिक्रमेणैव बोधः । एवम्, 'पीतः शङ्खो नास्ति' इत्यत्रारोपिता पीतशङ्खकर्तृका सत्तेति बोधः । न च विशिष्टसत्ताया अप्रसिद्धेः कथमारोपः, खण्डशः पदार्थानां प्रसिद्धेः । मेलनाप्रसिद्धिश्चाप्रयोजिका । अस्तु वा आहार्या विशिष्टप्रसिद्धिः, प्रतियोगिज्ञानस्याभावधीहेतुत्वेऽनाहार्यत्वनिवेशे गौरवाद् विशेषणतावच्छेदकप्रकारकज्ञानकारणतैव प्रतियोगिज्ञानकारणतेति पक्षेऽप्याहार्यज्ञानादाहार्य एव विशिष्टवैशिष्ट्यबोधः ।

---

१. ख० 'अपास्तम्' इत्यनन्तरम् 'एवञ्च यत्र प्रतियोगिनः प्रकारता तत्र तदभावस्य प्रकारता, यत्र तु तस्य विशेष्यता तत्र तदभावस्यापि सैवेति बोध्यम् ।

इदमेवाभिप्रेत्य 'प्रतियोग्यभावौ तुल्ययोगक्षेमौ' इति तान्त्रिकाः । बाधबुद्धिप्रतिबन्ध्यप्रतिबन्धकभावादिकमपि यथा यथाऽनुभवः, तथा तथा कल्प्यमिति न तदनुरोधेन ऋष्यनुभवसिद्धबोधान्यथाभाव उचितः—इत्यधिकः पाठः ।

एवञ्च प्रतियोगिज्ञानसम्भवान्नानुपपत्तिः। आहार्यः शाब्दबोधो नास्तीति त्वश्रद्धेयमेव। एतन्मते चार्थिकम् 'घटो नास्ति' इत्यभावज्ञानमादाय नञर्थविशेष्यको बोध इति व्यवहारः। प्रतियोगिज्ञानप्रतिबन्धादि च सङ्गमनीयमिति। तत्, न; अनुभवसिद्धाभावबुद्धेरपलापे मानाभावात्।

किञ्च, [असमासे]क्व क्रियान्वयः, क्व द्रव्यान्वय इत्यत्र तव मते नियामकाभावः, मम त्वारोपितत्वार्थकत्वे[1] द्रव्यान्वयः; अत्यन्ताभावार्थकत्वे क्रियान्वय इति सम्भवति व्यवस्था। किञ्च, 'घटो नास्ति' इति बोधोत्तरं घटवत्ताज्ञानप्रतिबन्धो न स्यात्। न चाग्रे तज्ज्ञानं जायते, तेन प्रतिबन्ध इति वाच्यम्, नियमतस्तज्ज्ञापकाभावात्। न चारोपितत्वज्ञानमेव तथा, इदञ्च तवाप्यावश्यकम्; अन्यथा कदाचिदत्यन्ताभावबोधः, कदाचिद् भेदबोध इति व्यवस्था न सिध्येत्।

मम तु संसर्गारोपे आद्यः, तादात्म्यारोपेऽन्त्य इति न दोष इति वाच्यम्, संसर्गाद्यारोपनियामकस्यैवात्यन्ताभावादिबोधकत्वसम्भवात्[2]। न च प्रमायां गुणस्य कारणत्वानुरोधेन प्रतियोग्यारोपस्याभावप्रमायां हेतुत्वावश्यकत्वात् सर्वत्रैव स हेतुरिति वाच्यम्, प्रमाया गुणजन्यत्वे मानाभावात्, प्रमात्वस्य कार्यतानवच्छेदकत्वाच्च।

अस्तु वा, आरोपः कारणम्, तथापि शब्दान्न तद्बोधोऽनुभवसिद्धः, अभावबोधस्यैव सर्वानुभवसिद्धत्वादिति **सम्प्रदायः**[3]।

नव्यास्तु—समासेऽपि भेद एव नञर्थः, परन्तु स विशेषणम्, भेदप्रतियोगी घट इत्येव बोधः। अतः सर्वनामकार्यं तत्पुरुषस्योत्तरपदार्थप्राधान्यञ्च 'अत्वं भवसि, अनहं भवामि' इत्यादौ पुरुषव्यवस्था च। 'रक्षोहागमलघ्वसन्देहाः' इत्यादावपि अभावप्रतियोगी सन्देह इत्येव बोधः। एवञ्च 'अनेकम्' इत्यादावेकवचननियमोऽप्युपपन्नः। 'पतन्त्यनेके' इति त्वेकशेषेण साधु। स्पष्टं चेदं भाष्ये इत्याहुः, तत्, न; अनुभवविरोधात्। 'अघटमानय' इत्युक्ते घटानयनानापत्तेश्च। यत्किञ्चिद्भेदप्रतियोगिघटानयनस्यैवापत्तेश्च।

---

१. ख० अन्योन्यार्थकत्वे।

२. ख० लौकिकप्रत्यक्ष एवारोपस्य हेतुत्वाच्च—इत्यधिकः पाठः।

३. ख० वस्तुतस्तु—यत्र नञसमभिव्याहारे प्रतियोग्यनुयोगिनोराधाराधेयभावेनान्वयः, तत्रारोपिततद्बोधोत्तरं नियमेनात्यन्ताभावबोधः। अन्यत्र भेदबोध इति व्यवस्था। एवञ्च नञः सर्वत्रैकयैव शक्त्या निर्वाह इत्यपरे—इत्यधिकः पाठः।

परे तु 'घटभिन्नः' इत्येव बोधः। 'अत्वं भवसि' इत्यादौ नञो द्योतकत्वेन युष्मदस्तद्भिन्ने लाक्षणिकत्वाद् भिन्नरूपयुष्मदर्थेन सामानाधिकरण्यात् पुरुषव्यवस्था सर्वनामकार्यमपि, "एतत्तदोः सुलोपोऽकोरनञ् समासे" [६।१।१३२] इति ज्ञापकात् सिद्धम्, भिन्नस्याप्युत्तरपदार्थत्वाच्च। "अनेकमन्यपदार्थे" [२।२।२४] इत्येकवचनं तु विशेष्यभूत 'सुप्' इत्यस्यैकवचनान्तत्वाद् जात्यभिप्रायेण वा तत्। 'सेव्यतेऽनेकया' इत्यत्रापि 'योषया' इति विशेष्यानुरोधात् प्रत्येकं सेवनान्वयानुरोधाच्चैकवचनम्। अत एव 'पतन्त्यनेके' इत्यादौ बहुवचनमपीति वदन्ति, तत्,[१] न; "तस्य भावः" [६।१।१११] इति सूत्रस्थभाष्यविरोधादिति प्रपञ्चितं शब्देन्दुशेखरे।

इति नञर्थविचारः

१. ख० नास्ति।

अथैवकारार्थविचारः

[1]एवशब्दस्यायोगव्यवच्छेदे, तद्वति च शक्तिः। तत्र विशेषणसङ्गतस्याद्ये, विशेष्यसङ्गतस्य द्वितीये। न च 'पृथिव्यामेव गन्धः' इत्यादौ विशेषणसङ्गतेऽपि द्वितीयस्य बोधात्; 'ज्ञानमर्थं गृह्णात्येव' इत्यादौ क्रियायाः सर्वविशेष्यत्वेन तत्सङ्गतेऽप्याद्यस्य बोधात्; इदमत्ययुक्तमिति वाच्यम्, विशेषणपदस्य विधेयार्थकत्वेन विशेष्यपदस्य चोद्देश्यार्थकत्वेनादोषात्। उद्देश्यत्वविधेयते चातिरिक्ते एव विषयते,

---

1. अयमाशयः—

अयोगं तथैवान्ययोगमत्यन्तायोगमेव च।
व्यवच्छिनत्ति धर्मस्य एवकारस्त्रिधामतः॥

इत्यभियुक्तोक्तदिशा एवकारस्यार्थत्रयम्। तथाहि—यत्र विशेषणान्वित एवकारस्तत्र विशेष्ये विशेषणस्य असम्बन्धरूपमयोगं निषेधति। यथा—'शङ्खः पाण्डुर एव' इत्यत्र पाण्डुरस्य विशेषणत्वेन तदन्वितेनैवकारेण विशेष्ये शङ्खे पाण्डुरत्वासम्बधं व्यवच्छिन्दता शङ्खस्य पाण्डुरत्वं नियम्यते। तथा च शङ्खत्वावच्छेदेन पाण्डुरत्वसमवायाभावाभावः प्रतीयते। पाण्डुरत्वसम्बन्धाभावाभाववान् शङ्ख इति बोधः।

यत्र पुनर्विशेष्यगत एवकारस्तत्र विशेष्येतरस्मिन् विशेषणीभूतधर्मसम्बन्धं वारयति। यथा—'पार्थ एव धनुर्धरः' इत्यत्र पार्थभिन्ने धनुर्धरत्वसम्बन्धं वारयन् पार्थे धनुर्धरत्वं नियमयति। अत्र एवार्थोऽन्ययोगव्यवच्छेदः, अन्यशब्दस्य भेदाश्रये शक्तिः, योगः = सम्बन्धः, व्यवच्छेदोऽभावः, पार्थस्य प्रतियोगिकत्वसम्बन्धेन भेदेऽन्वयः। तदाश्रयस्य वृत्तित्वसम्बन्धेन सम्बन्धे, तस्य च सम्बन्धस्य प्रतियोगिताकत्वसम्बन्धेनाभावपदार्थे तस्य धनुर्धरत्वे तस्य च पार्थेऽन्वयः।

एवञ्च पार्थप्रतियोगिकभेदाश्रयसम्बन्धप्रतियोगिकाभाववद्धनुर्धरत्ववान् पार्थ इति बोधः।

यत्र तु क्रियान्वित एवकारः, तत्रात्यन्तः सर्वदा योऽयोगः = असम्बन्धः, तस्य निषेधकः। तत्क्रियाश्रये कुत्रचिदपि सम्बन्धबोधक इति तु फलितोऽर्थः। यथा 'नीलं सरोजं भवत्येव'। अत्र हि न सकले कमले नीलत्वं नियम्यते, नाप्यकमलेऽनीलत्वम्, अपि तु यस्मिन् कस्मिन्नपि कमले नीलत्वसम्बन्धः।

अत्रैवकारेण सरोजत्वव्यापकत्वं नीलभवनाभावे प्रतिषिध्यते। एवञ्च सरोजनिष्ठो योऽभावस्तत्प्रतियोगी नीलभवनाभावः, सरोजनिष्ठं नीलभवनमिति यावत्, अभावाभावस्य प्रतियोगिरूपत्वात्।

न तु विशेष्यताप्रकारतारूपे, तत्समनियते वा। अत एव तत्र धात्वर्थक्रिया-विधेयत्वप्रतीतिः।

अयमुत्सर्गः—'चन्द्रेणैवास्तु सदृशं मुखम्' इत्यादौ विशेषणभूतविधेयचन्द्र-समभिव्याहृतैवकारेणाप्यन्ययोगव्यवच्छेदबोधनात्। तस्मात् तथाबोधे तात्पर्यमेव नियामकम्। अत एव महाभाष्ये "कर्मणि द्वितीया" [२।३।२] इत्यत्र 'कर्मण्येव द्वितीया' इति नियमे योगव्यवच्छेदं हृदि निधाय 'असामान्यापेक्षनियमः' इत्युक्तम्। अन्ययोगव्यवच्छेदं मत्वा 'प्रकृतार्थापेक्षः प्रत्ययनियमः' इत्युक्तमिति बहवः।

तत्रायोगः = सम्बन्धाभावः, तद्व्यवच्छेदः = तदभावः। एवमेव सम्बन्धा-भावोऽन्ययोगव्यवच्छेदः। 'शङ्खः पाण्डुर एव' इत्यादौ पाण्डुरत्वायोगाभाववान् शङ्ख इति बोध इति केचित्, तत्, न; इतरविशेषणत्वेनोपस्थितस्यापाण्डुरस्यान्यत्वे योगेऽन्वयायोगात्। तस्मात् पाण्डुरतादात्म्याभाववान् शङ्ख इति बोधः। शङ्ख-त्वावच्छेदेन च तदन्वयः। योगश्चाभेदः, अन्यश्च। यत्र 'एव'समभिव्याहृतस्य येन सम्बन्धेनेतरत्रान्वयः, स एव योग एवकारार्थतया तत्र तत्र भासते। समभि-व्याहारवशात् 'शङ्खे पाण्डुरत्वमेव' इत्यादौ पाण्डुरत्वान्यतादात्म्याभाववत्कर्तृका शङ्खाधिकरणिका सत्तेति बोधः।

यद् वा, पाण्डुरत्वायोगाभावकर्तृका तदधिकरणिका सत्तेति बोधः। तत्र प्रायः पाण्डुरत्वादिसम्बन्धत्वावच्छिन्नाभावाभावः शङ्खत्वाद्यवच्छिन्ने भासते। यत्र तु तथा न बोधः, तत्र सामानाधिकरण्येनाप्यन्वयः। यथा 'नीलं सरोजं भवत्येव' इत्यादौ। यथा अत्र हि 'नीलभवनसम्बन्धाभावसमानाधिकरणसरोजत्ववत्कर्तृका सत्ता इति सरोजत्वसामानाधिकरण्येनैवान्वयः, न त्ववच्छेदकावच्छेदेन, बाधात्। एवावतैव क्रियासमभिव्याहृते अत्यन्तायोगव्यवच्छेदबोध इति प्रसिद्धिः।

यद् वा, सरोजत्वसमानाधिकरणतादात्म्यसम्बन्धेन नीलाभिन्नसरोजकर्तृक-मयोगव्यवच्छेदि भवनमिति बोधः।

यत्तु, क्रियासङ्गतस्थले सर्वत्रात्यन्तायोगव्यवच्छेदः प्रतीयत इति। तत्, न; 'ज्ञानमर्थं गृह्णात्येव' 'आकाशं परममहत्त्ववद् भवत्येव' इत्यादौ अयोग-व्यवच्छेदमात्रप्रतीतेः। 'पार्थ एव धनुर्धरः' इत्यादौ पार्थान्यतादात्म्याभाववदभिन्नो धनुर्धर इत्यन्ययोगव्यवच्छेदप्रतीतिः। अत एव पार्थाकाशावेव धनुर्धराविति न, अन्ययोगव्यवच्छिन्नत्वावच्छिन्नस्येतरपदार्थेऽन्वयात् समभिव्याहृतपदार्थतावच्छेदेन च पार्थान्ययोगव्यवच्छेदवदभेदप्रतीतेर्न 'पार्थ एव स्रग्धरः, इत्याद्यापत्तिः।

ये तु पार्थान्यतादात्म्याभाववान् धनुर्धरः पार्थ इति बोधमाहुः, तेषां पार्थपदार्थस्य द्वेधान्वयो व्युत्पत्तिवैचित्र्यात् पार्थाकाशावेवेति वारणायावश्यक इति बोध्यम् ।

अत्र चान्यस्मिन् योगे व्यवच्छेदे तद्वति च शक्तिः । एतेनान्ययोगत्वावच्छिन्न-व्यवच्छेदश्चेत्, अन्यतादात्म्यरूपयोगस्य सत्त्वेनाप्रसिद्धेः कथं शक्तिः ? अन्यसम्बन्ध-प्रतियोगिकव्यवच्छेदस्याद्रव्यत्वे सत्त्वात् पार्थ इवाद्रव्यमित्यापत्तिः । अन्यसंयोगत्व-समवायत्वावच्छिन्नव्यवच्छेदश्चेत्, 'पार्थ एव धनुर्धरः' इत्यादौ पार्थान्यतादात्म्य-व्यवच्छेदस्य प्रतीयमानस्यानापत्तिरिति परास्तम् । तत्रान्यपदार्थैकदेशेऽन्यत्वे पार्थादेरन्वयो घटादन्य इत्यादाविव, व्युत्पत्तिवैचित्र्यात् । एकप्रातिपदिकोपस्थिति-विषयाणां परस्परान्वयोऽपि तत एव ।

अत्र व्यवच्छेदे शक्तिः, इतरत्र लक्षणेति **नैयायिकनव्याः** । एवमयोगव्यव-च्छेदेऽपि बोध्यम् । एवम् 'पृथिव्यामेव गन्धः' इत्यतः पृथिव्यन्यावृत्तिर्गन्धः पृथिवीवृत्तिरिति । अत एव 'पृथिव्यामेवाकाशः' इति न, तस्यावृत्तित्वात् । यत्-पदसमभिव्याहारेण यः सम्बन्धः प्रतीयते, एवकारसमभिव्याहारे तस्यैवान्ययोगस्य व्यवच्छेदप्रतीतिरिति न कोऽप्यतिप्रसङ्गः । विभक्त्यर्थं विना कस्याप्यर्थस्यासत्त्वाद् नान्वयः, व्युत्पत्तिवैचित्र्यादिति ।

केचित्तु, पृथिव्यन्यतादात्म्याभाववद्वृत्तिर्गन्ध इति बोधः । एवकारार्थ-बलादेव समभिव्याहृतपदार्थतावच्छेदकावच्छेदेन तद्वृत्तित्वस्य बोधान्न पृथिव्यामेव रूपमिति प्रयोगः । एवशब्दोत्तरं सप्तम्या लुक्, पृथिव्यामिति सप्तमी साधुत्वार्था, एवशब्दस्य सप्तम्यन्तत्वद्योतनाय । वस्तुतस्तस्यापि पृथिवीपदार्थत्वात् तस्याप्या-धारत्वं बोध्यमित्याहुः ।

'चैत्रस्यैवेदं धनम्, मैत्रस्यैवायं भ्राता' इत्यादौ चैत्रान्यस्वत्वव्यवच्छेदस्य मैत्रान्यभ्रातृत्वव्यवच्छेदस्य च बोधः । एतेन सर्वत्रायोगव्यवच्छेद एवार्थः, इत्यपा-स्तम्, उभयस्वामिकेऽपि चैत्रस्वत्वायोगस्योभयभ्रातृके मैत्रभ्रातृत्वायोगव्यवच्छे-दस्य च सत्त्वेन तथा प्रयोगापत्तेः ।

किञ्च, 'पृथिव्यामेव सत्ता' इति प्रयोगापत्तिः, पृथिवीयोगाभावाभावस्य सत्तायां सत्त्वात् । अन्ययोगव्यवच्छेद एव शक्तिरित्यपि चिन्त्यम् । अथैवम् 'गमनं कुरु' इत्यादावयोगव्यवच्छेदस्यैव स्वरसतः प्रतीतेः 'दण्डादेव घटः' इत्यादेर्विनापि लक्षणामयोगव्यवच्छेदे बोधे साधोरसाधुतापत्तेश्च ।

ननु यत्समभिव्याहृत एवकारः, तदन्वितान्ययोगव्यवच्छेदस्य तदन्वयिन्येव प्रतीतेर्गन्धे पृथिव्यन्यावृत्तित्वम्, तत्। 'शीत एव स्पर्शो जले' इत्यादौ शीतान्यतादात्म्यव्यवच्छेदवान् स्पर्शो जलवृत्तिरित्यर्थः स्यात्।

एवञ्च 'शीत एव स्पर्शो द्रव्ये' इत्यपि स्यादिति चेत्, न; साधुत्वार्थकविशेषणविभक्त्यन्तसमभिव्याहृतैवकारस्थले भेदेन स्वान्वितविशेष्यान्ययोगव्यवच्छेदस्येतरपदार्थेऽन्वयाङ्गीकारान्न दोषः। एवञ्च शीतस्पर्शान्यस्पर्शाश्रयत्वाभाववज्जलवृत्तिशीतस्पर्श इति बोधः।

यद्वा, जलवृत्तिस्पर्शत्वावच्छेदेन शीतान्यत्वव्यवच्छेदान्वयः। 'चैत्रेणैवायं यज्ञदत्तो दृश्यते' इत्यत्र यज्ञदत्ते चैत्रान्यस्य स्वकर्तृकदर्शनकर्मत्वरूपसम्बन्धव्यवच्छेदो यज्ञदत्ते प्रतीयते, व्युत्पत्तिवैचित्र्यात्, न तु दर्शनचैत्रान्यवृत्तित्वव्यच्छेदः। एवं हि चैत्रदर्शनस्य तदन्यवृत्तित्वेनोभयदृश्यमानेऽपि तादृशयोगापत्तिः स्यात्।

यद्वा, ईदृशविषये स्वेतरकारकान्वितक्रियात्वावच्छेदेन तदन्यवृत्तित्वप्रत्ययः, व्युत्पत्तिवैचित्र्यात्, अतो नोक्तदोषः। अन्ययोगेत्यत्र योगश्च यत्रैव सम्बन्धभेदेनान्वेति, तत्र भेदरूपः; यत्राभेदेनान्वेति, तत्राभेद इति बोध्यम्। अन्ययोगव्यवच्छिन्ने शक्तौ तु तादात्म्यमेवेति द्रष्टव्यम्।

'घटत्वं पृथिवीवृत्त्येव' इत्यादावेवकारस्य पृथिव्यन्यवृत्तित्वव्यवच्छेदादौ लक्षणा। समासे उपसर्जनस्य पृथिवीपदार्थस्यान्येनान्वयासम्भवात्। पृथिवीवृत्त्यन्ययोगव्यवच्छेदबोधस्तु 'द्रव्यत्वं पृथिवीवृत्ति' इत्यपि स्यात्। 'जातिमत्येव सत्ता' इत्यत्र जातिमदन्यावृत्तिः सत्तेति बोधः।

यदि त्वेकार्थसमवायेन सत्ताया अपि जातिमदन्यावृत्तिः सत्तेति बोधः, यदि त्वेकार्थसमवायेन सत्ताया अपि जातिमदन्यवृत्तित्वम्, तदा समवेतोति अध्याहारेणासत्तासमवाये जातिमदन्यानुयोगिकत्वव्यवच्छेदो द्रष्टव्यः। समवायसम्बन्धावच्छिन्नाधारत्वं सप्तम्यर्थः। जातिमदन्यतादात्म्याभाववदधिकरणिका सत्तेति बोधो वा।

'इह भवने मैत्रेणैव पक्ष्यते [1]तेमनम्' इत्यादौ एतद्भवनाधिकरणकतेमन-

1. 'निष्ठानं तु तेमनं स्यात्' [अभिधान० चि०, ३ का०, ६३ श्लो०] इति कोषाद् आर्द्रत्वसम्पादको वस्तुविशेषो लोके 'कढ़ी'पदवाच्यो भोज्यपदार्थस्तेमनपदेनोच्यते।

कर्मकभविष्यात्मकक्रियात्वावच्छेदेन मैत्रान्यकर्तृकत्वव्यवच्छेदप्रतीतिः, व्युत्पत्तिवैचित्र्यात् ।

'रूपं पृथिव्यां वर्तत एव' इत्यादौ 'पृथिव्यधिकरणकवर्तनायोगव्यवच्छेदवद्रूपकर्तृकं वर्तनम्' इति बोधः, व्युत्पत्तिवैचित्र्यात् । यद्वा, 'रूपकर्तृकं पृथिव्यधिकरणकमयोगव्यवच्छेदि वर्तनम्' इति बोधः ।

'ऋतौ स्वदारान् [धावान्] गच्छेदेव' इत्यत्र 'ऋतुकालावच्छिन्नस्वदारकर्मकगमनायोगव्यवच्छेदकर्तृकं गमनं प्रत्यवायाभावरूपेष्टसाधनम्' इति बोधः, व्युत्पत्तिवैचित्र्यात् । इष्टस्य प्रत्यवायाभावरूपत्वं तु 'ऋतुस्नातां तु यो भार्याम्' इत्यादिवचनैकवाक्यतयाऽवगम्यते । अत एकऋतौ गमनेऽपि ऋत्वन्तरे प्रत्यवायपरिहारार्थं प्रवृत्तिः । एवञ्च 'ऋतुकालैकविशेषणतया [तादात्मीय] तदीयगमनाभावः कर्मतासम्बन्धेन स्वदारनिष्ठः प्रत्यवायसाधनम्' इति बोध्यम् । यद्वा, तादृशं गमनं प्रेरणाविषय इति बोधः ।

अन्ययोगव्यवच्छेद एव शक्यः । अयोगव्यवच्छेदबोधस्तु लक्षणाविपरीतं वेति तु न विचारसहम्, निपातानामनेकार्थत्वात् । न चैवम् 'शङ्खः पाण्डुर एव, नापाण्डुरः', 'पार्थ एव धनुर्धरः, नान्यः', 'त्वन्मुखं त्वन्मुखेनैव तुल्यम्, नान्येन केनचित्' इत्यादौ 'नापाण्डुरः' इत्यादीनां पौनरुक्त्यापत्तिरिति वाच्यम्, 'अपाण्डुरः शङ्खो न', 'अन्यो धनुर्धरो न', 'मुखमन्यप्रतियोगिकसादृश्याभाववत्' इत्यर्थेनादोषात् ।

न च पाण्डुराद्यन्यतादात्म्यादिव्यवच्छेदे बुद्धेरनुमानेन व्यञ्जनया वा तदर्थबोधस्यापि जातत्वेन पौनरुक्त्यं तदवस्थमेव, आर्थ्या वृत्त्या लब्धस्य पुनः शब्देन प्रतिपादनेऽपि पौनरुक्त्यभावस्यालङ्कारिकैरुक्तत्वात् । 'लवणमेवासौ भुङ्क्ते' इत्यादौ प्राचुर्याद्यर्थकत्वस्यापि दृष्टत्वेन तदर्थकत्वव्यावृत्तये एवकारार्थविवरणमेतदित्यन्ये ।

एवं रीत्या एवकारस्य वाचकत्वेऽनेकस्थलेषु नानाविधाक्लृप्तव्युत्पत्तिकल्पनागौरवमिति द्योतकतापक्ष एव ज्यायान् । तत्रैव समभिव्याहृतपदस्य क्वचित् स्वान्ययोगव्यवच्छेदवति, क्वचित् स्वान्ययोगव्यवच्छेदे, क्वचित् स्वायोगव्यवच्छेदे, क्वचिद् व्यवच्छेदविशिष्टे स्वार्थे, क्वचित् स्वायोगव्यवच्छेदवति, क्वचिद् एवसंयुक्तविशेषणविशिष्टान्यतत्सजातीयसम्बन्धाभाववति लक्षणेत्याद्यूह्यम् ।

'चैत्रेणैवायं यज्ञदत्तो दृश्यते' इत्यादौ चैत्रान्यावृत्तित्वविशिष्ट इतरकारक-विशिष्टे दर्शने लक्षणा, इतरत्तात्पर्यग्राहकम्। यद्वा, चैत्रपदस्य चैत्राद्यतादात्म्या-भाववति लक्षणा, 'ऋतौ दारान् गच्छेदेव' इत्यादौ गमे ऋतुकालावच्छिन्न-स्वदारकर्मकगमनायोगव्यवच्छेदवत्कर्तृके गमने लक्षणेत्याद्यूह्यम्। नान्येनेत्यादौ पौनरुक्त्यपरिहारस्तु प्राग्वदेव।

एवञ्च एवकारसमभिव्याहारे एवार्थः परिसङ्ख्या[1]। परिसङ्ख्या चोपात्तातिरिक्ते समभिव्याहृतपदार्थाभावप्रत्ययरूपा। यथा 'पार्थ एव धनुर्धरः' इत्यत्र पार्थान्यस्मिन् धनुर्धरत्वाभावः। स च नैवकारघटितवाक्यार्थः, किन्त्वार्थ एव, उक्तरीतेः। शाब्दस्तु 'त्वन्मुखं त्वन्मुखेनैव तुल्यम्, नान्येन केनचित्' इत्यादावेव। 'पञ्च पञ्चनखाः' इत्यादौ तु प्राप्तानुवादस्य वैय्यर्थ्याद् भक्षेः पञ्चातिरिक्त-पञ्चनखकर्मकत्वाभाववति भक्षणे लक्षणा। तादृशभक्षणकर्मीभूताः पञ्चसङ्ख्याक-पञ्चनखा इति बोधः।

---

1. उभयस्य युगपत्प्राप्तावितरनिवृत्तिफलको विधिः परिसङ्ख्याविधिः। तथा हि—

विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति।
तत्र चान्यत्र च प्राप्तौ परिसङ्ख्येति गीयते॥ इति।

अयमर्थः—अत्यन्तमप्राप्तौ विधिः। यस्य यदर्थत्वं प्रमाणान्तरेणाप्राप्तम्, तस्य तदर्थत्वेन यो विधिः, सोऽपूर्वविधिः। यथा 'स्वर्गकामो यजेत' अत्र स्वर्गफलकत्वं यागस्य प्रमाणान्तरेण न प्राप्तम्, किन्त्वनेनैव वचनेनेत्यपूर्वविधित्वमस्य।

नियम इति। यो विधिः पक्षे प्राप्तमर्थं नियमयति, स नियमविधिः। यथा 'व्रीहीन् अवहन्ति'। अस्य वचनस्याभावे तण्डुलनिष्पादनाय वैतुष्यकार्यं नखविदलनेनावघातेन च प्राप्तम्, द्वयोर्युगपदसम्भवेन नखविदलनप्राप्तिवेलाया-मवहननस्य प्राप्त्यभावात् तस्य पाक्षिकी प्राप्तिः स्यात्। सति च तस्मिन् विधौ अवघातेनैव वैतुष्यं सम्पादनीयमिति नियमे जाते विदलनं सर्वात्मना निवर्तते। अवघातेनैव वैतुष्यकरणेऽपूर्वोत्पत्तिस्वीकारादिति नियमविधिः।

तत्र चान्यत्र च प्राप्तौ। उभयस्य युगपत्प्राप्तौ इतरनिवृत्तिफलको विधिः परिसंख्या विधिः। यथा 'पञ्च पञ्चनखा भक्ष्याः' इति। अनेन वाक्येन न भक्षणं विधीयते, तस्य रागतः प्राप्तत्वात्। नायं नियमविधिः, युगपत् प्राप्तेः। तथा च पञ्चपञ्चनखपञ्चेतरपञ्चनखभक्षणस्य युगपत् प्राप्तौ पञ्चपञ्चनखभक्षणेनैव क्षुन्निवृत्तिः कार्या इत्यनेन वाक्येन परि-संख्यायते। पञ्चेतरपञ्चनखभक्षणन्तु निवर्तते इति परिसंख्या विधिरयम्।

तत्र 'लोहितोष्णीषाः' इत्यादिवत् प्राप्ताप्राप्तविवेकेन भक्षणे पञ्चातिरिक्त-पञ्चनखकर्मकत्वाभावे विधेयता बोध्या। तत्र पञ्चातिरिक्तपञ्चनखेषु भक्षण-कर्मत्वाभावप्रतीतिरार्थी। एषाप्यार्थ्येव परिसङ्ख्या।

यत्तु पञ्चपदस्य पञ्चातिरिक्ते लक्षणा, भक्ष्यपदस्य भक्ष्यत्वाभाववति, तेन 'पञ्चातिरिक्ता भक्षणकर्मत्वाभाववन्तः' इति बोध इति। तत्, न; पदद्वय-लक्षणापेक्षयोक्तप्रकारस्यैव न्याय्यत्वात्,

'किमासेव्यं पुंसां सविधमनवद्यं द्युसरितः'

इत्यार्थीपरिसङ्ख्योदाहरणमिति प्रकाशादिग्रन्थासङ्गतेश्च। त्वद्रीत्या हि 'द्युसरित्सविधातिरिक्तमासेव्यत्वाभाववत्' इति बोधेन तस्याः शाब्दत्वात्।

किञ्च, किमासेव्यमिति प्रश्ने उत्तरत्वानापत्तिः, प्रश्नसामान्यार्थत्वा-भावात्। न च प्रश्नवाक्येऽपि लक्षणा, बाधाद्यभावात्। अत एव शब्दपरि-सङ्ख्यायाम् 'किं भूषणं सुदृढमत्र यशो न रत्नम्' इत्युदाहृतं प्रकाशकारैः।

किञ्च, "कर्मणि द्वितीया" [२।३।२] इत्यादेः 'कर्मणि द्वितीयैव' इत्यादि नियमार्थत्वमिति स्पष्टम्। भाष्ये तत्र कर्मणि द्वितीयातिरिक्ता न भवतीत्यर्थः।

एवञ्च द्वितीयायाः कर्मबोधकत्वे साधुत्वाबोधनाद्, राजपुरुषाद्येकदेशराजा-दिभ्यो निरर्थकद्वितीयाद्यापत्तिर्दुर्वारा, एषां शास्त्राणां शक्तिग्राहकत्वानापत्तिश्च।

न च 'कर्मण्येव द्वितीया'इत्यपि नियमः, आवृत्तौ मानाभावात्, पर्युदासं विधाय कर्मातिरिक्तेऽर्थे तद्वारणेऽपि कर्मणि विधानाभावेनोक्तराजदिभ्यो निरर्थकद्वितीयाद्यापत्तिर्दुर्वारा। मम तु न दोषः, 'द्वितीयातिरिक्तविभक्ति-बोध्यत्वाभाववति कर्मणि द्वितीया, इत्यर्थेन निरर्थकेऽप्राप्तेः।

एतेनात्र नियमे 'अव्ययेभ्यः सप्तापि विभक्तयः' इति परास्तम्। 'कर्मण्येव द्वितीया' इति पक्षेऽपि 'कर्मातिरिक्तार्थबोधकत्वाभाववति कर्मणि द्वियीयेति वाक्या-र्थान्न कश्चिद् दोषः। स्वार्थहानिपरार्थकल्पनाप्राप्तबाधरूपदोषत्रयमपि समभि-व्याहृतैवपदस्य लक्षणया तत्र पदेऽन्यत्र क्लृप्तस्वार्थत्यागस्य अक्लृप्तपदार्थस्य कल्पनात् पदे दोषद्वयं प्राप्तबाधश्चार्थकल्प्यमानवाक्येनेति मयापि सूपपादमिति सुधियो विभावयन्तु।

इत्येवकारार्थविचारः

अथ तिङर्थविचारः

अथ धातुप्रकृतितिङां प्रसिद्धत्वादर्थो निरूप्यते । [1]तत्र कर्तृकर्मविहित-तिङामाश्रयोऽर्थः । स च कर्त्तरि व्यापाराश्रयः, कर्मणि फलाश्रयः । आश्रयत्व-ञ्चाखण्डोपाधिरूपं शक्यतावच्छेदकम् ।

---

1. तिङर्थविचारसारांशः—

'उच्चारित एव शब्दोऽर्थप्रत्यायको भवति, नानुच्चारितः' इति भाष्यात्; लोके तथैवानुभवाच्च लादेशानां तिङामर्थनिरूपणाय प्रकरणमिदं प्रारब्धम् । "वर्तमाने लट्" इत्यादिविधायकानाम् "लः कर्मणि" इत्यादिशक्तिग्राहक-सूत्राणाञ्चादेशार्थं स्थानिन्यारोप्य प्रवृत्तिः ।

तत्र सङ्ख्याविशेषकालविशेषकारकविशेषभावा लादेशमात्रस्यार्थः । धातूनां फलव्यापारावर्थौ, तिङर्थाः कर्तृकर्मसङ्ख्याकालाः । तत्र सङ्ख्या कर्तृप्रत्यये कर्त्तरि, कर्मप्रत्यये तु कर्मणि विशेषणम् । कालस्तु धात्वर्थव्यापारे विशेषणम् । फलव्यापारयोः फलं विशेषणम्, व्यापारः प्रधानम् ।

इदमत्र रहस्यम्—'क्रियाप्रधानमाख्यातम्' इति निरुक्तात्, "भूवादयो-धातवः" इति सूत्रस्थक्रियाप्राधान्यबोधकभाष्याच्च कर्त्राख्याते कर्माख्याते वा सर्वत्र व्यापारमुख्यविशेष्यक एव बोधः । अत एव 'फले प्रधानं व्यापारः तिङर्थस्तु विशेषणम्' इति सङ्गच्छते ।

एवञ्च 'ग्रामं गच्छति चैत्रः' इत्यत्र ग्रामाभिन्नकर्मनिष्ठसंयोगानुकूल एकत्वावच्छिन्नचैत्राभिन्नकर्तृको वर्तमानकालिको व्यापारः ।

'ग्रामो गम्यते चैत्रेण' इत्यत्र तु चैत्राभिन्नकर्तृकवृत्तिवर्तमानकालिक एकत्वावच्छिन्नग्रामाभिन्नकर्मनिष्ठसंयोगानुकूलो व्यापार इति प्राचीन-वैयाकरणाः ।

नव्यास्तु—कर्त्राख्याते व्यापारमुख्यविशेष्यकः, कर्माख्याते तु फल-मुख्यविशेष्यको बोधः । 'फले प्रधानं व्यापारः' इत्यादिना व्यापारस्य प्राधान्य-बोधनं तु कर्त्राख्याताभिप्रायेण ।

अथवा, तत्र प्रधानाप्रधानोभयपदच्छेदः । प्रधानं कर्तृप्रत्ययसमभि-व्याहारतात्पर्यकम्; अप्रधानं तु कर्मप्रत्ययसमभिव्याहारतात्पर्यकमिति न काप्यनुपपत्तिः । अत एव "सुप आत्मनः क्यच्" इति सूत्रस्थं भाष्यं सङ्गच्छते ।

न च तस्याश्रयसम्बन्धनिरूपकादिभेदभिन्नत्वाच्छक्यतावच्छेदकानन्त्यम्, समवायवदेकत्वेऽपि क्षत्यभावात्। आश्रयतात्वश्चातिरिक्तं सकलाश्रयतानामनुगमकं बोध्यम्। न चाश्रयः प्रथमान्तपदेनैव लब्ध इति [1]न तत्र शक्तिकल्पना युक्ता, अनन्यलभ्यस्यैव शब्दार्थत्वादिति वाच्यम्, 'चैत्रः पचति' इत्यादौ चैत्रत्वादिना तल्लाभेऽपि पचिधात्वर्थव्यापाराश्रयत्वेन तदलाभात्।

यत्तु नैयायिकाः—न कर्तृकर्मणी वाच्ये, कृत्याश्रयादेः कर्त्रादित्वेन तत्र शक्तौ गौरवात्। किन्तु कर्तृलकारे कृतिः। न च धातुनैव सा लब्धा, 'पचति—पाकं करोति' इति यत्नादेः पृथक्तया विव्रियमाणत्वेन तस्य धात्वशक्यत्वात्। न च घञादिसमभिव्याहृतधातोः फल एव शक्तिः, 'ग्रामो गमनवान्' इति प्रतीत्यापत्तेः,

---

वर्तमानत्वादिकालो लडादिद्योत्यः, वाच्योऽपि। पक्षद्वयस्यापि भाष्यादावभिहितत्वात्, युक्तियुक्तत्वाच्च। तथाहि—तत्तद्धातूनामेव वर्तमानोऽर्थः, लट् तु तद्द्योतकः।

न च बहूनां धातूनां तत्र शक्तिकल्पने शक्ततावच्छेदकनानात्वाद् गौरवमिति वाच्यम्, व्यापारसन्तानस्यैव कालत्वेनाभ्युपगमात्। तस्य च धात्वर्थत्वात्। कालस्य व्यापारसन्तानातिरिक्तत्वे प्रमाणाभावात्। तथा च तस्मिन् द्योत्ये लडादय इति "वर्तमाने लट्" इति सूत्रार्थः। तस्माद् द्योतकत्वमेव लटः।

एवं वाचकत्वमपि, "वर्तमाने लट्" इति सूत्राद् वर्तमानकाले लड्विधानात्, व्यापारसन्तानस्य कालात्मकत्वाभावाच्च। तथा चोक्तं हरिणा—

'क्रियाभेदाय कालस्तु संख्या सर्वस्य भेदिका।' इति।

अनेन स्पष्टमेव क्रियापरिच्छेदकत्वं कालस्योक्तम्। नहि स्वपरिच्छेदकत्वं स्वस्य सम्भवति। तस्माद् वाचकत्वमेव लटः।

नैयायिकास्तु—लकाराणां कृतौ शक्तिः, कृतित्वजातेः शक्यतावच्छेदकत्वे लाघवात्। 'रथो गच्छति' इत्यादौ व्यापारे लक्षणा। शक्ततावच्छेदकञ्च लकारसाधारणं लत्वमेव। तिप्त्वादीनां शक्ततावच्छेदकत्वे गौरवम्।

अयमत्र विशेषः—लत्वेन यत्ने शक्तिः, आत्मनेपदत्वेन च फले। अन्यूनानतिप्रसक्तस्य धर्मस्यैवावच्छेदकत्वनियमेनात्मनेपदत्वस्य तथात्वादित्याहुः।

इति तिङर्थविचारसारांशः।

---

१. 'तत्र शक्तिः, आश्रयत्वेनतमाभात्' इति ख० पुस्तके।

'काष्ठैः पाकः' इत्यादौ तव कारकान्वयानापत्तेश्च, तव भावनायां कारकान्वयनियमात्। तस्माद् यत्नातिरिक्तव्यापार एव धातुशक्यः।

ननु 'रथो गच्छति' इत्यादौ कृतेर्बाधात्, करोतेर्व्यापारसामान्यार्थकत्वाच्च धात्वर्थानुकूलव्यापार एवाख्यातार्थः। अत एव 'बोजादिनाङ्कुरः कृतः' इति व्यवहारः। 'पचति' इत्यस्य 'पाकं भावयति' इति व्यापारसामान्यार्थकभावयतिना विवरणम्, 'रथो गमनं करोति' इति च विवरणं दृश्यते। कर्तृपदेनापि व्यापाराश्रय एवोच्यते। आख्यातार्थाश्रय इति[1] मतन्तु न युक्तम्, आमन्ते कृति च दोषापत्तेः। कृतिरित्यादौ च कृञः कृतौ निरूढलक्षणा। तण्डुलक्रयणादेश्च न पाकाद्यनुकूलत्वम्, अनुकूलताविशेषस्यैव संसर्गत्वान्न 'पचति' इत्यादिप्रयोगरूपो दोषः[2]। 'पचति' इत्यादौ यत्नानुभवस्तु यत्नाविनाभूतपाकादिक्रियाविशेषेण कारणस्य यत्नस्यानुमानात्। यत्ने वर्तमानत्वप्रतीतिरपि तात्पर्यलिङ्गेन यत्नत्वावच्छिन्ने वर्तमानत्वानुमित्युपगमेनवोपपन्नतादृशवर्तमानत्वप्रतीतौ शाब्दत्वं तु सविवादमेव। वर्तमानत्वाद्यन्वयस्तु आख्यातार्थव्यापार एव, 'पचति, पाकयत्नवान्' इति तु तात्पर्यार्थविवरणमिति चेत्, न; व्यापारत्वापेक्षया यत्नत्वस्य जातिरूपत्वेन शक्यतावच्छेदकत्वात्।

करोतेरप्येवम्, वातरोगादिना कम्पमाने चैत्रे स्पन्दानुकूलविजातीयवायुसंयोगरूपव्यापारवत्यपि 'नाऽहं स्पन्दं करोमि, अपि तु वातरोगेण मच्छरीरं कम्पते' इति प्रतीत्या करोतेर्यत्नार्थत्वस्यैवौचित्यात्, पटाङ्कुरयोः कृताकृतव्यवहाराच्च। बीजादिनाङ्कुरः कृत इत्यादावनुकूलव्यापारे कृञो लक्षणा। भावयतीति विवरणमपि कृत्यभिप्रायकमेव। न च कृञो यत्नार्थकत्वे यततेरिवाकर्मकतापत्तिः, शब्द शक्तिस्वभावात्।

यद्वा, कृञ उत्पत्त्यनुकला कृतिरर्थः, यततेर्हि कृतिरेवेत्यदोषः। न चैवमुत्पादयतीत्यस्योत्पत्तिं करोतीति विवरमसंगतं स्यात्, उत्पत्तेरुत्पत्त्यभावादिति वाच्यम्, तत्र व्यापारमात्रे लक्षणाङ्गीकारात्। न च यत्नत्वस्याख्याताावाच्यनिवृत्तिजीवनयोनियत्नसाधारणतया शक्यतावच्छेदकत्वासम्भव इति वाच्यम्, इष्टसाधनताज्ञानजन्यतावच्छेदकप्रवृत्तित्वजातिरेवाख्यातप्रवृत्तिनिमित्तत्वोपगमाददोषः। अत

१. मीमांसकोक्तं इत्यधिकः पाठः ख०।

२. इत्यधिकः पाठः ख०।

एवेश्वरकृतेर्जन्यमात्रजनकत्वेऽपि 'ईश्वरः पचति, ईश्वरो भुङ्क्ते' इत्यादयो न प्रयोगाः। 'ईश्वरो वेदं वक्ति' इत्यादौ तु व्यापारे लक्षणा, तस्माद् यत्न एवाख्यातार्थः।

अत एव 'चैत्र एव पचति, नाचेतनं काष्ठादि' इति स्वारसिको व्यवहारः। 'काष्ठानि पचन्ति' इति तु 'चैत्रः पचति' इतिवन्न स्वारसिकः प्रयोगः। न च 'करोति' इत्यादौ द्वेधा यत्नबोधापत्तिः, 'द्वौ' इत्यादिवदुपपत्तेः। 'रथो गच्छति' इत्यादौ च क्रियानुकूलव्यापारे लक्षणा। क्रियायाश्च सामानाधिकरण्यानुकूलत्वाभ्यां व्यापारेऽन्वयः, व्युत्पत्तिवैचित्र्यात्। अतो नान्यदीयगमनानुकूलतोदनादिलक्षणव्यापारवति 'गच्छति' इति प्रयोगः। अनुकूलताविशेषस्यैव वा सम्बन्धत्वान्नातिप्रसङ्गः।

यदि तु 'निद्राति' इत्यादौ मित्थानाडीमनोयोगरूपनिद्रानुकूव्यापाराप्रसिद्धिः, 'रथो गच्छति' इत्यादावपि तथाननुभवश्चेत्युच्यते, तर्हि 'जानाति, गच्छति, यतते, द्वेष्टि, करोति, निद्राति' इत्यादावश्रयत्वे लक्षणा।

ननु धात्वर्थस्यैवाश्रयतासम्बन्धेन प्रथमान्तार्थेऽन्वयोऽस्तु, किं लक्षणया? किञ्च, लक्षणापक्षे आश्रयत्वाय सम्बन्धस्याधिकस्य 'जानाति' इत्यादौ भानस्वीकारेण गौरवम्। न च 'तण्डुलः पचति' इत्यादौ तण्डुलादेः कर्मतासम्बन्धेन पाकादावन्वयबोधवारणाय नामार्थधात्वर्थयोर्भेदेन साक्षादन्वयस्याव्युत्पत्त्या न तथा बोधसम्भव इति वाच्यम्, प्रातिपदिकार्थप्रकारकक्रियाबोधस्याव्युत्पन्नत्वेऽपि क्रियाप्रकारकप्रातिपदिकार्थविशेष्यकबोधस्याव्युत्पन्नत्वे मानाभावादिति चेत्, न; 'घटः करोति' इत्यादौ 'कृतिकर्मीभूतो घटः' इत्यन्वयबोधवारणाय क्रियाप्रकारकनामार्थबोधस्याप्यव्युत्पन्नत्वात्। सम्बन्धभानगौरवं तु न दोषावहम्, प्रामाणिकत्वात्।

अस्तु वा तथा, वर्त्तमानत्वाद्यन्वयस्तु सर्वथेदृशे विषये धात्वर्थ एव, न त्वाश्रयत्वादौ। ज्ञानाद्यसत्त्वेऽपि स्वरूपसम्बन्धविशेषरूपस्यातिरिक्तस्य वाश्रयत्वादेः सम्बन्धेऽस्य सत्त्वे जानातीत्यादिप्रयोगापत्तेः। ज्ञानादिविशिष्टे आश्रयत्वादौ तदन्वये तु विशेषणज्ञानादावपि तदन्वयस्यावश्यकत्वेन तस्यैव स्वीकारौचित्यात्।

न च यत्नस्याख्यातार्थत्वे "कर्त्तरि लः" इत्याद्यनुशासनविरोधः, कृत्यभिधानेनैव प्रथमान्तार्थविशेषणतया कृत्यन्वयेन कृतिविशिष्टस्य कर्त्तुर्बोधनिर्वाहे लस्य तद्बोधकत्वाद् न तद्विरोधः, 'लः कर्मणि' इत्यत्र बोधकताया एव सप्तम्यर्थत्वात्,

न तु वाचकता तदर्थः, गौरवेण विशिष्टधर्मिणि शक्तेर्बाधात्। न च 'चैत्रः पचति' इत्यादौ भिन्नाभ्यां रूपाभ्यामेकधर्मिबोधकत्वलक्षणसामानाधिकरण्यानुभवविरोध इति वाच्यम्, तथाननुभवात्, तादात्म्यानन्तर्भावेण स्वार्थान्वितार्थबोधकत्वस्यैव सामानाधिकरण्यस्य प्रतीतेः।

अस्तु वा तथा सामानाधिकरण्यं लक्षणया, शक्तिस्तु लाघवाद् यत्न एव, अत एव "युष्मद्युपपदे समानाधिकरणे" [१।४।१०५] इत्यादीनां नानुपपत्तिः। अत एव च 'किं करोति' इति प्रश्ने 'पचति' इत्येवोत्तरे दत्ते देवदत्तादिपदाभावेऽपि मनसोपस्थिते कर्त्तरि नैकत्वसंशयः, लक्षणयोपस्थिते धर्मिणि सङ्ख्यान्वयेनादोषात्।

'पचति'इत्यादौ कालान्वयस्तु कृतावेव, न तु धात्वर्थे, यत्नशुन्येऽपि पुरुषे तदधीनाग्निसंयोगादिरूपपच्याद्यर्थस्य विद्यमानत्वे 'अयं न पचति'इति प्रयोगात्, 'अयं पचति' इत्युक्ते इदानीमयं पाकयत्नवान्न वेति संशयनिवृत्तेश्च। जानातीत्यादौ धात्वर्थ एव तदन्वयध्रौव्यात्। पचतीत्यादावपि तथैव, यत्ननिवृत्तौ पाकानुवृत्तौ 'अयं न पचति' इति तु न भवत्येव पचतीत्यस्यैव दर्शनाच्च।

एवञ्च कालान्वये नानाकार्यकारणभावकल्पनापि न। इदानीमयं पाकयत्नवान्न वेति संशयनिवृत्तिस्तु तात्पर्यलिङ्गेन यत्नत्वावच्छिन्ने वर्त्तमानत्वानुमित्यभ्युपगमेनोपपन्नेत्यन्ये।

नश्यतीत्यादावुत्पत्तिरपि धात्वर्थः, आख्यातार्थो वा इति तत्रैव कालान्वयः। अतो ध्वंसस्य नित्यत्वेऽपि न सर्वदा नश्यतीति प्रयोगः।

यद्वा, उत्पतिमदभाव[त्व!]स्यैव नाशपदार्थत्वेन तदेकदेशोत्पत्तौ तदन्वयः। "अनभिहिते कर्त्तरि तृतीया" इत्यादेश्चानभिहितायां कृतावित्यर्थः। कृतिश्चाश्रयत्वादीनामुपलक्षणम्, कर्तृधर्मेऽनभिहिते इति यावदिति केचित्। तत्, न; लकारसामान्यस्यैव कर्तृत्वे शक्तत्वेन 'पच्यते तण्डुलः चैत्रेण' इत्यादावपि तृतीयानापत्तेः। 'किं क्रियते देवदत्तेन' इति प्रश्ने 'पच्यते' इत्युत्तरेण कर्त्तृपदासमभिव्याहृते 'पच्यते तण्डुलः' इत्यादौ 'फलजनकस्पन्दो वर्त्तमानकृतिजन्यो न वा' इति सन्देहानुदयेन च 'चैत्रेण पच्यते' इत्यस्य 'चैत्रेण पक्वः क्रियते' इति विवरणेन चाख्यातमात्रस्य कर्तृत्वशक्ततायाः आवश्यकत्वात्। न च कर्तृत्वविशेष्यतया प्रातिपदिकार्थेऽविवक्षिते सति तृतीया, कर्मत्वविशेष्यतया प्रातिपदिकार्थे विवक्षिते सति द्वितीया इत्याद्यर्थः। अत एव सूत्रे धर्मिनिर्देशश्चरितार्थः, अतो न दोष इति वाच्यम्, चैत्रमैत्रोभयकर्तृ-

कपाकस्थले चैत्रकर्तृकपाककर्त्ता मैत्र इत्यन्वयतात्पर्येण 'चैत्रेण पचति मैत्रः, चैत्रेण पक्ववान् मैत्रः' इत्यादेरप्यापत्तेः।

न चाश्रयातिरिक्ताविशेषणतापन्नं यत् कर्तृपदम्, तद्विशेषणतानापन्नक्रियायां विशेषणतया प्रातिपदिकार्थविशेष्यकर्तृत्वान्वयविवक्षायां तदुत्तरं तृतीयेति सूत्रार्थः। 'चैत्रेण पाचयति मैत्रः' इत्यादौ ण्यर्थकर्तृत्वविशेषणतापन्नपाकादौ चैत्रादिकर्तृकत्वान्वयेन तत्र तृतीयासिद्धये आश्रयातिरिक्ताविशेषणतापन्नेति।

तच्चाख्यातार्थाश्रयत्वे विशेषणम्। तस्य चाश्रयातिरिक्तत्वं स्पष्टमेव। कृतिविशेष्यकबोधाभिप्रायेण 'चैत्रेण पचति' इत्येतद्वारणायाश्रयविशेषणत्वमुपेक्ष्याश्रयातिरिक्ताविशेषणत्वं निवेशितमिति वाच्यम्, सूत्राक्षरैस्तादृशार्थालाभात्। पाचयतीत्यादौ तिप आश्रये लक्षणाग्रहवत्पुरुषीय—'चैत्रेण पाचयति मैत्रः' इति प्रयोगे तृतीयाया असाधुत्वापत्तेश्च।

तस्मात् 'अनभिहिते' इत्यादेरनभिहितसङ्ख्याके इत्यर्थः। न च 'चैत्रेण दृष्टो घटः, घटं दृष्टवान् चैत्रः' इत्यादौ विनापि तिङं सङ्ख्याप्रतीतेः क्लृप्तशक्तिकेन सुपैव सङ्ख्योपस्थितिसम्भवे तिङां न तदभिधायकत्वम्। एवञ्च 'चैत्रः पचति' इत्यादावपि तृतीयापत्तिरिति वाच्यम्, 'चैत्रो मैत्रश्च गच्छतः' इत्यादौ विनापि द्वित्वादिबोधकसुपं द्वित्वादिप्रत्ययात्। न चैकत्वधर्मितावच्छेदकद्वित्वादिबोधः कुतः, एकत्वद्वयावच्छेदेन द्वित्वधीसम्भवात्। न च सुबैकवचनस्यैव द्वित्वादौ लक्षणास्तु, सुपः प्रकृत्यर्थगतसङ्ख्याबोधकत्वेन चैत्रद्वयमैत्रद्वयबोधापत्तेः।

ननु कृता सङ्ख्यानभिधानात् तत्र दोष इति चेत्, न; तत्र कर्तृकर्माभिधानानभिधानाभ्यामेव व्यवस्थासंभवात्। अन्यतरानभिधाने तृतीयेति सूत्रार्थः। कर्मलकारे कृतिर्न वाच्येति मते तु कृत्यनभिधानमेव कर्तुरनभिधानम्। न च सङ्ख्याभिधानानभिधानाभ्यामेवोक्तानुक्तविभागे सङ्ख्यायाः कर्तृकर्मसाधारण्येनान्वये बाधकाभावेन कर्तृलकारादौ कर्मादावपि द्वितीयाद्यापत्तिरिति वाच्यम्, एकपदोपात्तत्वेन भावनाविशेष्ये सङ्ख्यान्वयनियमस्वीकारेणादोषात्।

भावनायाश्चेतरविशेषणीभूतप्रथमान्तपदोपस्थाप्येऽन्वयः, तथैवाकाङ्क्षितत्वात्। भावनापदेन सङ्ख्याकालातिरिक्त आख्यातबोध्यो गृह्यते। तेन जानातीत्यादीनां सङ्ग्रहः। 'नारायण इव नरो हन्ति, चन्द्र इव मुखं दृश्यते' इत्यत्र नारायणे चन्द्रे च सङ्ख्यान्वयवारणायेतराविशेषणेतित्।

वस्तुतः 'घटो नित्यः' इत्यादितोऽबोधादितरविशेषणत्वेनोपस्थितेः शाब्दमात्रप्रतिबन्धकत्वादत्र विशिष्यतदनिवेशेऽपि क्षत्यभावः। एवञ्च कालेष्टसाधनत्वाद्यतिरिक्ताख्यातार्थबोधे प्रथमान्तपदजन्योपस्थितिर्हेतुरिति कार्यकारणभावः फलितः।

एवञ्च 'न पचति' इत्यत्र भावनानन्वयिन्येव कर्त्तरि तदन्वयेऽपि न दोषः। भावना हि तत्र नञर्थान्वयिनी। 'चैत्रेण सुप्यते' इत्यत्र चैत्रनिष्ठः स्वाप इति बोधाद् विशेष्ये स्वापे तद्वारणाय प्रथमान्तेति। अत एव तत्र भावलकारे प्रथमान्तपदजन्योपस्थित्यभावादनन्वितैव सङ्ख्या। अत एव तत्रौत्सर्गिकमेकवचनमेव।

किञ्च, तवापि कुत्र कर्त्ता वाच्यः, कुत्र कर्मेत्यत्र विनिगमनाविरहाच्छबादिकं तात्पर्यं वा नियामकं वाच्यम्। तथा च ममापि कुत्र सङ्ख्यान्वय इत्यत्र कुत्र कृतिरेव वाच्या, कुत्र फलमपि, इत्यत्र च तदेव नियामकमिति न काप्यनुपपत्तिः। 'मैत्रेण पच्यते तण्डुलः' इत्यत्र मैत्रनिष्ठभावनाविषयपाकजन्यफलशाली तण्डुल इति बोधः।

कृतिः फलञ्चाख्यातार्थः। तत्र कृतिर्धात्वर्थविशेषणम्, फलं विशेष्यम्, निष्ठत्वं तृतीयार्थः, संसर्गो वा, सङ्ख्यामात्रं तृतीयार्थः, भावनापदेन सङ्ख्याकालातिरिक्त आख्यातार्थ उच्यते। अत एव भावनाविशेष्ये सङ्ख्यान्वयस्य न भङ्गः। 'रथेन गम्यते ग्रामः' इत्यत्र रथनिष्ठगमनानुकूलव्यापारजन्यफलशालीति बोधः। अत्र निष्ठत्वं तृतीयार्थः। तस्य धात्वर्थे गमनेऽन्वयः। न च फलमपि संसर्गेण गमने, नामार्थधात्वर्थयोर्भेदेनान्वयस्याव्युत्पत्तेः।

यद्वा, तेन संसर्गेण रथस्याख्यातार्थभावनायामेवान्वयः। न च फलमपि संसर्गोऽस्तु, किं तत्रात्मनेपदस्य शक्तिकल्पनया, तस्य प्रकारतया भानानुभवात्। न च फलावच्छिन्नव्यापारस्य धात्वार्थत्वाद् धातुनैव तल्लाभः, विशेषणविशेष्यभाववैपरीत्यस्याशक्यत्वेन क्रियाजन्यफलालाभात्, यद्रूपविशिष्टे शक्तिः तद्रूपविशिष्टस्यैव पदेनोपस्थितेः। तस्माद् व्यापार एव धात्वर्थः, फलं त्वात्मनेपदार्थः, कृतिश्चेति।

ननु कृतेरपि तत्राख्यातार्थत्व आख्यातोपस्थापितभावनायाः क्रियाविषयायाः फलेऽन्वयः, उत भावनाविशेष्यक्रियायाः फलेऽन्वयः। नाद्यः, फलस्य क्रियाजन्यफलशालित्वरूपकर्मत्वप्रकारकप्रतीतिविरोधः। अन्त्ये, तिङुपस्थाप्यभावनायां क्रियाया विशेषणत्वेनान्यत्र क्लृप्तान्वयो भज्येत, किन्तु तृतीयार्थ एव। 'चैत्रेण

पक्वः' इत्याद्यनुरोधेन सुबर्थकृतेः क्रियायां विशेषणत्वेनैवान्वयव्युत्पत्तेर्द्वितीय-प्रकारेणैवान्वयबोधः । 'ग्रामं गच्छति' इत्यादौ तु फलं द्वितीयार्थः ।

वस्तुतस्तु प्रागुक्तानुपपत्त्या कृतेरप्यत्राख्यातार्थत्वमावश्यकम् । व्युत्पत्त्यन्त-तरमेवात्र कल्प्यमिति प्राञ्चः ।

केचित् तु, धात्वर्थनिरूपणोक्तयुक्तिभिस्तत्तत्फलावच्छिन्नव्यापारवाचितैव धातोः । न च धात्वर्थविशेषणत्वेनोपस्थितफलस्य कर्मण्यन्वयाव्युत्पत्तेरात्मने-पदार्थफलस्यान्वयो वाच्यः, तस्य च सामान्यरूपेण विशेषरूपेण वा फलसामान्य-वाचकत्वात् ।

एवञ्च 'गम्यते ग्रामः' इत्यादौ नियमतः संयोगादिरूपफलशालित्वं ग्रामादेर्न प्रतीयेतेति वाच्यम्, संयोगाद्यवच्छिन्नव्यापारशक्तगम्यादिसमभिव्याहारादेव सामान्यफलशक्तस्याप्यात्मनेपदस्य संयोगादिरूपफलमात्रबोधकताङ्गीकारेणादोषात्। न च विशेषरूपेण फलसामान्यबोधकत्वे शक्त्यानन्त्यम्, इष्टापत्तेः । तदादिवद् बुद्धिस्थत्वेन शक्यतावच्छेदकानुगमेन वा न शक्त्यानन्त्यम् ।

एवञ्च 'गम्यते ग्रामः' इत्यत्र संयोगावच्छिन्नव्यापारजन्यसंयोगाश्रयो ग्राम इति बोधः । 'ग्रामं गच्छति' इत्यादौ द्वितीयार्थश्चाधेयत्वं व्युत्पत्तिवैचित्र्याद् धात्वर्थ-तावच्छेदकेऽपि फलेऽन्वेति । एकदेशान्वयास्वीकारे तु तत्रापि फलमेव द्वितीयार्थः । ग्रामनिष्ठसंयोगजनकसंयोगावच्छिन्नक्रियानुकूलकृतिमानिति बोध इति वदन्ति ।

अत्र पक्षेऽपि संयोगस्य द्वेधाभानमनुभवविरुद्धमिति द्वितीयात्मनेपदयोर्न फलमर्थः, किन्तु धातोरेव, फलव्यापारौ पृथक् शक्यौ । एवञ्च द्वितीयाया आधेयत्वं कर्माख्यातस्याश्रयत्वम्, फलं तु कर्तृप्रत्ययसमभिव्याहारे धात्वर्थे व्यापारे विशेषणम् । कर्माख्यातसमभिव्याहारे तु[1] [1]यगात्मनेपदादिरूपतात्पर्यग्राहकवशाद् विशेष्यमित्येव साम्प्रतम् ।

1. इदमत्राकूतम्—यथा तदादित्यादिशब्दानां घटत्वपटत्वादिरूपेण नानार्थशक्ततया नानार्थकत्ववारणाय स्वीयविषयतावच्छेदकत्वसम्बन्धेन वक्तृविशेषोपलक्षिता ये घटत्वपटत्वादयो धर्माः, तदवच्छिन्ने तदादीनां शक्तिस्वीकारेण न नानार्थ-कत्वम्; तथाऽत्रापि स्वीयविषयताऽवच्छेदकत्वसम्बन्धेन पचादिधातु-

१. ख० नास्ति ।

'देवदत्तेन ज्ञायते' इत्यादौ विषयत्वं कर्मप्रत्ययार्थः, तृतीयार्थ आधेयत्वम्। 'क्रियते घटः' इत्यादौ साध्यतया कृतिविषयत्वमेव कर्मप्रत्ययार्थः। अतः 'आकाशं करोति' इत्यादयो न प्रयोगाः।

नन्वेवं कृतामपि कर्तृकर्मणोः शक्तिर्न सिध्येत्, कृत्याश्रयत्वादावेव शक्तेरुचितत्वात्। अव्ययनिपातार्थवत् प्रत्ययस्यापि भेदेनान्वयानुभावकत्वान्न नामार्थयोरभेदान्वयव्युत्पत्तिविरोध इति चेत्, न;

चैत्रो गन्ता गतो ग्रामः, मित्रा पक्त्री, गतं पुरम्।
भोक्ता तृप्यति, पक्वानि भुङ्क्ते, पक्ताऽपसार्यताम्॥

इत्यादौ पुंलिङ्गस्त्रीलिङ्गनपुंसकलिङ्गत्वनियमदर्शनेन पूर्वार्धोपात्तानामभेदान्वय एव साधुत्वोपगमेन तस्य धर्मिशक्तिं विनानुपपत्तेः, भोजनानुकूलकृतौ तृप्त्याश्रयत्वस्य भोजने पाकफलविक्लित्त्यादिकर्मकत्वस्य बाधाच्च। तस्मात् कर्तृविहितकृतां कर्तरि, कर्मविहितानां तु कर्मणि शक्तिः, चैत्रस्य नप्ता इत्यादाविव पदार्थतावच्छेदककृत्यादौ धात्वर्थान्वयः।

यद्वा, पचतेत्यादौ स्वानुकूलकृत्याश्रयत्वसम्बन्धेन पाकादेः कर्त्रादावेवान्वयः। कर्तृत्वकर्मत्वाद्यनभिधाने तृतीयाद्वितीयादय इति न दोषः, कृता विशिष्टस्याप्यनभिधानात्।

ननु कृतामपि धर्मवाचकत्वमेवास्तु, विशिष्टे तु लक्षणास्तु। 'भोक्ता तृप्यति' इत्यादौ सामानाधिकरण्यानुभवानुरोधात् 'चैत्रो गन्ता' इत्यादावपीति चेत्, न; विशिष्टशक्त्युच्छेदापत्तेः, सर्वत्रैव धर्मे शक्तिः, विशिष्टे लक्षणेत्यस्य वक्तुं शक्यत्वात्। शक्ततावच्छेदकञ्च श्रूयमाणतित्वादिकमेव, न तु सकलसाधारणतिङ्त्वम्, तस्य दुर्वचत्वात्। न च पाणिनीयसङ्केतविशेषसम्बन्धेन तिङ्पदवत्त्वं तत्, "आदिरन्त्येन" [१।१।७१]इत्येतच्च संकेतग्राहमिति वाच्यम्, तदविदुषामपि बोधात्।

किञ्चैवं घटादिवाचकघटादिपदेष्वपि कस्यचिच्छब्दस्य पुरुषविशेषीयसङ्केतसम्भवेन तुल्ययुक्त्या तत्रापि तच्छब्दस्यैव शक्ततावच्छेदकत्वापत्तेः। तिबादिषु पाणिनेस्तिङ्पदसङ्केतवत् पुरुषान्तरीयशब्दान्तरसङ्केतस्यापि सम्भवेन तत्तच्छब्दानामपि प्रवृत्तिनिमित्ततापत्तौ विनिगमनाविरहाच्च।

प्रयोक्तृसमवेतबुद्धिविशेषोपलक्षिता ये फूत्कारत्वादयो धर्माः, तदवच्छिन्नशक्यतानिरूपितशक्ततावत्त्वस्य पचादौ स्वीकारात्।

अननुगतनानाधर्मावच्छिन्नशक्यतानिरूपितशक्ततावत्त्वस्यैव नानार्थकत्वेन प्रकृते बुद्धिविशेषस्यानुगमकस्य सत्त्वेन नानार्थकत्वाभावः।

एतेन सङ्केतविशेषसम्बन्धेनाख्यातपदवत्त्वादिरूपमाख्यातत्वादिशक्तताऽवच्छेदकमित्यपास्तम्। नापि लत्वम्, तदजानतोऽपि बोधात्।

किञ्च, तस्य वाचकत्वे शत्राद्यनुरोधेन लस्य नानार्थतापत्तिः।

किञ्च, स्मारकतावच्छेदकशक्तताऽवच्छेदकोभयकल्पनापेक्षया शक्तताऽवच्छेदकस्यैव कल्पने लाघवेन 'पपाच' इत्यादावनेकेषां स्मारकतापत्त्या च स्थानिनामनियतत्वेन चाव्यवहृतत्वेनादेशानां वाचकत्वेऽस्यैव युक्तत्वम्। अत एवैधामित्यादावामन्तेनैव कर्तृबोधः।

न च 'हरेऽव' इत्यादौ पूर्वरूपादिस्थले परलोपादिविधानाद् व्याकरणानां कलहे कियान् सम्बोधनविषयार्थस्य, कियान् क्रियाया इत्यर्थस्य, वस्नसादौ कियान् द्रव्यवाचकः, कियांश्च कर्मत्वादेरित्यर्थस्य च नियन्तुमशक्यत्वेन प्रथमव्युत्पत्तेः समुदाय एव सत्त्वेन च पदे वाक्ये च शक्तिकल्पनापत्तौ वाक्यपदस्फोटापत्तिरिति वाच्यम्, प्रत्येकं पदानामवधृतशक्तिकानां समुदायेन यथा व्युत्पत्तिस्मृतानां तत्तदर्थोपस्थापनद्वारा वाक्यार्थबोधकत्वसम्भवान्न तदापत्तिः। लस्य तु न क्वापि शक्तिरवधृतेति न दोष इति वदन्ति।

अत्राहुः—लक्ष्यतावच्छेदकत्वस्येव शक्यतावच्छेदकत्वस्यापि गुरुणि स्वीकारे बाधकाभावः। न च कारणतावच्छेदकत्ववत् शक्यतावच्छेदकत्वं स्वरूपसम्बन्धविशेषः, तच्च सम्भवति 'लघौ गुरौ' न कल्प्यते। लक्ष्यतावच्छेदकत्वं तु न तथेति वाच्यम्, वैषम्ये बीजाभावात्।

किञ्च, स्वरूपसम्बन्धो यदि तत्तत्स्वरूपम्, तदा गुरुधर्माणामपि सत्त्वात् कानुपपत्तिः, अतिरिक्तत्वे लक्ष्यतावच्छेदकस्यापि गुरौ कथं कल्पनम्?

किञ्च, गुरुधर्मेष्ववच्छेदकत्वाभावकल्पनापेक्षया अन्यत्र कल्प्यमानावच्छेदकत्वीयसम्बन्धस्यैव कल्पना युक्ता, भावकल्पनायां लाघवात्।

किञ्च, अवच्छेदकत्वं न स्वरूपसम्बन्धः, नाप्यतिरिक्तम्, मानाभावात्। किन्त्वन्यूनानतिरिक्तवृत्तित्वमेव। तच्च गुरुण्यपि। एवं कारणतावच्छेदकत्वप्रतियोगितावच्छेदकत्वादीत्यन्यत्र विस्तरः।

एवञ्चावच्छेदकलाघवगौरवचिन्ताऽयुक्ता।

किञ्च, यत्र लघुगुरुरूपाभ्यां बोधो निर्विवादः, तत्रैव लघुरूपावच्छिन्ने शक्तिः, गुर्वंवच्छिन्ने लक्षणा। प्रकृते च कृतित्वेनाख्याताद् बोधः सविवादः।

नचानन्तकृतीनां शक्यतावच्छेदकत्वे तद्भेदाच्छक्त्यानन्त्यापत्तिः, आश्रयत्वस्यैकस्यैव शक्यतावच्छेदकत्वात् । तस्य नानात्वेऽप्याश्रयतात्वस्य शक्यतावच्छेदकानुगमकस्य सत्त्वेन शक्त्यानन्त्याभावात् ।

किञ्च, कर्तृतङः कृतिः, कर्मतङः फलम्, आश्रयत्वं वेति त्वत्पक्ष एव शक्त्यानन्त्यम्, मम तु सर्वत्राश्रय एवेति न तत् । लक्षणायां विनिगमना विरहाच्च ।

किञ्च, करोतिरपि धात्वंशस्यैव विवरणम्, विवरणे पाकशब्दश्च विक्लित्ति-मात्राभिधायकः । अत एव फलानुत्पाददशायां पाको जातो न वेति प्रश्ने भविष्य-तीत्यप्युत्तरं दृश्यते । व्यापारान्तर्भावेण प्रश्ने जायत इति च । न च धात्वर्थात् पृथग्विवरणानुपपत्तिः, पचतीत्यत्र धात्वर्थाख्यातार्थयोः संसर्गमर्यादया भासमान-स्यानुकूलत्वस्याकारकशक्तिरूपस्यापि पाकमिति द्वितीयया कारकशक्तिरूपेण प्रकारतया विवरणवद् धात्वर्थभूताया अपि कृतेस्तथाविवरणोपपत्तेः ।

अपि च, कृतेर्व्यापारविशेषतया कृत्तिङुभयानुगतत्वेन फूत्कारादौ धातोः शक्तिकल्पनाया आवश्यकत्वेन करोतीत्यादौ धातोर्नैरर्थक्यापत्तेश्च । प्रकृतेरेव शक्तिकल्पनाया युक्तत्वेन धातुत एव लाभात् तत्राख्यातस्य शक्तेरुक्तिसंभव एव न ।

वस्तुतः कृञोऽपि न यत्नार्थकत्वमिति धात्वर्थनिरूपणे उक्तम् । वातरोगादिना कम्पमाने देवदत्ते नाहं स्पन्दं करोमीति व्यवहारस्तु स्पन्दोत्पत्त्यनुकूला-साधारणव्यापारस्य तदर्थत्वादुपपन्नः, तादृशव्यापारस्य देवदत्तेऽभावात्, व्यापार-मध्ये कृतेरपि निवेशाच्च । अङ्कुरो न कृत इति व्यवहारः, उत्पत्त्यनुकुलकृत्य-भावमात्राभिप्रायेण, लक्षणा वा तत्र कृञः, तव मते बीजादिना कृत इत्यादाविव व्यापाराणां तत्तद्रूपेण वाच्यत्वेऽपि शक्यतावच्छेदकानां बुद्धिस्थत्वेनानुगमान्न शक्त्यानन्त्यम् । उत्पत्त्यवच्छिन्नव्यापारशक्तस्यापि व्यापारमात्रे लक्षणया उत्पत्तिं करोतीत्यादिनिर्वाहः । न च तव मते अभेदसम्बन्धेनाख्यातार्थाश्रयप्रकारकबोधं प्रति प्रथमान्तपदजन्योपस्थितिर्हेतुः, तदर्थसङ्ख्याप्रकारकबोधे तदर्थाश्रयोपस्थिति-र्हेतुः, तदर्थकालप्रकारकशाब्दबोधे धातुजन्योपस्थितिर्हेतुरिति कार्यकारणभावत्रयम् ।

मम तु कालेष्टसाधनत्वाद्यतिरिक्ताख्यातार्थबोधे प्रथमान्तपदजन्योपस्थिति-र्हेतुरिति सङ्ख्याभावनयोरेक इति लाघवमिति वाच्यम्, किं करोतीति प्रश्ने कर्तृपदाघटितपचतीत्युत्तरमात्रदाने कर्त्तरि एकत्वसंशयनिवृत्तिदर्शनेन तत्र लक्षण-योपस्थिते कर्त्तरि एकत्वान्वयस्य त्वयाप्यङ्गीकारेण सङ्ख्याप्रकारकबोधे तदर्थ-

कर्त्रुपस्थितिकार्यकारणभावस्य त्वयाप्यवश्यवक्तव्यत्वात्। सर्वत्र तथानङ्गीकारेण तत्तद्वाक्यीयत्वनिवेशेनात्यन्तगौरवञ्च। सङ्ख्याभावनान्वयकार्यकारणभावे कालेष्टसाधनत्वाद्यतिरिक्ताख्यातार्थत्वेन निवेशेऽधिकगौरवञ्च।

किञ्च, आख्यातेन क्वचित् कृतेः, क्वचिदाश्रयत्वस्य बोधः, कृतेः क्वचिद् धातुना, क्वचित् प्रत्ययेन बोध इत्यर्थस्य पर्यवसितत्वेन तव मतेऽनेकक्लिष्टकार्यकारणभावापत्तिः, तत्तद्व्युत्पत्त्यनुसारेण तथा तथा कार्यकारणभावानां सर्वेषामावश्यकत्वेन तल्लाघवगौरवविचारस्यायुक्तत्वाच्च।

किञ्च, "युष्मद्युपपदे" [१।४।१०५] इत्यादौ समानाधिकरणे इत्युक्ते ऽनुभवसिद्धसामानाधिकरण्यस्य त्वन्मतेऽनुपपत्तिः। न च तिङर्थसङ्ख्यान्वयिवाचकत्वमेव तत्र सामानाधिकरण्यम्, तादृशस्य सामानाधिकरण्यपदेनाव्यवहारात्। न च लक्षणया सामानाधिकरण्यम्, शक्तेरेवोचितत्वात्। अन्यथा विशिष्टशक्त्युच्छेदः, कृतिमात्रबोधस्य क्वाप्यभावात्। यदि तु पचतीत्येतावन्मात्रोक्तौ तन्मात्रबोध इत्युच्यते, तर्हि तदुक्तौ कर्त्तरि एकत्वसंशयापत्तिः, पक्ता जात इत्यादौ कृत्यपि कृतिमात्राभिप्रायेण प्रयोगस्य वक्तुं शक्यत्वात् तिङ्कृतौ वैषम्यं दुरुपपादञ्च।

किञ्च, कालेष्टसाधनत्वाद्यतिरिक्ताख्यातार्थबोधे प्रथमान्तपदजन्योपस्थितिर्हेतुरिति कार्यकारणभावे व्यभिचारः। कार्यकारणभावान्तरकल्पने तु गौरवम्।

किञ्च, विधेयस्योद्देश्यकोटौ प्रवेशानौचित्येन त्वदुक्तार्थोऽनुचितः, कर्त्रादौ युष्मत्समानाधिकरणे यो लः, तस्य स्थाने मध्यम इत्यर्थस्यैवोचितत्वम्।

किञ्च, संख्यान्वयनियमोऽपि दुरुपपादः। न च शबादिकं तात्पर्यग्राहकम्, कर्त्रर्थे सार्वधातुके शबित्याद्यर्थस्य सत्त्वेन तेषां सङ्ख्यान्वये तात्पर्यग्राहकत्वस्य निरूपयितुमशक्यत्वात्, यदपि "अनभिहिते" इत्यस्यानभिहितसङ्ख्याक इत्यर्थ इति। तदपि न; देवदत्तः पक्तेत्यादौ तृतीयापत्तिः।

अपि च, तिङ्विधौ द्व्येकयोरित्यादेरुपस्थितस्य किं लकारार्थस्यैकत्वादावित्यर्थः, उत तिङुपात्तार्थान्वयिगतैकत्वादावित्याद्यर्थः? आद्ये सिद्धं न इष्टम्। अन्त्ये तु देवदत्तादिपदोत्तरसुपैव तस्योक्तत्वेन तत्र तिङ्विधानानुपपत्तिः।

किञ्च, तव मते पचति, ज्ञातेत्यादौ नानारूपं कर्तृत्वं वाच्यम्, **मम** तु सर्वत्रैकरूपमेव तत्।

किञ्च, तव लविधौ कर्तृग्रहणस्य नानार्थतापत्तिः, तृतीयादिविधावपि क्वचित् कृतौ, क्वचिदाश्रयत्व इत्याद्यर्थे वैरूप्यम्। न च कृतौ तृतीयेत्याद्येव सूत्रार्थः, 'रथेन गम्यते' इत्यादावनुपपत्त्या तृतीयादीनां लक्षणेति वाच्यम्, सुब्विभक्तौ न लक्षणेति त्वत्सिद्धान्तात्, अर्थनिर्देशस्य व्यर्थत्वापत्तेश्च, अन्यार्थेऽसाधुत्वबोधनं हि तत्फलम्, त्वद्रीत्या लक्षणया सर्वत्र साधुत्वस्येष्टत्वात्, व्यत्ययानुशासनवैयर्थ्यापत्तेश्च।

किञ्च, 'कूलं पिपतिषति'त्यादावचेतने चेतनत्वारोपवद् रथादावपि चेतनत्वारोपेण तिङादीनां कृत्यर्थकत्वोपपत्तौ लक्षणाश्रयणं व्यर्थम्। न च व्याकरणस्मृतेः साधुत्वमात्रे तात्पर्येणार्थव्यवस्थापकत्वान्न दोषः इति वाच्यम्, अर्थविशेषपुरस्कारेणैव साधुत्वस्य वक्तव्यत्वेन ऋष्यनुभवानुरूढार्थानुवादबलेन तादृशार्थं एव साधुत्वस्यौचित्यात्। अत एव पचतीत्युक्ते कः कीदृश इति प्रश्नः, पण्डितो घनश्याम इत्युत्तरञ्च सङ्गच्छते। अन्यथा कर्त्तुरनुपस्थितौ क इति विशेषजिज्ञासानुपपत्तिः।

किं चैवं कृतामपि कर्तृवाचकत्वानापत्तिः। न च चैत्रो गन्तेत्यादौ समानाधिकरणप्रतिपादिकार्थयोरभेदान्वयव्युत्पत्तेर्भेदेनान्वये चैकपदोत्तरविरुद्धविभक्तिमत्पदजन्योपस्थितेर्हेतुत्वाच्च भेदेनान्वयासम्भवेनाभेदान्वयो वाच्यः, स च कर्तुर्वाच्यतां विनाऽनुपपन्न इति वाच्यम्, राज्ञः सुतस्य धनमित्यादौ सति तात्पर्ये उभयविधबोधस्यापि दर्शनेन कार्यकारणभावद्वयस्यापि व्यभिचरितत्वात् तथा तथा बोधे तात्पर्यज्ञानहेतुतयैव निर्वाहस्यावश्यकत्वेन चैत्रो गच्छतीत्यादाविव कृतेराश्रयतया चैत्रेऽन्वयेनाक्षतेः। न चैवमपि मित्रा पक्त्रीति लिङ्गसामानाधिकरण्यात् कृति कर्त्ता वाच्यः, ईदृशानां धर्मवाचकत्वेऽपि शुक्लादिपदानामिव विशेष्यनिघ्नत्वस्य वक्तुं शक्यतया वस्त्वव्यवस्थापकत्वात्।

किञ्च समानाधिकरणविशेषणस्य विशेष्यसमानलिङ्गत्ववत् तादृशविशेषणस्य विशेष्यसमानसङ्ख्यत्वनियमादाख्यातस्यापि धर्मिवाचकत्वमावश्यकम्। अन्यथा देवदत्ताः पचतीत्यादेरप्यापत्तेः। चैत्रो मैत्रश्च सुन्दरावित्यादौ व्यभिचारान्न तथा नियम इति चेत्, 'क्षुदुपहन्तुं शक्यम्' इत्यादौ व्यभिचारेण त्वदुक्तनियमस्याप्यभावात्। न च केवलकृतौ प्रयोगाभावः, आख्यातेऽपि समत्वात्, कृत्याश्रयस्यात्मनो जननासम्भवेन पाचको जात इत्यादेः सत्त्वाच्च। न च कृति कृतेरेव वाच्यत्वे चैत्रे गन्तेत्याद्यापत्तिः, चैत्रे गच्छतीत्यस्याप्यापत्तेः। यद्यप्याख्यातार्थस्य प्रथमान्त-

पदोपस्थाप्य एवान्वयः, तथापि कृतेर्विषयतया काष्ठादावन्वयविवक्षायां चैत्रे पचति काष्ठमित्यादेर्दुर्वारत्वम्, भोक्ता तृप्यतीत्यादौ तु कृतः कर्त्तरि लक्षणास्तु, तस्मादभेदान्वयानुभव एव कृत्सु कर्तृ शक्तौ प्रमाणं वाच्यः, विशिष्टशक्त्युच्छेदापत्तिश्च ।

एवं च 'पचति कल्पं देवदत्तः, इत्यादावभेदान्वयदर्शनात् त्वद्रीत्या युक्तत्वाच्च चैत्रः पचतीत्यादावन्वयानुभवाच्च विशिष्टशक्त्युच्छेदापत्तेश्चाख्यातस्यापि कर्तृ-वाचकत्वसिद्धिः ।

यत्तु नामार्थयोरित्यत्र नामत्वं न वैयाकरणपरिभाषितम्, किन्तु सुपः पूर्ववृत्तित्वे सत्यर्थवत्त्वम् । एवञ्च तिबुत्तरं सुबभावान्न दोष इति, तत्, न; आमन्तोत्तरं सुपः सत्त्वेन पाचयामासेत्यादौ कृतेर्भेदेन सम्बन्धेनान्वयानापत्तेः आमन्तोत्तरलिटो धर्मिवाचकत्वे आमन्ततिङन्तयोरभेदान्वयो दुर्लभः ।

किञ्चैवंविधनामग्रहणे छत्रीत्यादौ प्रकृतिप्रत्ययार्थयोरभेदान्वयापत्तिः, अनुशासनबलादेवार्थान्वययोर्निर्णये तु सिद्धं न इष्टम् । न च कल्पबादीनां कर्त्तरि लक्षणा, पाचक इत्यादावपि सुपां लक्षणयैवोपपत्तेः । आचार्यकल्पावित्यादिवत् कर्तृद्वित्वादिविवक्षायां पचति कल्पमित्यादावपि द्विवचनाद्यापत्तिः, अनुशासन-बोधितार्थे स्वेच्छामात्रेण लक्षणायामसाधुतापत्तेश्च ।

किञ्च, तत्र कर्त्तरि लक्षणायां पक्ता गच्छतीतिवत् पचति कल्पं गच्छतीत्यस्यापत्तिः ।

यदपि कर्माख्याते फलमात्मनेपदार्थ इति । तत्र धात्वर्थ एव विशेषण-विशेष्यभावव्यत्यासमात्रेणोपपत्तौ पृथक् प्रत्ययस्य शक्तिकल्पने गौरवात् । तत्र तात्पर्यग्राहकमात्मनेपदं यगादि चास्तु ।

किञ्च, नव्यनैयायिकनये तत्र कृतेराख्यातार्थत्वाभावेन तृतीयान्तासमभि-व्याहृत 'किं क्रियते' इति प्रश्ने पच्यत इत्युत्तरानापत्तेः, कृञस्तव यत्नार्थकत्वात् । न च तत्र कृतिरप्याख्यातार्थः । तस्यां धात्वर्थविशेष्यतायाः क्लृप्तत्वेनानन्वयापत्तेः ।

किञ्च, कृत्यभिधानेनैवाभिधानव्यवस्थाङ्गीकारेण कर्त्तरि तृतीयानापत्तिः । कृतेर्धात्वर्थत्वे तु सिद्धं न इष्टम् ।

किञ्च, प्राचीननये करोतीत्यादौ कालान्वयस्य धात्वर्थेऽङ्गीकारेण पचतीत्यादौ चाख्यातार्थे तदन्वयेन वैषम्यापत्तिः। मम तु सर्वत्र धात्वर्थे एवान्वय इति न दोषः।

एतेन कालस्य धात्वर्थेऽन्वयात् पदद्वयघटितः कार्यकारणभावस्तव, अस्माकन्त्वाख्यातार्थ एवेति लाघवमित्यपास्तम्। 'भूतं पक्वं जानाति'इत्यादौ कालान्वयाय तस्य तवाप्यावश्यकत्वाच्च।

किञ्च, कृतौ कालान्वये पाकशालायां काष्ठज्वलनाद्यनुकूलं व्यापारं कृत्वा पच्यमानमोदनं पश्यति निर्व्यापारतया तिष्ठति देवदत्ते पचतीत्यनापत्तिः। मम तु पाक्यवस्तुनिष्ठविक्लित्यनुकूलव्यापाराधिकरणवृत्तित्वविशिष्टपाकशालावस्थानरूपव्यापारस्य धात्वर्थस्य विद्यमानत्वान्न दोष इति दिक्।

मीमांसकास्तु, फलावच्छिन्नव्यापाररूपधात्वर्थानुकूलो व्यापारः, कृत्यादिरूप आख्यातार्थः। स च व्यापारत्वेनैव। एवञ्च जानातीत्यादौ न लक्षणा। कृत्यादिव्यापारस्तु नैयायिकोक्तयुक्तिजालैर्विशेष्यत्वानुरोधेन च तिङ एव वाच्यः। कालान्वयस्तु धात्वर्थव्यापारे, आख्यातार्थेऽपि वा। धात्वर्थव्यापाराश्रयत्वमेव कर्तृत्वम्, तदर्थफलाश्रयत्वं च कर्मत्वम्। "अनभिहिते" इत्यस्याबोधिते कर्त्रादावित्यर्थः, बोधश्च शक्त्या, आक्षेपाद्[1] वा, लक्षणया वा। तत्र कृति शक्त्या, तिङि भावनयाक्षेपेण लक्षणया वा।

---

1. मीमांसकमते आक्षेपः = अर्थापत्तिः, येन विना यदनुपपन्नम्, तेन तत् कल्प्यते। यथा 'पीनोऽयं देवदत्तो दिवा न भुङ्क्ते' इत्यत्र भोजनं विनानुपपन्नेन योगाभ्यासाद्यजन्यपुष्टत्वेन भोजनं कल्प्यते। तस्य दिवा बाधे रात्रिभोजने पर्यवसानं भवति। एवं प्रकृते भावनायाः कर्तारं विनानुपपत्त्या सा कर्तृरूपमाश्रयं कल्पयति। तथा चानुपपत्तिज्ञानमर्थापत्त्यपरनामाक्षेपः। तज्जन्यं ज्ञानमपि तन्नामकं प्रमित्यन्तरम्।

तार्किकमते आक्षेपोऽनुमानम्। यथा 'भावना क्वचिदाश्रिता, गुणत्वात्, सकर्तृका वा कार्यत्वात्, घटवत्' इत्यनुमितिजनकं व्याप्तिज्ञानादिकमाक्षेपः। एवञ्चाक्षेपेण भावनाज्ञानोत्तरमर्थापत्त्या, अनुमित्या वा कर्ता बोध्यते। मीमांसकैराक्षेपलभ्यस्यापि शाब्दबोधविषयत्वाभ्युपगमादाख्यातजन्यशाब्दबोधे भानमविरुद्धम्। एवं फलस्यापि स्वाश्रयं विनाऽनुपपत्त्या तेन स आक्षिप्यते।

ननु वृत्त्या पदजन्यपदार्थोपस्थितेः शाब्दबोधहेतुत्वेनाक्षेपलभ्यस्य शाब्दबोधे हेतुत्वं न सम्भवति।

न च विपरीतमेव किं न स्यात्, प्राधान्येन प्रतीयमानत्वात्। भावनायाः प्रत्ययवाच्यत्वे स्थिते तया कर्तुराक्षेपो युक्तस्तिङि, कृति त्वाक्षेपलभ्यत्वे तिङीव तस्याप्रधान्यापत्तिः। प्राधान्येन प्रतीयमानत्वाच्च तस्य वाच्यत्वम्। संख्यान्वयानुपपत्त्या सामानाधिकरण्यानुपपत्त्या "लःकर्मणि" [३।४।६९] इत्यादौ धर्मिनिर्देशेन च कर्त्रादौ लक्षणावसीयते। लक्षितकर्तारमादायैव च 'देवदत्तः पचति' इत्यादौ सामानाधिकरण्योपपत्तिः। "लः कर्मणि" [३।४।६९] इत्याद्यनुशासनं तु लाक्षणिकाद्यनुशासनमिति वदन्ति।

यद्यपीदमपि प्रागुक्तदूषणैर्दूषितमेव, तथापि कानिचिदन्यान्यप्युच्यन्ते। तथा हि—शाब्दयामीत्यनुभवविरोधादाक्षेपो न युक्तः।

किञ्चाक्षेपेण प्रतीतस्याभिधाननियामकत्वे कर्मप्रत्ययेऽपि पच्यत इत्यादेः 'पाकः क्रियत' इति विवरणदर्शनेन भावनाया वाच्यत्वाश्यकत्वे तस्याश्च विनाश्रयमनुपपत्त्या कर्त्तुराक्षेपसम्भवात्। कर्त्रभिधाने तृतीयानापत्तिः। न च कर्तृप्रत्यये कर्तरि विधानसामर्थ्याल्लक्षणाश्रयणेऽपि कर्मप्रत्ययस्थले आक्षेपलक्षणयोर्मानाभावः। आश्रयाकाङ्क्षायाश्चैत्रादिपदैरेव शान्तिरिति वाच्यम्, एवमप्याक्षेपलभ्याया अपि व्यक्तेः प्राधान्यस्य तव मते सत्त्वेन प्राधान्यानुरोधाच्छक्तिकल्पना न युक्ता। अन्यथा व्यक्तेरपि वाच्यत्वापत्तावाकृत्यधिकरणोच्छेदापत्तिः। व्यक्तेरविशेष्यत्वे तु वाहदोहाद्यनन्वयः। न च परिच्छेद्यतयावगतत्वाद् द्रव्यं तथा आख्याते परिच्छेद्यतयाक्षिप्तकर्तुस्तद्वदेव विशेष्यत्वापत्तेः।

किञ्च, प्रत्ययार्थः प्रधानमित्यजा, छागीत्यादौ व्यभिचरितम्।

किञ्च, कर्त्रा भावनाया एवाक्षेपोऽस्तु, मास्तु भावनाया एव वाच्यत्वम्। ननु भावनया कर्त्तुराक्षेपो युक्तः, न तु कर्त्रा तस्याः। कर्मप्रत्ययस्थले भावनाप्रतीत्यन्नापत्तेरिति चेत्, न; कर्मणोऽपि भावनान्वयित्वेन तदाक्षेपकत्वात्। कर्मकर्तृकृत्सु तदाक्षेपाय त्वयाप्येवं स्वीकर्तव्यत्वात्। अत 'एव किं कार्यं पचनीयम्, किं कृतं पक्वम्' इत्यादि पक्ववान् पाकं कृतवानिति व्यवहारः। न च "कर्तरि कृत्"

किञ्च, अनुपपत्त्यादिज्ञानविधुराणामप्यनुभवसिद्धतद्बोधानुपपत्तिः, आक्षिप्ते तत्राख्यातार्थसङ्ख्यान्वयानुपपत्तिश्च, वृत्त्या पदानुपस्थितत्वात्। तथा चोच्यते 'शाब्दी ह्याकाङ्क्षा शब्देनैव प्रपूर्यते' इति। शाब्दी = शाब्दबोधविषयिणी, आकाङ्क्षा = जिज्ञासा, शब्देनैव प्रपूर्यते = वृत्त्या पदार्थोपस्थितिद्वारा विषयसिद्धिसम्पादनेन निवार्यते इति तदाशयः। इत्यत आह— लक्षणयेति।

[३।४।६७]इत्यनुशासनात् कर्त्तुः कृतिवाच्यता, "लः कर्मणि"[३।४।६९]इत्यनुशासनस्य तिङ्क्ष्वपि सत्त्वात् तत एव हि तत्र कर्तृग्रहणमनुवर्तते। न चेदं निरूढलक्षणातात्पर्यग्राहकमनुशासनम्, "कर्त्तरि कृत्"[३।४।६७]इत्यस्यापि तथात्वापात्तेः।

ननु "लः कर्मणि च", "तिप्तस्झि", "द्वयेकयोः" इत्यादीनामेकवाक्यतया विधायकत्वे कर्तृगतैकत्वेऽभिधेये लस्य स्थाने एकवचनं तिबादि प्रयोक्तव्यमित्यादिक्रमेणार्थान्न कर्त्तुर्वाच्यता सूत्रादायातीति चेत्, न; द्विवचनादिसञ्ज्ञानामादेशनिष्ठत्वेन तद्विधिना "द्वयेकयोः" इत्यादीनामेकवाक्यत्वेऽपि तत्र कर्त्तरीत्यस्याभावेन तस्यैकत्वादिविशेषणत्वासम्भवात्। न च लविधितिबादिविध्योरप्येकवाक्यताऽस्तीति चेत्, अस्ति, परन्तु वाक्यैकवाक्यता सा, न पदैकवाक्यता। लविधिलभ्यलकारानुवादेनादेशविधेः प्रवृत्तेः। तथा च लविधिस्थकर्तृग्रहणं स्ववाक्यार्थवेलायामेकत्वादीनामनुपस्थित्या कथं तद्विशेषणं स्यात्। न चावान्तरवाक्यार्थेऽन्वितस्य तदेकवाक्यतावेलायामावृत्या एकत्वादिविशेषणमपीति वाच्यम्, आवृत्तौ मानाभावात्।

ननु "लः कर्मणि"[३।४।६९]इत्यत्र ल इति ङसन्तम्; आदेशापेक्षया षष्ठी, लस्य य आदेशः, स कर्मणीत्यादिक्रमेणार्थः, लकारश्च "वर्त्तमाने लट्" [३।२।१२३]इत्यनेनैव विहित इति न दोष इति चेत्, न; एवं हि लस्यानर्थकत्वं कालवाचकत्वं वा स्यात्। तथा च शतृशानचोः कर्तृकर्मादि वाच्यं न स्यात्। तथा चास्य माने गत इति भावे क्रियमाण इति कर्मणि च शानच् न स्यात्।

न च शानचः "कर्तरि कृत्" [३।४।६७] इत्यनुशासनात् कर्तैव वाच्यः, भावकर्मणोस्तु लक्षणेति वाच्यम्, शास्त्रातिक्रमेण स्वेच्छामात्रेण लक्षणायामसाधुतापत्तेः। न च "लटः शतृशानचौ" [३।२।१२४] इत्यनेनात्मनेपदपरस्मैपदविधायकानामेकवाक्यलुप्तत्वादभावस्य वृत्त्यार्थबोधकत्वाभावेन तदर्थो निर्दिष्टः स्यात्। न चाम इत्यादेशविधायकेन सह "लः कर्मणि" [३।४।६९] इत्यस्य वाक्यैकवाक्यत्वाल्लुक्शब्देन तत्सहचरितामन्तलक्षणाच्च न दोषः।

एवमपि जसन्तत्वे श्रुतेनैव सम्बन्धः, षष्ठ्यन्तत्वे त्वादेश इत्यध्याहार्यम्। अपि चोक्तरीत्या "लः कर्मणि" [३।४।६९] इति सूत्रे आदेशा अप्यनुवाद्याः। ते च 'लस्य' इत्यधिकृत्य "तिप्तस्झि" [३।४।७८] इति विहिताः। तथा च परिपूर्णवाक्यस्यैवानुवाद्यसमर्थकत्वान्महावाक्यार्थबोधं प्रति कारणत्वाच्च तदेक-

वाक्यतयैव पदविशेषपुरुषविशेषव्यवस्थापकानामिव वचनविशेषव्यवस्थापकस्यापि प्रवृत्तिध्रौव्ये पुनरिदानीं प्रवृत्तिर्निर्मूला, कर्त्राद्यर्थानां द्विवचनादिसञ्ज्ञाविनिर्मुक्तत्वात्।

किञ्च, पुनः प्रवृत्तिर्व्यर्था "तिप्तस्झि" [३।४।७८] "द्वयेकयोः" [१।४।२२] इत्याद्येकवाक्यतयैवैकत्वादौ वाच्यतायाः सिद्धत्वात्। न च कर्त्रादौ शक्त्यबोधनेन मीमांसकमतसिद्धिरेव फलम्, मतसिद्धौ पुनरन्वयः, पुनरन्वये च मतसिद्धिरित्यन्योन्याश्रयात्। अपि च पुनः प्रवृत्तिरनिष्टावहा, गौरवस्य सत्त्वात्।

किञ्च, कर्त्तरि एकत्वे इत्यर्थाङ्गीकारेऽपि विशेषणतया कर्त्रादीनां प्रवेशात् तद्वाच्यत्वं दुष्परिहरम्। न च लक्षणया तल्लाभान्न वाच्यत्वम्, तत्र तत्र तात्पर्यान्यथानुपपत्त्यैकत्वादिविशिष्टे कर्त्रादावेव लक्षणयोपपत्तौ तस्या अपि वाच्यत्वानापत्तेः। अपि च, सङ्ख्यायाः परिच्छेदकत्वेन विशेषणतैवोचिता—एकस्मिन् कर्तरीति। तथा च धर्मिणि शक्तिर्दुर्वारा।

अपि च, "भावकर्मणोः" [१।३।१३] "शेषात्" [१।३।७८] इत्याभिः शत्रादिविधिनैकवाक्यतया यथा धर्मिणि शक्तिर्बोध्यते, तथा तिबादिविध्येकवाक्यत्वेऽपि युक्तम्, वैषम्ये बीजाभावात्।

अपि च त्वदुक्तरीत्याऽनुशासनेन धर्मिणि शक्त्यभावे सिद्धे तिङां धर्मे शक्तिरपि न सिध्येत्, अनुशासनाभावात्। तं विनापि तत्सिद्धौ "कर्तरि कृत्" [३।४।६७] इत्यादीनां वैयर्थ्यापत्तिः।

किञ्च, जातिशक्तिनये घटमित्यादौ जात्याक्षिप्तद्रव्ये जातेर्विशेषणत्ववद् भावनाक्षिप्ते भावनाया विशेषणत्वापत्तौ भावनाप्रधानकबोधानापत्तेः। स च तवापि सम्मतः। व्युत्पत्त्यन्तरकल्पने तु गौरवम्।

किञ्च, लक्षितकर्त्रा देवदत्तादेः सामानाधिकरण्यनिर्वाहे पिङ्गाक्ष्यादियौगिकानामपि द्रव्यवाचित्वं न स्यात्, सामानाधिकरण्यस्याक्षिप्तद्रव्येणैवोपपत्तेः। तथा हि—दण्डीत्यतो दण्डसम्बन्धवानिति प्रतीतिरनुभवसिद्धा। तत्र "तदस्यास्त्यस्मिन्निति मतुप्" [५।२।९४] मत्वर्थे बहुव्रीहिरित्याद्यनुशासनेन विग्रहे षष्ठ्यर्थस्यैव प्राधान्यदर्शनेन च सम्बन्ध एव शक्तिः स्यात्। तदाक्षिप्तेन च सामानाधिकरण्योपपत्तिः।

तथा च [1]'अरुणया पिङ्गाक्ष्या एकहायन्या सोमं क्रीणाति' इति वाक्ये द्रव्यानुक्तेरारुण्यस्य स्ववाक्योपात्ते द्रव्य एवान्वयप्रतिपादकारुणाधिकरणोच्छेदापत्तिः। न च लक्षणापक्षे न दोषः, आक्षेपपक्षेऽपि जातिशक्तिनये व्यक्तेः साक्षात्प्रकृतिवृत्त्युपस्थाप्यत्वाभावेऽपि वृत्तिप्रयोज्योपस्थितिविषयत्वमादाय तत्र प्रत्ययार्थाद्यन्वयवदाक्षिप्ते स्ववाक्योपात्तत्वस्यापि वक्तुं शक्यत्वादिति वाच्यम्, एवमपि लाक्षणिकद्रव्यनिवेशेऽरुणपदस्यापि गुणिनि लाक्षणिकत्वात् पदीयद्रव्यनिवेशेनैवोपपत्तौ वाक्यीयद्रव्यनिवेशसिद्धान्तासङ्गतिः स्पष्टैव।

मम तु शक्त्युपस्थितद्रव्येणैव निराकाङ्क्षत्वाल्लक्षणाप्रसर एव, नारुणपदे इति सिद्धान्तोपपत्तिः। किञ्च, एवं सति विशिष्टशक्त्युच्छेदापत्तिः। न चाकृत्यधिकरणन्यायेनेष्टापत्तिः, तेनैव सिद्धौ पृथक्कत्रंधिकरणारम्भवैयर्थ्यापत्तेः।

किञ्च, घटादिपदेभ्यो घटत्वविशिष्टस्यैव नियतो बोध इति घटत्वस्य वृत्त्यविषयत्वे शाब्दविषयत्वायोगात् तदंशे वृत्तिकल्पनावश्यकत्वे 'नागृहीतविशेषण'न्यायेन तन्मात्रवाचित्वसिद्धौ द्रव्याक्षेपो युक्तः। न चाक्षिप्तस्यापदार्थत्वात् तत्र प्रत्ययार्थाद्यनन्वयप्रसङ्गः, वृत्तिप्रयोज्योपस्थितेरेव तत्र नियामकत्वाददोषः, न चैवं दण्डीत्यादौ।

नन्वत्रापि दण्डसम्बन्धीति बोधात् सम्बन्धी वाच्यः, सम्बन्धः शक्यतावच्छेदकः, सम्बन्धत्वं च शक्यतावच्छेदकानामुपलक्षणम्। एवञ्चात्रापि घटत्व-

---

1. अत्र किं वाक्यं भङ्क्त्वा अरुणिमा प्रकारे निवेशनीयः? किं वा क्रीणातिना सम्बध्यते? इति संशये क्रीणातिना सम्बध्यमानः; तद्योगात् क्रयणकरणं स्यात्। न चामूर्तस्य तद्युक्तमिति नास्य क्रयणसम्बन्ध इति पृथगेव प्रकरणे निवेशनीय इति पूर्वपक्षः।

सिद्धान्तपक्षस्तु—सन्निहितपदार्थान्वये प्रकरणनिवेशानौचित्यात् पिङ्गाक्ष्यादिपदानां द्रव्यवचनतया तस्मिन्नन्वयसौलभ्येन तद्द्वारा क्रीणात्यर्थेनापि साकमन्वयलाभाद् वाक्यघटकत्वमेव तस्येति। स चानुपपन्नः, पिङ्गाक्ष्यादियौगिकानां पदानामुक्तयुक्त्या सम्बन्धार्थकतया द्रव्यस्य तैरनुपादानात्।

किञ्च, पूर्वपक्षोऽप्यनुपपन्नः, पिङ्गाक्ष्येकहायनीशब्दार्थसम्बन्धस्याप्यमूर्तत्वात् क्रीणातिकरणत्वासम्भवेन क्रीणातिकरणत्वस्यैतद्वाक्यावलाभादारुण्यस्यैव वाक्यभेदशङ्कायां मूलशैथिल्याच्च। बहुव्रीह्योररुणपदस्य च लाक्षणिकद्रव्यविधायकताया अविशिष्टत्वेन बहुव्रीह्यादेरेव द्रव्यविधायकत्वम् नारुणपदस्येत्यत्र विनिगमकाभावात्।

स्थानीयः सम्बन्ध एव वाच्यः स्यादिति चेत्, न; जातौ शक्तिर्हि अनन्त्यादि-दोषभिया 'नागृहीतविशेषण'न्यायेन अन्वयः स्वीक्रियते, सम्बन्धशक्तावपि तस्य तदवस्थत्वेन न व्यक्तिपक्षाद् विशेषः। न च सम्बन्धशक्तावपि व्यापारपरत्वे आख्यातसामान्यलक्षणस्यास्य भावाख्यातेऽव्याप्त्यापत्तेः, 'चैत्रेण सुप्यते इत्यादौ हि धात्वर्थस्यैव विशेष्यतायास्त्वयाप्यङ्गीकारात्।

अपि च, किं कृतमिति प्रश्ने पक्वमित्युत्तरदर्शनात् पक्ववानित्यादेः पाकं कृतवानित्यादिविवरणदर्शनाद् धात्वर्थात् पृथक् तद्दर्शनाच्च कृत्यपि भावना वाच्या स्यात्। तस्याञ्च भवद्रीत्या प्राधान्यापत्तिः, प्रत्ययार्थत्वात्।

यदि तत्र कर्तृकर्मभ्यामाक्षेपलभ्या, तर्हि तिङ्क्ष्वपि तथैव स्यादिति तयोर्वैषम्यं दुरुपपादम्। न च कृदुपस्थाप्ये लिङ्गसंख्यान्वयदर्शनात् कर्ता वाच्यः, सङ्ख्यान्वयाय तिङ्यपि कर्तुर्वाच्यतापत्तेः, लिङ्गसङ्ख्यान्वयस्य घटमित्यादावि-वाक्षिप्तेनाप्युपपत्तेश्च, कर्त्रा हि कृदन्तमहासंज्ञाकरणेन कृत्तिङोस्तुल्यत्व-बोधनाच्च।

किञ्च, कारकाणामाख्यातार्थभावनायामन्वये स्थाल्यामित्यादिकारकाणा-मन्वये स्ववृत्तितण्डुलनिष्ठविक्लित्तिजनकत्वं सम्बन्धस्त्वया वाच्यः, मम तु स्ववृत्ति-वृत्तित्वं सम्बन्ध इति लाघवम्। एवं काष्ठादेर्यत्नरूपभावनाकरणत्वं न स्वरसत उपपादयितुं शक्यम्। धात्वर्थजनकतया तत्करणत्वेन तद्द्वारा भावनान्वये तु 'तद्धेतोः'[1] इति सम्बन्धत्वेनोपलक्षणीभूतेनानुगमान्नानन्त्यादिदोषः, परम्परया तदुपलक्षणीकृत्य सम्बन्धिष्येव शक्तेर्ग्रहीतुमुचितत्वात्।

न चैवं सम्बन्धत्व एव शक्तिरस्तु, तदादिजन्यबोधे बुद्धिस्थत्वादेरिव दण्डीत्यादिजन्यबोधे तदभानात्। नीलादिभ्यश्च नीलत्वेनैव नीलरूपवतः प्रतीतेरनुभवसिद्धत्वात्। तेषां गुणगतजातावेव शक्तिरिति मतोपपत्तिः।

---

1. 'तद्धेतोरेव तत्त्वे किं तेन' इति न्यायाकारः, लाघवमूलकश्चायम्। तस्य = हेतु-भूतस्य, हेतुः, तद्धेतुश्चासौ न्यायश्च तद्धेतुन्यायः। कस्मिंश्चित् कार्ये क्लृप्त-हेतुनैव सिद्धे पुनस्तद्धेतोर्हेतुकल्पनं निष्फलमिति निष्कृष्टोऽर्थः। यथा समाप्तिं प्रति लाघवाद् विघ्नध्वंसस्यैव हेतुत्वे कल्प्यमाने विघ्नध्वंसजनकमङ्गलस्य हेतुत्वकल्पने गौरवम्।

एवञ्च यज्जन्यबोधे यस्य नियमेन प्रकारतया भानम् अनुगतत्वञ्च, तत्रैवाकृत्यधिकरणन्यायप्रवृत्तिः, तत्रैव च तदाक्षिप्तेन सामानाधिकरण्यनिर्वाहः, नान्यत्रेति बोध्यम्।

'शक्तिः कारकम्' इति पक्षेऽस्माकं तु न दोषः, कर्तृकर्मादिबोधेऽखण्डोपाधिरूपकर्तृत्वादेर्नियमतः प्रकारतया भानेन तत्रैव शक्तिसिद्धौ तदाक्षिप्तेन सामानाधिकरण्योपपत्तेः, शक्तिशक्तिमतोरभेदाद् वा तदुपपत्तिः कर्मपदेन हि शक्तिमदभेदमापन्नैव शक्तिरुच्यत इति "सार्वधातुके यक्" [३।१।६७] इत्यत्र कैयटे स्पष्टम्।

तस्मात् पूर्वोक्तयुक्तिभिर्भावनाऽपि धातुवाच्यैव। 'प्रत्ययार्थः प्रधानम्' इत्युत्सर्गस्यापि भाष्यकाराद्यनुभवबलेन त्यागः।

किञ्चैवम् 'क्रियाप्रधानमाख्यातम्' इति निरूक्तादिविरोधः, तत्रत्यक्रियाशब्दस्य प्रत्ययार्थन्यायेन धात्वर्थेऽन्वय एवोचितः।

किञ्च, "कर्तृकर्मणोः कृति" [२।३।६५], "करणे यजः" [३।२।८५] "कर्तृकरणे कृता" [२।३।३२] इत्यादीनामसङ्गत्यापत्तिरित्यलम्।

ननु कर्त्तुराख्यातार्थत्वे दर्शपूर्णमासप्रकरणपठित[1]'नानृतं वदेत्' इति निषेधस्य क्रत्वर्थत्वं न सिध्येत्, श्रुत्या पुरुषार्थत्वप्रसङ्गात्। प्रकरणाद्धि

---

1. तत्र हि किमयं प्रतिषेधः पुरुषार्थः, आहोस्वित् क्रत्वर्थ इति संशये, वदेदित्याख्यातात् कर्तृप्रतीत्या कर्तृवाचकत्वनिर्णयः। "लः कर्मणि" इत्यनुशासनात् तस्य कर्तृपरत्वलाभाच्च। प्रत्ययार्थत्वेन वदनं प्रति प्राधान्याद् वदनं तावत् पुरुषार्थः, अतः प्रतिषेधोऽपि पुरुषार्थः। निषेधप्रतियोगित्वेन वदनक्रियामनुवदता वदेदिति शब्देन पुरुषार्थतयैव बोधनात् तादृशस्यैवाऽनृतवदनस्यानिष्टसाधनताया विपरीतस्वभावबोधकनञा बोधनादन्यादृशाऽनृतवदनस्य चाऽनुपस्थितत्वात्। अत एवानारभ्याऽधीतस्मार्त्तवदननिषेधस्याप्येतदेव मूलं भवतीति लाघवम्। अन्यथा तन्मूलभूतः पुरुषार्थोऽन्योः = निषेधः कल्प्य इति गौरवं प्रसज्येतेति पूर्वपक्षे 'अनन्यलभ्य एव शब्दार्थः' इति न्यायाद् भावनैवाख्यातवाच्या, कर्त्ता त्वाख्यातवाच्यभावनाया अविनाभावादाक्षेपलभ्य एवेति न तत्र तस्य शक्तिः। "लः कर्म्मणि" इत्यादिस्मृतिरपि 'द्व्येकयोः' इत्यनेनैकवाक्यतया तत्सङ्ख्यातवाचित्वपरैव। 'पचति देवदत्तः' इत्यादौ च 'गौः शुक्लः' इतिवत् सामानाधिकरण्यं लक्षणयैवेति नाख्यातस्य कर्त्तृवाचित्वमिति कर्त्तुः श्रुतेरनुपस्थितत्वान्न पुरुषार्थता तस्य, किन्तु प्रकरणात् क्रत्वर्थतैवेति निर्णीतं कर्त्रधिकरणे।

क्रत्वर्थत्वम्, तस्य च श्रुत्यपेक्षया दुर्बलत्वं स्पष्टमेवेति चेत्, न; कर्तृवाच्यत्वे उक्तसिद्धान्तः, उक्तसिद्धान्ते च तदनुरोधेन तस्या वाच्यत्वमिति परस्पराश्रयग्रस्तत्वात्।

किञ्च, कर्त्तुराख्यातार्थत्वेऽपि श्रुतिप्रकरणाभ्यामस्यास्तु क्रतुयुक्तपुरुषधर्मता। अन्यथा जञ्जभ्यमानवाक्यस्य वाक्यप्रकरणाभ्यां पुरुषसंस्कारमुखेन क्रत्वर्थत्वसिद्धान्तस्त्वदीय उच्छिद्येत। तदुक्तं **भट्टैः**

स्त्र्युपायमांसभक्षादिः पुरुषार्थमपि श्रुतः।
प्रतिषेधः क्रतोरङ्गमिष्टः प्रकरणाश्रयात्॥ इति।

किञ्च, कर्त्तुर्वाच्यत्वेऽपि क्रियाया एव प्राधान्यात् कर्त्तुर्गुणभूतत्वाच्चानृतवदनभावनाया न पुरुषार्थत्वम्। एवञ्च भावनायाः कैमर्थ्याकाङ्क्षायां प्रकरणाद् भवतामिव शुद्धक्रत्वर्थत्वमपि वक्तुं शक्यम्। कृत्प्रत्ययस्थले तु कर्त्तुर्विशेष्यत्वात् तत्संस्कारमुखेनैव क्रत्वर्थत्वमिति।

किञ्च, भावनाया वाच्यत्वम्, कर्त्तुराक्षेप इति तव मतेऽपि प्रकरणोपस्थाप्यार्थापेक्षया श्रुत्युपस्थितभावनाक्षिप्तकर्त्तुः प्रथमोपस्थितत्या क्रत्वर्थत्वं न सिध्येत् तत्सिद्धम्; आश्रयः, आश्रयत्वं वा कर्तृकर्मतिङ्शक्यम् इति। स्पष्टश्चेदम् "गत्यर्थलोटा" [८।१।५१] इति सूत्रे भाष्ये।

तत्र धात्वर्थफलं तदर्थव्यापारे प्रायो विशेषणम्, आख्यातार्थः कारकं धात्वर्थं प्रति विशेषणम्, कालश्च, सङ्ख्या त्वाख्यातार्थान्वयिनी। तत्राश्रयस्य क्व फलेऽन्वयः, क्व व्यापार इति चेत्, अत्र वदन्ति—तङ्यक्चिणादयः फले आश्रयान्वयद्योतकाः, शप्श्नमादयो व्यापारे।

वस्तुतः प्रकरणाद्येव द्योतकम्, कर्तृकर्मविषये वैपरीत्यदर्शनात्। न च तिङां शबादीनाञ्चानुशासनबलात् कर्तृवाचकत्वे तस्य वारद्वयं बोधापत्तिः, शबादीनां द्योतकत्वस्वीकारात्।

स्यादेतत्—आश्रयस्यैव प्राधान्यमुचितम्, कालातिरिक्ताख्यातार्थप्रकारकबोधे प्रथमान्तपदजन्योपस्थितेर्हेतुत्वादिति चेत्, न; आख्यातार्थप्रकारकबोधे धातुजन्योपस्थितेरेव लाघवेन हेतुत्वात्। सङ्ख्यान्वयस्तु समानाभिधानश्रुत्याख्यातार्थाश्रय एव। कार्यकारणभावान्तरं तु त्वयापि कालान्वयाय कल्प्यमानेन तुल्यम्।

किन्तु त्वदुक्तकार्यकारणभावद्वयमपि भिन्नपदघटितत्वाद् गुरु, मम त्वेकघटितत्वाल्लघु।

किञ्च, 'करोति, जानाति' इत्यादौ कालान्वयोऽपि धात्वर्थ एवेति सोऽपि तवावश्यक इत्यति गौरवम्।

किञ्च, त्वदुक्तकार्यकारणभावस्य 'न पचति चैत्रः' इत्यादौ नञर्थे आख्यातार्थान्वयेन व्यभिचारः, तत्रैव चैत्रे सङ्ख्यान्वयेन भावनान्वयिन्येव सङ्ख्यान्वय इति नियमस्यापि व्यभिचारश्च। न च निपातसमभिव्यवहारस्थले सङ्ख्याभावनयोः पृथगेव कार्यकारणभावो वाच्य इति वाच्यम्, अनेककार्यकारणभावकल्पनया गौरवापत्तेः।

किञ्च, 'चैत्रेण सुप्यते' इत्यादौ भावाख्यातेऽपि प्रथमान्तपदाध्याहारापत्तिः, भावार्थकभिन्नत्वविशेषणदाने च सुतरां गौरवम्।

किञ्च, 'भावप्रधानमाख्यातम्' इति यास्कविरोधः, तत्समानार्थकक्रियाप्रधानमिति भाष्यपठितवचनविरोधश्च। तिङर्थापेक्षया धात्वर्थः प्रधानमिति तदर्थः। न च धात्वर्थापेक्षया क्रियाकृतिः प्रधानमिति तदर्थः, तस्याः कृतेरन्यत्र विशेषणत्वेऽपि धात्वर्थापेक्षया प्राधान्यमस्त्येव, भावशब्देनापि भावयतीति व्युत्पत्त्या कृतिरेवोच्यत इति वाच्यम्, भावार्थकलकारेऽव्याप्तेः।

किञ्च, तव पश्य मृगो धावतीति वाक्यं न स्यात्, मम तु धावनक्रियाया दृशि कर्मत्वान्न दोषः। न च तस्या दर्शनविशेषणत्वे क्रियायाः प्राधान्यमिति त्वत् सिद्धान्तविरोधः, प्रत्यासत्त्याऽऽख्यातघटकप्रत्ययार्थापेक्षया क्रियायाः प्राधान्यबोधनादक्षतेः, 'सत्त्वप्रधानानि नामानि' इति वाक्यशेषेण सत्त्ववाचकवाच्यार्थविशेषणत्वाभावस्यैव 'क्रियाप्रधानम्', इत्यनेन बोधनाच्च। अत्र शब्दजन्योपस्थितेरेव शाब्दबोधकारणत्वे कर्मत्वं संसर्ग एव। तव त्वीदृशे विषये भाष्यादिसिद्धैकवाक्यता भज्येत। न च मृगस्यैव दर्शने कर्मत्वेनान्वयः, विभक्त्यर्थमद्वारीकृत्य नामार्थधात्वर्थयोः साक्षात् भेदेनान्वयायोगाद्। न च ततो द्वितीयास्तु, एवमपि प्रागुक्तवाक्यासिद्धिरेव।

किञ्च, प्रथमान्तपदजन्योपस्थित्यभावेन धावतीत्यस्य मृगविशेषणत्वानापत्तिः।

किञ्च, अप्रथमासामानाधिकरण्ये तिङो बाधित्वा शत्राद्यापत्तिः। न च वासरूपन्यायेन तिङोऽपि, लादेशेषु तदभावस्य **शब्देन्दुशेखरे** प्रतिपादितत्वात्। न च वाचनिकी प्रथमैवात्र कर्मत्वार्थेति वाच्यम्, तादृशवचनानुपलम्भात्। न च यो धावति मृगः, तं पश्य, इत्यध्यहारेणान्वयः, वाक्यभेदापत्तेः; उत्कटधावनक्रियाया एव दर्शनकर्मत्वस्य प्रतिपादयिषितत्वाच्च।

न च विशिष्टस्य वाक्यार्थस्य कर्मतासंसर्गेण दर्शनेऽन्वयः। एवञ्च न व्युत्पत्तिविरोधः, व्युत्पत्तेर्नामार्थविषयत्वात्। विशिष्टवाचकस्याप्रातिपदिकत्वाच्च न द्वितीयापत्तिरिति वाच्यम्, विशिष्टस्य त्वन्मतेऽप्यनतिरिक्तत्वात्। अत एव नीलविशिष्टघटस्य दर्शनकर्मत्वे प्रतिपिपादयिषितेऽपि 'नीलं घटं जानामि' इत्यादौ द्वितीयासिद्धिः।

किञ्च, देवदत्तकर्तृकपचिक्रियाकर्मकोत्पत्त्यनुकूलयत्नस्त्वद्वृत्तिरित्यर्थक-देवदत्तः पचति करोषीत्यस्यानापत्तिः। आख्यातोपात्तक्रियायाः सर्वनामपरामर्शा-योग्यत्वेनाध्याहारादिनाऽपि न निर्वाहः।

अपि च, पाकक्रिया भवतीत्यर्थे पचति भवतीत्यास्यानापत्तिः, पचति व्रजतीत्यस्यापत्तिश्च। न च तथा तथा व्युत्पन्नानां तथा बोधस्य तथा तथा शक्ति-ग्रहस्य च सत्त्वेन कथमापत्तय इति वाच्यम्, बोधस्य व्युत्पत्त्यनुसारिणो जाय-मानत्वेऽपि तादृशेऽर्थे साधुत्वस्यापाद्यत्वात्, साधुत्वस्यार्थघटितत्वात्। तच्च तदर्थ-निरूपणाभियुक्तवैयाकरणासम्मतार्थ एव, नान्यत्रेत्येतावदिहोच्यते।

न चैवमेधामित्यस्य क्रियाप्रधानत्वानापत्तिस्तिङन्तत्वाभावादिति वाच्यम्, लिटो वाचकत्वादाप्तस्वार्थिकत्वेन चान्यस्य प्रधानत्वं योग्यस्याभावेन,अर्थात् तस्या एव प्राधान्यात्, [1]आख्यातपदेन कृदादेशरहितलान्तग्रहणे तु दोषशङ्कैव न, सत्त्व-वाचकप्रत्ययान्तत्वाभावेन 'सत्त्वप्रधानानि' इत्यस्याप्रवृत्तेश्च।

1. आख्यातपदेन क्वचिद् धातोर्ग्रहणम्। अत एव 'नामाख्यातोपसर्गनिपाताः' इत्यत्र भाष्ये प्रकृतित्वेनोल्लेखः। अत एव च 'नामान्याख्यातजानि' इति शाकटायनः। "आख्यातमाख्यातेन क्रियासातत्ये" इत्यत्र त्वेतन्मते आख्यात-प्रकृतिकतिङन्ते लक्षणा। 'भावप्रधानमाख्यातम्' इत्यत्रापि आख्यातपदेन धातुर्ग्राह्यः।

शब्दरत्नकारस्तु—आख्यातपदेन तिङन्तस्य ग्रहणमभिप्रैति। निरुक्त-प्रामाण्यात् शब्दशास्त्रे क्वचित् तिङन्तस्य ग्रहणम्, क्वचिच्च धातोर्ग्रहण-माख्यातपदेन। अत आख्यातपदेन तिङो ग्रहणमिति तार्किकोक्त-मनादरणीयमेव।

किञ्च, 'नानृतं वदेत्' इत्यनारभ्याधीते वचने दर्शपूर्णमासप्रकरणस्थे च विनिगमनाविरहाच्छब्दानृतमर्थानृतं चेत्युभयमपि निषिध्यत इत्यन्यत्र निर्णीतम् ।

तथा च साधुत्वनिर्णायकसूत्रवार्त्तिकभाष्यकारैस्तिङां कर्त्तर्येव साधुत्व-कथनात् तदुल्लङ्घनेन याज्ञे कर्मणि भावनारूपेऽर्थे प्रयुञ्जाना मीमांसकादयश्चतुर्थी-मिव षष्ठ्याद्यर्थे कथं न प्रत्यवयन्तु, कथं वा यज्ञो नाविगुण इति विचार्यम् । न च निर्मूलमेतदनुशासनम्, तस्मात् 'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च' इति श्रुतेर्मूलत्वात् ।

पाणिनीयं महाशास्त्रं पदसाधुत्वलक्षणम् ।
सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं न किञ्चन ।।

इति पराशरीयपुराणाच्च । जैमिनिप्रभृतीनां त्वत्र तात्पर्याभावद् न तदुक्तिः साधुत्वनिर्णायिका । तदुक्तम् 'साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः' इति व्याकरणस्यापि शक्तिग्राहकत्वं वृद्धैरुक्तम् 'शक्तिग्रहं व्याकरणोपमान' इत्यादिना। न चैतेषामसाधुत्वे ततस्तत्तदर्थबोधस्तेषां तेषां न स्यादिति वाच्यम्, वस्तुतोऽसाधुत्वेऽपि भ्रमात्मकतज्ज्ञानसम्भवात्, साधुत्वज्ञानस्य कारणत्वाभावादसाधुत्वनिश्चयस्य बोधप्रतिबन्धकत्वाभावाच्चेति दिक् ।

किञ्च, प्रथमान्तविशेष्यकबोधे कीदृशस्तण्डुल इति प्रश्ने, कीदृशश्चैत्र इति प्रश्ने च, पक्वस्तण्डुलः, पाचकश्चैत्र इत्युत्तरवत् पच्यते पचतीत्युत्तरस्याप्यापत्तिः । न च 'पश्य मृगो धावति, पचति,भवति' इत्यादौ क्रियायाः कर्तृत्वकर्मत्वादिनान्वये तस्य असत्त्वरूपता न स्यादिति वाच्यम्, कर्तृकर्मेतरकारकत्वेनान्वयितामात्रेण तथात्वात्, क्रियानाधारकारकत्वेनान्वयाद् वा, कर्मत्वादेरप्रकारत्वाङ्गीकाराद् वा तत्त्वम् ।

न चैवमप्यसिद्धस्य दर्शनकर्मत्वासम्भवात् कथं धावनस्य दर्शनकर्मतेति वाच्यम्, समूहस्यासिद्धत्वेऽव्यवयवशः सिद्धत्वेन प्रत्यक्षकर्मत्वोपपत्तेः ।

नन्वेवमपि रोदितीव पठतीत्यादौ क्रिययोरुपमानोपमेयभावसत्त्वात् साधारण-धर्माधारत्वरूपस्य सत्त्वस्य "तेन तुल्यम्" [५।१।११५] इति सूत्रकैयटाद्युक्तस्य सत्त्वेनासत्त्वरूपताभङ्गः । न च प्रत्ययोत्तरमिवशब्दश्रवणेन धात्वर्थयोरुपमा दुर्लभेति वाच्यम्, तिङन्तोत्तरमिवशब्दश्रवणेन तदर्थयोस्तस्याः सुलभत्वात् । न चात्र कर्त्रोरेवोपमानोपमेयभावोऽस्तु, तस्य क्रियां प्रति विशेषणत्वेन तत्त्वासम्भ-वादिति चेत्, न; तिङन्तसमभिव्याहृतेवशब्दस्य सादृश्यार्थकत्वाभावात् ।

तदुक्तं भाष्ये "न वै तिङन्तेनोपमानमस्तीति, किन्तु तत्रत्य भावनार्थ इव शब्द" इति कैयटः। अत एवालङ्कारिका अपि 'लिम्पतीव तमोङ्गानि' इत्यादावुत्प्रेक्षामेवोदाजह्रुः।

सर्वनामपरामर्शायोग्यत्वरूपमेवासत्त्वं क्रियाया इत्यन्ये। ननु वैयाकरणमतेऽपि 'पचति कल्पं देवदत्तः' इत्यत्रान्वयो दुरुपपादः, आख्यातस्य धर्मिवाचकत्वेऽपि कल्पान्तेन क्रियाविशेष्यकबोधजननेनाभेदस्य वाधात्। भेदेनान्वयस्तु नामार्थयोरव्युत्पन्न इनि चेत्, न; यतो नास्माकं भावनाया देवदत्तेऽन्वयः, तस्या आख्याते विशेष्यत्वात्। नापि देवदत्तस्य तस्याम्, कारकविभक्त्यन्तत्वाभावेन तदन्वये मानाभावात्, आख्यातार्थाश्रयान्वयेन तदंशे भावनाया निराकाङ्क्षत्वाच्च। किन्त्वाख्यातार्थाश्रयेऽभेदेन तस्य विशेष्याकाङ्क्षायाः सत्त्वेन तदन्वयस्यैवोचितत्वाद् नामार्थयोरित्यस्यास्वनामजन्यप्रतीतिविशेष्ययोरभेदेनैवान्वय इत्यर्थः, न तु तयोरेवाभेदान्वय इति न दोषः।

नन्वेवमपि त्वद्रीत्या पचति भवतीत्यादौ समानवाक्ये तिङ्द्वयलाभेन तद्व्यावृत्त्यर्थं "तिङ्ङतिङः" [८।१।२८] इति सूत्रे अतिङ्ग्रहणस्यावश्यकत्वेन तत्प्रत्याख्यानपरभाष्यविरोध इति चेत्, न; लौकिकैकवाक्यत्वसत्त्वेऽपि 'एकतिङ् वाक्यम्' इति स्वपरिभाषितस्यासत्त्वादिति भाष्याशयात्। लौकिकैकवाक्यत्वञ्च[1] 'सुप्तिङन्तचयो वाक्यं क्रिया वा कारकान्विता' इत्यमरेणोक्तम्। अत्र 'वा'शब्दः समुच्चये।

एवञ्च, कारकान्वितक्रियाबोधकसुप्तिङन्तचय इत्यर्थः। सुप् च तिङ् च सुप्तिङ्, सुब्विशिष्टं तिङ् सुप्तिङ्, तयोरेकशेषेऽन्तशब्देन समासः। तेन सुबन्तचयतिङन्तचयसुप्तिङन्तचयानां त्रयाणामपि लाभः। क्रिया वेत्यनेन निरर्थकपदसमुदायव्यावृत्तिः।

यत्तु 'वा'शब्दस्वारस्यादर्थस्यापि वाक्यत्वमिति। तत्, न; अर्थे वाक्यशब्दाप्रयोगात्, "वचोऽशब्दसंज्ञायाम्" [७।३।६७] इति निषेधेन कुत्वानापत्तेश्चेति दिक्।

तत्सिद्धमाख्यातार्थाश्रयापेक्षया धात्वर्थः प्रधानमिति। एवञ्च देवदत्तः पचतीत्यत्रैकदेवदत्तकर्तृकपाकानुकूलक्रियेति बोधः। तण्डुलः पच्यते चैत्रेणेति कर्मलकारे

1. 'तिङ्सुबन्तचयो वाक्यम्' इति मुद्रितामरकोशपुस्तकसम्मतः पाठः।

त्वेकचैत्राश्रयिका एकतण्डुलाभिन्नाश्रयिका या विक्लित्तिः, तदनुकूला वर्त्तमाना भावनेति भावनाविशेष्यक एव बोध इति प्राञ्चः ।

नव्यास्तु 'पक्वस्तन्डुलः' इत्यादौ कर्मकृत्सभभिव्याहारे फलव्यापारयोर्व्यत्यासेन बोधस्यावश्यकतया कर्माख्यातेऽपि फलविशेष्यक एव बोधः । अत एव प्रत्ययार्थे साक्षात्सम्बन्धेन प्रकृत्यर्थविशेष्यान्वयित्वस्य सर्वत्र क्लृप्तस्य न त्यागः । अन्वयित्वं विशेष्यतया विशेषणतया वा । अत एव कर्तृलकारे न फलविशेष्यको बोधः, क्लृप्तप्रागुक्तनियमभङ्गापत्तेः । अत एव 'इष्यते पुत्रः' इत्यर्थे पुत्रीयतीति न प्रयोगः, भिन्नार्थत्वात् । किन्तु 'पुत्रमिच्छति' इत्यत्रार्थ एव । क्यजन्तात् कर्मणि प्रत्ययस्तु दुर्लभः, अकर्मकत्वादिति स्पष्टम् "सुप आत्मनः" [३।१।८] इत्यत्र [1]**भाष्ये** ।

कालस्य तु व्युत्पत्तिवैचित्र्यात् सम्पूर्णधात्वर्थ एवान्वयः । तेन व्यापारापगमे विक्लित्तिसत्त्वे 'पच्यते' इति स्यात्, 'अपाचि' इति न स्यात् । एवं फूत्कारादिदशायां विक्लित्त्यनारम्भे 'पच्यते' इति न स्यादित्यपास्तम् । तत्राभिमतफलजनने सति तन्निष्पादकसकलव्यापारापगमे भूतत्वं फलावच्छिन्नतादृशसकलव्यापारस्य भावित्वे भविष्यत्वं यावच्चाभिमतफलप्रयोजकक्रियायाः समाप्तिर्न भवति, तावद् वर्तमानत्वमित्याद्यनुपदमेव वक्ष्याम इति प्राहुः ।

भावलकारे तु व्यापार एव विशेष्यः क्तान्तादौ सामानाधिकरण्यसम्बन्धेन व्यापारयोरेव परस्परमन्वयदर्शनेनौत्सर्गिकस्य व्यापारनिष्ठफलविशेष्यत्वस्य त्यागे मानाभावात् तिङ्क्षु धात्वर्थानुवादक एव कालद्योतकत्वं त्वस्त्येव, सङ्ख्या तु तत्र

---

1. अत्र हि—'इष्टः पुत्रः, इष्यते पुत्रः' इत्यत्र यदि क्यच् भवति, तदेच्छामात्रस्य क्यचाऽभिधानादवश्यं कर्मणोऽभिधानाय तद्वाचिना प्रत्ययेनोत्पत्तव्यम् । यथा पुत्रीयतीति कर्त्रभिधानाय तिपेत्याशयिका इच्छाक्यजन्तात् कर्मणि प्रत्ययोत्पत्तिः कथन्नेति शङ्का 'अथेह क्यचा भवितव्यम्—इष्टः पुत्रः, इष्यते पुत्रः' इत्यादिशब्देन कृता ।

यदा क्रियाफलस्य कर्मणः प्राधान्यं प्रतिपिपादयिषितम्, तदा वाक्यमेव प्रयुज्यते—'इष्टः पुत्रः' इत्यादि, न तु क्यजन्तः, तस्याकर्मकत्वात् कर्मणि प्रत्ययानुत्पादादित्याशयेन समाधानमाह—'केचित् तावदाहुः—न भवितव्यमित्यादि । पुनश्चाग्रे—'समानार्थेन वाक्येन भवितव्यम्, प्रत्ययान्तेन च । यश्चेहार्थो वाक्येन गम्यते—'इष्टः पुत्रः, इष्यते पुत्रः' इति । नासौ जातुचित् प्रत्ययान्तेन गम्यते' इति । विवरणविव्रियमाणयोः समानार्थकत्वमिति तत्तात्पर्यम् ।

नास्त्येव, सङ्ख्यान्वयिकर्तृकर्मणोऽप्रतीतेः, धात्वर्थस्तु सङ्ख्यान्वयायोग्य एव, धात्वर्थबहुत्वे 'मैत्रेण स्थीयते, सुप्यते' इत्यनापत्तेश्च ।

एवञ्च सङ्ख्याया अभावे उत्सर्गत एकवचनमेव । मध्यमोत्तमावपि न स्तः, तिङ्समानाधिकरणयुष्मदाद्यभावात् । 'उष्ट्रासिका आस्यन्ते, हतशायिकाः शय्यन्ते' इत्यत्र "सार्वधातुके यक्" [३।१।६७] इति सूत्रस्थभाष्यप्रयोगादेव बहुवचनं साध्विति वदन्ति । 'आकाशोऽस्ति' इत्यादौ चैकाकाशाभिन्नाश्रयकः स्वरूपधारणानुकूलो वर्तमानो व्यापार इत्यादिक्रमेणोह्यमिति दिक् ।

अथाख्यातार्थवर्त्तमानत्वादीनामन्वयप्रकार-स्तल्लक्षणानि चोच्यन्ते

तत्र वर्तमानत्वादीनां धात्वर्थेऽन्वयः, न कर्तृकर्मणोः, अतीतक्रिये कर्त्तरि पचतीत्यापत्तेः, अपाक्षीदित्यनापत्तेश्च, वर्त्तमानक्रियावाचकाद्धातोर्लडित्याद्यर्थक-"वर्त्तमाने लट्" [३।२।१२३] इत्यादिभिः सूत्रैर्धात्वर्थेऽन्वयस्यैव बोधनाच्च। स च सम्पूर्णधात्वर्थव्यापारे इत्युक्तमेव। न चामवातजडीकृतकलेवरे उत्थानानुकूल-यत्नस्य विद्यमानतयोत्तिष्ठतीति प्रयोगापत्तिः, तस्योत्थानोद्देश्यकत्वेऽपि उत्थान-प्रयोजकत्वाभावात्। अत एव तत्र 'उत्थानाय यतते, नोत्तिष्ठति' इत्येव प्रयोगः। यागपाकाद्युद्देश्यककुण्डमण्डपतण्डुलक्रयणादियत्नव्यापारावादाय यागाद्यर्थम् 'यतते' इत्यादिवत् 'यजति, पचति' इत्यादिवारणाय प्रयोजकताविशेषस्यैव सम्बन्धस्याभ्यु-पेयत्वात्। एवम् 'गच्छति' इत्यादावुत्तरदेशसंयोगाद्यनुकूलक्रियारूपे धात्वर्थे तदन्वयः। नश्यतीत्यत्रापि प्रतियोगिसहितनाशसामग्रीरूपधात्वर्थे तदन्वयः। अतस्तस्यां सत्यां नश्यति, अतीतायाम् 'नष्टः' इत्याद्युपपद्यते।

केचित्तु—षड्भावविकारेषु नाशस्यापि गणितत्वादुत्पत्तिवत् सोऽपि चरम-क्षणसम्बन्ध एव तत्सत्त्वे नश्यतीति तदत्यये नष्ट इत्याहुः।

'नश्यति, नङ्क्ष्यति, नष्टः' इत्यत्र क्रमेण प्रत्ययेन वर्त्तमाना, भविष्यन्ती, अतीता चोत्पत्तिः, प्रतियोगित्वं च लक्ष्यते। तथा च तादृशोत्पत्तिमन्नाशप्रतियोगी-त्यादिक्रमेण बोधः। अत एव नाशस्य नित्यत्वात् सर्वदा नश्यतीति, श्वो नङ्क्ष्यति पटादौ परश्वो नङ्क्ष्यति, प्रपूर्वदिननष्टे पूर्वेद्युर्नष्ट इत्यापत्तिर्नेति **नैयायिक-नव्याः**।

नाशत्वमुत्पत्तिमदभावत्वम्। तथा च धातुप्रतिपाद्यतावच्छेदकोत्पत्तावेव कालान्वय इति **तन्नव्यतराः**।

कालश्च क्रियारूप एव, नातिरिक्तः; मानाभावाद्, गौरवाच्चेति **तन्त्रान्तरे** स्फुटम्। न च 'क्रियाभेदाय कालस्तु सङ्ख्या सर्वस्य भेदिका' इति **वाक्यपदीय**-विरोधः। नहि स्वपरिच्छेदकत्वं स्वस्यैवोपपद्यत इति वाच्यम्, तत्र कालशब्देन तद्गतवर्तमानत्वादेरेव विवक्षणात्।

'कालोऽतिरिक्तः' इति मते वा तत् ।

अन्यदीयक्रिययाऽन्यदीयक्रियापरिच्छेदसम्बन्ध इत्यपि केचित् ।

एवञ्च तस्य धातुनोक्तत्वात् तद्गतं वर्तमानत्वादि लडादिद्योत्यम्, द्योतकत्वञ्च शक्त्याधायकत्वम् । तच्च नानार्थेषु शक्तस्य स्वसंनिधानेन शक्तिपरिच्छेदकत्वम् । ननु स वाच्य एवास्तु, अनेकधातूनां तत्र शक्तिकल्पने गौरवापत्तेः, एकस्य लट एव शक्तिकल्पनौचित्याच्च ।

किञ्च, 'वर्त्तमाने लट्' [३।२।१२३] इति विशिष्य विधानेऽपि तत्राशक्तौ कर्त्ताऽपि वाच्यो न स्यात्, स्याच्च द्योत्य एव, अविशेषात् ।

किञ्च, वर्तमानत्वविशिष्टक्रियाबोधं प्रति लट्समभिव्याहारस्य कारणत्वं वाच्यम् । तथा च तुल्यत्वाल्लटो वाचकत्वमेवोच्यताम् । न च वाच्यत्वे विशेषेण सामान्यस्य[1] तक्रकौण्डिन्यन्यायाद् बाधे कर्तुर्वाच्यतैव न स्यादिति वाच्यम्, "लः कर्मणि" [३।४।६९] इत्यस्य निरवकाशत्वादिति चेत्, न; "माङि लुङ्" [३।३।१७५] "लट् स्मे" [३।२।११८] इत्यादौ चारितार्थ्यात्, एकधातुप्रकृतिकानेकलडादेशानां तत्र शक्तिकल्पने गौरवाच्च । तस्माद् द्योतकत्वमेव ।

तत्र वर्त्तमानत्वं प्रारब्धापरिसमाप्तत्वम्, भूतभविष्यद्भिन्नत्वम्; वा । भूतत्वं 'विद्यमानध्वंसप्रतियोगित्वम्' भविष्यत्वञ्च 'वर्त्तमानप्रागभावप्रतियोगिसमयोत्पत्तिकत्वम्। प्रागभावानङ्गीकारे तु शब्दप्रयोगाधिकरणकालध्वंसाधिकरणसमयोत्पत्तिकत्वं तत । तस्य च व्यापारसमुदायरूपक्रियायामन्वयः । अवयवव्यापारेष्वेवान्वय इति तु न युक्तम्, तथा सत्यवयवानां त्रिक्षणावस्थायित्वेन तत्र तस्यासम्भवेन पचतीति प्रयोगस्य विषयलाभ एव न स्यात् । 'पञ्चकृत्वः पचति'इत्यत्राप्यतिशयतृप्त्यादिफलेनैकीकृतावृत्तिगणितपाकसमुदाये वर्त्तमानत्वादीनामन्वयः ।

---

1. अत्रेदं बोध्यम्—तक्रन्यायेन बाध्यबाधकत्वेन सम्मतशास्त्रजन्यबोधीयविषयतयोर्यत्र व्याप्यव्यापकभावस्तत्र बाधकशास्त्रीयव्याप्यविषयताश्रयातिरिक्तत्वेन बाध्यशास्त्रीयविषयताश्रये सङ्कोचः । एवञ्च—एककार्यविनियोगोद्देश्येन प्रवृत्तवाक्यकदम्बघटकव्यापकधर्मावच्छिन्ने तादृशवाक्यकदम्बघटकव्याप्यधर्मावच्छिन्नातिरिक्तत्वेन सङ्कोच इति न्यायस्वरूपम् । अत्र कौण्डिन्यत्वरूपव्याप्यधर्मावच्छिन्नातिरिक्तत्वेन ब्राह्मणत्वरूपव्यापकधर्मावच्छिन्ने संकोचः । एवञ्च तक्रदानतः पूर्णं परं वा कौण्डिन्योद्देशकं न दधिदानमिति दिक् ।

क्वचित्तु 'प्रकृतः कटं देवदत्तः' इत्यादाववयवे समुदायरूपारोपेण, अवयवगतातीतत्वस्यैव समुदाये आरोपेण वा भूतकालप्रयोग इति स्पष्टम् "निष्ठा" [३।२।१०२] इति सूत्रे भाष्ये।

न चात्मास्ति, पर्वतास्तिष्ठन्ति, स्थास्यन्ति, अस्थुः; इत्यादिव्यवहारानुपपत्तिः, क्रियाया आरब्धत्वाभावेन प्रागुक्तवर्त्तमानत्वाभावाद् भूतत्वभविष्यत्वयोरभावात्; चेति वाच्यम्, तत्तत्कालिकानां राज्ञां क्रिया आदाय तद्विशिष्टात्मसत्तादेरुक्तवर्त्तमानत्वादिसम्भवात्। एवम् 'एको ह वै नारायण आसीत्' इत्याद्युपपद्यते। स्पष्टञ्चेदम् "वर्त्तमाने लट्" [३।२।१२३] इत्यत्र भाष्ये।

एवं भूतानद्यतनपरोक्षक्रियार्थकाल्लिट्। 'पपाचेत्यादिवाक्यजबोधे भूतत्वसन्देहानुदयाद् भूतत्वादेरिवानद्यतनत्वादेरपि बोधविषयत्वम्।

परोक्षत्वञ्च वक्तृसाक्षात्कारतज्जन्यासंस्कारान्यतराविषयत्वम्। नन्वत्र 'परोक्षे' इति विशेषणमसङ्गतम्, साध्यत्वेनाभिधीयमानः, गुणभूतावयवः, क्रमिकव्यापाराणामेकफलजनकत्वरूपयैकबुद्धया विषयीकृतः समूहः क्रिया।

तत्र यद्यप्यवयवाः प्रत्यक्षा एव, अत एव 'पश्य मृगो धावति' इत्यादौ क्रियाया दर्शनकर्मता। तथाप्यवयवानां मेलनाभावेन समुदायस्य सर्वस्यापि परोक्षत्वेनाव्यावर्तकत्वात्। तदुक्तं भाष्ये—क्रियानामियमत्यन्तापरिदृष्टा, न शक्या पिण्डीभूता निदर्शयितुम्' इति सा [सर्वाप्य ?]नुमानगम्येति चेत्, नः तदनुकूलशक्तिमतां व्यापाराविष्टानां साधनानां पारोक्ष्यस्येह विवक्षितत्वात्। तेन क्रियानाविष्टसाधनमात्रप्रत्यक्षेऽपि लिट्, यथा—पपाचेति।

एवं स्वव्यापारस्य वर्त्तमानस्य व्यासङ्गादिना स्वयमप्रतिसन्धाने तत्तत्कार्येणानुमितौ सख्याद्युक्त्या वा ज्ञाने भवत्येव लिट्, यथा—'बहु जगदपुरस्तात् तस्य मत्ता किलाहम्' इति, 'व्यातेने किरणावलीमुदयनः' इत्यपि "निष्ठा" [३।२।१०२] इति सूत्रभाष्योक्तरीत्या भूतत्वानद्यतनत्वपरोक्षत्वानामारोपेणोपपन्नम्।

आरोपफलं तु ग्रन्थेऽति सुकरत्वशीघ्रनिष्पाद्यत्वादिप्रत्यापन्नमेव। तत्फलं तु तत्कालिकाध्येतॄणां स्वशिष्याणामर्थप्रविवेकादिफलकममुं ग्रन्थं ज्ञातुमुत्सुकानामाह्लादनमेव। परोक्षत्वारोपोऽथैतत्फलक एव।

एवं सूक्ष्मकालेन करिष्यामि यत्नकरणकाले स्वेनापि साक्षात्कर्तुमशक्यमित्येवं बोधनादनायासेन ग्रन्थकरणमपि व्यङ्ग्यम्। सूर्योपमाप्येतत्पोषिकैव।

इतरग्रन्थेभ्योऽस्मिन् ग्रन्थे, तत्कर्तृभ्यश्च स्वस्मिन् व्यतिरेकोऽपि व्यङ्ग्यः। भविष्यतः प्रयोगकाले वास्तवमेव परोक्षत्वमिति न तदंशे आरोपापेक्षेत्यपि वदन्ति।

केचित्तु क्रियायामेव पारोक्ष्यम्, न च सर्वापि सा परोक्षैवेत्यव्यावर्तकं तत्, अवयवशः प्रत्यक्षत्वात्। न [च] प्रत्येकं न क्रियात्वम्, तावतापि धात्वर्थत्वाक्षतेः, क्रियात्वस्यावयवावयविसाधारणत्वाच्च।

किञ्च, धातोरित्यस्य धात्वर्थे लक्षणायां स्ववाच्यत्वं सम्बन्धः, साधनलक्षणायां स्ववाच्यसाधनत्वं सम्बन्ध इति गौरवम्। अवयवाश्रयत्वादेव च देवदत्तस्य कर्तृत्वादि सङ्गच्छत इत्याहुः।

अनद्यतनत्वं चातीतरात्रेः पश्चार्धेनागामिन्याः पूर्वार्धेन च कालोऽद्यतनः, तद्भिन्नत्वम्। एवमनद्यतने भविष्यति लुट्, भविष्यत्सामान्ये लृट्; इत्यादि तत्तदनुशासनबलाद् व्यवहाराच्च बोध्यम्।

अथ विध्यादौ विहितलिङर्थे किञ्चिदुच्यते

तत्र विधिः = प्रेरणम्, यथा निकृष्टस्य भृत्यादेः। निमन्त्रणम् = नियोगकरणम्, आवश्यके श्राद्धभोजनादौ प्रवर्त्तनम्। आमन्त्रणम् = कामचारानुज्ञा। अधीष्टः = सत्कारपूर्वको व्यापारः। तच्चतुष्टयानुस्यूतप्रवर्तनासामान्यं विध्यर्थः। विध्यादिसूत्रे चतुर्णां पृथगुपादानं स्पष्टार्थम्। प्रवर्तनात्वं शक्यतावच्छेदकम्। तदतिरिक्तांशस्य प्रमाणान्तरलभ्यत्वान्न शक्यत्वम्।

न च "प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च" [३।३।१६३] इति सूत्रे प्रैषादिग्रहणं व्यर्थम्, निमन्त्रणादौ कृत्याभावार्थं तस्यावश्यकत्वात्। लोड्विधानं प्राप्तकालार्थम्, प्रवर्तना च प्रकृत्यनुकूलो व्यापारो वक्त्रभिप्रायः। स चेच्छाविशेषरूपः, इच्छागतवैजात्यस्य शक्यतावच्छेदकत्वेन लाघवात्।

अत एव प्रार्थनस्य पृथग् ग्रहणम्। तत्र वक्त्रिच्छासत्त्वेऽपि तस्यानियमेनाप्रवर्तकतयाऽत्र वैजात्यनिवेशस्यावश्यकत्वात्। इच्छा च लोके पुरुषनिष्ठा, वेदे त्वीश्वरनिष्ठैव, 'नैवेश्वर आज्ञापयति, नापि धर्मसूत्रकाराः पठन्ति' इति भाष्यात्। तत्र हीश्वराज्ञा वेदः। प्रवर्तकत्वं च स्वातन्त्र्ये सति तादृशार्थबोधकलिङाद्युच्चारयितृत्वादिकमेव।

यत्तु, इष्टसाधनत्वमेव स व्यापारः, इष्टसाधनताज्ञानस्य प्रवृत्तिसामान्ये हेतुत्वावधारणेन तस्यैव वाच्यत्वौचित्यात्। इष्टं च क्वचित् साक्षात्कर्तुरेव,

क्वचित् परम्परया। अत एव च 'आचार्यप्रेरितोऽहं गामानयामि' इत्यादावाचार्यादेः प्रवर्तकत्वव्यवहारः सङ्गच्छते। भवत्प्रेरणयाऽहमध्यापयामि, न किञ्चिन्ममेष्टमिति व्यवहारस्तु न मे साक्षात् किञ्चिदिष्टमित्येवम्परः।

प्रवर्त्तकत्वञ्च प्रवृत्तिजनकेष्टसाधनत्वबोधकलिङाद्युच्चारयितत्वादिकमेव। न च राजप्रेरितपदातेस्तादृशलिङाद्युच्चारयितृत्वेन प्रवर्तकत्वापत्तिः, न चेष्टापत्तिः, 'पदातिप्रेरितोऽहं नेदं कुर्वे, किन्तु राजप्रेरितः' इति व्यवहारानापत्तेः; इति वाच्यम्, स्वातन्त्र्ये सतीति विशेषणात्। पिशुनप्रेरितराज्ञ्यपि स्वातन्त्र्यमस्त्येव। बलात्कारेण गुर्वादिप्रेरितबोलाद्यध्यापनेऽपि तदभावप्रयुक्तगुर्वादिक्रोधजन्यताडनाभाव एवेष्टः।

यद्यपि "स्वरितञि तः" [१।३।७२] इत्यादौ क्रियाफलशब्देन प्रत्यासत्त्या धात्वर्थभूतमेव फलं गृह्यते, तथापीह तथाग्रहणे न किञ्चिन्मानम्। न चेष्टसाधनताज्ञानं न प्रवर्त्तकम्, अनिष्टसाधने उदासीने च 'कष्टं कर्म' इति न्यायेन द्वेषादप्रवृत्तेरिति वाच्यम्, आन्तरालिकश्रमे द्वेषाभावदशायां तदज्ञानदशायां वा प्रवृत्त्यापत्तेः। न च चिकीर्षायां सत्यामिष्टापत्तिरिति वाच्यम्, इष्टसाधनत्वज्ञानं विना तस्या एवाभावात्।

एवञ्चेष्टसाधनत्वमेव लिङ्शक्यम्। तच्च स्वर्गादिसाधनत्वेनैव, तेन रूपेण ज्ञानस्यैव प्रवर्त्तकत्वात्; न त्विष्टत्वेन, तस्य स्वरूपसत एव हेतुत्वेन तज्ज्ञानानपेक्षणात्, बहुवित्तव्ययायाससाध्ये आमुष्मिके च विशिष्य तज्ज्ञानं विना प्रवृत्त्यभावाच्च।

तत्र नानार्थत्वपरिहाराय तदादाविव शक्यतावच्छेदकानामनुगमिकेच्छेति बोध्यम्। यथा बुद्धिविषयत्वरूपेणोपस्थितघटत्वपटत्वादिशालिषु बुद्धिविषयतावच्छेदकवति तदादिपदं शक्तमित्येव तदादेः शक्तिग्रहः। बुद्धिविषयत्वमुपस्थितावुपलक्षणतयानुगमकमात्रम्, न तु तदंशे शक्तिः। एवमिहापि लिङादिरिच्छाविषयतावच्छेदकस्वर्गत्वादिवत्साधनत्वशक्त इत्येव शक्तिग्रहः।

न चैवं तावता तदादौ बुद्धिः, इहेच्छा वा प्रविष्टा। पदार्थोपस्थितिरपि तदादौ प्रकरणादिमहिम्ना बुद्धिविषयतावच्छेदकघटत्वादिनेवेहापि समभिव्याहृतस्वर्गपदमहिम्ना स्वर्गादिसाधनमित्येव, न तु बुद्धीच्छयोः शाब्दबोधे भानम्।

एवञ्च विशिष्येष्टतावच्छेदकस्वर्गत्वादिप्रकारेण शाब्दबोधोत्पत्त्या विधिवाक्यात् प्रवर्तकज्ञाननिर्वाहः ।

एवञ्च इच्छाविषयतावच्छेदकत्वोपलक्षितस्वर्गत्वादिविशिष्टसाधनत्वे विधेः शक्तिरिति फलितम् ।

न चैतस्यापि स्वर्गकामादिपदाल्लाभेन न तत्र शक्तिः, कामान्तपदात् स्वर्गाद्युपस्थितावपि साधनत्वबोधकाभावात्, विश्वजिदादौ तत्पदसमभिव्याहारस्याप्यभावाच्च । सामान्यत इष्टसाधनत्वमात्रे ज्ञातेऽपि पश्चाद्विशेषजिज्ञासायां तत्तत्पदकल्पनेति त्वन्यदेतत् ।

बलवदनिष्टाननुबन्धित्वज्ञानं तु न प्रवर्तकम्, बह्वायाससाध्ये प्रवृत्त्यनापत्तेः । तत्र बहुतरदुःखस्यापि जायमानत्वात्, अल्पदुःखस्यापि कुतश्चिद् बलवत्त्वेनानुगतबलवत्त्वस्य दुर्वचत्वाच्च । न चैवं मधुविषसम्पृक्तान्नभोजनादौ प्रवृत्त्यापत्तिः, तत्तद्विषयकबलवद्द्वेषस्य स्वातन्त्र्येण प्रतिबन्धकत्वेनादोषात् । अत एवान्तरालिकश्रमे बलवद्द्वेषवान् ज्योतिष्टोमादौ न प्रवर्तते, अन्यस्तु प्रवर्तत एव ।

एतेन कृतिसाध्यत्वज्ञानं प्रवर्तकमित्यपास्तम् । कृत्यसाध्ये चन्द्रमण्डलादिग्रहणे प्रवृत्त्यभावश्च तत इष्टाभावेन वृथाश्रमजनकतया द्वेषात् । किञ्चाशक्तस्यापि यत्किञ्चित्कृतिसाध्ये प्रवृत्त्यापत्त्या मदंशविशिष्टं प्रवर्तकं वाच्यम् ।

एवञ्च वेदेन तथाबोधयितुमशक्यत्वान्न तच्छक्यम् । यागो मत्कृतिसाध्यः, मत्कृतिसाध्यत्वविरोधिधर्मानधिकरणत्वात्; इत्याद्यनुमानरूपालौकिकप्रमाणेनापि तद्ग्रहसम्भवेनान्यलभ्यत्वाच्च । यागो मत्कृतिसाध्यो भवत्विति चिकीर्षा तु लोकतस्तदवगमेनैव सिद्धा ।

अथेष्टसाधनत्वस्य विध्यर्थत्वे 'ज्यतिष्टोमेन स्वर्गकामो यजेत' इत्यादौ तृतीया न स्यात्, करणानभिधान एव तद्विधानात् । न च यज्यर्थगतसाधनत्वेऽभिहितेऽपि तद्विशेषज्योतिष्टोमादिप्रातिपदिकार्थगतस्यानभिधानेन तृतीया सिद्धिः, ज्योतिष्टोमयज्यर्थयोरभेदात् । अत एव 'देवदत्तः पचति' इत्यादौ देवदत्तपदादपि न तृतीया । 'अनभिहिते' इत्यस्यानभिहितसङ्ख्याक इत्यर्थ इति वादिभिरपि कृत्साधारण्याय करणतत्सङ्ख्यान्यतराभिधाने इत्यर्थोऽवश्यं वाच्यः; अन्यथा पचनीयस्याल्पेत्यस्याप्यापत्तेरिति चेत्, न; सव्यापारनिर्व्यापारसाधारणसाधनत्वाभिधानेऽपि करणत्वशक्तेः, तदाश्रस्य चानभिधानेनादोषात् ।

नन्वेवमपि स्वर्गत्वविशिष्टसाधनत्वं ज्योतिष्टोमे बोधनीयम्; न च तत् सम्भवति, स्वर्गत्वादेर्गङ्गास्नानवाजपेयादिजन्यस्वर्गादिसाधारण्येन ज्योतिष्टोमादिजन्यतानवच्छेदकतया तत्र स्वर्गत्वादिविशिष्टसाधनत्वबाधात्, न हि जन्यतानवच्छेदकधर्मो जनकत्वनिरूपके विशेषणं व्यभिचाराच्चेति चेत्, न; विजातीयतत्तत्साधनत्वस्यैव विधिना बोधाद् न दोषः। वैजात्यं च विधेस्तथाशक्तिस्वीकारादुपस्थितम्। एतदर्थमेव विधेस्तत्तत्साधनत्वे शक्तिरित्युक्तम्।

एवञ्च कार्यतावच्छेदकधर्मवत्त्वरूपकार्यत्वस्यावच्छेदकाग्रहे दुर्ग्रहत्वादेव वैजात्यकल्पना, तद्विशिष्टे विधेः शक्तिश्चेति बोध्यम्।

यद्वा, स्वर्गत्वमेव कार्यतावच्छेदकम्; अतिप्रसक्तस्याप्यवच्छेदकत्वे दोषाभावात्। ननु तथा सति स्वर्गत्वावच्छिन्नस्यापि अग्निहोत्राज्ज्योतिष्टोमरूपकारणभावेनानुत्पत्त्यापत्तिः, तथाप्युत्पत्तौ च घटादौ रासभवद् व्यभिचारादग्निहोत्रादेरकारणत्वप्रसङ्गः, एवं गुणसमवायिकारणतावच्छेदकत्वस्य द्रव्यत्वेनाङ्गीकारे सत्तायामेव तत्स्वीकारे च गुणादावपि रूपाद्यापत्तिरिति नातिप्रसक्तमवच्छेदकमिति चेत्, न; अग्निहोत्रादिजन्यापूर्वविशिष्टसमवायसम्बन्धेन स्वर्गत्वस्य तत्तद्विधावच्छेदकत्वान्न दोषः।

एवं तृणादेरपि तृणत्वावाच्छिन्नसंयोगसम्बन्धेन वह्नित्वावच्छिन्नं प्रति तृणत्वेन हेतुतेति न तत्रापि वैजात्यकल्पना। अत एव 'व्रीहिभिर्यजेत' इत्यादौ परस्परव्यतिरेकेण प्रत्येकं फलजनकत्वेऽपि न दोषः, 'व्रीहिभिर्यष्टव्यः' इति सङ्कल्पापूर्वावच्छिन्नसमयसम्बन्धस्यैव व्रीहिकार्यतावच्छेदकत्वेनादोषात्। सङ्कल्पापूर्वं च फलापूर्वोत्पत्तौ नष्टमिति प्रयोगान्तरे यवादीनामुपादानं नानुपपन्नम्।

न चैवं रासभस्यापि घटहेतुत्वापत्तिः, यवादेः श्रुत्या तृणादेररणिमण्यभाववति स्तोमे तृणसत्त्वे वह्निसत्त्वे तदभावेऽनुत्पत्तिरित्यन्वयव्यतिरेकसहकृताध्यक्षात् तत्सिद्धावपि रासभस्य हेतुत्वे मानाभावात्। किन्त्ववश्यकल्प्यदण्डादिभिरन्यथासिद्धिरेव।

एवं गुणादौ रूपापत्तिरपि न; तत्तद्रूपे तत्तद्द्रव्यस्य समवायिकारणताया आवश्यकत्वेन विशेषसामग्र्यभावादेव तदभावोपपत्तेः।

एतेन विधिलभ्यार्थविचारकाले वैजात्यास्वीकारे ज्योतिष्टोमाग्निहोत्रयोः फलसाम्यापत्तौ अल्पवित्तव्ययायाससाध्याग्निहोत्रेणैव सिद्धौ श्रमाद्याधिक्येन द्वेषादप्रवृत्तौ ज्योतिष्टोमाश्वमेधादिविधीनामननुष्ठानलक्षणाप्रामाण्यापत्तिरिति

मीमांसकोक्तमपास्तम्। यस्यैव लौकिकप्रतिष्ठादिरूपफलेच्छा, तस्यैव प्रवृत्तेः सम्भवाच्च।

अत एव सकलशास्त्रविदां युधिष्ठिरादीनां स्वल्पफलकराज्यार्थं गोत्रजब्राह्मणादिहननार्थं प्रवृत्तिः। अत एवाधुनिकानां कर्मासंगत्वं जानतामपि बहुवित्तव्ययायाससाध्येषु अग्निहोत्राद्यनुष्ठानेषु लौकिकप्रतिष्ठार्थं प्रवृत्तिः सङ्गच्छते।

किञ्च, 'सर्वेभ्यः कामेभ्यो ह दर्शपूर्णमासौ' इत्युक्तेस्तस्य नित्यतया काम्यप्रयोगेणैव प्रसङ्गान्नित्यकर्मसिद्धिसम्भवेन प्रयुक्तिलाघवलोभात् पुत्रेष्ट्यादौ प्रवृत्त्यनापत्तौ तवापि पुत्रेष्ट्यादीनामानर्थक्यं दुर्वारम्। न च कृताधानस्य पुत्रलोलुपस्य दर्शपौर्णमासात् प्रागपि पुत्रेष्ट्याद्यनुष्ठानसम्मतेनानर्थक्यपरिहारः।

एवमपि मारवधूदर्शपौर्णमासानां काम्येष्टिप्रवृत्तिविलोपो दुर्वारः स्यात्; न च समानफलानामपि कर्मणां शक्ताशक्तभेदेन व्यवस्था। अत एव—

सहस्रशक्तिश्च शतं शतशक्तिर्दशापि च।
दद्यादयञ्च यः शक्त्या सर्वे तुल्यफलाः स्मृताः॥

इति **भारते** सङ्गच्छत इति चेत्, तुल्ये ममापि। अत एव 'वित्तशाठ्यं न कारयेत्' इति तत्तद्व्रतप्रकरणे पठ्यत इत्यलम्।

ननु 'न कलञ्जं भक्षयेत्' इति निषेधवाक्यार्थानुपपत्तिः, कलञ्जभक्षणादेस्तृप्त्यादिरूपेष्टजनकत्वेन तदभावस्य बोधयितुमशक्यत्वादिति चेत्, न; ईदृशे विषयेऽनिष्टसाधनत्वस्य लिङर्थत्वात् तत्रैव नञ् तात्पर्यग्राहक इत्यदोषः।

यद्वा, नञ्समभिव्याहारे प्रत्यवायाभावरूपेष्टसाधनत्वं विध्यर्थः, तदभावश्च नञा बोध्यते, साधनत्वञ्चात्र तत्सत्त्वे नियमतः प्रत्यवायाभावः, तदभावे नियमतः प्रत्यवाय इत्यन्वयव्यतिरेकवत्त्वम्। एवञ्चार्थात् तद्भक्षणादौ प्रत्यवायः सिध्यतीति न दोषः। 'ज्वरितो न भुञ्जीत' इत्यादौ तु दुःखवृद्ध्यभावरूपेष्टसाधनत्वं विध्यर्थ इत्याद्यूह्यम्।

न च नित्यनैमित्तिकयोः फलाभावेन तत्रेष्टसाधनत्वमर्थ इति वक्तुमशक्यम्, प्रत्यवायपरीहाररूपफलस्य तत्रापि सत्त्वात्। तादृशफलेष्टसाधनत्वज्ञानादेव च तत्र प्रवृत्तिः। विधिबलेन तदकरणे प्राप्तस्य प्रत्यवायस्य तत्करणे परिहारावश्यम्भावात्। न च वेदबोधितत्वान्निष्फल एव प्रवृत्तिरिति कल्प्यम्, वेदसहस्रैरपि बोधिते निष्फलत्वज्ञानदशायामप्रवृत्तेः।

न च—

'अफलाकाङ्क्षिभिर्यज्ञो विधिदृष्टो य इज्यते।
यष्टव्यमेवेति मनः समाधाय स सात्त्विकः॥
(भगवद्गीता १७।११)

इति भगवद्वचनविरोधः,

यज्ञो दानं तपः[1] कर्म पावनानि मनीषिणाम्।
एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च॥
कर्त्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम्। (भ० गी० १८।५,६)

इत्यष्टादशे भगवतैव पावनत्वोक्तेः। तस्मादनुद्दिष्टोऽपि प्रत्यवायपरिहारः फलमिति फलं त्यक्त्वापि क्रियमाणस्य पावनत्वमिति तदाशयः।

सन्ध्यामुपासते ये तु सततं संशितव्रताः॥
विधूतपापास्ते यान्ति ब्रह्मलोकं सनातनम्॥

इति क्वचिन्नित्येऽपि फलश्रवणाच्च।

नन्विदं स्तावकस्तुतिश्च प्ररोचनार्था, प्ररोचना च पुरुषप्रवृत्त्यर्थेति चेत्, न; 'सर्वेभ्यः कामेभ्यो दर्शपूर्णमासौ' इत्यादेरपि तथात्वापत्तेः।

चतुर्थी तु 'ऊर्जो वरुध्यै' इत्याद्यर्थवादे चतुर्थीवद् नार्थसाधिका, 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्यादिभिः फलाकाङ्क्षानिवृत्तेश्च।

किञ्चार्थवादाप्रामाण्यं जानतस्ततः प्रवृत्तेरप्यनुपपत्तिः, 'बहुदुग्धेयं गौः' इति वाक्याप्रामाण्यं जानतस्तद्वाक्यादिव। न च स्वर्गाद्यर्थकतायामप्रामाण्येऽपि प्राशस्त्यबोधकत्वद्वारा स्तावकत्वमित्यभ्युपगतेऽर्थे प्रामाण्यमिति चेत्, न; तत्फलजनकत्वातिरिक्तप्राशस्त्यस्य क्वाप्यकल्पनात्। धर्मान्तरेण प्राशस्त्यज्ञानस्य प्रवर्त्तकत्वापायाच्च। तस्मात् स्वार्थ एवैषां प्रामाण्यम्।

एवञ्च 'सन्ध्यामुपासीत' इत्यादौ विधित इष्टावगमेऽपि तस्यावान्तररूपेण बोधनद्वारा शीघ्रोत्पत्तिज्ञापनद्वारा वा प्रवृत्तिविशेषार्थमर्थवाद इति। अत एव सर्वशक्त्यधिकरणे 'काम्यं यथा फलायोपदिष्टं तथा नित्यमपि' इति भट्टैरुक्तम्। तस्मादिष्टसाधनत्वं विध्यर्थ इत्याहुः। तत्, न; एवं हि अन्येष्टसाधनेऽन्यस्य प्रवृत्त्यापत्त्या मदिष्टसाधनत्वज्ञानं प्रवर्तकं वाच्यम्। तथा च कृतिसाध्यत्ववदस्यापि शक्यताया वक्तुमशक्यत्वम्।

---

1. तपश्चैव इति भगवद्गीतापाठः।

किञ्चैवम् 'पृच्छतु मां भवानित्यर्थे णिच् कस्मान्न भवति' इति "हेतुमति च" (३।१।२६) इति सूत्रस्थभाष्यशङ्कायाः 'द्रव्यमात्रविषयप्रेरणायां लोट्, सक्रियप्रेरणायां णिच्' इत्यादिसमाधानस्य चासङ्गत्यापत्तिः। न हि णिचेष्टसाधनत्वं बोध्यत इति कस्यापि सम्मतम्। तस्मात् प्रागुक्तप्रेरणैव विध्यर्थः।

एवञ्चाप्तप्रवर्तनया तत्राज्ञातज्ञाप्यत्वमिव श्रेयःसाधनत्वमप्याक्षिप्यत इति प्रवर्त्तकेष्टसाधनत्वज्ञानोपपत्तिः। क्वचित् तु स्वर्गकामादिसमभिव्याहारादादितो मानसमपि तज्ज्ञानमित्यन्यदेतत्।

सा च प्रवर्तना लिङ्द्योत्या वाच्या वा? तत्राद्ये उपपत्तिः, तस्याः प्रत्ययार्थत्वे कर्त्रादीनामर्थानां लकारान्तरे सावकाशानां विध्यादयो वाचकाः स्युः।

एवञ्च चैत्रेण पचेदिति स्यात्, द्विवचनादिकम्, शबादयश्च न स्युः, पुरुषव्यवस्था च न स्यात्। द्वितीये त्वियमुपपत्तिः, विरोधाभावात् "लः कर्मणि" [३।४।६९] इत्यत्र सर्वलकारसङ्ग्राहकबहुवचननिर्देशाच्च न कर्त्राद्यर्थानामेतैर्बाधः, सङ्ख्यायाः सङ्ख्येयापेक्षितत्वेन तेषां वाचकत्वावश्यकत्वात् [च] लडादौ वर्तमानत्वपरोक्षत्वादीनां समावेशेन "लः कर्मणि" [३।४।६९] इत्यस्य निरवकाशत्वाच्च।

न च "माङि लुङ्" [३।३।१७५] इत्यादिभिः कालसामान्यविहितेषु तत्सावकाशम्, तत्रापि विशेष्यासत्त्वभूतभावनायाः कालाकाङ्क्षितत्वेन कालस्य वाच्यत्वाङ्गीकारात्। अत एव तस्य सर्वलकारापवादत्वं सङ्गच्छते।

न च निमन्त्रयेयं भवन्तमिति न स्यात्, निमन्त्रणाया उक्तत्वादिति वाच्यम्; प्रयोजकनिष्ठयोर्निमन्त्रणयोरन्ययोः प्रत्यार्थत्वस्वीकारात्। तत्र तत्र द्योतकतापक्षो ज्यायान्, 'पच' इत्यादौ प्रत्ययं विनाऽपि प्रवर्तनाप्रतीतेः, पञ्चभिर्हलैः कृषतीत्यादौ प्रवर्तनाया धात्वर्थत्वस्य दृष्टत्वाच्च। एवञ्चात्र प्रयोजकव्यापारोऽपि धात्वर्थः, तस्यापि पाकाद्यनुकूलत्वात्। तत्र फलानुकूलत्वात् तदुपस्थितव्यापाराणां मध्ये प्रयोजकव्यापारस्य विषयितया विशेषणत्वेनान्वयः, इतरेषां तु विषयतया विशेष्यत्वेन।

एवं द्विप्रकारकान्वये लिङादयस्तात्पर्यग्राहकाः। तथा चैकाश्रयिका प्रवर्तनाविषयीभूता पाकानुकूला क्रियेत्यादिप्रकारेण पचेदित्यादौ बोधः।

न चैवं प्रवर्तनाश्रयस्यापि धात्वर्थव्यापाराश्रयत्वेन कर्तृत्वात् तत्र कर्तरि लकारः स्यादिति वाच्यम्, लिङाद्युत्पत्तेः पूर्वं प्रवर्तनाया अप्रतिपादनात् तदाश्रयस्य

कर्तृत्वाभावेन तमादाय "लः कर्मणि" इत्यस्याप्रवृत्तेः। लिङ्क्षु सूत्रद्वयाभ्यामेकवाक्यतापन्नाभ्यां विधीयत इत्यदोष इति बहवः।

अन्ये तु 'पाचयति' इत्यादौ प्रवर्तनाया विशेष्यत्वस्य क्लृप्तत्वेनात्रापि तथैवास्तु। एवञ्चैकाश्रयपाकानुकूलक्रियाविषया प्रवर्त्तनेति बोधः। न चैतस्याः प्रत्ययवाच्यत्वपक्षे 'क्रियाप्रधानमाख्यातम्' इति वचनबोधितधात्वर्थविशेष्यताया एव बोधनेनादोषात्।

न च णिच्सनादौ प्रकृत्यर्थ एव विशेष्यः, औत्सर्गिकप्रत्ययार्थप्राधान्यत्यागे मानाभावात्, अनुभवविरुद्धत्वाच्च 'पाचयिता' इत्यादौ णिजर्थादीनां प्राधान्यस्यावश्यकत्वाच्चेत्याहुः।

तत्र कारकविशिष्टधात्वर्थस्य प्रवर्तनायाम्, तादृशधात्वर्थे प्रवर्तनाया वान्वयः, कारकान्वयं विना धात्वर्थस्य निरूपयितुमशक्यत्वात्।

एवञ्च प्रवर्तनाक्षिप्तमज्ञातज्ञाप्यत्वं श्रेयःसाधनत्वञ्च विशिष्ट एव, कारकविशिष्टक्रियाया एव प्रवर्तनाविषयत्वात्। धात्वर्थस्य प्राप्तत्वे तु तात्पर्यतो गुणांशे पर्यवस्यति। यथा 'दध्ना जुहोति' इति। लिङादौ प्रवर्तना च वस्तुतो वर्तमानकाल एव भासते, शब्दशक्तिस्वभावाद्, वर्तमानकालस्यान्तरङ्गत्वाच्च। धात्वर्थस्तु भविष्यत्काल एव, शब्दशक्तिस्वभावात्।

एतेन प्रेरणा प्रयोज्यपाकवर्तमानतादशायां 'पचेत्' इति प्रयोगापत्तिरिति निरस्तम्। विधिलिङ्युत्तमस्तु न, स्वप्रवृत्तौ स्वेच्छायाः स्वरूपसत्या एव कारणत्वेन तज्ज्ञानानुपयोगात्। इदमेवाभिप्रेत्य 'उत्तमपुरुषो विधिशक्तिप्रतिबन्धकः' इति मीमांसकाः।

'न कलञ्जं भक्षयेत्' इत्यादौ नञ्समभिव्याहारे तु निवृत्तिर्लिङर्थ इति सर्वेष्टसिद्धिः।

इति तिङर्थविचारः

—:०:—

अथ सनाद्यर्थविचारः

अथ धातुप्रकृतिकसनाद्यर्थो निरूप्यते

'पिपठिषति' इत्यादौ सनर्थः = इच्छा। तत्र धात्वर्थस्य कर्मत्वसमानकर्तृकत्वैतदुभयसम्बन्धेनान्वयो व्युत्पत्तिवैचित्र्यात्, "धातोः कर्मणः समानकर्तृकादिच्छायां वा" [३।१।७] इति सूत्रस्वरसाच्च। पुनः पुनरतिशयेन वा पचति 'पापच्यते' इत्यादौ यङा तु प्रकृत्यर्थगतं पौनःपुन्यं बाहुल्यं वा बोध्यते। क्वचित् कौटिल्यगर्ह्याद्यपि "नित्यं कौटिल्ये गतौ" [३।१।२३], "लुपसदचर" [३।१।२४] इत्यादितत्तच्छास्त्रप्रामाण्यात्। 'श्वा मुमूर्षति' इत्यादौ आशङ्का सनर्थः, श्वकर्तृकमाशङ्काविषयो मरणमिति बोधः। एवमेव 'कूलं पिपतिषति' इत्यत्रापि।

इच्छारोपेण प्रत्यय इति मते पूर्वोक्तार्थः पश्चान्मानसबोधविषयः। तत्र चेदृशसमभिव्याहार एव कारणम्। 'पाचयति' इत्यादौ णिजर्थः प्रेरणेत्याद्यूह्यम्।

इति सनाद्यर्थविचारः।

अथ कृदर्थविचारः

अथ धातुप्रकृतिककृदर्थो विचार्यते

तत्र कर्तृकर्मविहितक्तामाश्रयोऽर्थः। तत्र कर्त्तरि व्यापाराश्रयः, कर्मणि फलाश्रयः, कर्मक्तसमभिव्याहारे च फलव्यापारयोर्व्यत्यासः। एवञ्च 'गतो ग्रामः' इत्यादौ व्यापारजन्योत्तरदेशसंयोगाश्रयो ग्राम इति बोधः।

न च तिङन्ते कर्तृकर्मणोर्धात्वर्थविशेषणताया दृष्टत्वेनात्रापि तथैवोचितमिति वाच्यम्, तिङन्त एव 'भावप्रधानम्' इत्यस्य प्रवृत्तेः; 'सत्त्वप्रधानानि' इत्युत्तरनिरुक्तेन तयोस्तत्र विशेष्यतया बोधनाच्च। नाम्नि सत्त्वप्राधान्यं च स्वघटकप्रकृतिभूतधात्वर्थापेक्षयैव। तेन विभक्त्यर्थस्यासत्त्वभूतस्य प्राधान्येऽपि न क्षतिः। नामपदेन चात्र सत्त्ववाचकप्रत्ययान्तं गृह्यते, अत एव 'पचति कल्पम्' इत्यादौ न दोषः। भावक्तस्तु कृत्यसञ्ज्ञकतव्यादीनां क्तखलर्थानाञ्च साध्यावस्थापन्नधात्वर्थानुवादकत्वमेव। अत एव 'एधितव्यम्' इत्यादौ न क्रियान्तराकाङ्क्षादि। अतस्तेष्वेकवचनमेव। 'सत्त्वप्रधानानि नामानि' इत्युक्तेः साध्यावस्थस्यापि लिङ्गयोगः। लिङ्गयोगान्वयित्वमेव च सत्त्वम्। तत्र लिङ्गान्तरासम्भवात् लिङ्गसर्वनामत्वाच्च नपुंसकत्वमेव। अत एव "तयोरेव कृत्यक्त" [३।४।७०] इति सूत्रे "लः कर्मणि" [३।४।६९] इति सूत्रगृहीतभावकर्मणोरेव तयोरित्यनेन परामर्शः सङ्गच्छत इत्याहुः।

घञादिवाच्यभावस्तु सिद्धावस्थापन्नः, 'पाकः' इत्यादौ क्रियान्तराकाङ्क्षादीनां दर्शनात्। न चैवम् 'ओदनस्य पाकः' इत्यादौ कारकान्वयो न स्यात्, साध्यावस्थापन्नक्रियास्वेव तदन्वयव्युत्पत्तेः; 'कारके' इत्यधिकारात्; 'कारकम्' इति महासञ्ज्ञाकरणाद् वेति वाच्यम्, प्रकृत्या साध्यावस्थापन्नस्यैवोपस्थापनात्।

न चाध्याहृततिङन्तार्थक्रियायामेव 'ओदनस्य पाकः' इत्यादौ कारकान्वयोऽस्त्विति वाच्यम्, "कर्तृकर्मणोः" [२।३।६५] इति कृद्योगषष्ठ्यनापत्तेः, असामर्थ्यात् 'ओदनपाकः' इति षष्ठीसमासानापत्तेश्च। न च शेषषष्ठ्यैव समासः, समासस्य वैकल्पिकत्वाच्च वाक्यमपि सिद्धमिति वाच्यम्, कर्मत्वादिप्रकारकबोधानुभवानापत्तेः।

किञ्चैवम् 'कर्तृकर्मणोः' इत्यर्थस्य व्यर्थत्वापत्तिः। न चैवम्, 'काष्ठैः पाकः' इत्यपि स्यादिति चेत्, इष्टापत्तेः।

न चैवम् 'पाकः' इत्यादौ वारद्वयं क्रियाबोधः स्यादिति वाच्यम्, एकस्यैव पदार्थस्य साध्यत्वसिद्धत्वाभ्यामुपस्थितिरित्यत्र तात्पर्यात्। न च विरुद्धाभ्यामाभ्यां कथमेकपदोपस्थितिः, भाष्यादिप्रामाण्येन बोधकभेदेन चैकाधिकरणवृत्तित्वेनोपस्थितिस्वीकारात्। तयोर्विरोधस्यैवाभाव इत्यन्ये।

तत्र धात्वर्थफलान्वये 'शोभनं पाकः' इत्येव। पाकादिपदेभ्योऽपि फलस्यैव साध्यत्वेनैवोपस्थापनात् "कर्तृकर्मणोः" [२।३।६५] इति षष्ठी तु न, कर्तृसाहचर्येण कर्मणोऽधात्वर्थस्यैव तत्र ग्रहणात्। स्पष्टञ्चेदम् "पूजनात् पूजितम्" [८।१।६७] इत्यत्राष्टमे भाष्ये। व्यापारान्वये तु घञा तत्र सिद्धत्वस्यापि बोधनात् 'शोभनः पाकः' इत्येव। तिङन्ते तु व्यापारान्वयेऽपि 'ज्योतिष्टोमेन भक्तिपूर्वं यजेत' इत्यादौ नपुंसकतैव। परन्तु प्रथमा, न तु द्वितीया, तस्य कर्मत्वाभावेन तद्विशेषणे तदप्राप्तेः।

[1]एतेन 'सङ्ख्यावर्तमानत्वाद्यबोधकानां घञादीनां प्रयोगसाधुतामात्रम्' इति **नैयायिकनव्योक्तमपास्तम्।**

तदुक्तम्—

साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना।
सिद्धभावस्तु यस्तस्याः स घञादिनिबन्धनः॥ इति।

सिद्धस्य भावः = सिद्धत्वम्। स्पष्टञ्चेदम् "सार्वधातुके" [३।१।६७] इति सूत्रे भाष्ये।

---

1. धातूनां सुब्विभक्त्यप्रकृतित्वात् तदर्थे सुबर्थसङ्ख्याकर्मत्वादीनामन्वयानुपपत्त्या धातोरिव घञन्तस्यापि क्रियावाचकत्वमभ्युपेयम्। प्रकृत्येकदेशार्थे तदन्वयाऽभ्युपगमे तु यत्र पाककर्तादेर्द्वित्वादिकं बाधितम्, पाकादेश्च तदबाधितम्, तत्र 'पचन्तौ पश्यति' इत्यादिप्रयोगापत्तेः, धातूपस्थाप्यार्थे सुबर्थान्वयबोधं प्रति तद्धातूत्तरधर्मिकयत्किञ्चिदर्थपरत्वज्ञानस्य प्रतिबन्धकत्वोपगमे तु गौरवम्।

एवञ्च यत्र धातुमात्रस्य पाकादौ तात्पर्य्यम्, तत्र तद्विशेषणतावाचकस्तोकपदाद् द्वितीयैव, यत्र तु कृदन्तसमुदायस्य, तत्र तद्विशेषणवाचकपदं तत्समानविभक्तिकमेवेति कातन्त्रपरिशिष्टकृन्मतं नव्यनैयायिकमतत्वेनानूद्य दूषयति—एतेनेति।

न च साध्यावस्थाया अपि भाने 'पञ्चकृत्वः पाकः' इत्यपि स्यात्, कृत्वसुजादेः क्रियान्वये एव साधुत्वादिति वाच्यम्, 'द्विः प्रयोगो द्विर्वचनेऽचि' इत्यादिप्रयोगदर्शनेनेष्टापत्तेः। अतिप्रसङ्गस्त्वनभिधानाद् वारणीय इत्येके।

अन्ये तु—क्रियाया एवाभ्यावृत्तिगणने कृत्वसुजित्यत्र क्रियाग्रहणवैयर्थ्येन तत्सामर्थ्यात् साध्यस्वभावाया एव क्रियायास्तत्र ग्रहणेन न दोषः। 'द्विः प्रयोगः' इत्यादि तु "द्विर्वचनेऽचि" [१।१।५९] इति ज्ञापकान्निर्वाह्यमित्याहुः।

किञ्च, तत्र साध्यत्वाभाने धातुसम्बन्धाधिकारविहितक्त्वादयः, क्रियार्थक्रियोपपदे विधीयमानतुमुनादयश्च न स्युः, 'भोक्तुं पाकः' इत्यादिक्रियापदस्य साध्यत्वविशिष्ट एव सङ्केतात्। एवम् 'भुक्त्वा पाकः' इत्याद्यपि। 'भोक्तुं पाचकः, भुक्त्वा पाचकः' इत्यादि तु न, 'गुणानाञ्च परार्थत्वात्' इति न्यायेन गुणभूतक्रियान्वयानौचित्यादिति क्त्वार्थनिरूपणे निरूपयिष्यामः।

न च 'भोक्तुं पचति पश्य' इत्याद्यपि न स्यात्, अन्तरङ्गत्वेन पदार्थोपस्थितिकालिकाप्राधान्यस्यैव ग्रहणात्। 'भोक्तुं पाचकोऽस्ति' इत्यादौ तु "शकधृष" [३।४।६५] इति सूत्रेण तुमुन्, 'भुक्त्वा पाचकः' इति तु 'अस्ति' इत्यादिक्रियाध्याहारेण योज्यम्। एवं 'भुक्त्वा गतः' इत्याद्यपि। कारकाणां तु गुणभूतक्रियायामप्यन्वयः, आकाङ्क्षावशात्। अत एव 'दत्तेन गतो ग्रामः, कृतपूर्वीकटम्' इत्यादौ कारकान्वय इत्याहुः, तत्, न; 'गुणप्रधानसन्निधौ गुणेन नान्वयः' इत्येव तदर्थः, प्रधानासन्निधौ तु गुणेनापीति 'भोक्तुं पाचकः, भुक्त्वा गतः, भुक्त्वा पाचकः' इत्याद्यपि साध्वेवेति वदन्ति।

नन्वेवं पाकादिपदोपात्तस्य प्रसज्यप्रतिषेधार्थकनञर्थेऽन्वयापत्तौ पाको नाऽस्तीत्यपि स्यात्, द्वित्वावच्छिन्नपाकाभावकर्तृका सत्तेति बोधादिति चेत्, न; व्युत्पत्तिवैचित्र्येण प्रतिषेधार्थकनञः साध्यावस्थामात्रक्रियावाचकार्थान्वयित्वस्यैव स्वीकारात्।

यद्यपि "तेन तुल्यम्" [५।१।११५] इति वतिरपि क्रियान्वयी, तथापि स इष्यत एव यागवत् पाकः इति। अत एव 'गोषु दुह्यमानासु देवदत्तस्य गमनम्' इत्यादौ "यस्य च भावेन" [२।३।३७] इत्यादि षष्ठ्यादिकम्, धातुना साध्यावस्थापन्नस्य बोधनादिति दिक्।

एवं तुमुनादीनामपि भाव एवार्थः, '[1]अव्ययकृतो भावे' इत्युक्तेः। स भावोऽसत्त्वभूत एव, अव्ययार्थे लिङ्गाद्यन्वयाभावेन प्रत्ययार्थे वैलक्षण्याननुभवात्। तत्र "तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्" [३।३।१०]इत्युक्तेस्तादर्थ्यमपि तुमुन्द्योत्यम्, तादर्थ्यमुद्देश्यत्वरूपम्। तच्च संसर्गः प्रकारो वा। प्रकृत्युपपदार्थयोः समानकर्तृकत्वमपीहाभिधानबलाल्लभ्यः प्रयोगोपाधिः, द्वयोः क्रिययोरधिकरणाकाङ्क्षायां प्रत्यासत्त्यैकग्रहणस्यैवौचित्यात्। एतद्विहितण्वुल् तु कर्त्तर्येव। तत्र तुमुन्प्रकृत्यर्थं उपपदार्थं प्रति विशेषणम्।

एवञ्च' कृष्णं द्रष्टुं याति' इत्यादौ कृष्णकर्मकभविष्यद्दर्शनोद्देश्यकं च यानमिति बोधः[2]। एवं क्त्वाप्रत्ययस्यापि भाव एवार्थः।

---

1. भाष्यकृतस्तु—"तुमर्थे" इति सूत्रे 'तुमर्थो भावः' इति व्यवस्थाप्य पुनः 'तुमर्थे' इत्यनुवृत्तिमभ्युपगम्य 'अव्ययकृतो भावे' इति प्रत्याचक्षाणाः क्त्वादीन् भाव एवाभ्युपयन्ति। परन्तु क्त्वातुमुनादेरसत्त्वभूत एव भावोऽर्थः, पाक इत्यादाविव।

2. अयमत्र सङ्ग्रहः— 'भोक्तुं पचति' इत्यत्र भोजनं पचिक्रिययोर्जन्यजनकभावसम्बन्धस्तुमुन्द्योत्यः, "तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्" इत्युक्तेः। तादर्थ्यञ्च जन्यजनकभावरूपमिति भावः। तादर्थ्यवत् समानकर्तृकत्वमपि क्रिययोः संसर्गतया भासते, शब्दशक्तिस्वभावात्। अत एव विभिन्नकर्तृकक्रियाद्वयतात्पर्यकः 'भोक्तुं पचति'इति न प्रयोगः।

तत्त्वविदस्तु—उद्देश्यत्वनिरूपकत्वरूपं तादर्थ्यं तुमुनापि द्योत्यं संसर्गतया भासते। तच्च तदिच्छाधीनेच्छाविषयत्वम्। "तुमुन्ण्वुलौ" इत्यत्र 'भविष्यति' इत्यनुवृत्तेर्भविष्यत्वमपि तद्द्योत्यम्। तथा च भविष्यद्भोजनोद्देश्यको भोजनकर्तृकः पाक इति बोधः। तुमुन् तु न कर्तरि, 'अव्ययकृतो भावे' इत्युक्तेः, "कर्तरि कृत्" इत्यस्यात्राप्रवृत्तेः, अनिर्दिष्टार्थकेष्वेतत्प्रवृत्तेः।

एतेन तुमुनाख्यातार्थकर्त्रोः परस्परमभेदान्वयेनैव विभिन्नकर्तृकक्रियाद्वयतात्पर्यकतादृशप्रयोगापत्त्यभावेन समानकर्तृकत्वं न सम्बन्ध इत्यपास्तम्, 'भोक्तुं पच्यते, भोक्तुं स्थीयते' इत्यादौ तदसम्भवाच्च। न च तत्रापि देवदत्तेनेत्यध्याहारात् तृतीयार्थकर्तर्यभेदान्वयान्नानुपपत्तिरिति वाच्यम्, अध्याहारं विनापि वाक्यार्थबोधस्यानुभवसिद्धत्वादिति दिक्।

"तुमुन्ण्वुलौ" इति सूत्रविहितो ण्वुल् तु "कर्तरि कृत्" इति कर्तर्येव, सम्बन्धश्च क्रिययोः पूर्वोक्त एव। एवञ्च 'कृष्णं दर्शको याति' इति वाक्यात् कृष्णकर्मकभविष्यद्दर्शनोद्देश्यकं दर्शनकर्तृकर्तृकं वर्तमानकालिकं यानमिति बोध इति वदन्ति।

युक्तञ्चैतत्, कृष्णदर्शनोद्देश्यकयानेन मार्गस्थजनान्तरदर्शनोत्पादेऽपि 'जनं द्रष्टुं याति' इति प्रयोगविरहात्, 'कृष्णं द्रष्टुं याति, न यवनादिकम्'

इति प्रयोगाच्च । अत एव नव्यतार्किकाः कर्तृकर्तृकत्वविशिष्टेच्छाधीनेच्छाविषयत्वस्य तुमुन्वाच्यतामनुमन्यन्ते । अत एव चतुर्थीकारके व्युत्पत्तिवादे 'अत्र चाहर्तुमिति तुमुनन्तार्थः स्वसमभिव्याहृतक्रियान्वयिस्वार्थप्रयोजनकत्वान्वय्याहरणम्'इत्युक्तम् । स्वार्थप्रयोजनकत्वस्य वाच्यतां विनाऽन्वययीत्युक्तेरसङ्गतिः ।

अन्यथा तस्य वृत्त्यनियामकतया तत्सम्बन्धावच्छिन्नप्रतियोगिताया अप्रसिद्ध्या तथाविधप्रतियोगिताकयवनादिगोचरदर्शनाभावस्य बोधयितुमशक्यत्वात् । उक्तसम्बन्धेन यवनादिगोचरदर्शनविशिष्टगमनाश्रयत्वाभाव एव प्रथमान्तार्थो बोध्यत इति तु न, 'कृष्णं द्रष्टुं स्थीयते, न यवनादिकम्' इत्यादौ तदसम्भवादिति दिक् ।

शाब्दिकनये तु सकलविशेषणविशिष्टमुख्यविशेष्यक्रियाया एव सर्वत्र बोधस्वीकारान्नानुपपत्तिरिति ध्येयम् । 'भोक्तुमिच्छति' इत्यादौ "समानकर्तृकेषु" इति तुमुन्, इच्छार्थेषु तुमुन्प्रकृतिभूतधात्वर्थसमानकर्तृकार्थप्रतिपादकेषूपपदेषु धातोस्तुमुन्निति तदर्थः । क्रियार्थक्रियोपपदाभावार्थमिदम् । तुमुनर्थविषयित्वविशिष्टकर्तृकर्तृकत्वसम्बन्धेन प्रकृत्यर्थस्येच्छायामन्वये तात्पर्यग्राहकस्तुमुन् । परमते तु तस्य तदवाच्यम् । परकर्तृकभोजनेच्छायां भोक्तुमिच्छतीति प्रयोगवारणाय समानकर्तृकत्वस्यापि सम्बन्धमध्यनिवेशः । "शक्नोति भोक्तुम्, धृष्णोति पठितुम्, जानाति पठितुम्' इत्यादौ "शकधृषज्ञाग्लाघटरभलभक्रमसहार्हास्त्यर्थेषु तुमुन्" इति तुमुन् । आद्ये सामर्थ्यापरपर्यायशक्तिरूपधात्वर्थे प्रकृत्यर्थस्य प्रयोजकत्वसम्बन्धस्तुमुन्द्योत्यः । द्वितीये शङ्काराहित्यरूपप्रागल्भ्यघटकशङ्काया विषयित्वं सम्बन्धः, प्रयोजकत्वं वोक्तप्रागल्भ्ये सम्बन्धः । तृतीये विषयित्वं सम्बन्धः स्पष्ट एव ।

अत्रापि सर्वत्र समानकर्तृकत्वमपि सम्बन्धे निवेश्यम् । अत्र यः सम्बन्धः, स परमते तद्वाच्यः । अत्र शक्नोतेरर्थे समभिव्याहृततत्तद्धात्वर्थोऽन्तर्भावनीयः । तथा हि—गलाधस्संयोगानुकूलक्रियायां व्यापारे शक्तौ च शक्नोतेर्वृत्तिः । तत्र शक्तौ शक्त्याख्या, इतरत्र लक्षणा । तत्र तुमुन्प्रकृतिभुज्यादिस्तात्पर्यग्राहकः । एतादृशेऽर्थे वृत्तिः कर्मप्रत्ययस्थले एव, न तु कर्तृप्रत्ययस्थले; प्रयोजनविरहात् । तत्र प्रयोज्यत्वसम्बन्धेन शक्त्यान्वितव्यापारस्य जन्यत्वसम्बन्धेनोक्तक्रियायामन्वयः । तथाविधक्रियारूपफलशालित्वादोदनादेः कर्मत्वम् । एवञ्च 'शक्यते ओदनो भोक्तुम्' इत्यतः शक्तिप्रयोज्यव्यापारजन्यगलाधस्संयोगानुकूलौदनाश्रयिकक्रियेति बोधः ।

तार्किकनये तु—तथाविधक्रियाश्रयतावानोदन इति बोधः । शक्तिश्च मीमांसकनये पदार्थान्तरम् । न्यायनये तत्तत्कारणानुकूलासाधारणकारणकलापः । यथा प्रकृते प्रदीप्तजठरानलसंयोगादिः, लिङ्गसङ्ख्याननुभवात् । तथा च धात्वर्थानुवादक एव तुमुनादिरिति पर्यवसन्नम् ।

यत्तु—"समानकर्तृकयोः पूर्वकाले" [३।४।२१] इति स्मरणात् क्त्वाद्यर्थः कर्ता। अन्यथा 'इष्टकाः पक्त्वाऽहं भोक्ष्ये' इत्यत्र तृतीयाप्रसङ्गः।

न चाख्यातेन कर्तुरभिधानान्न सेति वाच्यम्, भोजनक्रियाकर्त्तुरुक्तत्वेऽपि पाककर्त्तुस्तत्त्वाभावात्। 'अनभिहिते भवति' इति पर्युदासाश्रयणात्। अत एव 'प्रासादे आस्ते' इत्यत्र प्रासादनक्रियाधिकरणस्याभिधानेऽप्यासिक्रियाधिकरणस्यानभिधानात् सप्तमीति भाष्यादौ स्पष्टमिति। तत्, न; 'पक्त्वौदनो भुज्यते देवदत्तेन' इत्यत्र द्वितीयापत्तेरेवमप्यनुद्धारात्, 'समाने कर्तरि' इत्येव सिद्धे सूत्रे "समानकर्तृकयोः" (३।४।२१) इत्यस्य वैयर्थ्यापत्तेश्च। तस्मात् समानकर्तृकत्वं पूर्वकालत्वञ्च द्योत्यमेव।

द्योतकत्वं चार्थयोः संसर्गे तात्पर्यग्राहकत्वम्। तथाहि—अत्र भावः साध्यावस्थ एव, स च धातुना लभ्यः, क्त्वाप्रकृत्यर्थभूता च क्रिया क्रियान्तरे विशेषणम्। धातुसम्बन्धाधिकारात् तयोः सम्बन्धः सामानाधिकरण्यमुत्तरकालिकत्वञ्च। तत्र सम्बन्धतात्पर्यग्राहकाः क्त्वादयः। क्वचित्तु जन्यत्वव्याप्यत्वादिकमप्यधिकं भासते। तत्तु मानान्तरगम्यत्वाद् न क्त्वाद्योत्यम्। एवञ्च 'भुक्त्वा व्रजति', 'भुक्त्वैवाहं तृप्तः, न पीत्वा', 'अधीत्य तिष्ठति', 'ईश्वरो ज्ञात्वा तिष्ठति' इत्यादौ परेषामिवास्माकमपि बोधः।

एवञ्च 'कृत्तिङ्प्रकृत्यर्थयोः सामानाधिकरण्यसंसर्गबोधेनैव समानकर्तृकत्वलाभात् तत् क्त्वावाच्यम्' इति मीमांसकोक्तमयुक्तम्। 'समानकर्तृकता, पूर्वकालता च प्रतीयते' इति ग्रन्थास्तु संसर्गतया प्रतीतिसत्त्वान्नानुपपन्नाः। तत्प्रकारकबोधानुभवस्तु नास्त्येव। सूत्रे तु "समानकर्तृकयोः" इति निर्धारणे षष्ठी, सप्तमी वा। 'पूर्वकाले' इति बहुव्रीहिः। एवञ्च [1]समानकर्तृकयोः क्रिययोर्मध्ये पूर्वकालिकक्रियावाचकात् क्त्वेत्यर्थः।

---

1. अयं भावः—समानकर्तृकयोर्धात्वर्थयोर्मध्ये पूर्वकालविशिष्टार्थबोधकाद् धातोः क्त्वेति सूत्रार्थात् पूर्वकालः क्त्वाप्रकृत्यर्थप्रकारः, आनन्तर्यं च धात्वन्तरार्थे तादृशप्रकृत्यर्थस्य प्रकारताघटकः सम्बन्धः।

अत एव भाष्ये—'पूर्वं भुङ्क्ते पश्चाद् व्रजति' इत्यत्र क्त्वाप्रत्ययशङ्का पूर्वशब्दोऽत्र पूर्वकालार्थः, न तु धातोस्तत्र वृत्तिरित्यर्थकेन स्वशब्देनोक्तत्वादित्यनेन समाहिता। उक्तार्थानामिति न्यायपरत्वं तु न तस्य, तथा सतीह

यत्तु नैयायिकाः—अव्यवहितपूर्वकालिकत्वमात्रं शक्यम्। वर्षान्तरीयभोजनमादाय तथा प्रयोगवारणाय अव्यवहितेति। तच्च योग्यता, सा च तात्पर्यादिभिर्दण्डमासमुहूर्त्तादिभिरवसीयते। एवञ्च 'भुक्त्वा व्रजति', 'अद्य भुक्त्वा श्वो गमिष्यति, गन्ता वा' इत्यादौ यथायथं व्यवधानेऽपि न दोषः, क्त्वोपस्थाप्यकालस्याद्येत्यनेनाभेदान्वयादिति। तत्, न; 'भुक्त्वा व्रजति' इत्यादौ भोजनोत्तरं व्रजतीत्यन्वयबोधात्,

---

कस्मान्न भवति—'आस्यते भोक्तुम्' इति शङ्कापरभाष्यस्यासङ्गत्यापत्तेः। तत्रापि तुमुना तदुद्देश्यकत्वरूपसम्बन्धं बोधयताऽऽसतेः पूर्वकालत्वस्य द्योतितत्वेन तदप्राप्तेः। तत्र पूर्वकालानवगमे तु कथं शङ्का पदं निदध्यात्? वासरूपन्यायेन लटा साधनमित्यन्यत्।

यदा त्वासेः क्त्वा भवति, तदा भुजेस्तुमुन्न भवति, अनभिधानादिति कैयटग्रन्थः। 'पूर्वं भुक्त्वा पश्चाद् व्रजति' इत्यत्र त्वन्येभ्यो भोक्तृभ्यः पूर्वं भुक्त्वान्येभ्यो व्रजितृभ्यः पश्चाद् व्रजतीत्यर्थः' इति साधनान्तरक्रियावधिकमेव पूर्वकालत्वं प्रतीयत इति नास्य सूत्रस्य विषयः, किन्तु 'विभाषाग्रे प्रथम' इत्यस्येति स्पष्टमत्र भाष्ये। 'दर्शपूर्णमासाभ्याम्' इत्यत्र त्वानन्तर्यसम्बन्धेन पूर्वकालिकदर्शादिवैशिष्ट्यं सोमे प्रतीयत इति न तत्र दोषः।

एवञ्च 'पूर्वकालः' इति कर्मधारयः, एवञ्च षष्ठीवत् क्त्वादिरपि समानकर्तृकत्वादिसम्बन्धवाचक इति वक्तुं शक्यमिति प्राहुः।

अत्र पूर्वकालत्वं प्रागभावावच्छिन्नकालत्वम्, प्रागभावे व्रजनक्रियायास्तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेनान्वयः। आनन्तर्यञ्च तदधिकरणसमयाध्वंसाधिकरणमुहुर्तादिध्वंसानधिकरणत्वविशिष्टतदधिकरणसमयध्वंसाधिकरणक्षणवृत्तित्वम्। तेन न पूर्वोक्तदोषः।

'ईश्वरो ज्ञात्वा तिष्ठति' इत्यत्रेश्वरज्ञानध्वंसाऽप्रसिद्ध्या तद्ध्वंसो नानन्तर्ये निवेशितः।

इदमत्र बोध्यम्—'स्नात्वा भुक्त्वा पीत्वा व्रजति' इत्यत्र व्रजनक्रियावधिकपूर्वकालत्वमादायैव सर्वत्र क्त्वा, न तु भोजनादिक्रियावधिकं तदादाय। तथा सति 'तस्यापत्यम्' इत्यादावेकत्वादेरिव प्रकृतेः समानकर्तृकयोरिति द्विवचनोपात्तस्य द्वित्वस्याविवक्षायामप्यमीषां ब्राह्मणानां पूर्व आनीयतामित्युक्ते सर्वपूर्व एव आनीयते, न तु यत्किञ्चित्पूर्वो मध्यमः, तथात्रापि स्नातेरेव क्त्वाप्रत्ययः स्यात्, न तु भुज्यादेः।

एवञ्च स्नानक्रियायाः यानक्रियायाश्च व्रजनक्रियायामेवान्वयः, न तु स्नानादिक्रियाया भोजनादौ। अत एव तत्र 'भुक्त्वा स्नात्वा पीत्वा व्रजति' इति विपरीतप्रयोगोऽप्युपपद्यत इति स्पष्टं भाष्ये।

व्रजनपूर्वकाले भोजनमित्यबोधाच्च तथा नाव्यवधानमपि । वर्षान्तरीयभोजने तथा प्रयोगः सति तात्पर्ये इष्ट एव, असति तात्पर्ये तदभावादेव न बोधः । औत्सर्गिकं पुनरव्यवधानमाद्रियत एव ।

अत एव 'दर्शपूर्णमासाभ्यामि [ष्ट्वा] सोमेन यजेत' इति वाक्यं दर्शोत्तरकालं सोमाङ्गत्वेन विधत्ते । अन्यथा क्त्वाश्रुतेः पूर्वकालार्थायाः प्रकरणानुरोधाद् बाधापत्तेरिति मीमांसकसिद्धान्तासङ्गतिः स्यात् ।

एवञ्च तिङन्तार्थक्रियायाः प्राधान्यमप्यौत्सर्गिकमबाधितं भवति। तस्मादुत्तरः कालः क्त्वार्थः । आनन्तर्यञ्च न तद्ध्वंसाधिकरणक्षणवृत्तित्वम्, 'स्थित्वा पश्यति' इत्यादावभावात् । स्थितेर्दर्शनकालेऽपि सत्त्वेन तद्ध्वंसाधिकरणक्षणवृत्तित्वरूपानन्तर्यस्य बाधात् । किन्तु तात्कालिकप्रागभावप्रतियोगित्वरूपम्, तदधिकरणसमयध्वंसाधिकरणसमयोत्पत्तिमत्त्वरूपं वा आनन्तर्यं शक्यम् ।

न चैवं मुखव्यादानोत्तरं तदभावकाले 'मुखं व्यादाय स्वपिति' इति प्रयोगापत्तिः, 'भुक्त्वैवाहं तृप्तः, न पीत्वा' इति प्रयोगानापत्तिः; उभयानन्तर्याविशेषात्, 'ईश्वरो ज्ञात्वा तिष्ठति' इत्यस्य चानापत्तिरिति वाच्यम्, तज्जन्यत्वव्याप्यत्वादीनामपि क्त्वाद्यर्थत्वात् । तथा च 'मुखं व्यादाय' इत्यादौ कालिकादिसम्बन्धेन व्याप्यत्वाभिप्रायेणैव प्रयोगादन्यदातननिद्रायास्तथात्वाभावान्न प्रयोगः । अत एवाध्ययनकालिकस्थितिमादायैव 'अधीत्य तिष्ठति' इति प्रयोगो नाध्ययनाभावकालिकस्थितिमादायेत्युपपद्यत इति **नैयायिकनव्याः** । तदप्येतेन परास्तम्, उक्तरीत्या सम्बन्धिविधयैव भानोपपत्तौ वाच्यत्वकल्पनस्यायुक्तत्वात् । अत एव वाक्यार्थीभूत एव सम्बन्ध इह द्योत्यः, न पदार्थभूत इति कर्मप्रवचनीयेभ्यो वैलक्षण्यम् ।

किञ्च, तेषां वाच्यत्वे कृतिप्रत्ययार्थविशेष्यत्वनियमात् तस्यैव विशेष्यत्वापत्तिः । न चेष्टापत्तिः, क्रियाप्राधान्यविरहेणाभीक्ष्ण्यद्वित्वाभावापत्तेः, गुणीभूतक्रियामाश्रित्य तत्प्रवृत्तौ पाचकादावतिप्रसङ्गात्, भावविधायकानुशासनविरोधाच्चेति दिक् ।

'अहं भुक्त्वा व्रजामि' इत्यादौ तृतीया तु न, क्तान्तार्थविशेष्यप्रधानतिङन्तार्थक्रियानिरूपितशक्त्यभिधाने गुणक्रियानिरूपितशक्तेरप्यभिहितत्वस्य भाष्यादिप्रामाण्येनाङ्गीकारात् । उक्तञ्च हरिणा—

प्रधानेतरयोर्यत्र द्रव्यस्य क्रिययोः पृथक् ।
शक्तिर्गुणाश्रया तत्र प्रधानमनुरुध्यते ।।
प्रधानविषया शक्तिः प्रत्ययेनाभिधीयते ।
यदा गुणे तदा तद्वदनुक्तापि प्रतीयते ।। इति ।

अत एव 'पक्त्वौदनो भुज्यते' इत्यत्रौदने न द्वितीया । न च परिपूर्णं पदान्तरेणान्वेतुं योग्यमिति व्युत्पत्तेः कारकसम्बन्धं विना क्रियास्वरूपस्यैवाभावाच्च 'पक्त्वा' इत्यस्यापि कर्तृकर्माकाङ्क्षासत्त्वाच्चान्तरङ्गतया द्वितीयादिकं दुर्वारम्, न हि तत्काले प्रधानक्रियानिरूपितशक्तेर्ज्ञानमस्ति, नापि तदभिहितत्वस्येति वाच्यम्, भाष्यप्रामाण्येन धातुसम्बन्धाधिकारविहिताव्ययकृदतिरिक्तविषयत्वाद् व्युत्पत्तीनामित्यदोषात् ।

किञ्च, पूर्वं क्रियान्तरान्वयस्य बुद्धिविषयत्वे हि क्त्वाः साधुरिति अन्तरङ्गत्वादिकमयुक्तमेव । 'ओदनं पक्त्वा ग्रामो गम्यते देवदत्तेन' इत्यत्र तु द्वितीया भवत्येव, प्रधानक्रियागुणक्रियानिरूपितशक्त्योरेकनिष्ठत्वाभावेन तदभिहितत्वेनैतदभिधानाभावादिति भाष्यादिसम्मतः पन्थाः । स्पष्टञ्चेदम् "स्वादुमि णमुल्" [३।४।२६] इति सूत्रे भाष्ये ।

अत्रेदं बोध्यम्—आख्यातवाच्यक्रियायाः प्राधान्यात् तां प्रत्येव क्त्वान्तोपस्थिताः सर्वा विशेषणम्, न तु तासां परस्परं सम्बन्धः, 'गुणानाञ्च परार्थत्वात्' इति न्यायात् ।

एतेन 'अमीषां पूर्वमानय' इत्युक्ते यथा मध्यमो नानीयते, एवमत्रापि मध्यमक्रियावाचकात् प्रत्ययो न स्यादित्यपास्तम् ।

अत एवानियतः प्रयोगः 'स्नात्वा भुक्त्वा पीत्वा व्रजति, व्रजति पीत्वा भुक्त्वा' इत्यादि चेति । 'मुखं व्यादाय स्वपिति' इति तु व्यादानोत्तरकालेऽपि स्वापस्य सत्त्वात् साधु इति दिक् ।

इति कृदर्थविचारः ।

—:०:—

अथ नामार्थविचारः

अथ कृदन्तस्य नामत्वात् तदर्थो निरूप्यते

तत्र व्यक्तिमात्रं प्रातिपदिकार्थः, शक्तिपरिच्छेदकशिरोमणिना व्यवहारेण व्यक्तावेव तत्परिच्छेदात् । ननु केवलव्यक्तिषु शक्तिग्रहोऽसम्भवी, अनन्तव्यक्तीनामेकपदोपस्थित्यभावेन सङ्केतग्रहासम्भवात् । न च यत्र क्वचिदेव व्यक्तौ शक्तिग्रहोऽस्तु बोधकारणम्, शाब्दबोधे त्वगृहीतशक्तिकाऽपि व्यक्तिर्भासत इत्यङ्गीकार्यमिति वाच्यम्, एवं हि शक्तिग्रहाविषयस्यापि शाब्दबोधविषयत्वाद् व्यभिचारेण शक्तिग्रहस्य कारणतैव न स्यात्, गोपदाश्वपदादेरपि भानापत्तेश्च ।

किञ्च, हस्तिपकव्यक्त्यन्तरे हस्तिपकत्वं धर्मितावच्छेदकीकृत्य हस्तिसम्बन्धग्रहाद्यत्र हस्तिपके न गृहीतः, तस्यापि हस्तिदर्शनेन स्मरणापत्त्या व्यक्त्यन्तरसम्बन्धज्ञानस्य व्यक्त्यन्तरस्मरणाहेतुत्वात्, शक्तेर्मीमांसकमते[1] पदार्थान्तररूपत्वात्, तस्याश्च सम्बन्धिकत्वेन सम्बधिभेदेन भिन्नतया तत्तद्व्यक्तिभेदेन भेदप्रसङ्गादनन्तशक्तिकल्पनापत्तिश्च ।

---

1. अत्र मीमांसकाः—शब्दानां जातौ शक्तिः, लाघवात्, व्यक्तीनामानन्त्येन तत्र शक्तौ गौरवात् । जातेः शब्दशक्यत्वे "जात्याख्यायामेकस्मिन्०" [१।२।५८] इति सूत्रम् । 'सवर्णेऽण्ग्रहणमपरिभाष्यम्, आकृतिग्रहणात् सिद्धम्' । इति वार्तिकम् "सरूप" [१।२।६४] सत्रस्थम् 'आकृतिं वाजप्यायनः' इति भाष्यञ्च प्रमाणमित्याहुः, तत्, न; व्यक्तीनामानन्त्येऽपि शक्यतावच्छेदकजातेरुपलक्षणत्वेन तदैक्येन च तादृशजात्युपलक्षितव्यक्तौ शक्तिस्वीकारेणानन्तशक्तिकल्पनाविरहेणागौरवात् ।

वस्तुतस्तु 'न ह्याकृतिपदार्थकस्य द्रव्यं न पदार्थः' इति सरूपसूत्रभाष्याद् विशिष्टमेव वाच्यम्, तथैवानुभवात्, अनुभवसिद्धस्यापलापानर्हत्वाच्च । लिङ्गम्, सङ्ख्या कारकञ्च प्रादिपदिकार्थः,

एकं द्विकं त्रिकं चैव चतुष्कं पञ्चकं तथा ।
नामार्थ इति सर्वेऽमी पक्षाः शास्त्रे निरूपिताः ।।

इत्यनेन जातिव्यक्तिलिङ्गसङ्ख्याकारकाणां नामार्थत्वबोधनात् । प्रत्ययानां द्योतकत्वेन प्रकृतेर्वाचकत्वं युक्तम् । धातुप्रत्ययप्रत्ययान्ततदादिभिन्नो योऽर्थवान् शब्दः, तत्वं प्रातिपदिकत्वमित्यनुगतस्य प्रातिपदिकत्वस्य शक्ततावच्छेदकतया नानन्तशक्ततावच्छेदकत्वकल्पनम्, न वा शक्त्यानन्त्यम् । शक्त्यानन्त्येऽपि फलमुखगौरवस्यादोषत्वान्न दोषः ।

किञ्च, 'गौः शुक्लश्चलो डित्थः' इत्यादीनां जातिगुणक्रियासञ्ज्ञाशब्दत्वेन विषयविभागो न सिध्येत्। तथा च 'गौः शुक्लश्चलः' इत्यादीनां सहप्रयोगानुपपत्तिरिति चेत्, न; येन रूपेणोपस्थिते शक्तिग्रहः, तेन रूपेण पदार्थोपस्थितिः। स च धर्मोऽशक्योऽपि पदात् स्मृतः शाब्दबोधे भासते। अतो [यज्] जातिप्रकारकबोधजनकः, तदवच्छिन्नशक्तिमान् वा जातिशब्द इति विषयविभागसम्भवात्। तत्राव्यापकस्यापि तदवच्छेदकत्ववत्, अलक्ष्यस्य लक्ष्यतावच्छेदकत्ववत्, अकारणत्वेऽपि कारणतावच्छेदकत्ववत्, अशक्यत्वेऽपि शक्यतावच्छेदकत्वस्य जात्यादौ सम्भवात् तान [ताम् अ]वच्छेदकीकृत्य स्ववृत्तिजात्याद्याश्रयत्वरूपसामान्यलक्षणाप्रत्यासत्त्योपस्थितसर्वव्यक्तिशक्तिग्रहसम्भवान्नानन्त्यव्यभिचारौ[1]। नापि गोपदादश्वबोधः। न च तस्याशक्यत्वे तत्प्रकारकबोधानापत्तिरिति वाच्यम्, हस्तिमात्रादौ हस्तिपकादिसम्बन्धग्रहणात्तद्रूपेणोपस्थितिवत् सम्भवात् ससम्बन्धिकपदार्थमात्र एव यं धर्ममुपलक्षणीकृत्य सम्बन्धग्रहः, तद्विशिष्टोपस्थापकत्वात्।

ननु उपलक्षणत्वम्—तच्छब्दजन्योपस्थितिविषयत्वेन तद्वृत्तितामात्रेण [वा]। नाद्यः, अन्योन्याश्रयापत्तेः। नान्त्यः, घटत्वादिवद् द्रव्यादेरपि घटादिवृत्तित्वेन, शक्त्या सह सामानाधिकरण्यसम्बन्धेन च घटपदाद् द्रव्यत्वप्रकारकबोधापत्तेः।

किञ्च, अशक्यस्य बोधेऽतिप्रसङ्ग इति चेत्, न; घटत्वादेः शाब्दबोधप्रकारतायां तदंशे तत्पदशक्यतावच्छेदकत्वस्यैव प्रयोजकत्वेनादोषात्। शक्यता-

---

यद्यपि अन्वयव्यतिरेकाभ्यां विभक्तीनामेव संख्यावाचकत्वकल्पनमुचितम्, तथापि 'दधि मधु चानय' इत्यादौ विभक्तिं विनापि सङ्ख्याकारकप्रतीत्या व्यतिरेकव्यभिचारात् तदौचित्यं हेयमेवेति।

वस्तुतस्तु न वा सङ्ख्यावाचिका प्रकृतिः, विभक्तिर्वा, किन्तु 'घटः' इति विभक्त्यन्तसमुदायः सङ्ख्याविशिष्टघटवाचकः। तदुक्तम्—

'वाचिका द्योतिका वा स्युर्द्वित्वादीनां विभक्तयः।'

शक्तताव‍च्छेदिका तत्तदानुपूर्वीति न कश्चिद् दोषः।

विशेषणतया शब्दोऽपि शाब्दबोधे भासते, 'युधिष्ठिर आसीत्' इत्यादौ युधिष्टिरशब्दवाच्यः कश्चिदासीदिति बोधात्। तथा चोक्तम्—

नो सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते॥ इति।

(वा०प०, ब्र०का० १२३)

1. 'व्यक्तीनामानन्त्यात् शक्त्यानन्त्यप्रसङ्गः' शङ्का अपाकृता 'नानन्त्यव्यभिचारौ' इत्यनेन।

इदमत्राकूतम्—धर्ममुपलक्षणीकृत्य शक्तिग्रहाद् वस्तुतस्तद्धर्माकृतिविशिष्टा व्यक्तिर्बुद्ध्यते, न तु तद्धर्मप्रकारेण। एतदेव जात्यादेरुपलक्षणत्व-

वच्छेदकत्वञ्च तत्पदशक्तिघटकबोधीयविशेष्यतावच्छेदकत्वम्। तथा च तत्सम्बन्धेन तद्धर्मावच्छिन्नत्वविशिष्टतादृशविशेष्यतासंसर्गकशक्तिज्ञानमेव कारणम्। घटादिपद-शक्तिग्रहे च घटत्वादेरेव विशेष्यतावच्छेदकत्वम्, न द्रव्यत्वादेरिति स्वीकारेणा-दोषात्। एवं सर्वत्रोह्यम्।

न च यत्र द्रव्यपदं गुणवत्त्वेन द्रव्यबोधजनकमिति शक्तिग्रहः, तत्र द्रव्यत्वस्य विशेष्यतावच्छेदकत्वे तत्प्रकारकबोधापत्तिरिति वाच्यम्, द्रव्यत्वस्य विशेष्ये प्रकारत्वेऽपि विशेष्यतावच्छेदकत्वाख्यविषयताविशेषस्य गुणवत्त्व एव [1]स्वीकाराद् न दोषः। इदमेव धर्मितावच्छेदकमित्युच्यते। अत एव न्यायनयेऽप्याकाशादिपदानां शब्दाश्रयत्वविशिष्टेऽशक्तत्वेऽपि ततः शब्दाश्रयत्वरूपेण बोधः। शब्दाश्रयत्वादि-विशिष्टविशेष्यकसम्बन्धग्रहस्यैव तद्विशिष्टविषयकस्मृत्यादिहेतुत्वाङ्गीकारान्न क्षतिरिति मणिकृतोक्तम्।

यत्तु शब्दाश्रयत्वस्याकाशपदवाच्यत्वानङ्गीकारे आकाशपदान्निर्विकल्पक-मेव। निर्विकल्पकत्वञ्च तदंशे तत्पदोपस्थाप्याप्रकारत्वम्, न तदंशे सामान्यतो निष्प्रकारकत्वम्, विभक्त्युपस्थाप्यैकत्वादीनां तदंशे प्रकारत्वावश्यकत्वात्। पदार्थोपस्थितिस्तु निष्प्रकारिकैव। न च स्मृतावनुभवसमानाकारत्वस्यैव सिद्धान्त-सिद्धत्वेन निर्विकल्पकस्मरणानुपपत्तिरिति वाच्यम्, प्रकारांशे मोषस्वीकारेणा-दोषादिति। तत्, न; जात्यतिरिक्तस्य स्वरूपतः पदार्थान्तरे प्रकारत्वासम्भवेन 'आकाशगामी' इत्यादौ शाब्दबोधानुपपत्तेः, [2]अन्वयितावच्छेदकावच्छिन्न एव पदार्थान्तरान्वय इति नियमानुपपत्तेश्च।

त्वम्, यत् स्वाश्रयाणां सर्वेषां स्वरूपतः शक्तिग्रहविषयत्वं सम्पाद्य स्वयं शक्तिग्रहाविषयो बोधाविषयश्च भवति। यथा 'काकवन्तो देवदत्तस्य गृहाः' इत्यत्र काकः स्वोपलक्षिततृणत्वादिना तद्गृहमितरेभ्यो व्यावर्त्तयति, तथा जातिर्व्यक्तीरुपस्थाप्य स्वोपलक्षिताभिर्व्यक्तिभिः शक्तिमितरेभ्यो व्यावर्त्तयति। एवञ्च शक्यव्यक्तीनामानन्त्येऽपि उपलक्षणीभूतघटत्वादिजातेरैक्याच्छक्ते-रैक्यम्, कारणताया निरूपकाश्रयव्यक्तिबाहुल्येऽप्यवच्छेदकदण्डत्वादेरैक्यवत्। शक्यतावच्छेदकभेद एव शक्तेर्भेद इति नास्ति अनन्तशक्तिकल्पनगौरवम्।

1. 'स्वीकारेणादोषात्' इति पाठोऽत्र युज्यते, 'न च' इति शङ्कायां पञ्चम्यन्तपाठे नैव समाधानस्याचार्यशैलीदर्शनात्।

2. यथा अन्वयितावच्छेदकं यद् घटत्वादिकम्, तदवच्छिन्ने घट एव पदार्थान्तरस्य नीलादेरन्वयः, न तु घटत्वे। अत एव नित्यस्य घटत्वान्वयाभिप्रायेण न 'नित्यो घटः' इति प्रयोगः।

न च शब्दाश्रयत्वेनाकाशपदाद् बोधे 'आकाशः शब्दाश्रयः' इति प्रयोगानापत्तिः; तत्राष्टद्रव्यान्यद्रव्यत्वेन, आकाशपदवाच्यत्वेन वोपलक्षितेऽपि तत्पदशक्त्यङ्गीकाराददोषः, तात्पर्यतश्च निर्णयः। न च नानाधर्मावच्छिन्नैकधर्मिणि शक्तिरसांदृष्टिकीति वाच्यम्, अप्रयोजकत्वात्। तादृशधर्मान् विशेष्यतावच्छेदकीकृत्य लक्षणाया एवाभ्युपगमान्न दोषः। एवं यत्र द्रव्यादिपदस्य सामान्यावच्छिन्ने शक्तस्य सुवर्णाद्याभिप्रायेण प्रयोगेऽपि बोध्यम्। एवं विशेषधर्मावच्छिन्ने शक्तस्य सामान्यधर्मावच्छिन्नविशेष्यकबोधाभिप्रायेण प्रयोगेऽपि बोध्यम्।

यथा दुःखासम्भिन्नसुखशक्तस्वर्गपदस्य सुखसामान्यप्रयोगे लक्षणेत्येव च युक्तम्। शक्त्याप्रवृत्तिनिमित्तैकदेशं परित्यज्य न बोध इत्यनुभवात्। तादृशबोधे तद्रूपांशे शक्तिघटकबोधनिरूपितविशेष्यतावच्छेदकत्वावगाहिशक्तिज्ञानत्वेन हेतुत्वान्नातिप्रसङ्गः। अत एव च 'गङ्गायां घोषः' इत्यादौ तीरत्वादिनोपस्थितिः। दण्डाद् घटत्वेन घटस्य, घटाच्च दण्डत्वेन दण्डस्योपस्थितिरिति सङ्गच्छते। [1]जातिमात्रे शक्तौ हि 'गां दद्यात्' इत्यादौ गोत्वदिदानासम्भवादनुपपत्तिः। न च लक्षणया व्यक्तिबोधः, शक्यसम्बन्धरूपलक्षणाया अग्रहेऽपि तद्भानात्, सर्वेषु विशिष्टबोधकवाक्येषु वृत्तिद्वयकल्पनायां गौरवाच्च इत्येके।

केचित्तु—गवादिपदानां धर्म एव शक्तिः, नानाव्यक्तीनां शक्यत्वे गौरवात्। न च प्रत्येकं व्यक्तिभिर्विनिगमनाविरहः। एवं हि व्यक्त्यन्तरे लक्षणायां [2]स्वसमवेतसमवायित्वं संसर्ग इति गौरवम्, जातिशक्तौ च [3]स्वसमवायित्वं [4]तथेति लाघवम्।

किञ्च व्यक्तिवादिनापि आनन्त्यव्यभिचारवारणाय तस्याः शक्यतावच्छेदकत्वमवश्यं वाच्यम्। अत एवैकाकारप्रतीतिसिद्धिः।

---

1. अत्र जातिपदं तत्तत्प्रवृत्तिनिमित्तस्योपलक्षणम्। तेनाकाशत्वाभावत्वादीनां जातित्वाभावेऽपि न क्षतिः।
2. स्वम् = व्यक्तिः, तत्र समवेता जातिः, तत्समवायित्वं व्यक्ताविति लक्षणसमन्वयः।
3. स्वम् = जातिः, तत्समवायित्वं व्यक्ताविति।
4. संसर्ग इत्यर्थः।

एवञ्च लाघवात् सैव वाच्याऽस्तु, व्यक्तौ शक्तेर्जातौ तदवच्छेदकत्वस्य कल्पने गौरवात्। यथा तव जातौ शक्यतावच्छेदकता निरवच्छिन्नैव, एवं शक्तिरपि तस्यां तथैवेति न गोत्वत्वादिप्रवेशाद् गौरवशङ्का। अत एव शाब्दबोधे व्यक्तौ तस्याः स्वरूपेणैव प्रकारता सङ्गच्छते।

न च गोपदशक्यमिति निर्धर्मकशक्तिग्रहासम्भवः। प्राथमिकशक्तिग्रहस्यानुमित्यात्मकत्वेन निर्धर्मितावच्छेदिकाया अनुमितेरभावादिति वाच्यम्, अत्र पक्षे पदविशेष्यकस्य शक्तिघटके बोधे गोत्वादिप्रकारकस्यैव शक्तिग्रहस्य स्वीकारेणादोषात्। नहि समवायेनैव जातेः स्वरूपतः प्रकारतेति नियमः, 'घटं जानामि' इत्यादौ प्रकारितासम्बन्धेनापि घटत्वादेर्ज्ञानाद्यंशे प्रकारत्वाङ्गीकारात्। अत एव न विशिष्टे शक्तिः, [1]'नागृहीतविशेषण'न्यायेन जातेर्वाच्यत्वावश्यकत्वे तत्रैव शक्तेरुचितत्वात्।

नन्वेवम् 'गामानय' इत्यादौ वाहदोहाद्यन्वयानुपपत्तिः, न च साक्षात्सम्बन्धेन जातौ बाधेऽपि परम्परया तदन्वयोपगमान्न दोषः, 'गौर्जाता' इत्यादौ विशेष्यभूते गोत्वे अन्वयितावच्छेदकतया गोत्वत्वादिभानापत्तेः। शक्तौ तदन्तर्भावाद्यापत्तेश्च। जातेरपि प्रकारतयैव स्वरूपतो भानमिति नियमात्।

एवञ्च तेषां पदानां व्यक्तिबोधजनकत्वे विवादाभावेन व्यक्तिशक्तिः सिद्धैवेति चेत्, अत्र वदन्ति व्यक्तिशक्तावस्माकं न वैमत्यम्, अपि तु व्यक्तिशक्तिज्ञानहेतुतायामेव। अत एव व्यक्त्यंशे कुब्जा शक्तिरिति गीयते, तदंशे तज्ज्ञानानपेक्षणात्। अत एव व्यक्तेर्न वाच्यता, यद्विषयकत्वेन शक्तिज्ञानस्य [यद्विषयक] शाब्दधीजनकता, तत्त्वस्यैव तद्वाच्यताव्यवहारनियामकत्वात्। यथान्वयांऽशे

---

1. 'नागृहीतविशेषणा बुद्धिर्विशेष्यमधिगच्छति' इति न्यायस्वरूपम्। विशेषणविषयकबुद्धिर्विशेष्यं नावगाहते। विशेष्यविषयकत्वस्य विशेषणविषयकत्वनियतत्वमिति निष्कर्षः।

एवञ्च विशिष्टशक्तिवादे विशिष्टशक्तिग्रहस्य विशेषणविषयकत्वावश्यकतया तदुभयविषयकत्वस्य पदार्थोपस्थित्यादिकारणतावच्छेदकत्वकल्पनापेक्षया विशेषणविषयकत्वमात्रस्यैव तदवच्छेदकत्वकल्पना लाघवादुचितेति जातावेव शक्तिः स्वीकर्त्तव्येति फलितोऽर्थः।

कुब्जशक्तिसत्त्वेऽपि तद्विषयकत्वं शक्तिज्ञानजनकतायां नावच्छेदकम्, तथा व्यक्त्यंशे तत्सत्त्वेऽपि तद्विषयकत्वस्य शक्तिज्ञानजनकतानवच्छेदकत्वान्न व्यक्तौ वाच्यत्वव्यवहारः। गोत्वविषयकत्वस्यैव च निवेशाद् गोत्वादेर्वाच्यता।

एवञ्चात्र पक्षे कार्यकारणभावावच्छेदककोटौ व्यक्त्यनन्तर्भावमात्रेणैव 'गौर्गोपदशक्या' इति शक्तिग्रहोऽपि वक्तुं शक्यः। परन्तु तस्य गोत्वप्रकारकज्ञानत्वेन व्यक्तिविषयतामनन्तर्भाव्यैव कारणत्वाद् व्यक्तेरवाच्यतोपपत्तिः। एवञ्च तदंशे कुब्जत्वव्यवहारः, पदविशेष्यकशक्तिग्रहमते तु तज्ज्ञानानपेक्षणादपि कुब्जशक्तित्वमिति।

एवं व्यक्तिशक्तिवादे जात्यंशे [1]'कुब्जा' शक्तिरिति बोध्यम्।

यत्तु भट्टाः—पदाद् व्यक्तेर्न स्मरणम्, अनुभवो वा, नापि तत्र कुब्जा शक्तिः, किन्त्वाक्षेपः; आक्षेपिका च जातिरेव। आक्षेपश्चानुमानम्, तादात्म्येन जातेराधेयतया व्यक्त्याक्षेपकत्वेन न वैयधिकरण्यम्। अनुमानञ्च गोत्वं गवाश्रितम्, गोनिष्ठप्रतियोगितानवच्छेदकधर्मवत्त्वात्, किञ्चिदाश्रितं वा, जातित्वादिति, तत्, न; तादृशहेतूपस्थितेरसार्वत्रिकत्वात्, गोपदात् तादृशरूपेण गोत्वादेरनुपस्थितेश्च।

किञ्च, आक्षेपितव्यक्तौ कर्मत्वाद्यन्वये 'प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तिभङ्गः, [2]'धूमोऽयं ज्वलति' इत्यादावन्वयबोधवारणाय पदजन्यपदार्थोपस्थितेः शाब्दबोधकारणत्वेनाक्षेपितेन पदार्थान्तरान्वयानापत्तिश्च। एतेनार्थापत्तिराक्षेप इत्यपास्तम्।

---

1. 'हृदयं यदि वा पृष्ठमुन्नतं क्रमशः सरुक्।
क्रुद्धो वायुर्यदा कुर्यात् तदा तं कुब्जमादिशेत्॥'
इत्यायुर्वेदे कुब्जलक्षणं प्रतिपादितम्। स यथा विकृतेनाङ्गेन किमपि विधातुमशक्तः, अविकृतेन हस्तपादादिना भोजनादिकं सम्पादयति, तथैव शाब्दबोधात् पूर्वमनुपस्थिता अत एवान्वयांशनिरूपिता पदेऽज्ञाता शक्तिः न शाब्दबोधमुपकरोति, ज्ञाता च शाब्दबोधमुपकरोत्येव।
यद्यपि उक्तलक्षणलक्षितकुब्जत्वं चेतनधर्म एव, तथाप्यत्र समानधर्मत्वादचेतनायां शक्तावप्यारोप इति तत्त्वम्।

2. 'घटपदात् एकसम्बन्धिज्ञानविधयोपस्थिताकाशचैत्रादेः घटपदजन्यशाब्दबोधविषयत्ववारणाय च' इत्यपि बोध्यम्।

न च समानसंवित्संवेद्यत्वमाक्षेप इति वाच्यम्, द्रव्यमित्यादिघटज्ञाने घटत्वज्ञानाभावात्। यदि तु 'गामनाय' इत्यादौ स्वाश्रयवृत्तित्वरूपपरम्परया कर्मत्वादौ जातेरन्वयः, तेन सम्बधेन गोत्वादिमत्त्वस्याधेयतासम्बन्धेन गवादिव्याप्यत्वात्; गवादिमत्त्वं विनानुपपत्तेश्च; आनयनकर्मत्वाधेयत्वादिसम्बन्धेन गवादिव्यक्तिप्रकारिका धीः आक्षेपात् संसर्गघटकतया शाब्दबोधे व्यक्तिभानेऽपि कर्मत्वाद्यंशे गोत्वाद्यवच्छिन्नव्यक्तिभानानुरोधेनाक्षेपादरः। पदाज्जातेः स्मरणं तु निर्विकल्पकमेवेति तदाशय उच्यते सोऽपि दुष्टः, प्रागुक्तेः।

जातिशक्तस्य व्यक्तौ लक्षणेति मण्डनानुयायिनः। तेषामयं भावः -- लक्षणया जातिप्रकारक एव बोध इति नानुभवविरोधः, नीलादिपदानां शक्यनीलादिगुणपुरस्कारेण लक्षणया बोधकत्ववत् शक्यजातिपुरस्कारेण लक्षणया गवादिपदस्य बोधकत्वात्।

शक्यादन्येन रूपेण ज्ञाते भवति लक्षणा।

इति तु प्रायिकमिति। तत्, न; यतो व्यक्तौ लक्षणा निरवच्छिन्ना, सावच्छिन्ना वा। नाद्यः, असम्भवात्। नान्त्यः, तत्पक्षे हि जातेरेवा[1]वाच्छेदकत्वं वाच्यम्। तथा च लक्ष्यताच्छेदकतयैव जातिभानोपपत्तौ तत्र शक्तिकल्पना व्यर्था। न च शक्यसम्बन्धरूपलक्षणानिर्वाहाय तत्र शक्तिरुपेया। एवञ्च स्वातन्त्र्येण शक्तेरनुपयोगितया तस्या वृत्तित्वानुपपत्तेः।

ननु "जात्याकृतिव्यक्तयः पदार्थः" इति गौतमसूत्रेण गवादिपदात् संस्थानविशेषरूपाकृतेरपि बोधस्यानुभविकत्वप्रदर्शनेन परैर्जात्याकृत्युभयविशिष्टव्यक्तौ शक्तिरङ्गीक्रियते। तत्र जातेः साक्षात्समवायसम्बन्धेन व्यक्तिविशेषणत्वात् प्रवृत्तिनिमित्तत्वम्, अवयवसंयोगरूपाकृतेस्तु सामानाधिकरण्यरूपपरम्परया विशेषणत्वान्न तत्त्वम्। 'पिष्टकमय्यो गावः' इत्यादौ केवलाकृतिविशिष्टगवादौ लक्षणा।

एवञ्च जातिशक्तिवादे आकृतिविशिष्टव्यक्तौ लक्षणा। तत्र शक्त्युपस्थितजातेरन्वयः।

न चाकृतावेव शक्तिः, जातिविशिष्टे लक्षणेति वैपरीत्यमेवास्तु, आकृतेरवयव[1]संयोगरूपाया अनन्तत्वेन तदपेक्षया एकस्या जातेरेव शक्यत्वौचित्यात्।

---

1. 'संयोगविशेषरूपायाः' इति पाठः समीचीनः।

---

१. ख० पु० 'वच्छिन्नत्वम्'।

न चावयवसंयोगनिष्ठजातिरेव शक्या, तदन्वयश्च स्वाश्रयघटितपरम्परयेति वाच्यम्, आकृतिप्रकारकबोधस्यैवानुभवात् । व्यक्त्यनुपरक्तकेवलजातौ प्रयोगविरहश्च न शक्त्यभावसाधकः, अप्रयोजकत्वात् ।

न च कदाचित् केवलजातिमात्रेण 'गौर्नित्या' इति प्रयोगापत्तिः, शक्त्या स्वरूपेणोपस्थितायाः जातेः समानपदोपात्तो धर्मिण्याश्रयतासम्बन्धेनैवान्वयस्य व्युत्पन्नत्वादिति चेत्, न; एवं हि तादृशबोधे आकाङ्क्षाया अपि कारणत्वकल्पने गौरवेण विशिष्टशक्तेरेवोचितत्वात्। तस्मात् कुब्जशक्तिरित्येवोचितम्, व्यञ्जनया तद्बोधः—इत्यन्ये ।

वस्तुतस्तु जातिशक्त्यैव ज्ञातया जातिव्यक्त्योरुपस्थितौ तात्पर्यात् कदाचिज्जातिर्विशेष्या, व्यक्तिर्विशेषणम्; कदाचिद् व्यक्तिर्विवशेष्या, जातिर्विशेषणम् । एवञ्च जातौ परम्परया वाह्यान्वयः; व्यक्तिरेव चान्वयितावच्छेदिकेति परम्परयान्वयपक्षे न प्रागुक्तदोषः । अत एव "जात्याख्यायामेकस्मिन्" [१।२।५८] इति "जातिरप्राणिनाम्" [२।४।६] इति च सङ्गच्छते । अत एव च जातिप्रधान्ये समाहारद्वन्द्व एव, व्यक्तिप्रधान्ये त्वितरेतरयोग एवेति भाष्यादिव्यवहाराश्च सङ्गच्छन्ते ।

[1]इदं सर्वपक्षेषूह्यम्—जातिप्रकारशक्तिधिय एव जातिविशिष्टव्यक्तिबोधकत्वाद् न घटत्वादिपदाद् व्यक्तिबोधः । भावप्रत्ययरहितपदघटितजातिशक्तिधीरेव तद्बोधे हेतुरित्यन्ये ।

एवं शुक्लशब्दादिषु गुणिबोधकेषु गुणः शक्यः, पाचक इत्यत्र क्रियाः, डित्थादौ शब्द एव । तत्र च डित्थपदं डित्थपदवति शक्तमित्येवं शक्तिग्रहः । न च शक्तिग्रहात् पूर्वं तत्पदवैशिष्ट्यस्य मानान्तरेणाग्रहात् तथाशक्तिग्रहासम्भवः। सम्बन्धसामान्येन तद्वैशिष्ट्यग्रहात्, भाविसञ्ज्ञाविज्ञानवद् वा न दोषः । तादृशशक्ति-

1. अत्रायं विवेकः—"सरूपाणामेकशेषः" इत्येकशेषारम्भाद् व्यक्तिरपि पदार्थ इत्येव सिद्धम्, न तु केवलव्यक्तिस्तथेति, जातिविशिष्टव्यक्तेः पदार्थत्वेऽपि तदारम्भस्यावश्यकत्वात् । अण्ग्रहणस्य भाष्यकृत्प्रत्याख्यानेन, सरूपसूत्रस्य शास्त्रीयप्रक्रियामात्रनिर्वाहकत्वस्याकरे सिद्धान्तितत्वेन च न ताभ्यां व्यक्तिमात्रस्य प्रातिपदिकार्थत्वं सिद्ध्यतीति व्यवहारमात्रमेव शरणं केवलव्यक्तिवादिनामिति तत्त्वम् ।

वस्तुतस्तु विशिष्टस्यैव पदार्थत्वम् । यद्यपि 'आकृतिपदार्थस्य द्रव्यं न पदार्थः' इत्यादिभाष्याद् विशकलितयोरेवाकृतिव्यक्त्योः पदार्थत्वं प्रतीयते, तथापि 'कस्यचित् किञ्चिद् गुणभूतम्, किञ्चित् प्रधानम्' इत्युत्तरभाष्यपर्यालोचनया विशिष्टे शक्तिरवसीयते ।

ग्रहस्य च वाचकतासम्बन्धावच्छिन्नपदप्रकारकबोधत्वस्यैव कार्यतावच्छेदकत्वाद् नातिप्रङ्गः।

ननु पाचकादीनां कथं क्रियाशक्तत्वमित्युच्यते—पचेः क्रियायां शक्तत्वेनाकस्य कर्त्तरि शक्तत्वेन तत्तत्पदाभ्यामुपस्थितयोराकाङ्क्षावशात् परस्परान्वयेन पाचकशब्दस्य शक्तेरेवाभावादिति चेत्, न; कुम्भकार इत्यादेरेकार्थीभावविषयाणामत्रोदाहरणत्वेनाक्षतेः।

वस्तुतस्तु "कर्त्तरि कृत्" [३।४।६७] इत्यस्यैकजातीयार्थकत्वाय पाचकादावप्येकार्थीभावः। अत एव पाचकादिपदान्नोद्देश्यविधेयभावेनान्वय इति दिक्।

वस्तुतो गुणादीनामपि शक्यत्वे आनन्त्यव्यभिचारयोः सत्त्वेन तत्रापि गुणगतजातिरेव शक्या। एवञ्च पाचकादिषु क्रियागतजातिः, गुडतण्डुलपाकादिषु भिन्नेषु पाकत्वस्यैकस्य जातिरूपस्याङ्गीकारात्। डित्थादावपि डित्थादिशब्दगता जातिः, शुकाद्युच्चारणभेदेन डित्थादिशब्दानां नानात्वात्। आकाशपदादेः शक्तिरुक्तैव।

यद्वा, कल्पभेदेन भिन्नेषु आकाशत्वमपि जातिरखण्डोपाधिर्वा तच्छक्यमिति वदन्ति।

पदान्नियमतो जातिविशिष्टव्यक्तिमानेन तत्रापि बोधकतारूपा शक्तिरस्त्येवेति विशिष्टमेवेति शक्यम्। घटत्वप्रकारकघटविशेष्यकबोधे च घटत्वप्रकारकशक्तिज्ञानत्वेनैव हेतुतेति न गौरवम्, नापि घटत्वादिपदेभ्यो व्यक्तिबोधः। उक्तं हि भाष्ये—'नह्याकृतिपदार्थकस्य द्रव्यं न पदार्थः, नापि द्रव्यपदार्थकस्याकृतिर्न पदार्थ इति' इत्यन्ये।

अत्र पक्षत्रये लिङ्गस्यावाच्यत्वेऽपि न त्रैलिङ्ग्यम्, तत्तल्लिङ्गाभिधायि, प्रत्ययत्वेनैव शब्दानां तत्तल्लिङ्गताभ्युपगमात्। अन्वयव्यतिरेकाभ्याम् "स्त्रियाम्" इत्यधिकृत्य टाबादेर्विधानेन, "तस्माच्छसो नः पुंसि" [६।१।१०३] इत्याद्यनुशासनेन च तथैव युक्तत्वाच्च। एवं सङ्ख्यादावपि द्रष्टव्यम्।

अपरे तु—लिङ्गमपि नामार्थ एव। प्रत्ययार्थत्वे हि स्त्रीत्वस्य, स्त्रिया वा प्राधान्यापत्तिः। व्यक्तिशक्तावपि स्त्रीतादात्म्यापन्नाऽजाबोध एवानुभवसिद्धः, न त्वजातादात्म्यापन्नस्त्रीबोधः[1]।

---

1. अजपदादिति शेषः।

किञ्च, वागादिशब्दे विनाऽपि प्रत्ययं स्त्रीत्वस्य बोधात् प्रातिपदिकस्य शक्तत्वावश्यकत्वेन टापोऽपि शक्त्यन्तरकल्पने गौरवम् [वात्], लिङ्गानुशासनस्य प्रकृतावेव दर्शनाच्च। अत एव "कृदिकारादक्तिनः" इति वार्त्तिके 'अक्तिनः' इति चरितार्थम्। अन्यथा क्तिना स्त्रीत्वस्योक्तत्वान् ङीपोऽप्राप्तौ तद्वैयर्थ्यं स्पष्टमेव। अत एव व्यावक्रोशीत्यादौ "णचः स्त्रियामञ्" [५।४।१४] इत्यञि स्त्रियां विहितेऽपि स्त्रीप्रत्ययसिद्धिः। न च तवापि प्रकृत्यैवास्योक्तत्वात् स्त्रीप्रत्ययानापत्तिः; प्रकृत्युक्तस्य तस्याव्यावर्त्तकत्वात्। अन्यथा टाबादिविधीनां वैयर्थ्यापत्तिरिति दिक्।

ननु 'स्तनकेशवती स्त्री स्याल्लोमशः पुरुषः स्मृतः' इत्यादिलक्षणलक्षितावयवसंस्थानविशेषरूपलिङ्गस्याचेतने खट्वादौ बाधात् स्त्रीप्रत्ययानापत्तिः। किञ्चैवं दारानित्यादौ नत्वं न स्यात्, तदर्थस्य पुंस्त्वाभावादिति चेत्, न; आरोपेण निर्वाहसम्भवात्। आरोपे च लिङ्गानुशासनं मानमिति केचित्।

भाष्यकृतस्तु—सत्त्वरजस्तमसां प्राकृतगुणानां वृद्धिः; पुंस्त्वम्, अपचयः, स्त्रीत्वम्, स्थितिमात्रं नपुंसकत्वम्। अत एवोत्कर्षापकर्षसत्त्वेऽपि स्थितिमात्रमादाय "सामान्ये नपुंसकम्" इत्युद्घोषः। उत्कर्षापकर्षसाम्यावस्थात्रयसाधारणस्थितिमात्रविवक्षायां नपुंसकं भवतीति तदर्थः। ईदृशावस्थात्रयस्य पदार्थमात्रे सत्त्वादिदं केवलान्वयि; 'इयं व्यक्तिः, इदं वस्तु, अयं पदार्थः' इति व्यवहाराणां सर्वत्राप्रतिबद्धप्रसरत्वादर्थनिष्ठञ्च। तथा च **भाष्यम्**—'एकार्थे शब्दान्यत्वाद्दृष्टं लिङ्गान्यत्वम्, अवयवान्यत्वाच्चेति'।

एकस्मिन्नेवार्थे पुष्यः; तारका; नक्षत्रमिति शब्दनानात्वदर्शनात् स्तनकेशाद्यतिरिक्तमेव लिङ्गम् 'कुटी, कुटीरः' इत्यादौ रेफस्यावयवस्योपजने लिङ्गभेददर्शनाच्चेत्यर्थ इति कैयटः।

पुंल्लिङ्गः शब्द इति तु वाच्यवाचकयोरभेदोपचाराद् बोध्यम्। अर्शआद्यजन्तं वा तत्।

न चैवमविकारिणि एतदभावेन 'ब्रह्मन्' शब्दे नपुंसकतानापत्तिरिति वाच्यम्, आत्मनि सर्वस्यास्तद्धेत्वेन [ध्यस्तत्वेन] परम्परया तत्रापि तत्सत्त्वात्। अत एवात्मा ब्रह्मेत्यादि व्यवहाराः।

न चैवम् 'कश्चिदपि सत्त्वादिः स्वस्मिन्नात्मनि मुहूर्त्तमप्यवतिष्ठते, वर्द्धते वा, यावदनेन वर्धितव्यमपायेन वा युज्यते' इति भाष्योक्तेरुपचयादीनां क्षणिकत्वमवश्यं वाच्यम्।

एवञ्च युगपद्द्विलिङ्गत्वादिव्यवहारानापत्तिरिति वाच्यम्, व्यवहारस्य स्वसमकालिकपदार्थसत्तानपेक्षत्वात्। अत एव भूतभाविविषयकव्यवहारः सङ्गच्छते।

न चैवमप्युपचयादेर्विरुद्धस्यैकत्र समावेशायोगादेकस्य त्रिलिङ्गतानापत्तिरिति वाच्यम्, कोशादिप्रामाण्येन विरोधस्यैवाभावात्। तत्र कश्चिच्छब्द एकलिङ्गविशिष्टार्थे एव शक्तः, कश्चिल्लिङ्गद्वयविशिष्टे, कश्चित्तु त्रितयविशिष्टे इति लिङ्गानुशासनादिभ्यो निर्णेयम्।

एवं मधुशब्देनोपचयस्थित्युभयविशिष्टं मकरन्दादिकमेवोच्यते, उपचयमात्रविशिष्टं तु चैत्रादिकमित्यपि तत एव निर्णेयम्।

एषु च पुंसादिशब्दानां वृध्यादिवत् शास्त्रीयः संकेतः। अत एव भाष्ये उक्तम् "अवश्यं कश्चित् स्वकृतान्त आस्थेयः" इति। तत्र टिघुभादिवल्लघुभूतसञ्ज्ञाकरणस्य युक्तत्वेन गुरुभूतसञ्ज्ञाकरणसामर्थ्याद् नत्वादिशास्त्रप्रवृत्तौ लौकिकमपि लिङ्गं निमित्तत्वेनाश्रीयते। तत्र लौकिकेऽसम्भवे शास्त्रीय एव। तत्सम्भवे तु सामानाधिकरण्यसम्बन्धेन शास्त्रीयविशिष्टे लौकिके, न तु केवललौकिके, नापि केवलशास्त्रीये, महासञ्ज्ञाकरणसामर्थ्यात्, पुंसादिसंकेतानां संख्यासंज्ञाया इवार्थान्तरसंग्रहार्थं प्रवृत्तत्वेऽप्यर्थान्तरनिरासार्थमप्रवृत्तेश्च।

अत एव 'चञ्चाः पश्य' इत्यादौ शब्दशक्तिस्वभावादपचयविशिष्टस्यैव पुमादेर्भानमङ्गीकृत्य "लुपि युक्तवत्" [१।२।५१] इति सूत्रस्य "तदशिष्यम्" [१।२।५३] इत्यनेन प्रत्याख्यानं सङ्गच्छते। अन्यथा युक्तवद्भावेऽभावस्याप्यतिदेशान्न पुंस्त्वप्रयुक्तं कार्यम्, प्रत्याख्याने तु प्राप्नोतीति फलभेदः स्यात्।

एवञ्च स्त्रियां पशुनेत्यादिप्रयुक्ते शास्त्रीयलिङ्ग एव, नाभावादिकम्। पुंपशौ प्रयुक्ते तु शास्त्रीयविशिष्टे लौकिके। अत एव 'पशुना यजेत' इत्यादौ पुंस्त्वस्य विवक्षितत्वान्न स्त्रिया याग इति मीमांसकोद्घोषः।

तत्र पुंस्त्वस्येत्यस्य लौकिकपुंस्त्वस्येत्यर्थः। 'छागो वा मन्त्रवर्णात्' इति षष्ठान्त्याधिकरणन्यायेन छागरूपपशुविशेषस्येव मन्त्रवर्णस्य लौकिकपुंस्त्वविवक्षायां तात्पर्यग्राहकस्य सत्त्वाच्च, 'छागस्य वपायाः' इति मन्त्रे 'छागस्य' इति पठितस्य छागभिन्ने इव स्त्रियामसम्भवात्। आकारान्तच्छागशब्दस्य स्त्रीव्यक्तावप्रयोगेण लौकिपुंस्त्वसमानाधिकरणपारिभाषिकपुंस्त्वविशिष्टे शक्तत्वात्।

शास्त्रीयमपि लिङ्गं लौकिकलिङ्गवत् शाब्दबोधे भासते, तथानुभवात्, कोशादिप्रामाण्याच्च इत्याहुः। **वाक्यपदीये** तु—जातित्रयमुक्तम्। तत्रापि पूर्ववदेव प्रक्रिया।

तिस्रो जातय एवैताः केषाञ्चित् समवस्थिताः।
अविरुद्धा विरुद्धाभिर्गोमनुष्यादिजातिभिः ॥

इत्युक्तम्।

केचित् तु—शब्दनिष्ठमेव पारिभाषिकं लिङ्गम्, पुँल्लिङ्गः शब्द इत्यादिव्यवहारस्यासति बाधके गौणत्वायोगात्। 'भाषितपुंस्कात्' इत्यप्यर्थभेदेन शब्दभेदादुपपन्नम्। लिङ्गभेदस्तु न भेदप्रयोजकः, 'एकः शब्दोऽयं द्विलिङ्गः' इत्यादिव्यवहारात्। तत्र पुंस्त्वेनाभावः स्त्रीत्वादौ टाबादिकं द्योतकम्। तच्च शब्दनिष्ठमपि शब्दवाच्यम् अर्थपरिच्छेदकतयान्वेति। लिङ्गविशेषविशिष्टस्यैवार्थविशेषवाचकताया लिङ्गानुशासनशास्त्रसिद्धत्वात्। स्वाश्रयवाच्यत्वसम्बन्धेन लिङ्गस्यार्थव्यावर्त्तकत्वोपपत्तेः। अत एव प्रयोगनियमोऽपि। एवञ्च पशुनेत्यत्र पुंस्त्वस्य परिच्छेदकत्वान्न पशुस्त्रिया यागः। न च पशुशब्दस्य नित्यपुंस्त्वात् पदार्थादिशब्दोदितलिङ्गवत् साधारण्यात् कथं स्त्रीपशुव्यावृतिः, 'पश्वानय' इति ऋग्वेदे दर्शनात् पशुनेति पुंस्त्वस्य विवक्षितत्वमिति निर्णयेन च तस्य नित्यपुंस्त्वाभावनिर्णयात्, 'छागो वा मन्त्रवर्णात्' इति षष्ठान्त्याधिकरणन्यायेन निर्वाहाच्च। यथा 'सारस्वतौ मेषौ' इत्यत्र तद्धितप्रकृतिः [शब्दः] स्त्रीलिङ्गः, पुँल्लिङ्गो वेति सन्देहे 'सन्दिग्धे तु वाक्यशेषात्' इति न्यायेन 'एतद्वै दैव्यं मिथुनम्' इत्यर्थवादादेकशेषेण द्वयोर्ग्रहणं निर्णीयते।

न चैवं सर्वनामनिष्ठलिङ्गस्य चेतनाचेतनसाधारणस्त्रीपुंससाधारणत्वात् 'देवदत्तो यज्ञदत्ता चानेया अस्यै च मुद्रा देया' इति प्रेरणायां यज्ञदत्ताया अपि मुद्रादानापत्तिः। पूर्वोपस्थिततत्तद्रूपेणोपस्थापकात् सर्वनाम्नो देवदत्तत्वेनेव पुंस्त्वेनापि व्यावृत्तपूर्वोपस्थितपरामर्शान्न दोषः। अत एव गुणिपरशुक्लादिशब्दानां गुणांशस्याधिकस्य भानेऽपि विशेष्यपदोदितलिङ्गसङ्ख्यांशेऽनुवादत्वेन विशेष्यनिघ्नतोपपत्तिः। अत एव पदार्थमात्रविवक्षायां गुणोत्कर्षापकर्षरूपलिङ्गस्याविवक्षितत्वादवर्जनीयसाम्यावस्थया प्रयोगमभिप्रेत्य "सामान्ये नपुंसकम्" इति विधानं संगच्छते। 'औत्सर्गिकैकवचन'न्यायादजहल्लिङ्गानां दारादिशब्दानां नित्यबहुवचनान्तानामेकस्मिन्निव लिङ्गस्यार्थापरिच्छेदकत्वेऽपि तथाप्रयोग इत्याहुः।

एवञ्च त्रिकं प्रातिपदिकार्थः, संख्याकारके तु प्रत्ययार्थ एव, अनन्तप्रकृतीनां संख्याकारकयोः शक्तिकल्पनामपेक्ष्य प्रत्ययानामेव तत्र शक्तिकल्पनाया उचितत्वादित वदन्ति।

परे तु—संख्यापि प्रकृत्यर्थ एव, 'दधि, मधु' इत्यादौ विनाऽपि प्रत्ययं तत्प्रतीतेः। अनन्तशक्ततावच्छेदककल्पनागौरवं तु फलमुखत्वान्न दोषावहम्, तथा गृहीतबोधकत्वस्य प्रकृतिमात्रादपि तद्बोधेन तेषामपि तद्बोधकारणत्वावश्यकत्वेन कल्प्यस्याभावाच्च। अतिप्रसङ्गस्तु तत्तत्संख्याबोधे तत्तद्विभक्तिसमभिव्याहारकारणतया परिहरणीयः। स च 'अयं घटः' इत्यतो बोधवारणाय तवाप्यावश्यक इत्याहुः।

केचित्तु, कारकमपि तथेत्याहुः।

न चैवम् 'नामार्थप्रकारकबोधे सुबादिजन्योपस्थितिर्हेतुः' इत्यादिकं विलीयेतेति चेत्, न; विभक्तिद्योत्यार्थमादायोपपत्तेः। एते च सर्वे पक्षाः "सरूप"-सूत्रादौ भाष्ये स्पष्टा इति दिक्[1]।

केचित् तु शब्दोऽपि शाब्दबोधविषयः,

विषयत्वमनादृत्य शब्दैर्नार्थः प्रकाश्यते।

इति वाक्यपदीयेऽनुभवप्रदर्शनात्, 'गामुच्चारय' इत्यादावर्थोच्चारणासम्भवेन विना शब्दविषयत्वं शाब्दबोधासङ्गतेश्च। अतस्तत्रापि शब्दस्य शक्तिर्वाच्या।

---

1. स्वार्थो द्रव्यञ्च लिङ्गञ्च सङ्ख्या कर्मादिरेव च।
अमी पञ्चैव नामार्थास्त्रयः केषाञ्चिदग्रिमाः॥

इति पञ्च पक्षा इत्यर्थः।

अत्रायं विवेकः—संख्यामात्रं विभक्त्यर्थः, इतरच्चतुष्टयं प्रातिपदिकार्थः। तथा चोक्तम्—

'वाचिका द्योतिका वा स्युर्द्वित्वादीनां विभक्तयः' इति।

अयं भावः—लिङ्गादिनिरूपिता घटादिशब्दे पृथक् पृथक् शक्तिरङ्गीकर्त्तव्या, एकपदोपस्थितानामप्यर्थानामाकाङ्क्षावैचित्र्यात् परस्परमन्वयः। तत्र लिङ्गसंख्ययोः प्रकृत्यर्थे विशेषणत्वम्, कारकस्य विशेष्यत्वम्। अथवा कारकस्यापि द्योतकत्वाद् विशेषणत्वम्। प्रातिपदिकस्य लिङ्गसंख्याविशिष्टार्थकत्वे त्वेकत्वविशिष्टे द्वित्वादिविशिष्टे च शक्तिकल्पने गौरवम्, 'गोरूपम' इत्यादौ संख्याभानवच्चित्रबोधानुपपत्तिश्च। विशकलितपदार्थत्वपक्षे तात्पर्यग्राहकत्वाभावात् तादृशबोधनिर्वाह इति केचित्।

अन्ये तु—धातुवद् विशिष्ट एव शक्तिः। केवलघटत्वादिविशिष्टेऽपि पृथक् शक्तिस्वीकारात् संख्याद्यविषयकबोधनिर्वाह इत्याहुः।

एके तु—पञ्चानामपि प्रातिपदिकार्थप्रकारकशाब्दबोधे सुबादिजन्योपस्थितिर्हेतुः' इत्यादेर्विभक्तिद्योत्यार्थमादायोपपत्तिः कार्येत्याहुः।

परे तु—तद्विलयेऽपीष्टापत्तिरेव, द्योत्यार्थस्य विशेषणत्वेन तादृशबोधस्यैवाभावात्।

न च लक्षणया निर्वाहः, 'जबगडदेत्याह' इत्यादौ शक्याग्रहेण तत्सम्बन्धरूपलक्षणाया अग्रहात् । बाधादिप्रतिसंधानं विनैव बोधाच्च ।

किञ्चानुकरणस्थले यद्यनुकार्यानुकरणयोर्भेदः, तद्विवक्षा वा, तदा शब्दोऽपि प्रातिपदिकशक्यः । यथा पटदिति कुर्वित्याद्यनुकार्यध्वनीनामनुकरणाद् भेदो ध्वनिमयत्ववर्णमयत्वादिविरुद्धधर्मप्रतीत्या सिद्धः । "भुवो वुक्" इत्यादौ तु विवक्षा अर्थपदार्थकत्वशब्दपदार्थकत्वाभ्यां भेदाच्च । तथा च तत्र तदुपस्थित्यर्थमुपस्थितस्य तस्य शाब्दबोधविषयतानिर्वाहार्थं च शक्तिरवश्यमभ्युपेया । अत एव वृत्त्यार्थबोधकत्वरूपार्थकत्वात् प्रातिपदिकत्वे सुबाद्युत्पत्तौ जश्त्वादिसिद्धिः । तयोरभेदविवक्षायां तु श्रोत्रेणोपस्थित एव शाब्दबोधे भासते, न तु तत्र स्वतन्त्रवृत्तिकल्पना । तथा हि—'वृत्तिविषय एव शाब्दविषयः' इति नियमोऽतिप्रसङ्गनिरासाय कल्प्यते । स च निरूपकताश्रयतान्यतरसम्बन्धेन वृत्तिमान् तद्विषय इति नियमेऽपि नैव भवति तस्य शाब्दबोधविषयता ।

ननु एवं सति प्रत्यक्षोपस्थितघटादेरपि शाब्दबोधविषयत्ववारणाय शाब्दबुद्धिं प्रति वृत्तिसंस्कारजन्यपदार्थोपस्थितिर्हेतुरित्यवश्यं वाच्यम् ।

एवञ्चात्र वृत्तिमत्त्वे श्रोत्रादुपस्थितौ च सत्यामपि तादृशोपस्थित्यविषयत्वात् कथं शाब्दबोधविषयतेति चेत्, अत्र वदन्ति—गकारादयः क्वचिच्छक्ताः, वर्णत्वात्, नक्तादिपदं क्वचिच्छक्तम्, साधुपदत्वादिति सामान्यतोऽनुमानेन तत्पदवाच्यः कश्चिदर्थोऽस्तीत्याकारकः सामान्यतः शक्तिग्रह एव वाच्यत्वसम्बन्धेन पदप्रकारकबोधे हेतुरित्यनुभवसिद्धम् ।

अत एवाज्ञातार्थकेष्विदमेकं पदमिति ज्ञातेषु चैत्रगवयनलादिपदेषु श्रुतेषु 'क एदर्थः' इति प्रश्ने उपमानतल्लक्षणकथनादिना कश्चित् तन्नामा राजेत्यादिना तत्प्रतिवचनादि च दृश्यते । अत एव सादृश्याद्युपायेन तद्बोधकत्वेनोपमानादेः प्रसिद्धपदसामानाधिकरण्यादितस्तद्बोधकत्वेन कोशादेश्च प्रामाण्यं व्युत्पादयन्ति । एवमेवाप्रसिद्धार्थकपदेष्वनुभवः सर्वसिद्धः, न तु घटादिपदेष्विव तत्तज्जात्यादिरूपेण असम्भावितश्च तथाबोधः, नलत्वादिरूपेण शक्तिग्राहकाभावेन तेन रूपेण बोधकत्वासम्भवात् ।

न चातीतनलादिभाविचैत्रादिवर्त्तमानप्रसिद्धासन्निकृष्टवस्तुगोचरा अनादयो धारारूपेण विशिष्यबोधान्यथानुपपत्त्या कल्प्यन्त इति नैयायिकनव्योक्तम् [समीचीनमिति वाच्यम्], हेत्वसिद्धेः; विनैव तत्तद्वाचकपदश्रवणं तेषां स्मरणा-

पत्तेश्च। उद्‌बोधकाधीनव्यवस्थायां ज्ञानसंस्कारयोः कारणत्वस्यैवासिद्धयापत्तिः। पदप्रकारकबोधस्यैवानुभवाच्च। अन्यथोक्तप्रश्नाद्युच्छेदप्रसङ्गः।

किञ्च, देशान्तरप्रसिद्धं चैत्रं काश्यां शृण्वतां विशिष्यागृहीतसङ्गतिकानामपि नलादिपदादिव बोधानुभवात् तदनुरोधेनानादिसंस्काराद्विशिष्यशक्तिग्रह-सत्त्वाभ्युपगमे तेषामेव कालान्तरे गङ्गातटे तं पश्यताम् 'चैत्रोऽत्र नास्ति' इति वाक्याद् बोधो न स्यात्, गङ्गातटत्वं धर्मितावच्छेदकीकृत्य चैत्रत्वावच्छिन्न-प्रतियोगिताकाभाववत्ताज्ञानं प्रति तदेव धर्मितावच्छेदकीकृत्य चैत्रत्वप्रकारकतद्वत्ताधियः प्रतिबन्धकत्वस्य सर्वसिद्धत्वात्।

किञ्च, विशिष्यगृहीतसंगतिकानामिव तद्दर्शनात् पदस्मरणं स्यात् 'चैत्रोऽत्र न वा' इत्यादिसंशयश्च न स्यात्।

एतेन प्रमेयत्वादिरूपेण सकलानुभवोत्तरं प्रमेयत्वांशमोषे प्रथमतस्तज्जाति-विषयं निर्विकल्पकं स्मरणम्, ततस्तत्तद्रूपेण तत्तत्पदार्थोपस्थितिमादाय शक्तिग्रहः। न च सर्वेषामर्थानामेवं बोधापत्तौ सार्वज्ञ्यापत्तिः, फलबलकल्प्योद्‌बोधकवशादेव स्मृतेः क्वाचित्कत्वकादाचित्कत्वनियमादित्यपास्तम्, अनुभवविरुद्धतादृशस्मरण-कल्पने मानाभावाच्च।

एतेन वरुणादिपदानां पाशहस्तादिपदादुपस्थिते शक्तिग्रहः। न च तस्यापि शक्तिग्रहासम्भवादनुपपत्तिः, यौगिकेषु समुदायशक्तिग्रहानपेक्षणात्, अवयवानाञ्च पाशादिपदानां लोके शक्तिग्रहात्। एवमदृष्टादिपदेष्वप्यूह्यमिति परास्तम्, जातिविशेषरूपेण पाशहस्तादिपदादुपस्थित्यभावेन तेन रूपेण शक्तिग्रहासम्भवात्। अन्यथा प्रत्यक्षत उपस्थिते वरुणे वरुणादिपदेषु गृहीतशक्तिकानामिव त्वदुक्तरीत्या पाशादिपदे तद्ग्रहवतां पाशाद्यदर्शनेऽपि व्यक्तिमात्रदर्शनात् 'वरुणोऽयम्' इत्यादि-प्रत्ययापत्तिः। अत एव 'विष्णुः, नारायणः, कृष्णः' इत्यत्र सामानाधिकरण्यं सङ्गच्छते। अन्यथा 'घटो घटः' इत्यत्रेव तन्न स्यात्। पदप्रकारकबोधानुकूलशक्ति-ग्रहस्तूक्त एव। एवञ्च नलादिपदेभ्यो नलपदवाच्य इत्यादिक्रमेणैव बोधः।

तथा च घटत्वादिजातिवच्छक्तिसम्बन्धेन शक्यविशेषणतया घटादिपदजन्य-शाब्दबोधे पदस्यापि भानं नानुपपन्नम्। तत्र घटत्वादिजातिवच्छब्दांशे न वृत्तिविषयत्वम्, मानाभावात्, आश्रयत्वेनैव तत्कार्यसिद्धेः।

तथा च सम्बन्धोभयनिरूप्यत्वेन सम्बन्धिद्वयोपस्थापकत्वाविशेषाद् घटत्वाद्यवच्छिन्नशक्त्यैव घटादिवच्छब्दस्याप्युपस्थितौ सत्यामर्थबोधनतात्पर्ये सति विशेषणतया शब्दो भासत इति न दोषः। तत्रापि घटत्वादिरूपेण विशिष्य शक्तिग्रहवद्भ्यो घटादिपदेभ्यः पदजात्युभयप्रकारको बोधः। नलादिपदेभ्यस्तु पूर्वोक्तप्रकारेण तदसाधारणधर्मानुपस्थित्या सामान्यरूपेणोपस्थितव्यक्तौ शक्तिग्रहात् 'केवलव्यक्तिविशेष्यकः, केवलपदप्रकारको नलादिपदवाच्यः कश्चिदर्थः' इत्याकारको बोधः।

'गवित्ययमाह' इत्यादौ 'इति'शब्दसमभिव्याहारवशात् क्वचित् "स्वं रूपम्" [१।१।६८] इत्यादिशास्त्रबलात् क्वचित् प्रकरणादिवशात्, क्वचिदन्वययोग्यताकाङ्क्षादिवशात् शब्दमात्रे तात्पर्यं गृह्यते। तत्र 'घटो नित्यः, स्वर्गी ध्वस्तः' इत्यादौ विशेषणांशवच्छब्दस्वरूपमात्रं प्राधान्येन तया शक्त्या बोध्यते। वृत्तिसत्त्वेऽपि तात्पर्यविरहादर्थांशो न बोध्यते, लवणमात्रतात्पर्यदशायां सैन्धवशब्दादश्ववद् बुद्धौ वा त्यज्यते।

न चार्थशक्त्यैव तात्पर्यवशात् प्राधान्येन शब्दस्यापि भानमित्ययुक्तम्, तत्प्रकारकव्यक्तिविशेष्यकबोधत्वस्यैव तद्वृत्तिज्ञानकार्यतावच्छेदकत्वात्। अन्यथा 'घटो नित्यः' इत्यादौ घटत्वे लक्षणा न स्यात्। प्राधान्येन बोधार्थं खलु तत्र लक्षणाश्रयणमिति वाच्यम्, तत्र घटत्वत्वादिरूपेण बोधानुरोधेन लक्षणाभ्युपगमात्। अन्यथा घटत्वनिर्विकल्पकापत्तिः। अत्रानुपूर्वीविशिष्टवर्णानां पदरूपत्वेन केवलतदुपस्थितावप्यानुपूर्व्या अवच्छेदकत्वेन भानान्नोक्तदोषः। विशेष्यव्यक्त्यंशाभानात् पदस्य विशेषणत्वं नास्तीति प्राधान्यमप्यर्था[दा]यातम्। मोषवादिन्यायनये प्रमेयत्वप्रकारकसकलानुभवात् प्रमुष्टविशेषणकव्यक्तिमात्रस्मरणाभ्युपगमवत् प्रमुष्टविशेषणकशब्दमात्रस्मरणे बाधकाभावात्, 'उच्चारय'इत्यादिसमभिव्याहारस्य मोष एवोपयोगात्।

एवञ्चार्थशक्तिज्ञानस्यैव पदप्रकारकबोधत्वादिकार्यतावच्छेदकमिति न दोषः। शक्तिग्रहवत्संस्कारैरुपस्थितत्वेन वृत्तिजन्योपस्थितिश्चास्तीति बोध्यम्।

एतेन 'गामुच्चारय'इत्युक्ते विकृतस्यैवोच्चारणापत्तिः, तादृशस्यैव श्रोत्रेणोपस्थितेः। शब्दस्याप्रकृत्यर्थत्वात् तत्र द्वितीयार्थाद्यन्वयानापत्तिः। स्वस्यैव प्रत्यक्षेण शीघ्रमुपस्थित्या गौरस्तीत्यादावपि स्वपरत्वापत्तिश्चेत्यादि परास्तम्। उक्ततात्पर्यवशाद् वृत्त्याऽविकृतस्यैव शब्दाद्युपस्थितेः। न चैवं तात्पर्येणैव सर्वनिर्वाहे

वृत्तिमात्रोच्छेदः, तस्य शब्दसामान्येऽहेतुत्वात्। किन्तु क्वचिच्छब्दजन्यबोधस्य प्रमात्वे नियामकम्, क्वचित् तथाबोधेऽपोति न वृत्तिं विना निर्वाह इत्यादि-वाक्यस्फोटे निरूपयिष्यामः।

एवञ्च सति तात्पर्ये शब्दः प्रधानम्, तदभावे धात्वर्थविशेषणमेवेति सिद्धम्। अत एव 'उद्भिदा यजेत' इत्यादौ नामधेयत्वं व्यवस्थाप्य तस्य विशेषणत्वेनान्वयात् 'उद्भिदभिन्नेन यागेनेष्टं भावयेत्' इति वाक्यार्थः। सञ्ज्ञात्वावगमस्तु सामानाधिकरण्यात्। यतः सामानाधिकरण्यं विशेषणविशेष्ययोर्वा, सञ्ज्ञासञ्ज्ञिनोर्वा। तत्रोद्भित्पदप्रसिद्धार्थस्य विना लक्षणां यागसामानाधिकरण्यानुपपत्तेर्नीलमुत्पलमित्यादिविशेषणविशेष्यभावासम्भवे न पदपरत्वमाश्रित्य द्वितीये पर्यवसानम्। विशेषणविशेष्यभावपदेन च वाचकतातिरिक्तसम्बन्धावच्छिन्न-परिच्छेद्यपरिच्छेदकभाव उच्यते। गुणगुण्याद्योरिव वाच्यवाचकयोरभेदस्यापि 'अयं गौः' इत्यत्र कः शब्दः इति भाष्ये तद्व्याख्यानकौस्तुभे, "वृद्धिरादैच्" [१।१।१] सूत्रभाष्ये च स्पष्टमुक्तत्वात्। यागवाचकता चोद्भित्पदे योगरूढिभ्याम्।

एवञ्च तद्बोधोत्तरं विजातोययागत्वावच्छिन्ने तत्पदशक्तिग्रहे वृत्तेऽन्यत्रोद्भित्पदेन तेनैव रूपेण यागोपस्थितिः, पदप्रकारिकैव वेत्यन्यत्। "वृद्धिरादैच्" [१।१।१] इत्यादावपि 'वृद्धिपदाभिन्ना आदैचः' इति वाक्यार्थः, प्रसिद्धवृद्धि-पदार्थस्यादैच्पदार्थाभेदबोधे तस्य पदपरत्वात्। 'सर्वनामानि' इत्यादौ तु महासञ्ज्ञाकरणबलात् पूर्वोक्तानुपपत्तेश्चार्थपदोभयपरता। सामानाधिकरण्य-सम्बन्धेनार्थविशिष्टपदाभेदस्तत्र वाक्यार्थः।

एवञ्च संज्ञिन उद्दिश्य सञ्ज्ञाभूतपदाभेद एषु विधेयः। न च पदम् उद्दिश्य सञ्ज्ञ्यभेद एव विधेयोऽस्तु। अत एव "वृद्धिरादैच्" इत्यत्रादैचां परनिर्देश इति वाच्यम्, "अदेङ् गुणः" [१।१।२] इत्यादौ दोषापत्तेः, मङ्गलार्थं वृद्धिशब्दस्य पूर्वं पाठ इत्यादिभाष्यप्रामाण्येन संज्ञापदस्यैव विधेयत्वौचित्याच्च, टिघुभादि-संज्ञापदानां मानान्तरासिद्धत्वेनोद्देश्यत्वासम्भवाच्च। उच्चारणकृतशब्दसिद्धिस्तु नास्मच्छास्त्रे विधेयताप्रतिबन्धिका, पणादीनां विधेयत्वानापत्तेरिति दिक्।

केचित्तु, पूर्वोक्तानुपपत्त्येवोद्भिदादिपदानां तत्काल एव नलादिपदवत् तत्पदवाच्यत्वेन सामान्यरूपेण शक्तिग्रहः, तेनैव च बोध इत्याहुः।

यत्तु, मीमांसकमते नाम्नि लक्षणेति। तत्, न; उक्तरीत्या क्लृप्तशक्त्यैव सिद्धेः। किञ्चैवं नामधेयत्वोच्छेदः गुणविधौ मत्वर्थलक्षणाभिया हि नामधेयत्व-

मुक्तम्, सा नामधेयत्वेऽपि चेत् कुतो गुणविधित्वत्यागः ? सामानाधिकरण्यानुपपत्तेर्गुणविधाविवात्रापि बीजत्वेनापेक्षणात् । नहि विना बीजं लक्षणेति दिक् ।

अत एव कथितपदत्वं दोषोऽपि क्वचिन्न दोषः ।

उदेति सविता ताम्रस्ताम्र एवास्तमेति च ।
सम्पत्तौ च विपत्तौ च महतामेकरूपता ।।

इत्यत्र ताम्रपदं विना न तादृशो बोध इति काव्यप्रकाशोक्तं सङ्गच्छते । तदुक्तं हरिणा—

ग्राह्यत्वं ग्राहकत्वञ्च द्वे शक्ती तेजसो यथा ।
तथैव सर्वशब्दानामेते पृथगवस्थिते ।।

अस्यार्थः—अन्धकारे चाक्षुषवारणाय द्रव्यचाक्षुषमात्रे आलोकसंयोगो हेतुरित्यवश्यं वाच्यम् । एवञ्च घटालोकसंयोगादेव घटस्येवालोकस्यापि यथा प्रत्यक्षम्, तथार्थगोचरशब्दनिष्ठशक्त्यैव शब्दस्यार्थस्य च भानम् । यथा वा घटचक्षुःसंयोगाभावे तस्मादेवालोकसंयोगादालोकस्यैव भानम्, तथार्थे तात्पर्यविरहे तद्वृत्त्यैव शब्दमात्रबोध इति ।

परे तु, वृत्त्यानुपस्थितावपि अभिहितान्वयवादे वृत्तिं विनैव यथाऽऽकाङ्क्षादिवशात् संसर्गस्य शाब्दबोधे भानम्, तथा शाब्दज्ञानसामान्यसामग्र्यैव तात्पर्याऽऽकाङ्क्षादिवशात् 'गौर्नित्या, गौरनित्या' इत्यादौ गोत्वादेरिव स्वातन्त्र्येण विशेषणत्वेन वा भानम् । 'पर्वते वह्निः' इति शाब्दानुमित्यादितः सहैव वह्न्यर्थिप्रवृत्तिदर्शनात् 'अस्तिर्भवन्तीपरोऽप्रयुज्यमानोऽप्यस्ति' इति भाष्याच्च ज्ञानसामान्यसामग्र्या एवार्थविशेषणतया वर्त्तमानकालभासकत्वकल्पनवत् सर्वत्र शाब्दबोधे [1]शब्दभानानुभवात् शाब्दसामान्यसामग्र्या एव शब्दभासकत्वकल्पनात् ।

1. शब्दस्य शाब्दबोधविषयत्वं स्वीकुर्वतां शाब्दिकानामयमाशयनिष्कर्षः—प्रवृत्तिनिमित्ततदाश्रयाद्यर्थस्य शब्दस्य च ज्ञानमात्रे विषयत्वम् । शब्दस्य आनुपूर्व्याश्च निर्विकल्पकज्ञानवद् विशकलितयोर्भानम् । ततश्च 'पटः पटशब्दवाच्यः' इति विशिष्टं ज्ञानं जायते । परमत इव वैयाकरणमतेऽपि कालविशेषस्य अदृष्टविशेषस्य वा कारणत्वकल्पनेन घटपदप्रयोगकाले घटरूपार्थस्य वाचकस्य सर्वस्य कलशादिपदभानं न स्यात् । यथा पटत्वस्य निर्विकल्पकबोधकाले द्रव्यत्वस्य भानं न भवति । 'ओमित्येकाक्षरं ब्रह्म' इति श्रुतेः, 'रामेति द्व्यक्षरं नाम' इति वचनात्, "वृद्धिरादैच्" (१।१।१) इति सामानाधिकरण्यानुरोधाच्च शब्दार्थयोस्तादात्म्येन अर्थविशेष्यकपरामर्श एव शब्दानुमितौ कारणम् । तादात्म्यस्य भेदाभेदघटितत्वेन भेदस्योल्वणत्वविवक्षायां 'पटरूपोऽर्थः पटः शब्दो न' इत्यादिव्यवहाराः संगच्छन्त इत्यलं प्रपञ्चेन ।

एवञ्च प्रकारताविशेष्यतान्यतरसम्बन्धेन पदभिन्नविषयकशाब्दं प्रत्येव पदजन्यपदार्थोपस्थितेः कारणत्वं कल्प्यते। प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थ-बोधकत्वमिति व्युत्पत्तौ प्रकृत्यर्थत्वञ्च 'प्रकृतिजन्यबोधविषयत्वम्' इति 'गामुच्चारय'इत्यादौ न कर्मत्वाद्यन्वयानुपपत्तिः। न च घटपदजन्यबोधे सकल-पर्यायाणां प्रकारतया भानापत्तिः, विनिगमकाभावादिति वाच्यम्, तत्तत्पद-प्रकारकबोधे तत्तत्पदज्ञानघटितशाब्दसामान्यसामग्र्या हेतुत्वेनादोषादित्याहुः।

एवञ्च वृत्त्याश्रयतया पदोपस्थितावपि तस्य वृत्तिविषयत्वाभावेन वृत्तिविषयबोधकत्वरूपार्थवत्त्वाभावात् प्रातिपदिकत्वाभावेन 'भू सत्तायाम्' 'गवित्ययमाह' इत्यादौ विभक्त्यनुत्पत्तिः, तदनुत्पत्तावपि साधुत्वमस्त्येव परिनिष्ठितत्वात्। "भुवो वुग् लुङ्लिटोः" [६।४।८८] इत्यादि तु भेदविवक्षापक्षे साधु। अनयोश्च लक्ष्यानुरोधेन व्यवस्था। समानानुपूर्वीकशब्दमात्रविषयकबोधजनकत्व-मनुकरणत्वम्।

न चैवं गणपठितानामनुकरणत्वेन क्रियावाचकत्वाभावः, प्रयोगस्थानां गणपठितत्वमिति भूवादिसूत्रासङ्गतिरिति वाच्यम्, गणपठितशब्दवाच्यत्वरूपस्य गणपठितत्वस्य विवक्षितत्वान्न दोष इत्याहुः।

केचित्तु, अनुकरणं सादृश्यसम्बन्धेन स्वसदृशशब्दानुपस्थापयति, तथो-पस्थितस्यापि आकाङ्क्षादिवशादुपस्थितसम्बन्धस्यैव शाब्दबोधेऽन्वयप्रतियोगित्वं व्युत्पत्तिवैचित्र्यात्, अनुभवबलात्, तात्पर्यवशाच्च स्वीक्रियते। कृत्यपदजन्य-पदार्थोपस्थितेरनुकरणाजन्यशाब्दबुद्धित्वमेव कार्यतावच्छेदकम्। 'प्रत्ययानां प्रकृत्यर्थान्वित' इत्यादिव्युत्पत्तौ प्रकृत्यर्थत्वञ्च प्रकृतिजन्यबोधविषयत्वम्। अतो 'गामुच्चारय'इत्यादौ न कर्मत्वाद्यन्वयानुपपत्तिः। अनुकरणत्वञ्च स्वसदृशशब्दमात्र-तात्पर्यकोच्चारणविषयत्वमित्याहुः।

सर्वनाम्नाञ्च 'बुद्धिविषयतावच्छेदकत्वोपलक्षितधर्मावच्छिन्नबोधकं तदादि-पदम्' इत्याकारः शक्तिग्रहः। तत्र शक्तिग्रहविषयताया अननुगतघटत्वपटत्वादि-निष्ठाया अप्यनुगतरूपावच्छिन्नतया शक्त्यैक्यम्। घटादिपदसंकेतविषयतानां नानाघटव्यक्तिनिष्ठानां घटत्वाद्यनुगतधर्मावच्छिन्नत्वेन तत्पदशक्त्यैक्यवत्।

इयांस्तु विशेषः—तत्र घटत्वादिप्रकारकबोधानुभवात् तेषां धर्मिता-वच्छेदकताख्यविषयतया शक्तिग्रहविषयत्वमुपेयते; शक्तिग्रहविषये बोधे विषयतायाः

प्रकारत्वञ्च। एवं पश्वादिशब्दानां लोमत्वेनानुगतलोमवल्लाङ्गूलशक्तानां तच्छक्तिग्रहविषयत्वम्। तया विषतया लोमत्वादीनामुपेयते। प्रकृते बुद्धिस्थत्वस्य शाब्दबोधेऽभानात् तस्य तया विषयतया शक्तिग्रहाविषयत्वेन शक्तिग्रहविषयबोधे विषयतयाऽप्रकारत्वेन च तस्योपलक्षणत्वमिति। धर्मितावच्छेदकत्वञ्च तदाश्रयनिष्ठविषयतानिरूपकत्वम्। बुद्धिस्थत्वे च तादृशविषयता सामानाधिकरण्यमात्रमिति न तत्प्रकारकबोधापत्तिः। धर्मितावच्छेदकत्वेन, विशेष्यत्वेन वा शक्तिग्रहविषयस्यैव शक्तिग्रहविषयबोधे विषयतया प्रकारस्यैव च तज्जन्यबोधविषयत्वं फलबलात् कल्प्यते।

न चापूर्वे धर्मे शक्तिग्रहासम्भवः, बुद्धिविषयतावच्छेदकत्वसामान्यलक्षणाप्रत्यासत्त्योपस्थिते धर्ममात्रे शक्तिग्रहाक्षतेः। सामान्यप्रत्यासत्त्यनङ्गीकारे तु बुद्धिप्रकारतया गृहीतपटत्वादिविशिष्टव्यवहारदर्शनात् तत्र तत्पदस्य शक्ति गृहीत्वा यद्यत्तत्पदं यादृशयादृशधर्मावच्छिन्नविषयकबुद्धया प्रयुज्यते, तत्तत्पदं तादृशधर्माविशिष्टशक्तमिति सामान्यतो व्याप्तिमवधारयति। तदनन्तरञ्च प्रत्यक्षेण गृहीतचैत्रत्वादिविशिष्टविषयकबुद्धिप्रयोज्यत्वं प्रकरणादिना यत्र, तत्तत्पदे तादृशहेतुना चैत्रत्वविशिष्टवाचकत्वस्य प्रागसिद्धस्यापि पक्षधर्मताबलादनुमित्यात्मकनिश्चयेनावगाहनान्नानुपपत्तिः। अत एव तत्पदात् कदाचिद् घट इति, कदाचिज्जातिमानिति, कदाचिज्जातिमान् घट इति, कदाचिद् बुद्धिस्थो घट इति बोधः सङ्गच्छते।

न च हर्यादिपदशक्यतावच्छेदकानामप्युपलक्षणीभूतेन बुद्धिविशेषविषयत्वादिपदेनानुगमसम्भवेन नानार्थोच्छेदापत्तिः, तदादिभ्यः पूर्वोक्तरीत्या नानारूपेणैकस्यापि बोधानुभवात् तथाङ्गीकारेऽपि हर्यादिपदेभ्यस्तथाऽननुभवेन तत्कल्पनायोगात्। अत एव तेषां नानार्थत्वमेव। अन्यथा हर्यादिपदेभ्योऽपि कदाचिज्जातिमान् हरिरित्याद्याकारकबोधापत्तिः।

न च किञ्चित्प्रकारेण भासमाने धर्मेऽवच्छेदकत्वभाने तद्विशिष्ट एव भासते, न तदुपलक्षित इति नियमः। अत एव जातिमान्नास्तीत्यतो न स्वरूपेण घटत्वावच्छिन्नाभावबोधः। एवञ्च बुद्धिस्थत्वविशिष्ट एव धर्मितावच्छेदकत्वावगाहनात् तद्विशिष्टस्यैव बोधापत्तिरिति वाच्यम्, अवच्छेदकत्वस्य संसर्गविधया भान एव तथा नियमात्। शक्तिग्रहस्त्ववच्छेद्यावच्छेदकभावप्रकार एवेति न दोषः।

न चेदानीमुच्चारिततत्पदात् कालान्तरीणदेशान्तरीणबुद्धिस्थधर्मावच्छिन्नस्यापि बोधापत्तिरिति वाच्यम्, तात्पर्यज्ञानकारणतया निर्वाहात्। व्यक्तिस्थानीयापत्त्यभावाच्च। शक्यताच्छेदकावच्छिन्नबोधस्य जायमानत्वेन तदापादकाभावाच्च। एवं युष्मदस्मदोः स्वसम्बोध्यतावच्छेदकत्वस्वोच्चारयितृत्वाच्छेदकरूपानुगतधर्मोपलक्षितचैत्रत्वादिकं प्रवृत्तिनिमित्तमिति बोध्यम्। "देव्युवाच—मया त्वयि हतेऽत्रैव गर्जिष्यन्त्याशुदेवताः" इत्यादौ ऋष्युच्चारितवाक्येन तादृशानुपूर्वीरूपसामान्यप्रत्यासत्त्या देवीवाक्यस्यापि ज्ञानाद् देवीमहिषासुरयोस्तादृशवाक्यप्रयोक्तृत्वसम्बोध्यत्वप्रतिसन्धानादेव युष्मदस्मद्भ्यां देवीमहिषासुरादिप्रतीतिर्निर्वाह्या। अनुवादकऋषितत्सम्बोध्ययोस्तु तात्पर्याभावान्न प्रतीतिः।

न चैवं मौनिपुरुषज्ञानपरात् 'अयमहं पण्डितः' इति जानामीति वाक्यस्थास्मत्पदेन मौनिनः प्रतीत्यनापत्तिः, तस्योच्चारयितृत्वाभावादिति वाच्यम्, उच्चारणेनानुसन्धानोपलक्षणान्न दोषः।

न चैवं बुद्धिविषयतावच्छेदकरूपावच्छिन्न एव युष्मदस्मदोः शक्तिरस्तु, किं सम्बोध्यत्वाद्यवच्छेदकावच्छिन्ने शक्तिकल्पनया ? अतिप्रसङ्गभङ्गस्तु तात्पर्यविरहादेवेति वाच्यम्, तात्पर्यसत्त्वेऽपि चैत्रोच्चारितात् 'अहं करोमि' इति वाक्यादन्यं बोधयितुं प्रयुक्तात् 'त्वं गच्छ' इति वाक्याच्चोच्चारयितृत्वसम्बोध्यत्वभ्रमं विना मैत्रादिबोधस्य सर्वानुभवविरुद्धत्वात्। अन्यथा तात्पर्येण स्वरसत एव तथाप्रयोगापत्तेः। बुद्धिविषययावत्त्वावच्छिन्नः सर्वशब्दार्थः, यावत्त्वमत्रैकत्वातिरिक्तसङ्ख्याकृतः परिच्छेदः। यावत्त्वानाञ्च बुद्धिविषयत्वेनानुगमः। 'सर्वं ओदनं भुङ्क्ते' इत्यादौ त्ववयवगतसङ्ख्यापरिच्छेदस्यावयविन्यारोपो बोध्यः। यत्र तु यावत्त्वेन घटत्वादिविशिष्टानामपि सर्वे आनेया इति सर्वशब्दमात्राद् बोधः, तत्र लक्षणा बोध्या। यद्वा, बुद्धिविषयावच्छेदकयावत्त्वेन बुद्धिविषयघटत्वादिशालिषु सर्वशब्दस्य शक्तिः। 'सर्वे घटाः' इत्यादौ तु विशेषनिर्णयाय घटादिशब्दप्रयोग इत्याहुः।

किंपदस्य जिज्ञासाविषयधर्मावच्छिन्ने शक्तिः, अत एव स्वीयजिज्ञासाज्ञापनाय किंपदघटितप्रश्नवाक्यं सङ्गच्छते। एवञ्च कः पचतीत्यतो जिज्ञासाविषयधर्मावच्छिन्नकर्तृकः पाक इति बोधः। तद्विषयकजिज्ञासायास्तदिच्छाविषयीभूतज्ञानजनकात् 'विप्रः पचति' इत्यादित एव निवृत्तिरिति तादृशप्रश्नानन्तरं तदेवोत्तरम्।

न च प्रमेयं पचतीत्यप्युत्तरं स्यात्, तज्जन्यज्ञानस्यापि तादृशेच्छाविषयत्वादिति वाच्यम्, उद्देश्यवाचककिंपदस्य स्वसमभिव्याहृतपदोपस्थाप्यकर्तृवृत्तिधर्मव्याप्यधर्मावच्छिन्न एव शक्त्यभ्युपगमेनादोषात् । एवम् 'को ब्राह्मणः पचति' इत्यादौ अभेदेन स्वार्थान्वितोद्देश्यवाचकपदान्तरसमभिव्याहृतकिंपदस्य स्वार्थाभेदान्वयिपदार्थतावच्छेदकधर्मव्याप्यधर्मावच्छिन्ने शक्तिः, अतस्तत्र 'चैत्रः पचति' इत्येवोत्तरम्, न तु 'मनुष्यः पचति' इति ।

एवं प्रायेण यत्र किंपदार्थान्वयः, तद्वृत्तिधर्मव्याप्यधर्मावच्छिन्न एव पदस्य शक्तिर्बोध्या । क्वचित्तु स्वान्वयिधर्मव्याप्यधर्मावच्छिन्न एव शक्तिरित्याद्यूह्यम् ।

एवम् 'अयं कः' इत्यादौ विधेयवाचककिंपदस्य समभिव्याहृतपदोपस्थाप्यतावच्छेदकत्वोपलक्षितधर्मावच्छिन्नोद्देश्यतानिरूपितविधेयतावच्छेदकतया जिज्ञासितो यो विशेषधर्मः, तदवच्छिन्ने शक्तिः । अत एव तत्रायं ब्राह्मण इत्येवोत्तरम् । 'मुखं किमिन्दुः' इत्यादौ अव्ययकिमो वितर्कोऽर्थः । वितर्कश्च प्रयोक्तुः सम्भावनात्मकं ज्ञानम् । एवञ्चाभेदेनेन्दुप्रकारकसम्भावनाविशेष्यो मुखमिति बोधः ।

एवं धनमिदं किं चैत्रस्येत्यादावाश्रयत्वादिसम्बन्धेन चैत्रस्वप्रकारकसम्भावनाविशेष्यो धनमिति बोधः । किमिन्दुरित्यादौ सम्भावनाबोधोत्तरं तत्प्रयोजकाह्लादकत्वादिसाधर्म्यप्रतीतिस्त्वर्थात् । किं गौरित्यादौ कुत्सार्थकमपि तत् । तत्पदप्रतिपाद्यतया वक्तृबुद्धिविषयतावच्छेदकत्वोपलक्षितधर्मावच्छिन्ने यत्पदस्य शक्तिः । अतस्तेनार्थप्रत्यायने नियमतस्तत्पदापेक्षा, तत्पदसमभिव्याहारं विनोक्तानुगमकधर्माग्रहेण शक्तिपरिच्छेदस्यासम्भवात् । तच्छब्दजन्यप्रतिपत्तेः पूर्वमपि तत्प्रतिपाद्यतया वक्तुरभिसम्बन्धः प्रकरणादिना सुग्रह इति न तच्छब्दजप्रतीतेर्यत्पदशक्तिग्रहेऽपेक्षा । तत्रोत्तरवाक्यगतयच्छब्दस्य तच्छब्दाक्षेपसमर्थत्वेन न तत्र तच्छब्दोपादानापेक्षा । यथा 'चन्द्रमसि पुष्करैः कृतं मिलितं यदभिरामताधिके' इत्यादौ । एवं यत्पदोपस्थाप्ये तत्पदशक्तिर्बोध्या । तत्र प्रसिद्धानुभूतप्रक्रान्तार्थकतच्छब्दस्य यच्छब्दाक्षेपः, समर्थत्वात् । न तत्र यच्छब्दोपादानापेक्षेति काव्यप्रदीपादौ विस्तरः ।

इदमेतदोः प्रत्यक्षबुद्धिविषये, अदसः परोक्षबुद्धिविषये शक्तिः ।

स्वपदस्य स्वसमभिव्याहृतपदोपस्थाप्ये शक्तिः। समभिव्याहारश्चात्रैक-वाक्यघटकत्वम्। समभिव्याहृतपदोपस्थाप्यश्च समभिव्याहृतक्रियाकारकपदार्थ एव गृह्यते। तेन चैत्रस्य भ्राता स्वपुत्रं पश्यतीत्यादौ स्वशब्देन न चैत्रप्रतीतिः। स्वपुत्रदर्शितं चैत्रं मैत्रः पश्यतीत्यादौ च न चैत्रपुत्रबोधानुपपत्तिः। अत एव 'कलशे निजहेतुदण्डजः किमु चक्रभ्रमिकारिता गुणः' इत्यादावध्याहृतक्रिया-कारकस्य कलशस्य स्वशब्दसमानार्थकनिजपदेन प्रतीतिः।

यदा तु षष्ठ्यर्थस्य क्रियायामन्वयः, तत्र तदर्थबोधकोऽपि स्वशब्दः। यथा 'स्वव्यापकवह्निसामानाधिकरण्यं धूमस्यास्ति' इत्यादौ। इदमेवाभिप्रेत्य 'सर्वनाम्नामुत्सर्गतः प्रधानपरामर्शित्वम्' इत्युच्यते। तत्र प्रधानपरामर्शित्वमित्यस्य प्रधानान्वयिपरामर्शकत्वमित्यर्थः।

एकः शब्दः कैवल्यादिविशिष्टे शक्तः। कैवल्यञ्च सजातीयद्वितीय-रहितत्वम्। तच्च सजातीयनिष्ठभेदाप्रतियोगित्वम्। तथा च 'अयमेकोऽत्र भुङ्क्ते' इत्यादावेतद्देशाधिकरणकभोजनकर्तृनिष्ठभेदाप्रतियोगी। 'अयमत्र भुङ्क्ते' इत्या-कारको बोध इत्याद्यूह्यमिति सर्वेष्टसिद्धिः।

इति नामार्थनिर्णयः।

अथ सुबर्थविचारः

अथैतत्प्रकृतिकसुबर्थो निर्णीयते

तथादौ प्रथमाविभक्त्यर्थविचारः

तत्र प्रथमाद्वितीयातृतीयाचतुर्थीपञ्चमीषष्ठीसप्तमीत्याख्या विभक्तयः सप्त। तत्र प्रथमायाः शक्तिग्राहकं सूत्रम् "प्रातिपादिकार्थे प्रथमा" इति। यस्मिन् प्रातिपदिके उच्चारिते यस्यार्थस्योपस्थितिः, स तत्प्रातिपदिकार्थः। तेन शक्यलक्ष्यगौणानां सर्वेषां संग्रहः। 'कृष्णः सुन्दरः' इत्यादौ प्रकृत्यर्थानुवादिका विभक्तिः, अभेदः संसर्गः, कृष्णाभिन्नः सुन्दर इति बोधः। लिङ्गं तु प्रातिपदिकस्य वार्थः। प्रत्ययो द्योतक इति निरूपितं नामार्थवादे संख्याऽपि वाच्या, द्योत्या वेत्यपि तत्रैव निरूपितम्। 'सिंहो माणवकः, द्रोणो व्रीहिः' इत्यादौ सिंहद्रोणादिपदानां सिंहसदृशे द्रोणपरिच्छेद्यादौ च लक्षणा बोध्या।

अत्र सूत्रे प्रातिपदिकशब्देन तत्प्रकृतिकलिङ्गबोधकप्रत्ययविशिष्टमपि गृह्यते, "प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्" इति परिभाषणात्। तेन 'इन्द्राणी' इत्यादौ प्रथमासिद्धिरिति दिक्।

इदमपि सूत्रं क्रियायोग एव प्रवर्त्तते, "कर्मणि द्वितीया" [२।३।२] इत्यादिसाहचर्यात्, तथैवाकाङ्क्षितत्वाच्च। अत एव 'तिङ्समानाधिकरणे प्रथमा'। अत एव 'अस्तिर्भवन्तीपरोऽप्रयुज्यमानोऽप्यस्ति' इति भाष्यादिग्रन्थः सङ्गच्छते। यत्र तु क्रिया न श्रूयते, तत्राप्यध्याहारो बोध्यः। एकशब्दादावपि अनन्वितार्थकप्रयोगापेक्षयाऽनुवादकप्रयोगस्य न्याय्यत्वादेकवचनादि बोध्यमित्याहुः।

संबोधनमपि प्रथमार्थः, "सम्बोधने च" [२।३।४७]इति सूत्रस्वरसात्। तत्र सम्बोधनं ज्ञापनम्, अत एव ज्ञाप्यमान इत्यर्थकः 'सम्बोध्यमानो देवदत्तः' इति व्यवहारः सङ्गच्छते। तज्ज्ञापनार्थमेव सम्बोधनविभक्त्यन्तपदघटितवाक्यप्रयोगः, तत्फलं प्रवृत्तिनिवृत्त्यादिकम्। तत्र समित्युपसर्गोपादानं सम्यक्त्वबोधनार्थम्। तेन

सम्बोधनविभक्तिरनुवाद्यविषयिणी[1] क्रियान्वयिनी चेति बोध्यम्। तेन 'राजा भव, युध्यस्व, इन्द्रशत्रुर्वर्धस्व' इत्यादौ न सम्बोधनविभक्तिः, इदानीमपि राजत्वस्यासिद्धत्वेनानुवाद्यत्वाभावात्। अत एव 'राजन् युध्यस्व' इत्यस्य कुमारावस्थायाम्; 'राजाभव,युध्यस्व' इत्यस्य च राजावस्थायां न प्रयोगः। हेशब्दादिकञ्च सम्बोधनतात्पर्यग्राहकम्। अचेतने तु चेतनात्वारोपेण गौणः प्रयोगः।

अत्र च सम्बोधनं प्रकृत्यर्थं प्रति विशेष्यम्, क्रियां प्रति च विशेषणम्। तेन 'राम पाहि' इत्यादौ रामसम्बन्धिसम्बोधनविषयस्त्राणमिति बोधः। सम्बोधनविभक्तेरनुवाद्यविषयतया अनुवाद्यस्य च विधेयसाकाङ्क्षतया, विधेयस्य च क्रियारूपत्वेन तदन्वयस्यैवौचित्यात्।

'हे देवदत्त त्वं सुन्दरः' इत्यादौ 'असि' इत्यध्याहारो बोध्यः। अत एव धिङ् मूर्खेत्यादौ क्रियाध्याहारे प्रथमा। मूर्खसम्बन्धिसम्बोधनविषया निन्द्या क्रियेति बोधः। क्रियाया निन्द्यत्वञ्च सर्वासंमतमूर्खादिकर्तृकत्वमेव। तदभावे द्वितीया, मूर्खसम्बन्धिनिन्देति बोधः। अत एव 'व्रजानि देवदत्त' इत्यादौ 'एकतिङ् वाक्यम्' इत्येकवाक्यत्वादामन्त्रितस्य चेति निघातसिद्धिः। क्रियां प्रत्यविशेषणत्वे तु नैतत्सिध्येत्।

यत्तु, 'राम पाहि'इत्यत्र सम्बोध्यरामकर्तृकं रक्षणमर्थः। सम्बोधनं प्रकृत्यर्थं प्रति विशेषणम्, प्रकृत्यर्थश्चाख्यातार्थेऽभेदेन विशेषणम्। उक्तरीत्या बोधे तु 'भो ब्राह्मणास्त्वं पच' इति प्रयोगापत्तिः।

---

1. अत एव सम्बोधनविभक्तेरपि कारकविभक्तित्वं सिध्यति।
अयं भावः—

'सिद्धस्याभिमुखीभावमात्रं सम्बोधनं विदुः।
प्राप्ताभिमुख्यो ह्यर्थात्मा क्रियासु विनियुज्यते॥'

इति हर्युक्तेः, लाघवाच्च बोधाय सम्मुखीभावः सम्बोधनमिति व्युत्पत्तेः मुखपरावृत्त्याद्यभिव्यङ्ग्योऽभिमुखीभाव एवात्र सम्बोधनम्।

तस्य च सङ्ख्याया इव प्रकृत्यर्थे देवदत्तादेराश्रयत्वसम्बन्धेनान्वयः। तस्य विभक्त्यर्थत्वम्, प्रकृत्यर्थत्वमेव वेत्यन्यदेतत्। प्रकृत्यर्थस्य च क्रियासु विनियुज्यते इत्युक्त्या प्रवर्तनान्वयद्वारा विध्यर्थप्रवर्तनायामेवान्वयः।

तथाऽन्वयस्वीकारादेव 'नामार्थधात्वर्थयोरभेदान्वय एव' इति व्युत्पत्तिविरोधोऽपि न। प्रवर्तनायाश्च विषयत्वसम्बन्धेन गमनक्रियायामन्वयः।

एवञ्च 'देवदत्त त्वं गच्छ' इत्यादौ अभिमुखीभवद्देवदत्ताभिन्नयुष्मदर्थोद्देश्यकप्रवर्तनाविषयो गमनमिति बोधः।

न चैवम् 'राम पाहि' इत्यादौ प्रथमपुरुषापत्तिः, "युष्मद्युपपदे" [१।४।१०५] इत्यत्र युष्मदित्यस्यार्थपरत्वेन युष्मदश्च सम्बोध्यमानार्थकतया रामेत्यस्यापि तदर्थत्वादक्षतेरिति, तत्, न; 'हे राम शिवो गच्छति काशीम्' इत्यादौ प्रत्ययार्थान्वस्य वक्तुमशक्यत्वात्।

किञ्च युष्मदित्यस्यार्थपरत्वे 'हे राम भवान् गच्छति' इत्यत्र मध्यमपुरुषापत्तिः; भवदर्थस्य सम्बोध्यासम्बोध्यसाधारणत्वेऽपि प्रकृते सम्बोधनसमभिव्याहारेण सम्बोध्यमात्रार्थत्वात्। अर्थपरत्वाभावे तु 'राम पाहि' इत्यादौ मध्यमो दुरुपपादः, त्वमित्याध्याहारे तु तस्यैवाख्यातार्थेनाभेदान्वयात् 'राम' इत्यनेनान्वयो दुरुपपादः।

यत्तु, भो ब्राह्मणास्त्वं पचेति स्यादिति, तत्, न; किमत्र सर्वेषां सम्बोध्यमानब्राह्मणानां कर्तृत्वम्, उत अन्यतमस्यैव, उत सम्बोध्यमानातिरिक्तस्य? नाद्यः, त्वमित्येकवचनान्तेनोल्लेखानापत्तेः; न द्वितीयः, अन्येषां ज्ञापने फलाभावेन तज्ज्ञापनस्य व्यर्थत्वापत्तेः। 'त्वं भुङ्क्ष्व, त्वं स्नाहि' इत्यादिभिन्नभिन्नक्रियाप्रतिपादनतात्पर्ये त्विष्टापत्तिः। एतेन तृतीयोऽपि निरस्तः।

किञ्च, शब्दशक्तिस्वाभाव्येन सम्बोधनविभक्त्यन्तपदसमभिव्याहारे युष्मदस्तत्पदबोध्यपरामर्शकत्वस्यैव लोकसिद्धत्वेन तदतिरिक्तस्य त्वंपदार्थता वक्तुमशक्या। अत एव तव मते 'हे देवदत्त अयं पचति' इत्यादौ सम्बोध्यमानस्य कर्तृत्वं न, शब्दशक्तिस्वाभाव्येन सम्बोध्यमानातिरिक्तस्यैवेदंशब्दार्थत्वादिति दिक्।

इति प्रथमाविभक्त्यर्थविचारः।

अथ द्वितीयाविभक्त्यर्थविचारः

द्वितीयादयो द्विविधाः—कारकविभक्तयः, उपपदविभक्तयश्च। तत्र कारकाणि षट्—कर्त्ता, कर्म, करणम्, संप्रादानम्, अपादानम्, अधिकरणञ्चेति। तत्र कारकत्वं क्रियान्वयित्वम्। अत एव 'ब्राह्मणस्य पुत्रं पन्थानं पृच्छति' इत्यादौ ब्राह्मणस्य न कारकत्वम्, क्रियान्वयित्वाभावात्। अन्यथा सुन्दरादिविशिष्टस्य पुत्रस्य क्रिया-व्याप्यत्वेन सुन्दरादीनां कर्मकारकत्ववद् ब्राह्मणसम्बन्धिपुत्रस्य विशिष्टस्य क्रिया-व्याप्यत्वेन तस्यापि तत्त्वं स्यात्। सुन्दरादीनाञ्च 'अरुणाधिकरण'न्यायेन, क्रिया-न्वयित्वम्; पुत्रद्वारा [वा] एवञ्च साक्षात्क्रियान्वय्यभिन्नतया [वा ?] क्रियान्व-यित्वं कारकत्वम्, तदतिरिक्तसम्बन्धग्रहणे मानाभावात्, भेदसम्बन्धस्य बहिरङ्ग-त्वाच्च।

यत्तु, क्रियान्वितप्रत्ययार्थान्वयित्वं कारकत्वमिति, तत्, न; पक्व इत्यादौ प्रत्ययार्थस्य कारकत्वानापत्तेः।

एतेन क्रियान्वितविभक्त्यर्थान्वयित्वं कारकत्वमित्यपास्तम्, पक्व ओदन इत्यादौ ओदनादेः कर्मकत्वानापत्तेः।

यदपि, [1]क्रियाजनकत्वं कारकत्वमिति, तत्, न; पूर्वोदाहरणे पुत्रस्य कारकत्वानापत्तेः। तं विना प्रश्नक्रियाऽनिष्पत्तेस्तस्यापि जनकत्वमिति चेत्,

---

1. अत्रायं निष्कर्षः—क्रियाजनकत्वं कारकत्वमिति कारकसामान्यलक्षणम्। तच्च जनकत्वं कारणत्वरूपम्। कारणत्वञ्चान्यथासिद्धिशून्यत्वे सति कार्या-व्यवहितप्राक्क्षणावच्छेदेन कार्यसमानाधिकरणात्यन्ताभावप्रतियोगित्वानवच्छे-दकधर्मवत्त्वम्। एवञ्च 'चैत्रस्य तण्डुलं पचति' इत्यादौ चैत्रस्यान्यथासिद्धत्वेन क्रियाजनकत्वाभावान्न कारकत्वम्।

सम्प्रदानस्य त्वनुमतिप्रकाशनद्वारा क्रियाजनकत्वम्। अनुमतिसत्त्वे दानस्य प्रवृत्तिः, तदभावे तदभाव इत्यन्वयव्यतिरेकाभ्याम्।

एवम् 'कटे आस्ते' इत्यादावधिकरणकारकस्यापि स्थितिं प्रति कारणत्वात् क्रियाजनकत्वमक्षुण्णमेव।

न च 'घटं करोति' इत्यादौ घटस्यानुत्पन्नत्वेन क्रियाजनकत्वाभावात् कारकत्वानापत्तिरिति वाच्यम्, कपालनिष्ठजनकत्वस्य घटे आरोपेणादोषात्, बोद्धार्थकर्मत्वाद् वा।

एवमपादानस्यापि क्रियाजनकत्वम्, वृक्षाभावे पर्णविभागस्यैवासम्भवात्।

नैयायिकास्तु, विभक्त्यर्थद्वारा क्रियान्वयित्वं कारकत्वम्। क्रियाविषयितानिरूपितविभक्त्यर्थविषयतानिरूपितविषयताश्रयत्वमिति निष्कर्षः।

'स्तोकं पचति' इत्यत्र क्रियाविशेषणस्य स्तोकस्य कारकत्ववारणाय विभक्त्यर्थद्वारेति। 'चैत्रस्य तण्डुलं पचति' इत्यादौ तु चैत्रस्य विभक्त्यर्थद्वारा क्रियान्वयित्वाभावान्न कारकत्वमिति परिष्कुर्वन्ति।

तत्, न; 'कटे आस्ते,' स्थाल्यां पचति' इत्यादौ कटस्थाल्योः कर्तृकर्मद्वारा क्रियान्वयित्वेन विभक्त्यर्थद्वारा क्रियान्वयित्वाभावात् कारकत्वानापत्तेः, कर्तुरपि कारकत्वानापत्तेश्चेति।

कर्तृत्वञ्च—प्रकृतधातुवाच्यव्यापाराश्रयत्वम्। तेन प्रयोज्यप्रयोजकानुक्तकर्तॄणां सर्वेषां संग्रहः। 'माषेष्वश्वं बध्नाति' इत्यत्र तु गलविलाधःसंयोगनुकूलव्यापराश्रयत्वेनाश्वस्य कर्तृत्वेऽपि प्रकृतधातुवाच्यव्यापाराश्रयत्वाभावान्न कर्तृत्वापत्तिरिति।

कर्मत्वञ्च—प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वेनोद्देश्यत्वम्।

इदमेव कर्मलक्षणे ईप्सिततमत्वम्। 'गां पयो दोग्धि' अत्र पयसः कर्मत्वसिद्धये प्रयोज्यत्वनिवेशः।

'प्रयागात् काशीं गच्छति' अत्र प्रयागस्य कर्मत्ववारणाय प्रकृतधात्वर्थफलेति।

नैयायिकास्तु—धात्वर्थतावच्छेदकव्यापारव्यधिकरणफलशालित्वं कर्मत्वम्। तादृशं च फलं गमेस्संयोगः, त्यजेर्विभागः, पतेरधोदेशसंयोगः। अधोदेशरूपकर्मणो धात्वर्थनिविष्टत्वादकर्मत्वेन पर्णं वृक्षाद् भूमौ पतति, संयोगमात्रफलपक्षे वृक्षाद् भूमिं पतति इति प्रयोगः इत्याहुः।

करणत्वञ्च—स्वनिष्टव्यापाराव्यवधानेन फलनिष्पादकत्वम्। इदमेव साधकतमत्वम् 'रामेण बाणेन हतो वाली' इत्यत्र बाणव्यापाराव्यवहितोत्तरफलनिष्पादकत्वं बाणस्येति लक्षणसमन्वयः।

सम्प्रदानत्वञ्च—क्रियामात्रकर्मसम्बन्धाय क्रियायामुद्देश्यं यत् कारकं तत्त्वम्। यथा 'ब्राह्मणाय गां ददाति' इत्यादौ दानक्रियाकर्मीभूतगोसम्बन्धाय ब्राह्मणो दानक्रियोद्देश्यः। गोब्राह्मणयोः स्वस्वामिभावः सम्बन्धः।

अपादानत्वञ्च—तत्तत्कर्तृसमवेततत्तत्क्रियाजन्यप्रकृतधात्ववाच्यविभागाश्रयत्वम्। तदेवावधित्वम्। विभागश्च न वास्तवसम्बन्धपूर्वको वास्तव एव,

तथापि संप्रदानेऽव्याप्तिः, अविद्यमानसंप्रदानकस्यापि दानस्य जायमानत्वेन तस्य नियतपूर्ववृत्तित्वाभावात्। 'जायते, करोति' इत्यादौ कर्तृकर्मणोरव्याप्तेश्च।

न च यागस्य पूर्ववृत्तित्वाभावेऽपि अपूर्वद्वारा जनकत्ववत् संप्रदानादिज्ञानस्य पूर्ववृत्तित्वेन तद्द्वारा तस्यापि जनकत्वं सूपपादमिति वाच्यम्, क्रियानिष्ठशाब्द-विषयतानिरूपकविषयताश्रयत्वरूपक्रियान्वयित्वापेक्षयाऽनन्यथासिद्धनियतपूर्ववर्त्ति-त्वघटितक्रियाजनकत्वस्य गुरुत्वात्।

आश्रयत्वरूपकृदर्थोपपत्तिस्तु जनक इवान्वयिन्यपि असूपपादा। अखण्डजन्यतानिरूपकजनकत्वमखण्डोपाधिरूपं तत्र निविष्टमित्यपि विनिगमना-विरहग्रस्तम्।

किन्तु बुद्धिपरिकल्पितसम्बन्धपूर्वको बुद्धिपरिकल्पितोऽपि। 'माथुराः पाटलिपुत्रकेभ्य आढ्यतराः' इत्यादौ बुद्धिपरिकल्पितापायाश्रयणेनैव भाष्ये पञ्चमीसाधनात्।

अधिकरणत्वञ्च—कर्तृकर्मद्वारकफलव्यापाराधारत्वम्। यथा 'स्थाल्यामोदनं गृहे पचति' इत्यादौ कर्मद्वारकविक्लित्तिरूपफलाधारः स्थाली, कर्तृ-द्वारकव्यापाराधारो गृहमिति।

कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिः सम्बन्धः षष्ठ्या वाच्यः। 'राज्ञः पुरुषः' इत्यादौ षष्ठीवाच्यसम्बन्धस्याश्रयाश्रयिभावसम्बन्धेन पुरुषेऽन्वयः, राजनिरूपितसम्बन्धवान् पुरुष इति बोधात्।

अत्र सम्बन्धत्वेन रूपेण तत्तत्सम्बन्धे शक्तिः।

एवञ्च शक्यतावच्छेदकस्य सम्बन्धत्वस्य कर्तृत्वकर्मत्वादिषु विद्यमानत्वात् सम्बन्धत्वेन रूपेण षष्ठ्यर्थताऽस्त्येव। अत एव सम्बन्धत्वविवक्षायम् 'सतां गतम्, सर्पिषो जानीते' इत्यादौ षष्ठी साधिता सिद्धान्तकौमुद्यामिति प्राचीनानां हृदयम्।

नवीनास्तु—न सम्बन्धत्वेन रूपेण स्वस्वामिभावादिसम्बन्धः षष्ठ्या वाच्यः। अत एव 'एकशतं षष्ठ्यर्थाः' इति "षष्ठी स्थाने योगाः" इति सूत्रस्थं भाष्यं सङ्गच्छते। 'राज्ञः पुरुषः' इत्यत्र स्वत्वस्वामित्वरूपः समूहः षष्ठ्यर्थः, न तु स्वत्वम्, स्वामित्वं वा, तस्यैकमात्रवृत्तित्वात् सम्बन्धस्य च द्विष्ठत्वनियमात्। षष्ठ्यर्थसम्बन्धस्तु संसर्गविधयैव भासते, न तु प्रकारविधया।

एवञ्च राज्ञः पुरुषः इत्यत्र स्वस्वामिभावसम्बन्धेन राजविशिष्टः पुरुष इति मूलोक्तं तु प्रकारविधया भानानुरोधेनेत्याहुः।

किञ्चाश्रये ण्वुलो विधानात् क्रियाश्रयत्वस्य संप्रदानापादानयोर्बाधेन धातुना क्रियानिरूपितजनकत्वलक्षणापेक्ष[ण]या विषयतालक्षणं न्याय्यम्, तस्याः स्वरूपसम्बन्धविशेषरूपत्वेनातिरिक्तत्वाभावात्। क्रियायामन्वयश्च प्रकारत्वेन विशेष्यत्वेन वा। अत एव 'पाचको देवदत्तः, पक्वस्तण्डुलः' इत्यादौ पाकनिरूपित-कर्तृत्वकर्मत्वादिकं संगच्छते। अत एव कारकाणां क्रियायामेवान्वय इति सिद्धान्तः।

"कारकाद्दत्तश्रुतयोः" [६।२।१४८] इत्यादौ च कारकशब्दः स्वर्यते, तेन कारकाधिकारोक्तं कर्त्रादिषट्कं गृह्यत इति नातिप्रसङ्गः। एवञ्च संकेत-विशेषसम्बन्धेन कारकशब्दवत्त्वं कारकत्वमिति परमार्थः।

तत्र कर्मलक्षणबोधकसूत्रम् "कर्तुरीप्सिततमं कर्म" [१।४।४९] इति। कर्तुरिति कर्तरि षष्ठी, आप्नोत्तेः सनन्तात्, "मतिबुद्धि" [३।२।१८८] इति सूत्रेण वर्तमाने क्तः, मतिरिच्छेति हि तत्राकरः। एवञ्च कर्त्राप्तुमिष्यमाणं कर्मेत्यर्थः। आप्तिश्चात्र सम्बन्धः। तत्र कर्त्रा कर्मणः साक्षात् सम्बन्धस्यासंभवात् क्रियाद्वारकः परम्परासम्बन्धो गृह्यते। कर्तृविशेषणतया तस्या उपस्थिततया उपस्थितपरित्यागेनानुपस्थितकल्पनायां मानाभावात्। एवञ्च कर्तृनिष्ठव्यापारेण सम्बन्द्धुमिष्यमाणमित्यर्थः। सम्बन्धश्च फलव्यापारयोः संसर्गतया भासमानो जन्यतादिरूपः, तत्फलाश्रयतारूपश्च। इष्यमाणत्वञ्च, तद्व्यापारोद्देश्यत्वमेव।[1]

---

1. एवञ्च प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वेनेच्छोद्देश्यत्वं कर्मत्वमिति फलितम्।

तथाहि—'कुलालो घटं करोति' इत्यत्र प्रकृतो धातुः कृञ् धातुः, तदर्थः प्रधानीभूत इतरनिष्ठविशेष्यतानिरूपितोपस्थितीयप्रकारत्वानधिकरणीभूतः उत्पत्त्यनुकूलो व्यापारः, तत्प्रयोज्यम्—प्रकृतधात्वर्थफलम् = उत्पत्तिः, तदाश्रयत्वेनोद्देश्यता; 'घट उत्पत्त्याश्रयो भवतु' इत्याकारिका घटे कर्तुरुद्देश्यत्वादिति घटस्य कर्मत्वं सिद्धम्।

फलाश्रयत्वञ्च फलतावच्छेदकसम्बन्धेन ग्राह्यम्। फलतावच्छेदकसम्बन्धश्च येन सम्बन्धेन फलाश्रयत्वप्रकारिकेच्छा भवति, स सम्बन्धः। स च तत्तद्धातुभेदाद् भिन्नः।

यथा 'ग्रामं गच्छति' इत्यत्रानुयोगित्वविशिष्टः समवायः फलतावच्छेदकसम्बन्धः। 'तेन सम्बन्धेन संयोगाश्रयो ग्रामो भवतु' इत्याकारकेच्छीयफलनिष्टविषयतावच्छेदकत्वस्य समवाय एव सत्त्वेन, तत्सम्बन्धेन फलाश्रयस्यैव

एतेन 'रथो ग्रामं गच्छति' इत्यादौ कर्तुरचेतनत्वेन तत्रेच्छाया असंभवात् तत्कर्मणः कर्तृगतेच्छाविषयत्वाभावेन कर्मत्वं न स्यादित्यपास्तम्। तदुपलक्षितोद्देश्यत्वस्य तत्रापि सत्त्वात्, तत्रोत्तरदेशसंयोगस्य रथादिव्यापारोद्देश्यत्वात्। भाष्यनये कूलं पिपतिषतीत्यादिवच्चेतनत्वारोपेण न क्षतिरित्यप्याहुः।

तदुद्देश्यत्वञ्च साक्षात् फलरूपे धात्वर्थे क्रियायाः फलेच्छापूर्वकेच्छाविषयत्वेन फलस्य तत्त्वात्। तत्र फले कर्मसंज्ञायाः फलाभावात् तदभिन्ने प्रवर्तते। यथा स्तोकं पचन्तीति। एवञ्च तत्राभिन्नोऽभेदो वा द्वितीयार्थः। फलाश्रयत्त्वात् तण्डुलादोनामप्युद्देश्यत्वम्। अत एव "लः कर्मणि" [३।४।६९] इति सूत्रं संगच्छते। तत्र हि कर्तृसाहचर्येणाधात्वर्थकर्मण एव ग्रहणम्। अत एव विक्लित्यादिकर्मणि न लकारः। अत एव प्रयागात् काशीं गच्छति देवदत्ते प्रयागं गच्छतीति प्रयोगः, अन्यथा प्रयागस्यापि देवदत्तव्यापारजन्यविभागाश्रयत्वेन स दुर्वार एव। तस्य प्रकृतधात्वर्थोद्देश्यता तु नेति स्पष्टमेव।

न च कालिकादिसम्बन्धेन फलाश्रयेऽतिव्याप्तिः, फलतावच्छेदकसम्बन्धेन फलाश्रयस्य ग्रहणात्।

न च 'चैत्रो ग्रामं गच्छति' इत्यत्र ग्रामसंयोगादिरूपफलाश्रयचैत्रादेः कर्मत्वं स्यादिति वाच्यम्, परया कर्तृसंज्ञया बाधात्। ग्रामनिष्ठानुयोगिताया एव फलतावच्छेदकसम्बन्धत्वेन तेन सम्बन्धेन चैत्रे तदभावाच्च। अत एव 'आत्मानमात्मना हन्ति' इत्यत्र शरीरमनोरूपावच्छेदकभेदेन कर्मत्वकर्तृत्वोपपादनं भाष्ये कृतम्।

कर्मत्वम्, न तु कालिकादिना फलाश्रयस्य, तस्य सम्बन्धस्य फलतावच्छेदकत्वाभावात्।

अत एव संयोगस्य द्विष्ठत्वेन तस्य समवायेन ग्राम इव चैत्रे सत्त्वेऽपि चैत्रो ग्रामं गच्छतीतिवच्चैत्रः स्वङ्गच्छतीति न प्रयोगः, अनुयोगित्वविशिष्टसमवायस्य चैत्रेऽसत्त्वात्।

तस्य च फले कर्तृनिष्ठव्यापारप्रयोज्यविभागरूपफलाश्रयत्वस्य सत्त्वेन सकर्मकत्वम्।

न च चैत्रमैत्रोभयकर्तृकविभागस्थले प्रतियोगित्वविशिष्टसमवायेन चैत्रे विभागरूपफलसत्त्वेऽपि 'चैत्रो मैत्रं विभजते' इति प्रयोगापत्तिरिति वाच्यम्, अकर्मकधातुस्थले फलसामानाधिकरण्यस्य व्यापारे सत्त्वेन तत्र फलाधिकरणतायाः समवायेन विवक्षितत्वेन मैत्रवृत्तित्वविशिष्टसमवायेन फलस्य चैत्रेऽभावेनादोषात्, परत्वात् कर्तृसंज्ञया बाधाच्च।

'वृक्षाद् भूमौ पतति' इत्यत्र कर्तृकर्मद्वारा तद्विवक्षायामाधारत्वम्। साक्षात् तदाश्रयत्वविवक्षायां तु कर्मत्वं बोध्यम्। अत एव 'द्वितीया श्रि"[२।१।२४]इति समासविधानं संगच्छते। 'घटं करोति' इत्यत्रोत्पत्तिरूपधात्वर्थफलाश्रयत्वात् कर्मत्वम्, 'घटं जानाति' इत्यादौ ज्ञानजन्यविषयावच्छिन्नाज्ञानभङ्गरूपफलशालित्वात् कर्मत्वम्।

न चैवमपि नष्टे भाविनि च तं जानातीत्यनुपपन्नम्, तत्रापि सूक्ष्मरूपेण स्थित्यभ्युपगमात्, न्यायनये विषयताया अतीते कृतिस्वीकारवदावरणतद्भङ्गयोरपि वृत्तिस्वीकारे क्षत्यभावाच्च।

यद्वा, जानातीच्छतीत्यादौ ज्ञानेच्छाद्यनुकूलो व्यापारो धात्वर्थः। स च ज्ञानजनको मनश्चक्षुःसंयोगादिरेव। अत एव 'मनो जानाति' इत्यादिप्रयोगाः संगच्छन्ते। इच्छानुकूलश्च ज्ञानादिः, फलतावच्छेदकसम्बन्धो विषयता।

यद्वा, विषयतानिरूपकज्ञानेच्छादिरेव व्यापारः। न च विषयताया ज्ञानाजन्यत्वेन कथं फलत्वम्, अनुपदवक्ष्यमाणफलत्वस्य तत्रापि सत्त्वेनाक्षतेः।

नन्वत्र सूत्रे कर्तृग्रहणं किमर्थम्, तदभावोऽपि केनाप्तुमित्याकाङ्क्षायां कारकाधिकारात् प्रत्यासत्तिन्यायेन प्रकृतधात्वर्थलाभः। न चैवं कर्तुरपि कर्मत्वं स्यात्, परत्वात् कर्तृत्वेन बाधादिति चेत्, न; यतः संकोचे मानाभावेन फलावच्छिन्नव्यापाररूपसंपूर्णधात्वर्थेनेप्सितस्य तण्डुलादेरेव कर्मत्वं स्यात्, न फलस्येति तस्यापि कर्मत्वाय तत्[1]।

किञ्च, 'यवेभ्यो गां वारयति' अत्र पदानामपि कर्मत्वं स्यात्, तत्र भक्षणादिफलजनकव्यापाराभावानुकूलो व्यापारो वारयतेरर्थः। न च "वारणार्थानाम्" [१।४।२७] इति सूत्रं व्यर्थम्, अनुपदवक्ष्यमाणार्थान्तरवृत्तिवारयत्यादियोगे चारितार्थ्यात्। तद्धि सूत्रं विनिगमनाविरहादुभयत्रापि प्रवर्तते। कर्तृग्रहणे कृते तु न दोषः, कर्तृनिष्ठव्यापारजन्यफलानाश्रयत्वादित्याहुः।

ननु तमब्ग्रहणं किमर्थमिति चेत्, 'पयसौदनं भुङ्क्ते' इत्यादौ पयसः कर्मत्वव्यावृत्त्यर्थम्। न चात्र पयसो मृदुविशदत्वसंपादनरूपस्वव्यापारजन्यसम्बन्धेन भुजधात्वर्थेऽन्वयविवक्षायाः सत्त्वेन फलाश्रयत्वविवक्षाया असत्त्वेन च कथं तमब्ग्रहणाभावेऽपि द्वितीयाप्रसक्तिः, नहि युगपद्विवक्षाद्वयं कर्तुं शक्यमिति वाच्यम्, पञ्चकप्रातिपदिकार्थपक्षे पयःशब्देनैवोभयं प्रतिपाद्यमिति विवक्षायाः सत्त्वेनादोषात्। पयोनिष्ठमृदुविशदत्वसंपादनरूपव्यापारजन्यपयो-

1. कर्त्तृग्रहणम्।

निष्ठगलादधःकरणानुकूलव्यापार इत्यादिबोधात्, तत्र तमबग्रहणाभावे परत्वाद् द्वितीयैव स्यात्। परन्त्वत्र मुख्यतया भुजिक्रियोद्देश्यत्वमोदनस्यैव, न पयस इति बोध्यम्। न च "तथायुक्तञ्चानीप्सितम्" [१।४।५०] इति कर्मत्वं पयसो दुर्वारम्, सर्वथानुद्देश्य एव तत्प्रवृत्तेः, अनीप्सितपदेन तथैव लाभात्। यदि तु तस्यापि मुख्यतया तत्त्वम्, तदा भवत्येव कर्मत्वमिति बोध्यम्। उद्देश्यतायां मुख्यत्वञ्च तद्धात्वर्थप्रकारेच्छाविशेष्यत्वे सति तद्धात्वर्थोपयुक्त-धर्मान्तरप्रकारकेच्छाविषयत्वाभाववत्त्वम्। प्रकृते च गलादधःकरणरूपफला-श्रयत्वप्रकारकेच्छाविषयत्वेऽपि तदुपयुक्तमृदुविशदत्वसंवादकत्वप्रकारेच्छाविषयत्व-स्यापि सत्त्वान्न दोषः। सत्यन्ताभावे तु 'अग्नेर्माणवकं वारयति' इत्यत्राग्नेरपि कर्मत्वापत्तिः। न च 'वारणार्थानाम्' इत्यस्य वैयर्थ्यम्, प्रागुक्तार्थकवारयत्यादियोगे चारितार्थ्यात्। अत्र वारणं संयोगाभावानुकूलो व्यापारः। न च प्रवृत्तिविघातो वारणमिति वृत्त्यादिविरोधः, धातूनाम् [1]अनेकार्थत्वात्। मम त्वग्नेः संयोगाभाव-प्रकारकेच्छाविशेष्यत्वाभावान्न दोषः। न ह्यग्निर्माणवकसंयुक्तो मा भवत्विति इच्छा, अपि तु माणवकोऽग्निसंयुक्तो मा भवत्विति। ध्वनितञ्चेदमत्रैव भाष्ये।

एवञ्च धात्वर्थतावच्छेदकफलम्, कर्तृव्यापारप्रयोज्यफलतावच्छेदक-सम्बन्धेन धात्वर्थफलाश्रयश्चैतदन्यतरत्वं कर्मत्वमित्येतत्सूत्रनिष्कर्षः।

अत्र फलत्वं कर्तृप्रत्ययसमभिव्याहारे तद्धात्वर्थनिष्ठविशेष्यतानिरूपित-प्रकारताश्रयतद्धात्वर्थत्वम्, न त्वत्र जनकत्वप्रवेशः, आस्यादीनां तत्पूर्वकदर्शनादौ लक्षणायामनेन कर्मत्वप्रतिपादकभाष्यादिविरोधापत्तेः। देवदत्तकर्तृकपचिक्रिया-कर्मकोत्पत्त्यनुकूलो यत्नस्त्वत्कर्तृक इत्याद्यर्थकदेवदत्तः पचति करोषीत्यादौ पश्य मृगो धावतीत्यादौ च पाकधावनादेः क्रियाफलत्ववारणाय तद्धात्विति।

तथा हि सति देवदत्तस्य कर्मत्वे ततो द्वितीया स्यात्। पक्वौदनो युज्यते इतिवत् प्रधानानुरोधिसंज्ञाया बलवत्त्वाद् न धात्वर्थकर्तृत्वेन तद्बाधः। इदमपि तत्तत्क्रियाभेदभिन्नमेव बोध्यम्।

---

1. अयमाशयः—'परौ भुवोऽवज्ञाने" [३।३।५५] इत्यनेन परिपूर्वकाद् भूधातोरव-ज्ञानेऽर्थे घञ् विधीयते। तच्च 'अनादरः परिभवः परीभावस्तिरस्क्रिया' इति कोशात् सिद्धमेव। पुनरवज्ञानेऽर्थे घञ्विधानं व्यर्थीभूय ज्ञापयति—धातूनामने-कार्थत्वम्।

अथ च 'कुर्द क्रीडायामेव' अत्र धातूनामनेकार्थत्वाभावे 'एव'ग्रहणस्य वैयर्थ्यं स्यात्।

तेन 'पुष्पेभ्यः स्पृहयति' इत्यत्र 'हरिं प्रीणयति' इत्यर्थकहरये रोचते भक्तिरित्यादौ च पुष्पहर्यादौ नातिप्रसङ्गः, तद्योगे धात्वर्थफलाश्रयस्य सम्प्रदानपदार्थत्वात्।

ननु तमब्ग्रहणे सति यत्र प्रीतियोग्युपादानं पयसौदनं भुङ्क्ते इत्यादौ तत्रैव स्यात्, न तु 'ग्रामं गच्छति', 'आदित्यं पश्यति' इत्यादौ। न च तत्रापि क्रियापेक्षयोत्कृष्टत्वमस्त्येव, सा हि फलार्थमिष्यमाणत्वादीप्सिता भवति, पश्यत्यादावपि प्राकट्यरूपं फलमस्त्येवेति वाच्यम्, तुल्यजातीयस्यैव प्रतियोगित्वात्। कारकतुल्यजातीयं हि कारकम्, न क्रिया। न च क्रियाया अपि संदर्शनप्रार्थनाद्यपेक्षया कर्मत्वमस्त्येवेति वाच्यम्, सर्वत्र तद्भाने मानाभावात्।

किञ्चैवं क्रियाया अनीप्सिततमत्वेन तदपेक्षया प्रकर्षानुपपत्तेरिति चेत्, अत्राहुः 'ललाटकुक्कुटयौ पश्यति, येनादर्शनमिच्छति' इत्यादिनिर्देशैः प्रतियोग्यनुपादानेऽपि कर्मसंज्ञाज्ञापनादिति।

तत्र द्वितीयायाः कर्मणि शक्तिग्राहकं सूत्रम् "कर्मणि द्वितीया" इति। अत्र कर्मपदेनैतच्छास्त्रविहितकर्मसंज्ञकमात्रं गृह्यते, अविशेषात्। अत्र "कर्तुरीप्सिततमम्" इति सूत्रबोधितकर्मविहितद्वितीयाया आश्रयोऽर्थः, फलस्य धातुनैव [1]लाभात्, इष्टतमत्वस्यापि मुख्योद्देश्यतारूपस्य ततोऽभानात्, वाक्यार्थविधया लाभाच्च। तत्र प्रकृत्यर्थोऽभेदेन विशेषणम्, विशेष्यञ्चाधेयतया फलम्। एवञ्च 'हरिं भजति'-इत्यादौ हर्यभिन्नाश्रयवृत्तिप्रीतिजनको व्यापार इति बोधः। प्रीतिजनकव्यापारो हि भज्धात्वर्थः।

न च [2]आकृत्यधिकरणन्यायेनाश्रयत्वमेवार्थ इति वाच्यम्, तावताऽपि धर्मिबोधस्य तत आवश्यकत्वेन बोधकतारूपायाः शक्तेस्तत्र दुर्वारत्वात्। अन्यथा विभक्तितो धर्ममात्रबोधापत्तौ 'गां वाहय' इत्यादौ वाहाद्यनन्वयापत्तिः। बोधकतैव चास्माकं शक्तिरिति प्रपञ्चितम्। पञ्चम्याद्यर्थकसमासानां धर्मिपरतया निर्णीतत्वेन तथैव न्याय्यत्वाच्च। "कर्मणि" इत्यादिसूत्रस्वरसाच्च। कर्मेत्यादिकृदन्तमहासंज्ञाकरणेन तदर्थस्यैव विभक्त्यर्थस्यापि इतरत्राभेदेनैवान्वये विभक्तीनां

---

1. 'अनन्यलभ्यो हि शब्दार्थः' इत्याप्तवचनादिति शेषः।
2. तत्र हि आकृतावेव शक्तिरभ्युपगन्तव्या, लाघवात्। व्यक्तौ शक्तिस्वीकारे शक्यतावच्छेदके गौरवमापद्येतेति सिद्धान्तितम्।

साधुत्वबोधनाच्च। अत एव तिङ्सुपोः समानार्थत्वप्रतिपादकभाष्यादिग्रन्थाः सङ्गच्छन्ते। तिङश्च धर्मिण्येव शक्तिरिति निरूपितमाख्यातवादे।

आश्रयत्वञ्चाखण्डोपाधिरिति न शक्यतावच्छेदकगौरवम्। गुरुण्यपि अवच्छेदकत्वस्य निरूपितत्वाच्च।

न चाश्रयता निरूपकभेदेन सम्बन्धिभेदेन च भिन्ना। अन्यथा घटाश्रयतादि-ग्रहापत्तिरिति शक्त्याऽनन्त्यमिति वाच्यम्, पटग्रह इष्टापत्तेः। तदग्रहे च न दोष-शङ्का। इयमेव च समवायस्यैकत्ववादिनां शुक्लादिगुणानामेकत्ववादिनां च गतिः।

अस्तु वा आश्रयत्वं नाना, तथापि तदादौ बुद्धिविषयतावच्छेदकत्ववदाकाश-पदशक्तौ शब्दत्ववच्चाश्रयतात्वस्य शक्यतावच्छेदकतावच्छेदकस्यैवैकत्वान्न शक्त्यानन्त्यम्।

यत्तु आश्रयस्य शक्यत्वे आधेयत्वस्य संसर्गत्वमुपेयम्। तथा च 'तण्डुलः पचति' इत्यतोऽपि बोधापत्तिः। न च द्वितीयासमभिव्याहारस्तादृशबोधे कारणम्, प्रथमायाः कर्मत्वे शक्तिग्रहदशायाम् 'तण्डुलः पचति' इत्यतोऽपि तथाबोधेन व्यभिचारादिति। तत्, न; कर्मत्वस्य शक्यत्वेऽपि ततो बोधापत्तेर्दुर्वारत्वात्।

न च कर्मत्वबोधकपदप्राग्वर्तिपदजन्यज्ञानत्वेन हेतुत्वमेवमाधेयतासंसर्गक-घटप्रकारकशाब्दबोधे घटबोधकपदोत्तरपदजन्यज्ञानत्वेन हेतुत्वम्, अतो नोक्ताति-प्रसङ्गः, नापि शक्तिभ्रमदशायां ततो बोधः, नापि घटः कर्मत्वमित्यतो विपरीत-व्युत्पन्नस्य तथाबोधे व्यभिचार इति वाच्यम्, कर्मत्वं घटः, अम् घटः इत्येतादृशसम-भिव्याहारव्युत्पन्नानां ततस्तथाबोधे व्यभिचारतादवस्थ्यात्, घटः कर्मत्वमित्यतो-विपरीत[1]व्युत्पत्तिरहितस्यापि तथाबोधापत्तेश्च। यदि तत्तत्समभिव्याहारजन्य-तथाबोधे तत्तत्समभिव्याहारजनकत्वग्रहोऽपि हेतुरिति ब्रूषे, तर्ह्यस्माकमपि न क्षतिः।

एतावान् विशेषः—परेषां कर्मत्वबोधकपदघटितानुपूर्वीत्वेन प्रवेशः, अस्माकं तु कर्मबोधकपदत्वेनेति। न च त्वन्मते आश्रयवाचकपदप्रवेशः, तस्य तच्छक्यत्वात्।

---

1. स्वस्वशास्त्राभ्यासजनितसंस्कारविशेषो व्युत्पत्तिः। यथा व्याकरणशास्त्रा-भ्यासवतां सुबन्ततिङन्तादीनामेव पदत्वम्, न तु शक्तत्वस्यापि। तार्किकाणां तु तस्यापीति भावः।

तथा च 'देवदत्तेन पच्यते' इत्यतोऽपि कर्मत्वबोधापत्तिरिति वाच्यम्, कर्मकरणादौ शक्यतावच्छेदकाश्रयत्वस्य तत्तच्छक्तिरूपस्य भिन्नताभ्युपगमेनादोषात्। अन्यथा द्वितीयादेः पर्यायतापत्तेः। अस्तु वा, फलाश्रयत्वरूपकर्मत्वेन कार्यकारणभावे प्रवेशः, अशक्यस्यापि फलस्य तन्निष्ठतामात्रेणेतरव्यावर्तकत्वसंभवात्। यद्वा, तत्तत्कर्मादिपदवदाश्रयस्यैव द्वितीयादिशक्यत्वेन तेनैव रूपेण कार्यकारणभावे प्रवेश इति न दोषः।

यदपि, कर्मत्वत्वादिना बोधानुभवात् तत्तद्रूपेण शक्यतेति तदपि न, तथाबोधस्य तादृशव्युत्पत्त्यधीनत्वेनाप्रमाणत्वात्, सर्वेषां तथाननुभवाच्च। न चाश्रयोऽपि न शक्यः, अन्यलभ्यत्वादिति वाच्यम्, हरित्वादिना लाभेऽपि आश्रयत्वादिना अलाभात्।

एतेन प्रातिपदिकस्यापि तदर्थकत्वात् प्रातिपदिकार्थविहितप्रथमया सह विकल्पापत्तिरिति निरस्तम्, आश्रयत्वेन तदर्थत्वाभावात्। अनयैव दिशा सर्वासां कारकविभक्तीनां धर्मिबोधकत्वं द्रष्टव्यम्।

ननु 'आश्रयत्वेनालाभः' इत्यस्य आश्रयत्वं न लब्धमित्येवार्थः, तथा च तत्रैव शक्तिरुचिता। "कर्मणि द्वितीया" इत्याद्यनुशासनं तु शक्तितद्वतोस्तादात्म्यमभ्युपेत्य। अन्यथा "द्व्येकयोः" इत्याद्यनुरोधाद् एकवचनादेः संख्याविशिष्टाश्रयवाचकतापत्तिः। तिङ्कृदादेस्तु 'कृतः कटः, देवदत्तः पचतिकल्पम्' इत्यादौ सामानाधिकरण्यान्वयानुरोधात् "युष्मद्युपपदे" इत्याद्यनुरोधाच्च धर्मिवाचकत्वं तल्लक्षकत्वं वेति निरूपितमाख्यातवादे। "अनभिहिते" इत्यस्य च तत्तच्छक्त्यनभिधाने इत्यर्थः। आख्यातेऽप्यवच्छेदकतया शक्तिसत्त्वान्न दोषः। तस्य निरूपकतासम्बन्धेन धात्वर्थे फलेऽन्वयः।

यद्वा, प्रत्ययार्थत्वेऽपि रमेत्यादाविव प्रकृत्यर्थविशेषणत्वम्। अत एव तदर्थबहुव्रीह्यादीनां धर्मिपरत्वम्। विभक्तिप्रकृतिमात्रार्थत्वेन वा तेषां तत्त्वम्। अत एव षष्ठ्यर्थबहुव्रीहेरपि परमते धर्मिबोधकता संगच्छते।

न च तस्य शक्यत्वे तत्त्वस्य शक्यतावच्छेदकत्वमिति गौरवम्, उक्तोत्तरत्वात्। तादात्म्येन तस्यैवावच्छेदकत्वाच्च, आश्रयतानां नानात्वे त्वाश्रयत्वत्वमेवाखण्डोपाधिरूपमिति गौरवाभावाच्च।

न चात्र मते आश्रयत्वत्वस्यापि शक्यत्वं स्यादिति वाच्यम्, अशक्यत्वेऽपि तदवच्छेदकत्वसंभवात्, अलक्ष्यादेर्लक्ष्यतावच्छेदकत्वादिवदिति चेत्, सत्यम्। अत एव 'शक्तिरेव वा' इति पक्षान्तरमुक्तं हरिणा।

सा चेयं द्वितीयाकृदादिभिरनुक्ते एव कर्मणि, "अनभिहिते" इति सूत्रात्। तेन 'कृतः कटः' इत्यादौ न द्वितीया, 'अनभिहिते' इति कर्मणीत्यादीनामेव विशेषणम्, संनिहितत्वात्। एतेन कर्मत्वादेः कृदादिभिरुक्तत्वेऽपि एकत्वादिसंख्यायामनुक्तत्वाद् द्वितीया स्यादेव। यथैकादिशब्देभ्यः संख्योक्तावपि कर्मत्वादिबोधनाय सा क्रियत इति निरस्तम्। संख्यावोधस्य प्रथमयापि संभवाच्चेति विस्तरः शब्देन्दुशेखरे द्रष्टव्यः।

अपरञ्च कर्मत्वबोधकं सूत्रम्—"तथायुक्तं चानीप्सितम्" इति। तत्रानीप्सितत्वमनुद्देश्यत्वम्। 'पराधीनतया विषं भुङ्क्ते' इत्याद्युदाहरणम्। अनुद्देश्त्वञ्च प्रत्यासत्त्या यद्धात्वर्थफलाश्रयत्वेन कर्मत्वे तद्धात्वर्थकर्तुरेव बोध्यम्। तथायुक्तञ्च प्रकृतधात्वर्थफलाश्रयत्वम्। तेन 'विषेणौदनं भुङ्क्ते, प्रयागात् काशीं गच्छति देवदत्तः' इत्यादौ विषप्रयागादेर्न कर्मत्वम्।

अत्र च विषयस्य स्वव्यापारजन्यत्वसम्बन्धेन व्यापारे एवान्वयविवक्षेति न फलाश्रयत्वम्।

एवञ्च सर्वथानुद्देश्यत्वे सति धात्वर्थफलाश्रय इत्येतत्सूत्रनिष्कर्षः।

'पयसौदनं भुङ्क्ते' इत्यादौ पयसि कर्मत्ववारणाय सत्यन्तम्। अत एवात्र सूत्रे अनीप्सितग्रहणं चरितार्थम्। अन्यथा तक्रकौण्डिन्यन्यायेनानीप्सित एवैतत्प्रवृत्तिः सिद्धा, किं तेन। अन्यथाऽमुख्योद्देश्येऽपि स्यादिति तद्व्यावृत्त्यर्थं तत्।

अपरञ्च तद्बोधकं सूत्रम्—"अकथितञ्च" [१।४।५१] इति। अत्र पूर्वसूत्रात् 'युक्तम्' इत्यनुवर्तते। तत्र केनेत्याकाङ्क्षायम् उपस्थितकर्मण्येवान्वयः। तेनायमर्थः—अपादानसम्प्रदानाधिकरणकर्मरूपैरविवक्षितं सम्बन्धत्वेन च विवक्षतं कर्मनिष्ठधात्वर्थस्य निमित्ततया सम्बन्धि तत्कर्मेति। अत एव करणहेत्वोरनुपादानम्, कर्मयुक्तत्वाभावात्। इदं च—

दुह्याच्पच्दण्डरुधिप्रच्छिचिब्रूशासुजिमथ्मुषाम्।
कर्मयुक् स्यादकथितं तथा स्यान्नीहृकृष्वहामिति।

इति परिगणितधातुयोग एव प्रवर्तते। कर्मयुक् कर्मनिष्ठप्रकृतधात्वर्थस्य निमित्ततया सम्बन्धीत्यर्थः।

एवञ्चैतदन्यतमधात्वर्थप्रधानव्यापारजन्यैतदन्यतमधात्वर्थव्यापारे सम्बन्धितयान्वयित्वमेतदन्यतमगौणकर्मत्वम्—इत्येतत्सूत्रनिष्कर्षः। गौणत्वञ्चास्य 'गौणे कर्मणि दुह्यादेः' इत्यादिव्यवहाराज्ज्ञायते। एवञ्चैतत्कर्मविहितद्वितीयायाः सम्बन्धोऽर्थः।

अस्योदाहरणम्—'गां दोग्धि पयः' इति। अत्र दुहेरन्तस्थितद्रवद्रव्यविभागानुकूलव्यापारानुकूलव्यापारोऽर्थः। तत्र विभागानुकूलो व्यापारो गोनिष्ठः, कर्तृव्यापारगोव्यापारोभयप्रयोज्यफलाश्रयत्वात् पयसः प्राधान्यम्, गोस्तु तद्वैपरीत्याद् गौणत्वम्। तत्र यद्यपि "तथायुक्तम्" इति, "कर्तुरीप्सिततमम्" इति वा कर्मत्वं सिध्यति, तथापि शेषत्वविवक्षायां षष्ठीबाधनार्थमिदम्। पयोनिष्ठविभागीयसम्बन्धस्यैव फलतावच्छेदकत्वाद् न गोर्विभागाश्रयत्वेन कर्मत्वम्।

एवञ्च गोसम्बन्धी पयोनिष्ठविभागानुकूलो यो व्यापारः, तदनुकूलो गोपनिष्ठो व्यापार इति बोधः।

यदा तु द्रवद्रव्यनिष्ठविभागानुकूल व्यापार एव धात्वर्थः, तदापादानत्वविवक्षायां गोरिति पञ्चम्येव। तदविवक्षायां त्वनेन कर्मत्वमेव। स्पष्टञ्चेदं कैयटे। अपादानत्वाद्यविवक्षा चेयम्—यद्धातोर्व्यापारद्वयार्थत्वविवक्षा, तदर्थविभागाद्यवधित्वाविवक्षा चेति बोध्यम्।

'बलिं याचते वसुधाम्' [इत्यत्र] याच्धातोः स्वत्वनिवृत्तिजनकव्यापारानुकूलव्यापारोऽर्थः। तत्राद्यो व्यापारो बलिनिष्ठः, तदनुकूलो दीयतामित्याद्यभिलाषादिरूपो याचकनिष्ठः। तथा च बलिसम्बन्धी बसुधानिष्ठस्वत्वनिवृत्तिजनको यो व्यापारः, तदनुकूलो याचकनिष्ठो व्यापार इति बोधः। स्वत्वनिवृत्त्यनुकूलव्यापारमात्रार्थत्वे स्वत्ववद् द्रव्यीयविभागाश्रयत्वविवक्षायामपादानत्वं बलेरित्येके।

याचिकर्मणाभिप्रेयमाणत्वत् सम्प्रदानत्वमित्यन्ये।

यत्तु, याचनं स्वोद्देश्यकदानेच्छेति। तत्, न; 'पुत्रार्थं कन्यां याचते' इत्यनापत्तेः। पुत्रोद्देश्यकं त्वत्र दानम्। स्वसम्प्रदानेच्छावति फललाभशङ्कया देहीति प्रयोगाद्यभाववत्यपि 'देवदत्तो याचते' इति प्रयोगापत्तेश्चेति दिक्।

'अविनीतं विनयं याचते' अत्र स्वीकारानुकूलव्यापारानुकूलव्यापारो याचेरर्थः। स्वीकारश्च 'इदमवश्यं करिष्यामि' इत्यादिशब्दप्रयोगादिजनको ज्ञानविशेषः। तदीयफलतावच्छेदकसम्बन्धो विषयता। एवञ्च विनयः प्रधानम्, स्वीकारानुकूलव्यापारमात्रार्थकत्वेऽविनीतस्य सम्प्रदानत्वम्। अयमेव चानुनय इत्याहुः।

एवञ्च चाविनीतसम्बन्धी विनयविषयकस्वीकारानुकूलव्यापारानुकलो व्यापारो देवदत्तनिष्ठ इति बोधः।

'तण्डुलानोदनं पचति' [अत्र] उत्पत्तिजनकविक्लित्यनुकूलव्यापारः पचेरर्थः। तत्रौदनतण्डुलयोरुत्पत्तौ विक्लित्तौ चाश्रयतयान्वयः। उभयव्यापारोद्देश्यत्वादोदनः प्रधानम्, ओदननिष्ठोत्पत्तिजनिका या तण्डुलादिसम्बन्धिनी विक्लित्तिः, तज्जनको व्यापार इति बोधः।

यदा तु विक्लित्तिजन्योत्पत्त्यनुकूलो व्यापारोऽर्थः, तदा तण्डुलानामोदनं पचतीति। तण्डुलविकारमोदनं विक्लित्योत्पादयतीत्यर्थः। विक्लित्यनुकूलव्यापारमात्रवाचित्वे तण्डुलानामेव कर्मत्वमिति दिक्।

'गर्गान् शतं दण्डयति' [अत्र] स्वसम्प्रदानकदानानुकूलव्यापारानुकूलव्यापारः शासनरूपो दण्डेरर्थः। शासनं नियन्त्रणम्, शतं प्रधानम्, उद्देश्यत्वात्। दानानुकूलव्यापारमात्रार्थकत्वे विभागाश्रयत्वविवक्षायां गर्गाणामपादानत्वम्, तदविवक्षायां सम्प्रदानत्वम्।

'व्रजमवरुणद्धि गाम्' [अत्र] उत्तरकालिकदेशान्तरगतिप्रतिबन्धानुकूलानुयोगितासम्बन्धावच्छिन्नोत्तरदेशसंयोगानुकूलो व्यापारो रुधेरर्थः। अनुयोगितासम्बन्धावच्छिन्नः स व्रजनिष्ठः। गौः प्रधानम्, उद्देश्यत्वात्। प्रतियोगितासम्बन्धावच्छिन्नोत्तरदेशसंयोगार्थत्वे कर्मद्वारा क्रियाश्रयत्वविवक्षायामधिकरणत्वम्।

'माणवकं पन्थानं पृच्छति' प्रश्नविषयार्थज्ञापनानुकूलव्यापारः पृच्छेरर्थः। स च व्यापारः केन पथा गन्तव्यमित्याद्यभिलाषादिरूपः। ज्ञापनाश्रयत्वाद् माणवकस्य ज्ञानविषयत्वाच्च पथस्तत्त्वं बोध्यम्। ज्ञानानुकूलव्यापारमात्रार्थत्वे माणवकस्य सम्प्रदानत्वम्।

'वृक्षमवचिनोति फलानि' विभागानुकूलव्यापारानुकूलो ग्रहणोपसर्जनव्यापारश्चिञोऽर्थः। विभागानुकूलव्यापारार्थत्वे वृक्षस्यापादानत्वम्।

'माणवकं धर्मं ब्रूते, शास्ति वा'—प्रतिपत्तिजनकव्यापारानुकूलव्यापारो ब्रूञः, प्रवृत्तिपर्यवसायिप्रवृत्तिजनकः स शासेः। यदा तु विषयतया ज्ञानानुकूलव्यापारोऽर्थः, तदा सम्प्रदानत्वं माणवकस्य।

'शतं जयति देवदत्तम्'—दानानुकूलः पराभवाख्यो व्यापारो जयतेरर्थः। स्वत्वोत्पत्त्यनुकूलव्यापारमात्रार्थकत्वेऽपादानत्वं सम्प्रदानत्वं वा।

'सुधां क्षीरनिधिं मथ्नाति'—द्रवद्रव्यगतसारभागोत्थानानुकूलव्यापारफलकव्यापारो मन्थेरर्थः। उत्थानमूर्द्ध्वदेशे संयोगः। उत्थानानुकूलव्यापार-

मात्रार्थकत्वे कर्मद्वारा क्रियाश्रयत्वविवक्षणेऽधिकरणत्वम्, विभागाश्रयत्वविवक्षणेऽपादानत्वं वा ।

'देवदत्तं शतं मुष्णाति'--पराज्ञानतद्द्रव्यग्रहणोभयानुकूलो व्यापारो मुषेरर्थः। यदा तु ग्रहणानुकूलव्यापार एवार्थः, तदा देवदत्तस्यापादानत्वम् ।

'अजां ग्रामं नयति, हरति, कर्षति, वहति वा'—उत्तरदेशसंयोगानुकूलव्यापारानुकूलो व्यापारो नयतेरर्थः । स एव स्कन्धग्रहणादिपूर्वो वहेः, गत्यनुकूलो व्यापारविशेषः कृषेः, बलाद्ग्रहणपूर्वकं देशान्तरप्रापणं हरतेः । अजानयनस्योद्देश्यत्वाद् अजा प्रधानम् । गमनमात्राथकत्वे ग्रामस्याधिकरणत्वं बोध्यम् । यदा तु ग्रामीयाऽजासंयोग एवोद्देश्यः, तदा ग्राम एव प्रधानम् । एतेन 'तप्ते पयसि दध्यानयति, सा वैश्वदेव्यामिक्षा' इत्यत्र तच्छब्देन प्राधान्यात् पयसः परामर्श इति मीमांसकग्रन्था व्याख्याताः । पयःस्थाने दध्यागमनेनार्थप्राधान्यमादाय वा तेषामुपपत्तिः अत एव सप्तम्युपादानं सार्थकमिति दिक् ।

अपरञ्च 'अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसञ्ज्ञक इति वाच्यम्' इति । देशः कुरुपञ्चालादिः, अकर्मकशब्देन देशकालादिभिन्नकर्मरहिता अविवक्षितकर्माणश्च । तेन 'मासं पचति' इत्यपि गन्तव्योऽध्वा क्रोशादिः, भावो भावाद्यर्थविहितघञाद्यन्तः । 'कुरून् स्वपिति, मासमास्ते, क्रोशं शेते, गोदोहमास्ते ।' शेषत्वविवक्षायामेतत्प्रवृत्तेर्द्वितीयार्थः सम्बन्धः । अधिकरणत्वविवक्षायां सप्तम्येव । एतद्धात्वर्थसम्बन्धित्वेन विवक्षिताधारत्वञ्चैतत्कर्मत्वलक्षणं बोध्यम् ।

"गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ" [१।४।५२] इति सूत्रबोधितकर्मत्वं तु णिजर्थव्यापारजन्यतत्तद्धात्वर्थव्यापाराश्रयत्वम् । तत्तद्धातुभेदेन कर्मत्वलक्षणानां भिन्नत्वान्न लक्षणातिव्याप्त्यादिकम् । ण्यन्तहृक्रघटितकर्मत्वलक्षणे तृतीयान्तपदानभिधेयत्वे सतीति विशेषणं देयम् । 'तेन देवदत्तेन हारयति कटम्' इत्यादौ नातिव्याप्तिः; ण्यन्ताभिवादिदृशोस्तु तत्त्वे सति आत्मनेपदप्रत्ययान्ततद्धातूपात्तफलाश्रयत्वं कर्मत्वम् । वैकुण्ठमधिशेते, अधितिष्ठति, अध्यास्ते, उपवसति, अनुवसति, अधिवसति, आवसति वेत्यादावाधारो द्वितीयार्थः । एतद् धातुयोगेऽधिकरणत्वमेव कर्मत्वम्, 'आधार' इत्यनुवर्त्तमाने "अधिशीङ्स्थासां कर्म" [१।४।४६], "उपान्वध्याङ्वसः" [१।४।४८], इति

सूत्रस्वरसात्। उपवसतेश्चाभुक्त्यर्थकातिरिक्तोपवसत्याधारत्वं बोध्यम्। तेन 'वने उपवसति' इत्यादौ नातिव्याप्तिः। अभिनिविशतिकर्मत्वञ्च सप्तम्यन्तपदानभिधेयतद्धात्वर्थाधारत्वं बोध्यम्। 'क्रूरमभिक्रुध्यति, अभिद्रुह्यति' इत्यादौ विषयतासम्बन्धित्वं बोध्यम्।

अत्र च बोधः 'हरये क्रुध्यति' इत्यादौ वक्ष्यमाणरीत्या बोध्यः। क्रीडार्थकदिव्धातुयोगे 'शतं दीव्यति' इत्यादौ तृतीयान्तपदानुपस्थाप्यतद्धात्वर्थसाधकतमत्वमेव तत्कर्मत्वं बोध्यम्। सकलसाधारणकर्मत्वं च सङ्केतविशेषसम्बन्धेन कर्मशब्दवत्त्वमेव बोध्यम्। धातूनां सकर्मकत्वमपि एतच्छास्त्रबोधितकर्मसंज्ञकार्थान्वय्यर्थकत्वं बोध्यम्।

यत्तु, व्यापारव्यधिकरणफलवाचकत्वं सकर्मकत्वम्, तत्समानाधिकरणफलवाचकत्वमकर्मकत्वमिति। तत्, न; 'अध्यास्ते' इत्यादेः सकर्मकत्वानापत्तेः, अकर्मकत्वापत्तेश्च। न चेष्टापत्तिः, "अन्तःकञ्चुकिभिर्लसन्मणिधरैरध्यासिता भूमयः"

इत्यादौ 'दीव्यन्ते अक्षाः' इत्यादौ च कर्मणि प्रत्ययापत्तेः, भावे तदापत्तेश्च। अकर्मकत्वञ्च च कर्मसंज्ञकार्थानन्वय्यर्थकत्वमिति दिक्।

[1]यत्तु, परसमवेतक्रियाजन्यधात्वर्थतावच्छेदकफलाश्रयत्वं कर्मत्वम्। परसमवेतेति विशेषणात् 'चैत्रश्चैत्रं गच्छति' इति न प्रयोगः।

इयान् विशेषः—द्वितीयया स्वप्रकृत्यर्थापेक्षया परत्वम्। आख्यातेन स्वार्थसंख्यान्वय्य पेक्षया तद् बोध्ते। तच्च धात्वर्थक्रियायामन्वेति। गमिपत्योः पूर्वस्मिन् देशे त्यजेः, उत्तरदेशे स्पन्देश्च पूर्वापरयोः कर्मत्ववारणाय धात्वर्थतावच्छेदकेति। एवञ्च गमेः संयोगः, पतेरधःसंयोगः, त्यजेर्विभागस्तथेति। स्पन्देश्च न किञ्चित् फलं तथेति न दोषः। नापि त्यागो गमनमित्यनयोः पर्यायतापत्तिः।

---

1. नैयायिकमतं दूषयितुमुपन्यस्यति—'यत्तु' इत्यादिना।

अयम्भावः—'चैत्रश्चैत्रं गच्छति' इति दोषवारणाय 'परसमवेतत्वम्' इति क्रियाविशेषणमुपाददते नैयायिकाः। द्वितीयाप्रकृतित्वेन विवक्षितार्थभिन्नसमवेतव्यापारजन्यं यत् फलम्, तादृशफलाश्रयस्यैव कर्मत्वमिति तेषां तात्पर्यम्।

प्रकृते च द्वितीयाप्रकृतित्वेन विवक्षितचैत्रार्थप्रतियोगिकभेदस्य चैत्रेऽसत्त्वात् तत्समवेतव्यापारजन्यसंयोगरूपफलाश्रयस्य न कर्मत्वम्। ग्रामप्रतियोगिकभेदवच्चैत्रसमवेतव्यापारजन्यफलाश्रयत्वाद् ग्रामस्य कर्मत्वं सिद्धयति।

तत्र क्रियायाः फलस्य च धातुनैव लाभाद् आधेयत्वम्, भेदश्च द्वितीयार्थः। फलस्य पदार्थैकदेशत्वेऽपि तत्र द्वितीयार्थान्वयो व्युत्पत्तिवैचित्र्यात्।

यद्वा, फलं पृथगेव धातुशक्यम्। धात्वर्थतावच्छेदकत्वञ्च धात्वर्थविशेष्यकजनकत्वसंसर्गकबोधप्रकारत्वम्। धात्वर्थप्रकारकजन्यत्वसंसर्गकबोधविशेष्यत्वान्यतरत्वम्। अत एव कर्माख्याते फलस्य विशेष्यत्वेऽपि न क्षतिः। तत्र 'ग्रामं गच्छति' इत्यादौ धात्वर्थतावच्छेदके संयोगे वृत्तित्वं भेदश्च सामानाधिकरण्येन व्यापारे भेदे च प्रतियोगितया प्रकृत्यर्थोऽन्वेति। तथा च ग्रामवृत्तिसंयोगजनकग्रामभेदसमानाधिकरणक्रियानुकूलकृतिमानिति बोधः।

एवं कर्माख्यातेऽपि भेद आधेयत्वं चाख्यातार्थः। तत्र फलांशे आधेयत्वम्, क्रियायाञ्च यथोक्तसम्बन्धेन भेदः, भेदे च फलाश्रयः प्रतियोगितयेत्यूह्यम्।

ननु भेदे कर्मणः किं प्रतियोगितासामान्येनान्वयोऽन्वयितावच्छेदकावच्छिन्नप्रतियोगितया वा। नाद्यः, 'चैत्रश्चैत्रं गच्छति' इत्यापत्तेः। द्वित्वाद्यवच्छिन्नप्रतियोगिताकचैत्रभेदस्य चैत्रेऽपि सत्त्वात्। नान्त्यः, 'देवदत्तो द्रव्यं गच्छति इत्यादेरनापत्तेरिति चेत्, न; फलान्वयिव्यक्तिविशेषावच्छिन्नं प्रतियोगितया तदन्वयेनादोषात्। 'ग्रामं गमयति यज्ञदत्तम्' इत्यादौ शुद्धगम्धात्वर्थव्यापारस्य ण्यन्तधात्वर्थव्यापारं प्रति फलत्वम्, प्रागुक्तमवच्छेदकत्वं चास्त्येवेति प्रयोज्यकर्त्तुः कर्मत्वं बोध्यम्।

पाचयत्यादियोगे तु गत्यादिसूत्रस्य नियमर्थत्वान्न दोषः। क्रियाभेदेन कर्मत्वस्य भेदात् णिजन्तं पाचयत्यादिभिन्नक्रियाघटितमेव लक्षणं कार्यमिति तत्त्वम्।

न च परसमवेतत्वविशेषणदाने चैत्रमैत्रोभयकर्मसंयोगस्थले कर्मणः स्वान्यमैत्रसमवेतत्वाच्चैत्रस्य च तज्जन्यसंयोगादिरूपफलशालित्वाच्चैत्रे कर्मलक्षणातिव्याप्तिः। 'चैत्रः स्वात्मानं गच्छति' इति प्रयोगापत्तिश्चेति वाच्यम्, क्रियाभेदेन लक्षणभेदात्। यस्य परसमवेतयत्क्रियाजन्ययादृशफलाशालित्वम्, तत्तत्क्रियाकर्मेति, चैत्रस्य च स्वक्रियायाः परसमवेतत्वाभावात् तामादाय नातिप्रसङ्गः। मैत्रक्रियामादाय तत्त्वं त्विष्टमेव, तत्रैव 'मैत्रश्चैत्रं गच्छति' इति प्रयोगात्। एतेन प्रयोगप्रसङ्गोऽपि वारितः। चैत्रनिष्ठसंयोगजनकचैत्रान्यवृत्तिक्रियाश्रय इति शाब्दबोधासम्भवात्। स्वनिष्ठक्रियायाः परसमवेतत्वबाधात् परसमवेतक्रियायाश्च स्वस्मिन्नसत्त्वात्। 'घटं करोति' इत्यादौ 'वह्निमनुमिनोमि, जानामि' इत्यादिवद् विषयतायां लक्षणा।

एवञ्च नामार्थान्वितोद्देश्यत्वातिरिक्तविषयत्वरूपविभक्त्यर्थान्वय्यर्थकत्वं गौणसकर्मकत्वं जानातीत्यादीनाम्। अत एवाभुञ्जानेऽपि 'भोजनाय यतते' इति प्रयोगाद्यतधात्वर्थे नामार्थान्वितस्य चतुर्थ्यर्थोद्देश्यत्वस्यैवान्वयान्न यतेः सकर्मकत्वम्, न वा 'भोजनं यतते' इति प्रयोगः।

यत्तु, घटपदं कपालपरम्, तस्य घटरूपफलशालित्वात् कर्मत्वम्, कपालस्य सिद्धत्वेऽपि घटत्वेन कृतिविषयता बोध्येति। तत्, न; घटस्य धात्वर्थतानवच्छेदकत्वात् कपालं घटं करोतीति प्रयोगानापत्तेश्च। ज्ञाततारूपफलाश्रत्वेन कर्मत्वमिति तु न युक्तम्, नष्टे घटे तं जानातीत्यनापत्तेः। ज्ञातता विषयत्वापरपर्यायैवेति चेत्, इष्टापत्तेरित्याहुः।

अत्रेदं प्रष्टव्यम्—किं भेदे शक्तिः, चैत्रश्चैत्रं गच्छतीत्यादितो बोधवारणाय कल्पते, उत साधुत्ववारणाय? नाद्यः—तस्य शक्यत्वेऽपि तस्यान्यत्रान्वयवारणाय तत्प्रकारकबोधे धातुजन्यव्यापारोपस्थितिर्हेतुरिति कार्यकारणभावान्तरस्यावश्यकतया तदपेक्षया तत्र शक्तिमकल्पयित्वा द्वितीयार्थाभिधेयत्वान्वितफलप्रकारकबोधं प्रति द्वितीयान्तार्थान्यवृत्तिव्यापारोपस्थितेर्हेतुत्वमेवोच्यताम्, फलान्वयानुरोधेन तवाप्यावश्यके कार्यकारणाभावे तज्जनकतावच्छेदककोटौ द्वितीयान्तार्थान्यवृत्तित्वमात्रप्रवेशेन न किञ्चिन्मे गौरवम्। तव तु भेदे शक्तेस्तदन्वये हेतुहेतुमद्भावान्तरस्य च कल्पनेन गौरवं स्पष्टमेव।

न च 'चैत्रमैत्रौ परस्परं गच्छतः' इत्यत्र व्यापारस्य द्वितीयान्तार्थवृत्तित्वाद् व्यभिचारः, द्वितीयान्तार्थवृत्त्यन्योन्याभावप्रतियोगितावच्छेदकव्यापारोपस्थितेर्विवक्षितत्वात्।

न च भेदे शक्तिग्रहशून्यस्य चैत्रश्चैत्रमित्यतो बोधान्न तथा कार्यंकारणभाव इति वाच्यम्, तत्कारणत्वग्रहस्यापि बोधे कारणत्वादक्षतेः। अत एव विपरीतव्युत्पन्नस्य घटः कर्मत्वमित्यतो बोधः, 'घटमानय' इत्यतश्चाबोधः।

किञ्चैवं भेदस्य शक्यत्वमेव न सिध्येत्, चैत्रश्चैत्रमित्यतो विपरीतव्युत्पन्नं प्रति बोधस्येष्टत्वात्, परसमवेतत्वशक्तिग्रहवतोऽनन्वयादेव बोधाभावात्। नहि पटपदस्य घटे शक्तिग्रहवतो घटबोधात् पटपदं पटशक्तं भवति।

नान्त्यः, कर्तृसंज्ञया बाधेन तदसम्भवात्।

किञ्च, त्वदुक्तकर्मत्वस्य द्वितीयाद्युत्पत्तौ तत् साधुत्वे वा न प्रयोजकत्वम्, 'घटं जानाति' इत्यादौ सविषयकधातुयोगे द्वितीयानुत्पत्तिप्रसङ्गात्।

न च सविषयान्यस्मिन्नेतत्, तत्र तु विषयतयान्वय एव तथेति वाच्यम्,, 'कृष्णाय रोचते', 'देवदत्ताय क्रुध्यति', 'पुष्पेभ्यः स्पृहयति' इत्यादावतिप्रसङ्गापत्तेः। 'देवदत्तमभिक्रुध्यति' इत्यादौ 'वैकुण्ठमधितिष्ठति' इत्यादौ चाव्याप्तेश्च।

अथ सञ्ज्ञैव तन्नियामिका, तर्हि भेदस्य वाच्यत्वकथनं निष्फलम्।

किञ्च, 'घटं जानाति'इत्यादौ विषयत्वे लक्षणेत्यप्ययुक्तम्, स्वेच्छामात्रेण तस्या अनुचितत्वात्।

किञ्च, द्वितीया कर्मण्येव साधुः, कर्मणि द्वितीयैव च साधुरिति क्रमेण नियमानां भाष्यादावुक्तत्वेनान्यत्र लक्षणयाप्यसाधुत्वबोधनात्। अत एव 'सुब्विभक्तौ न लक्षणा' इति त्वदीयवृद्धानां व्यवहारः। कर्मसूत्रे तु 'कृत्रिमाकृत्रिमन्यायेन' स्वशास्त्रपरिभाषितकर्मग्रहणस्यैव न्याय्यत्वेन विषयताया अग्रहणात्।

किञ्च, त्वदुक्तलक्षणस्य फले व्याप्तिः। तथा च स्तोकं पचतीति न स्यात्। न च 'क्रियाविशेषणानां द्वितीयान्तत्वं नपुंसकत्वं च' इति वचनात् तदुपपत्तिः, तादृशवचनाभावात् 'सोमेन यजति'इत्यादौ तृतीयानापत्तेश्च।

किञ्चैवमवच्छेदकमपि व्यर्थम्, धात्वर्थफलशालित्वस्यैव युक्तत्वात्। धात्वर्थफलत्वञ्च धात्वर्थनिरूपितजन्यताश्रयतदर्थत्वम्।

यद्वा, प्रकारताविशेष्यतान्यतरसम्बन्धेन धात्वर्थव्यापारान्वयित्वमित्याहुः।

यत्तु मीमांसकाः, साध्यत्वं द्वितीयार्थः। उक्तञ्च—

'श्रुत्या साध्याभिधायित्वं द्वितीयायाः प्रतीयते' इति।

एवञ्च 'व्रीहीनवहन्ति'इत्यादावहनेन व्रीहीन् भावयेदित्यर्थः। यद्यपि व्रीहयः सिद्धा एव क्रियायाः साधनानि च, तथाप्यदृष्टविशेषसाधनत्वरूपसंस्कार्यत्वमेवात्र साध्यत्वं बोध्यम्। 'सक्तूञ्जुहोति' इत्यत्र तु भूतभाव्यनुपयुक्तत्वेन सक्तूनां प्रागुक्तसाध्यत्वासम्भवेन सक्तुकरणकहोमानुकूलव्यपारप्रतीतये तृतीयार्थः करणत्वं द्वितीयया लक्ष्यते। एवञ्च सक्तुभिर्भावयेदित्यर्थः।

यद्यपि प्रागुक्तरीत्या लक्षणायामसाधुत्वम्, तथापि छन्दसि "सुपां सुलुक्" [७।१।३९], "बहुलं छन्दसि", "तृतीया च होश्छन्दसि" [२।३।३] इत्यादिभिरर्थान्तरेऽपि साधुत्वकथनान्न दोषः इत्याहुः।

तत्र साध्यत्वं शक्तिविशेष एवेति न कश्चिद्विरोधः। एतावान् विशेषः—वेदे कर्मत्वशक्तिः प्रागुक्तसंस्कार्यत्वसमानाधिकरणैवेत्यलं पल्लवितेन।

अथोपपदविभक्तिभूततदर्थो निरूप्यते

तत्र सामान्यत उपपदविभक्तीनां सम्बन्धोऽर्थः, तासां शेषषष्ठ्यपवादत्वात् । तद्विशेषांश्च तत्र तत्र वक्ष्यामः । 'उभयतः कृष्णं गोप्यः' कृष्णसम्बन्धि पार्श्वद्वय-वर्त्तिन्य इति बोधः ।

'धिक् कृष्णाभक्तम्' धिगर्थो निन्दा, कृष्णाभक्तसम्बन्धिनिन्देति बोधः ।

'उपर्युपरि, अधोऽधः, अध्यधि, वा लोकम्' । द्विरुक्तोपर्यादेः समीपोर्ध्व-भागवृत्तित्वसमीपाधस्तनभागवृत्तित्वसमीपदेशवृत्तित्वानि क्रमेणार्थाः ।

सामीप्ये द्वित्वविधानात् प्रतियोगित्वरूपः सम्बन्धो द्वितीयार्थः । लोक-प्रतियोगिकसामीप्यवदूर्ध्वभागवृत्तिरित्यादिक्रमेण बोधः ।

'अभितः परितो वा कृष्णं गोपाः'—अनयोः खण्डशः शक्त्या सर्वावयवा-वच्छेदेनेत्यर्थः । तदेकदेशे सर्वस्मिन् द्वितीयार्थसम्बन्धान्वयः । कृष्णसम्बन्धिसर्वाव-यवावच्छेदेनेत्यर्थः । 'अभितः' इत्याभिमुख्येऽपि । कृष्णसंमुखे इत्यर्थः ।

'समया, निकषा वा ग्रामम्' इत्यत्राव्ययं सामीप्यार्थे, द्वितीयार्थो निरूपितत्वम्, ग्रामनिरूपितसामीप्यवदिति बोधः । 'हा कृष्णाभक्तम्' इत्यत्र हाशब्दः शोके तत्सम्बन्धी शोक इति बोधः ।

'हा पितः क्वासि' इत्यादौ पितृसम्बोध्यकप्रश्नविषयसत्ता शोच्येत्यर्थः । अत एव पितुर्न द्वितीया, हाशब्दयोगाभावात् । 'बुभुक्षितं न प्रतिभाति' इत्यादौ बुभुक्षितसम्बन्धिकिञ्चिद्विषयप्रतिभानाभाव इत्यर्थः । प्रतिभा झटिति स्फूर्त्तिः ।

'अन्तरा त्वां मां च हरिः' इत्यत्रान्तराशब्दो मध्यार्थकः, अवधित्वरूपः, सम्बन्धो द्वितीयार्थः । एवञ्च त्वन्मदवधिकमध्यवृत्तिर्हरिरिति बोधः ।

'अन्तरा हरिं न सुखम्' इत्यत्रात्यन्ताभाववानन्तराशब्दार्थः द्वितीयार्थः प्रतियोगित्वमभावेऽन्वेति । हरिशब्दश्च तद्भक्त्यादिलाक्षणिकः । एवञ्च हरिभक्ति-काभाववद्वृत्तिसुखप्रतियोगिकोऽभाव इति बोधः । एवमन्तरेणशब्दोऽप्युभयार्थः । प्रतियोगियोगितद्योगेऽपि द्वितीया ।

'जपमनुप्रावर्षत्' इत्यत्र द्वितीयार्थो लक्ष्यलक्षणभावः सम्बन्धो हेतुश्च । अनुश्च सम्बन्धविशेषद्योतकः । लक्ष्यत्वञ्च ज्ञानजन्यज्ञानविषयत्वम् । जपज्ञानेन हि जपकालज्ञानद्वारा कालविशेषविशिष्टा वृत्तिर्ज्ञाप्यते । अत एव 'कदा वृष्टो देवः' इति प्रश्ने इदमुत्तरम् । तत्र प्रकृत्यर्थो हेतावभेदेनान्वेति । स च लक्ष्यत्वैक-

देशज्ञाने, एकपदार्थयोरप्येवकारदौ परस्परान्वयदर्शनात्, जपाभिन्नहेतुज्ञानजन्य-ज्ञानविषयो वर्षणमिति बोधः।

'नदीमन्ववसिता सेना'—द्वितीयार्थः साहित्यमनुद्योत्यम्। नद्या सह सम्बद्धेति बोधः।

'अनुहरिं सुराः'—अपकर्षरूपहीनत्वसम्बन्धोऽनुद्योत्यो द्वितीयार्थः, हरिप्रति-योगिकापकर्षवन्त इति बोधः। उपहरिमित्यत्राप्येवम्।

'वृक्षं प्रति, पर्यनु वा विद्योतते विद्युत्' लक्ष्यत्वसर्वबोधो द्वितीयार्थः प्रत्यादि-द्योत्यः। वृक्षप्रकाशेन विद्युज्ज्ञानात् तस्य लक्षणत्वम्। तेन हि दिग्विशेषावच्छिन्ना विद्युद् ज्ञाप्यते। वृक्षज्ञानजन्यज्ञानविषयो विद्युद्विद्योत इति बोधः।

भक्तो विष्णुं प्रति—विषयत्वं द्वितीयार्थः। तस्य चैकदेशभक्तावन्वयः। विष्णुविषयकभक्त्याश्रय इति बोधः।

लक्ष्मीर्हरिं प्रति—स्वत्वमप्यर्थः। हरिप्रतियोगिकस्वत्ववतीति बोधः।

'वृक्षं वृक्षं प्रति सिञ्चति' अत्र वीप्सा द्विर्वचनद्योत्या। वीप्सापदेन बोधयितुमिच्छाविषयव्याप्यत्वं बुद्धिस्थयावत्प्रकृत्यर्थनिष्ठमुच्यते। व्याप्यत्व-विशिष्टवृक्षादीनाञ्च स्ववृत्तिव्याप्तिनिरूपकत्वेन सेचनाद्यन्वय इत्यत्र प्रत्यादयस्ता-त्पर्यग्राहकाः, कर्मप्रवचनीयतया सम्बन्धावच्छेदकत्वस्य युक्तत्वात्।

यद्यपि 'वृक्षं वृक्षं सिञ्चति' इत्यादौ प्रतिं विनापि मानान्तरगृहीततात्पर्यव-शात् तेनैव सम्बन्धेनान्वयः, तथापि तत्सत्त्वे सोऽपि तन्निर्णायक इत्येतावतैव सम्बन्धावच्छेदकत्वम्। तत्र वृक्षादीनां सेचनकर्मत्वेऽपि प्रथमतः प्रतिद्योत्यसम्बन्धेना-न्तरङ्गत्वात् तन्निमित्तोपपदविभक्तिभूतद्वितीयैव। अत एव प्रत्यर्थं शब्दनिवेश इत्यादावर्थस्य निवेशनक्रियानिरूपिताधिकरणत्वेऽपि अर्थमर्थं प्रति इत्येव विग्रहो भाष्यादौ दर्शितः।

एतेन "उपपदविभक्तेः कारकविभक्तिर्बलीयसी" इति न्यायात् कर्मण्येवात्र द्वितीयेत्यपास्तम्, युगपदुभयान्वयस्य बुद्ध्या रूढत्व एव तत्प्रवृत्तेः। प्रतिद्योत्यसम्बन्ध-नान्वयेऽपि आश्रयत्वेनानन्वयाच्च। वृत्तिविषये तु प्रतिरेव वीप्साया अपि द्योतकः।

किञ्च, कर्मणि द्वितीयायां प्रतिना सामर्थ्याभावात् प्रतिवृक्षं सिञ्चतीति प्रयोगानापत्तिः।

एतेनात्र कर्मण्येव द्वितीया, पर्यादयस्तु क्रियाविशेषका एवेति हरदत्ताद्युक्त-मपास्तम्, क्रियाविशेषकत्वेऽन्वर्थतया कर्मप्रवचनीयसञ्ज्ञाया एवानापत्तेः। "अव्ययं

विभक्ति०" [२।१।६] इति सूत्रे हरदत्तेन सम्बन्धपरिच्छेदकत्वस्यैवोक्तत्वाच्च । अत एव भाष्येऽपि 'किमर्थं पुनरिदमुच्यते, न चोपसर्गादिसञ्ज्ञाबाधनार्थम्, क्रियायोगाभावात्' इत्युक्त्वा 'द्वितीयार्थम्' इति सिद्धान्तितम् ।

वृक्षं प्रति सिञ्चतीत्युदाहरणे क्वचित् क्रियान्वये कर्मत्वादेव द्वितीया सिद्धेति प्रश्नः । प्रत्याद्यवच्छेद्यसम्बन्धान्वयेनान्तरङ्गत्वात् प्राप्तषष्ठीबाधनार्थमकर्मकार्थञ्चावश्यकमित्युत्तरमिति मम प्रतिभाति ।

'यदत्र ममाभिष्यात्, तद्दीयताम्' अत्र यच्छब्दो बुद्धिस्थत्वेन भागवाची, मत्सम्बन्धियद्भागकर्तृका एतदधिकरणिका सत्ता प्रेरणाविषयः, तत्कर्मकं दानमिति बोधः ।

'सर्पिषोऽपि स्यात्' अत्रापि बिन्दुरूपपदार्थद्योतकः । स्यादिति तिङा कर्तृसामान्यवाचकेन बिन्दुत्वेन तद्विशेषो लक्ष्यत इति तत्त्वम् । सम्भावनायां लिङ्, द्योत्यबिन्दौ सर्पिष इत्यवयवावयविभावेनान्वेति । बिन्दुश्च क्रियायामाधेयतया दौर्लभ्यसम्बन्धेन चान्वेति । अत्राप्यपिरेव तात्पर्यग्राहकः ।

एवञ्च सर्पिरवयवबिन्दुदौर्लभ्यप्रयुक्तदौर्लभ्यवती तदभिन्नैककर्तृका सम्भावनाविषयः सत्तेति बोधः ।

'अपि स्तुयाद् विष्णुम्' सम्भावने लिङ् । अपिर्लिङर्थसम्भावनाविषयतया शक्यत्वस्य द्योतकः । विष्णुकर्मकैतत्कर्तृकाशक्यत्वेन सम्भाव्यमाना स्तुतिरिति बोधः । विष्णुविषयायाः[1] शक्यत्वसम्भावने वान्यविषयानिश्चयेन शक्येति फलति ।

एतेन 'अपि वेदान्तपारगम्' इत्यादावपियोगे स्वार्थे न तात्पर्यमिति धर्मशास्त्रग्रन्था व्याख्याताः । ईदृशेषु सम्भावनाविषयतयौचित्यं द्योत्यम्, सम्भावितौचित्यस्य चानुष्ठानमयुक्तमिति स्वार्थे तात्पर्याभावो बोध्यः ।

यद्वा, शक्यत्वादिना सम्भावनं क्रियाविषयमपि द्योत्यम्, लिङ् तु विध्यादौ । एवञ्च सम्भावनेऽपि "कर्मप्रवचनीये" इत्यनुशासनं यथाश्रुतमेव । आद्ये तु सम्भावनाविषये वर्त्तमानः 'अपिः' इति तदर्थो बोध्यः ।

'अपि स्तुहि'—स्तुताविच्छाप्रवृत्तिविषयतापि द्योत्या । इच्छाप्रवृत्तिविषया स्तुतिरिति बोधः । 'अपि स्तुयाद् वृषलम्' क्रियागतं गर्ह्यत्वमपिद्योत्यम् । वृषलकर्मिका गर्ह्या स्तुतिरिति बोधः । स्तुतेर्गर्ह्यत्वे तत्कर्त्तुरपि गर्ह्यत्वं फलति । तदेव धिग्देवदत्तमित्यादिनानूद्यते ।

1. 'स्तुतेः' इति शेषः ।

'मासमधीते' अत्र त्रिंशद्दिनसमुदायो मासपदार्थः, तत्तत्सम्बन्धश्च दिनपर्याप्तत्रिंशत्त्वव्यापकत्वम्। तत्र त्रिंशत्त्वादेर्मासादिपदादेव लाभाद् व्यापकतामात्रं द्वितीयार्थः। अतस्त्रिंशत्सु दिनेषु किञ्चित्कालावच्छेदेनाध्ययनसम्बन्धेऽपि तत्प्रयोगोपपत्तिः। व्यापकत्वञ्च त्रिंशत्त्ववन्निष्ठप्रतियोगिव्यधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकावच्छिन्नत्वम्, तच्चाध्ययनादावन्वेति। प्रतियोगिव्यधिकरणेतिविशेषणादिनावान्तरदण्डादावध्ययनाभावेऽप्युक्तप्रयोगोपपत्तिः। मासपदञ्च त्रिंशद्दिनपरमेव, न तु तावत्कालस्थाय्यखण्डवस्तुपरम्, एकदिनाध्ययनेऽपि तादृशाखण्डकाले प्रतियोगिव्यधिकरणाध्ययनाभावेन मासमधीत इति प्रयोगापत्तेः। मासघटकं दिनञ्च सूर्योदयावधि सूर्योदयान्तरपर्यन्तस्थाय्यखण्डवस्तुपरम्, न तु क्रियासमूहः। तथा सत्येकैकक्रियादिव्यक्तेरपि मासत्वाधिकरणतया तत्र प्रतियोगिव्यधिकरणाध्ययनाद्यभावसत्त्वेन बाधापत्तेः। 'दिनं स्वपिति'इत्यादौ दिनपदं त्रिंशद्दण्डकूटपरम्। सूर्योदयावधि सूर्यास्तपर्यन्तक्षणकूटपरं वा। अतो नैकदण्डादिस्वप्ने तथा प्रयोगः। त्रिंशत्त्वादिकं च तात्पर्यवशाद्विशिष्य तत्र त्रिंशत्त्वमेव भासते। एतेनैकमासव्यापकाध्ययनस्थलेऽपि मासान्तरेऽध्ययनाभावसत्त्वेन मासव्यापकताया अध्ययने बाधेन मासमधीत इत्याद्यनुपपत्तिरिति परास्तम्।

एवम् 'क्रोशं कुटिला नदी' इत्यादावपि यत् किञ्चित् क्रोशत्ववन्निष्ठप्रतियोगिव्यधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकावच्छिन्नत्वं कुटिलादौ भासते। क्रोशत्वादिकञ्च बुद्धिस्थदण्डादिपरिच्छिन्नसङ्ख्याविशेषवद् देशत्वमेवेति न कश्चिद् दोषः[1]।

इति सुबर्थवादे द्वितीयाविभक्त्यर्थनिरूपणं समाप्तम्।

---

1. ननु 'मासमास्ते, गोदोहमास्ते' इत्यदाविव 'मासमधीते' इत्यत्रापि धातोर्व्यापनपर्यन्तं वृत्तिस्वीकारेणैव "कर्तुरीप्सित" इति कर्मत्वेन द्वितीयासिद्धौ "कालाध्वनोः" इति सूत्रं व्यर्थम्। हरिणाप्युक्तम्—

कालभावाध्वदेशानामन्तर्भूतक्रियान्तरैः।
सर्वैरकर्मकैर्योगे कर्मत्वमुपजायते॥ इति।

अत्राकर्मकैरित्युक्तावपि न्यायसाम्येन सकर्मकधातोरपि तदर्थान्तर्भावेण बाधकाभावः। अत एव 'प्राकृतमेवैतत् कम' इति प्रकृतसूत्रस्थभाष्येणाशङ्कितमिति चेत्, सत्यम्; 'यत्र अक्रियया संयोगः, तदर्थमिदं वक्तव्यम्' इति भाष्य एव समाधानात्।

न च कथं तर्हि 'मासमधीते' इत्युदाहरणमिति वाच्यम्, संबन्धसामान्यविवक्षायां षष्ठीबाधनार्थत्वेन क्रियायोगार्थमप्यावश्यकत्वेन यत्र क्रियाकारकभावेन नान्वयविवक्षा तत्रात्यन्तसंयोगार्थमिति तद्भाष्यव्याख्यानस्योचितत्वात्।

अथ तृतीयाविभक्त्यर्थनिरूपणम्

कारकतृतीयायाः कर्ता, करणञ्च वाच्यम्, "कर्तृकरणयोस्तृतीया" [२।३।१८] इति सूत्रस्वरसात्। तत्र कर्तृत्वबोधकं सूत्रम्—"स्वतन्त्रः कर्ता" [१।४।५४] इति कारकाधिकारात् क्रियायां स्वतन्त्रः कर्तृसंज्ञक इति तस्यार्थः। स्वातन्त्र्यञ्च व्यापारतावच्छेदकसम्बन्धेन तद्धात्वर्थनिष्ठविशेष्यतानिरूपित-प्रकारतानाश्रयत्वे सति तन्निरूपितविशेष्यतारूपमुख्यविशेष्यतावद्धात्वर्थाश्रयत्वम्। तद्धात्वर्थनिष्ठेत्यत्र धात्वर्थश्च तात्पर्यग्राहकानपेक्षधातुशक्य एव ग्राह्यः। तेन णिचो द्योतकत्वेऽपि 'देवदत्तेन यज्ञदत्तः पाचयति' इत्यादौ पच्धात्वर्थप्रयोज्य-व्यापाराश्रयप्रयोजकव्यापाराश्रययोः कर्तृत्वसिद्धिः। कालिकादिसम्बन्धेन व्यापाराश्रयेऽतिव्याप्तिवारणाय सम्बन्धविशेषनिवेशः।

एतेन सामग्रीसाध्यायां क्रियायां सर्वेषां स्वस्वव्यापारे स्वातन्त्र्यात् 'स्वतन्त्रः' इत्यव्यावर्तकमित्यपास्तम्, प्रागुक्तस्वातन्त्र्यस्य युगपत् सर्वेष्वभावात्। मुख्य-विशेष्यतालक्षणे दलद्वयोपादानेन 'रूपवन्तं गच्छति' इत्यादावुत्तरदेशसंयोगरूपे फले रूपादौ च न मुख्यविशेष्यत्वमिति तदाश्रये रूपवति नातिव्याप्तिरिति बोध्यम्।

अत्र कर्तृप्रत्ययसमभिव्याहारे इत्यपि विशेषणं बोध्यम्। तेन 'पक्वस्तण्डुलो देवदत्तेन' इत्यादौ फलस्य विशेष्यत्वेऽपि देवदत्तस्य कर्तृत्वसिद्धिः। अत्रापि व्यापार-स्यान्यत एव लाभाद् आश्रयमात्रं तृतीयार्थः। तत्र च प्रकृत्यर्थस्याभेदेनान्वयः। स च धात्वर्थे आधेयतासम्बन्धेनान्वेति। एवञ्च 'चैत्रेण सुप्यते' इत्यादौ चैत्राभिन्ना-श्रयवृत्तिः स्वाप इत्यादि बोधः।

यत्तु, तत्तत्क्रियानुकूलकृत्याश्रयत्वं तत्तत्कर्तृत्वम्। कर्त्रेत्यत्र कृधातोः कृति-वाचकत्वेन तृचश्चाश्रयवाचित्वेन योगार्थबलात् तथैव लाभात्, गुरुतरभारोत्तो-लनादिविषयकयत्नसत्त्वेऽपि तत्तत्क्रियाया अनिष्पत्तौ तत्कर्तृत्वाव्यवहाराद् विषयत्वमपहायानुकूलत्वमुपात्तम्। तत्राश्रयस्य प्रकृत्यैव लाभात् कृतिरेवार्थ इति। तत्, न; कृतेरपि धातुलभ्यतया आख्याते निरूपितत्वात्, आश्रय-त्वेन तस्य प्रकृत्याऽलाभाच्च। 'दण्डः पचति' इत्यादौ [1]अचेतनेऽव्याप्तिश्च। तत्राश्रये लक्षणेति चेत्, स्वेच्छामात्रेण तस्या अनुचितत्वात्। लक्षणया बोधो

1. कृतेश्चेतनवृत्तित्वादिति शेषो बोध्यः।

पपादनेऽपि तत्र साधुत्वे मानाभावाच्च। एतेनाचेतने गौणं कर्तृत्वमित्यपास्तम्। शास्त्रीयकार्यवैलक्षण्यादर्शनेन भाष्यकारादीनामैकरूप्येण व्यवहाराच्च त्वदुक्तिमात्रेण तस्यायुक्तत्वात्।

किञ्च, कृञः कृतिवाचकत्वमेव नेति निरूपितमाख्यातवादे।

यत्तु, मत्तो भूतम्, न तु मया कृतमिति व्यपदेशाद् [1]नान्तरीयककृतिसाध्यपिष्टकमध्यस्थशर्कराभोजननिरूपितकर्तृत्वस्यापि निवेशे तु यागादिकृतेरुद्देश्यतया स्वर्गादिविषयकत्वेन यागादिकर्तरि स्वर्गादिकर्तृत्वापत्तेरिति। तत्, न; साध्यत्वेन विषयताया एव व्यवहाराभावाच्च तत्रातिव्याप्तिः, कृतौ क्रियाविषयाविनिवेशात्, यागादिकृतावुद्देश्यतया स्वर्गादिविषयकत्वेऽपि स्वर्गानुकूलत्वाभावाच्च। अनुकूलताविशेषस्यैव निवेशात्। तादृशशर्कराभोजनाश्रये कर्तृत्वस्येष्टत्वमित्यपि कश्चित्।

यदपि, कारकचक्रप्रयोक्तृत्वं कर्तृत्वमिति। तदपि न, अचेतनेऽव्याप्तेः।

किञ्च कारकचक्रप्रयोक्तृत्वं कारकान्तरजन्यव्यापारजनकत्वम्। एवञ्च कर्मजन्यफलजनके करणे कुठारादावतिव्याप्तिः। न च कारकान्तरजन्यव्यापाराभाववत्त्वरूपकारकान्तराप्रयोज्यत्वे सतीति विशेषणान्न दोषः, पुरुषादिजन्यसंयोगादिरूपव्यापारवत्त्वात् करणादेरिति वाच्यम्, ईश्वरप्रयोज्यानां कर्तृत्वानापत्तेरिति दिक्।

नन्वेवं घटो भवतीत्यादौ घटादेः कर्तृत्वानापत्तिः, उत्पत्तेः पूर्वं तेषामभावेन धात्वर्थव्यापारानाश्रयत्वादिति चेत्, न; [2]सत्कार्यवादे दोषाभावात्। मतान्तरेऽपीदृशे विषय उपादानकारणस्य व्यापाराश्रयत्वविवक्षाया एव कर्तृत्वप्रयोजकता बोध्या। एतन्मते च धात्वर्थव्यापाराश्रयत्वतद्व्यापाराश्रयोपादानकत्वान्यतरत्वं स्वातन्त्र्यं बोध्यम्।

केचित्तु पदार्थसत्ता न बोधे प्रयोजिका, किन्तु विवक्षैव। अत एव खपुष्पमित्यादितोऽपि बोधः। एवञ्च प्रकृतेऽपि न दोष इत्याहुः।

---

1. अन्तरा भवम् = अन्तरीयम्, गहादित्वात् छः। अन्तरीयमेव आन्तरीयकम्। न आन्तरीयकम् = नान्तरीयकम्। "सह सुपा" इति समासात् नस्य लोपाभावः।

2. सत्कार्यवादे कार्यस्यात्यन्तिकोऽभावो न भवति, किन्तु नाशकारणसामग्रीसमवधानदशायामपि सदेव कार्यं तिरोहितं भवति, उत्पत्तिकारणसामग्रीसमवधाने उद्भूतं भवति। एवञ्च घटादेरपि उत्पत्तेः प्राक् सूक्ष्मावस्थया वर्तमानत्वेन धात्वर्थव्यापाराश्रयत्वेन कर्तृत्वं सेत्स्यति।

अत्र केचिद् धात्वर्थव्यापाराश्रयत्वं साक्षात् परम्परया वा । तत्राद्यं प्रसिद्धम्, द्वितीयं तु पञ्चभिर्हलैः कर्षतीति । तत्र हि—स्वाश्रयप्रयोजकत्वसम्बन्धेन कर्तुर्धात्वर्थव्यापाराश्रयत्वम्, अन्यथा प्रयोज्यव्यापारस्य धात्वर्थे तदाश्रयाणां बहुत्वाद् बहुवचनापत्तिः, प्रयोजकव्यापारस्यापि धातुवाच्यत्वे तु णिजापत्तिः, अन्तर्भावितण्यर्थ इति प्रवादस्याप्ययमेवार्थ इति । तत्, न; अन्तर्भावितण्यर्थत्वेन सकर्मकताया उच्छेदापत्तेः । अत एव सकर्मकाणामन्तर्भावितण्यर्थकत्वे द्विकर्मकतामाहुः ।

तस्मात् प्रयोजकव्यापारोऽपि तत्र तदर्थः, परन्तु यत्र णिचं विना तदर्थद्योतकमस्ति, तत्रैवेदम् । यथा प्रकृते पञ्चभिर्हलैरिति । क्वचित्तु एकान्ते तूष्णीमासीनत्वादिकम् । तस्मात् कृषेर्ण्यर्थान्तर्भावेण लक्षणेत्येव तत्त्वम् । स्पष्टं चेदं **कैयटे** ।

यदि तु, द्वितीयकर्मरहितोऽपि तत्र प्रयोगः, तदा प्रयोजकव्यापारस्यैव धात्वर्थत्वमाश्रित्य समाधेय इति दिक् ।

कर्तृत्वं च विवक्षानिबन्धनम् । तेन स्थाल्यादिव्यारस्यापि धात्वर्थ[त्व-] विवक्षायां स्थली पचतीति भवति । एवमेकस्यैवोपाधिभेदेन कर्तृत्वकर्मत्वकरणत्वान्यपि भवन्ति । यथात्मानमात्मना सृजसीति । तदुक्तं हरिणा—

एकस्य बुद्ध्यवस्थादिभेदेन परिकल्पने ।
कर्मत्वं करणत्वञ्च कर्तृत्वञ्चोपजायते ।। इति ।

एतेन ज्ञानस्वरूपस्यात्मनः स्वरूपज्ञानं विषयत्वरूपस्वप्रकाशत्वे कर्तृकर्मविरोधः । अभेदे आधाराधेयभावस्य विषयविषयिभावस्य चाभावादिति **वाचस्पत्युक्तिः** परास्ता, शब्दविशेषोपाधिकस्य कर्तृत्वादेः प्रत्यक्षादावुक्तिसम्भवाभावात् ।

यदि तु, कर्तृकर्मशब्दयोराश्रयविषयलक्षकत्वम् । यदि वा स्वप्रकाशत्वे इत्यस्य स्वप्रकाशपदव्यवहार्यत्वे इत्यर्थः, स्वं प्रकाशयतीति हि स्वप्रकाशपदव्युत्पत्तिः, तदा सम्यगेवेत्यलं पल्लवितेन ।

करणत्वबोधकञ्च सूत्रम् "साधकतमं करणम्" [१।४।४२] इति । कर्तृव्यापाराधीनयद्व्यापाराव्यवधानेन क्रियानिष्पत्तिर्विवक्ष्यते, तत्र क्रियाकरणमिति तदर्थः । चैत्रश्चैत्रेण पचति, काष्ठं चैत्रेण पचतीति व्यावृत्त्यर्थं कर्तृव्यापाराधीनेति, अधिकरणादिव्यापाराव्यवधानेनापि यदा क्रियानिष्पत्तिर्विवक्ष्यते, तदा तेषामपि करणत्वमिष्टमेव । यदाह हरिः—

वस्तुतस्तदनिर्देश्यं नहि वस्तु व्यवस्थितम्।
स्थाल्या पच्यत इत्येषा विवक्षा दृश्यते यतः।

इति करणविभक्तेर्व्यापारोऽर्थः। तत्र प्रकृत्यर्थस्याधेयतयान्वयः, व्यापारस्य च स्वनिष्ठजनकतानिरूपिताव्यवहितोत्तरोत्पत्तिकत्वसम्बन्धेन धात्वर्थेऽन्वय इति केचित्।

अत एव

आश्रयोऽवधिरुद्देश्यः सम्बन्धः शक्तिरेव वा।

इति विभक्त्यर्थनिरूपणे हर्युक्तिः संङ्गच्छत इत्यपरे।

दिव्धातुयोगे तु इदमेव द्वितीयान्तपदानुपस्थाप्यत्वविशिष्टं करणलक्षणं बोध्यम्। 'पित्रा पितरं संजानीते' इत्यत्र तृतीयायाः कर्मार्थः।

अथोपपदविभक्तितृतीयासु बोधो लिख्यते

'प्रकृत्या चारुः' इत्यत्र प्रकृतिर्यावदाश्रयभाविधर्मविशेषः। तेन तत्सम्बन्धि-चारुत्ववानित्यर्थः। तृतीयार्थः सम्बन्धः। 'प्रायेण याज्ञिकः' इत्यत्र प्रायशब्दो बह्वर्थः, बहुत्ववांश्चाचारादिः। तेन बहुत्ववदाचारसम्बन्धियाज्ञिकत्ववान् इति बोधः। सम्बन्धश्च ज्ञाप्यज्ञापकभावः।

यद्वा, प्रायशब्दः सम्भावनार्थः, सम्भावनाविषययाज्ञिकत्ववानित्यर्थः। दृश्यते च तस्यां प्रायशब्दः, 'प्रायेण निष्क्रामति चक्रपाणौ' इति। 'प्रायेणास्मिन् वंशे याज्ञिकाः' इत्यादौ तु बहुत्वार्थः। बहुत्ववन्तो याज्ञिका इति बोधः।

'गोत्रेण गार्ग्यः' इत्यत्र गोत्रसम्बन्धिगार्ग्यत्ववानित्यर्थः। सामान्यविशेषण-भावः सम्बन्धः।

'द्विद्रोणेन धान्यं क्रीणाति'—द्रोणद्वयपरिच्छिन्नधान्यकर्मकः क्रय इति बोधः।

सुखेन यातीत्यत्र सुखजनकं यानमिति बोधः।

'नाम्ना सुतीक्ष्णः'—ज्ञाप्यत्वरूपः सम्बन्धस्तृतीयार्थः। नामज्ञाप्यसु-तीक्ष्णत्ववानिति बोधः।

एवम् 'चरितेन दान्तः' इत्यत्रापि। सुरथो नाम राजेत्यादौ सुरथ इत्यत्र सुरथशब्दवाच्य इत्यर्थः। नामेत्यव्ययं संज्ञार्थम्। नामशब्दार्थसंज्ञायाः सुरथशब्दै-कदेशे शब्देऽन्वयः। तेन संज्ञाभिन्नसुरथशब्दवाच्य इति बोधः।

यद्वा, सुरथेति शब्दपरं संज्ञाभिन्नसुरथशब्दाभिन्नो राजेति बोधः।

यद्वा, नामेत्यपि शब्दपरत्वे तात्पर्यग्राहकम्। नाम्ना चन्द्रकलेत्यादावनव्ययनामयोगेऽप्येवमेव। अभेदस्तृतीयार्थः। एवमवच्छेदकत्वावच्छेद्यत्वादीनां सम्बन्धत्वविवक्षायां पटत्वेन; जन्यत्वम्, प्रकारत्वम्, अभावः, इत्यादिषु प्रकृत्यादित्वात् तृतीया बोध्या।

'अह्ना क्रोशेन वानुवाकोऽधीतः' इत्यत्र तृतीयार्थः सम्बन्धः, क्तप्रत्ययार्थातीतत्वैकदेशे नाशे, फलप्राप्तिपूर्वकत्वञ्च द्योत्यम्। एवञ्चाहस्सम्बन्धिफलप्राप्तिपूर्वकनाशप्रतियोगि अनुवाकविषयकमध्ययनमिति बोधः।

'पुत्रेण सहागतः' इत्यादौ "**सहयुक्तेऽप्रधाने**" [२।३।१८] इति तृतीया, सहार्थविशेषणत्वमप्राधान्यम्। 'क्रियाप्रधानम्' इत्यादौ प्रधानशब्दस्य विशेष्यपरताया दृष्टत्वात्। सहशब्दार्थश्च स्वान्वयिसमभिव्याहृतपदार्थगतसमानकालिकत्वम्। तृतीयार्थश्च क्रियासमभिव्याहारे तत्तत्क्रियाकर्तृत्वादिकमेव। एवञ्च शिष्येण सह स्थूलः, शिष्येण सहागतः, शिष्येण सहोपाध्यायस्य गौरित्यादौ शिष्यवृत्तिस्थौल्यसमानकालिकस्थौल्यवान्, शिष्यकर्तृकागमनसमानकालिकागमनवान्, शिष्यसम्बन्धिस्वत्वसमानकालिकोपाध्यायस्वत्ववती गौरित्यादिक्रमेण बोधः। अन्त्ये च षष्ठ्यर्थसम्बन्ध एव सहार्थान्वयः, तथैवानुभवात्।

क्वचित् समानदेशत्वं तदर्थः। अत एव माषवापोत्तरं तस्मिन्नेव क्षेत्रे तिलवापेऽपि तिलैः सह माषान् वपतिस्मेति भवति। स्पष्टञ्चेदमत्रैव भाष्यादौ।

एतेन पुत्रेण सहागत इत्यादौ पुत्रस्य सहार्थसामर्थ्यात् कर्तृत्वप्रतीत्या कर्तृत्वेनैव तृतीया सिद्धा। न च क्तेनाभिधानम्, प्रधानकर्तुरेव तेनाभिधानादिति निरस्तम्। सहार्थगमनाश्रयत्वेऽपि प्रकृतधातूपात्तव्यापाराश्रयत्वाभावेनाकर्तृत्वात् पुत्रेण सह स्थूल इत्याद्यर्थं सूत्रस्यावश्यकत्वाच्च। पिता पुत्रौ सहागतावित्यादौ तु समानकालिकत्वमात्रमर्थः, तात्पर्यादित्याहुः।

अपरे तु सहशब्दार्थः साहित्यम्। पित्राद्यन्वयिपुत्रसाहित्यवान् पिता आगत इति बोधः। साहित्यञ्च समानकालिकादिसमभिव्याहृतक्रियाद्याश्रयत्वसमानाधिकरणोऽखण्डोपाधिः, पदार्थान्तरं वेत्यन्यदेतत्। अस्यापि धर्मस्य प्रागुक्तसाहित्यसमानसंवित्संवेद्यत्वस्वीकारात् तद्विषयकबोधस्यानुभवसिद्धत्वेऽपि न दोषः। अत एव पितरि तृतीयापादनं भाष्योक्तं सङ्गच्छते।

अन्यथा पूर्वोक्तमते सहार्थस्य क्रियादावन्वयेऽपि तेनान्वयात् तदापादनमसङ्गतमेव स्यात्; इत्याहुः ।

एवं विद्यमानतावाचिसहशब्दयोगेऽपि तृतीया । 'सहैव दशभिः पुत्रैर्भारं वहति गर्दभी' इत्यादौ [1]दशसंख्याकपुत्राणां विद्यमानत्वेऽपीत्यर्थः ।

एवं सहार्थप्रतियोगिनः शाब्दाप्राधान्येऽपि आर्थप्राधान्यमेव । अत एव समकक्षयोर्मध्येऽन्यतरस्यापरेण सहागन्तव्यमित्युक्ते दुःखं दृश्यत इति बोध्यम् ।

'अक्ष्णा काणः' इत्यत्र चक्षुर्नाशवान् । सचक्षुष्कः काणपदार्थः, चक्षुःपदार्थो गोलकम्, तृतीयार्थो विकारप्रयुक्तत्वादिरूपः सम्बन्धः । गोलकविकारप्रयुक्तचक्षुर्नाशवान् सचक्षुष्क इति बोधः ।

एवम् 'पादेन खञ्जः' इत्यादौ पादविकारप्रयुक्तसंस्थानवैधुर्यवच्चरणवानिति ।

'कायेन दशवक्त्रः, मुखेन त्रिलोचनः' इत्यादौ प्रकृत्यादित्वात् तृतीया बोध्या ।

'जटाभिस्तापसः' इत्यादौ ज्ञाप्यत्वरूपसम्बन्धस्तृतीयार्थः । जटाज्ञाप्यतापसत्ववानिति बोधः ।

'दण्डेन घटः' इत्यादौ हेतुस्तृतीयार्थः, हेतुत्वञ्च अनन्यथासिद्धनियतपूर्ववर्त्तित्वादिरूपं कारणत्वमेव । तत्समानाधिकरणोऽखण्डोपाधिर्वा । प्रकृतिप्रत्ययार्थयोरभेदः संसर्गः । प्रत्ययार्थस्य च जन्यतासंसर्गेणेतरत्रान्वयः । एवञ्च दण्डाभिन्नहेतुजन्यो घट इति बोधः ।

'अध्ययनेन वसति' इत्यादौ फलस्याप्यध्ययनस्य हेतुत्वं [2]सुज्ञानद्वारा बोध्यम् । 'दास्या संयच्छते' इत्यत्रोद्देश्यस्तृतीयार्थः, दाण्योगे अशिष्टव्यवहारे चतुर्थ्यर्थे तद्विधानात् । दास्युद्देश्यकं कामुककर्तृकं दानमिति बोधः ।

इति तृतीयाविभक्त्यर्थनिरूपणं समाप्तम् ।

---

1. अस्यायमाशयः—सहशब्दो लुप्तसप्तम्यन्तः, सा च सती सप्तमी अपिशब्दाध्याहारश्च । तेनोक्तार्थलाभः ।

केचित्तु—अत्र विद्यमानेत्यध्याहारः । तथा च विद्यतिक्रियाप्रयुक्तसाहित्यनिर्वाह इति प्रत्यपीपदन् ।

2. अत्र 'स्वज्ञानद्वारा' इति पाठः समीचीनः, अर्थानुकूलत्वात् । एवञ्च अध्ययनस्य वासफलस्यापि स्वज्ञानद्वारा वासनिमित्ततया हेतुत्वेन विवक्षायां तृतीया । अध्ययनाभिन्नहेतुक एककर्तृको वास इति बोधः । काश्यादेस्तु अध्ययननिमित्तत्वेऽपि अधिकरणत्वविवक्षायां सप्तमी । वस्तुतस्तु "हेतौ" इति सूत्रे फलस्यापि हेतुत्वेन विवक्षणाद् अध्ययनरूपफलजनको वास इत्यनुभवसिद्धबोधस्य निर्वाहः सिद्ध्यति ।

अथ कारकचतुर्थ्यर्थनिरूपणम्

कारकचतुर्थ्याः सम्प्रादानमर्थः, "चतुर्थी सम्प्रदाने" [२।३।१३] इति सूत्रात्। सम्प्रदानत्वबोधकञ्च "**कर्मणा यमभिप्रैति स सम्प्रदानम्**" [१।४।३२] इति सूत्रम्। धात्वर्थकर्मणा सम्बन्द्धुमिच्छति सम्प्रदानमिति तदर्थः। कर्मसम्बन्धश्च कर्मनिष्ठफलनिरूपकत्वादि। एवञ्च तत्तद्धातुकर्मनिष्ठफलनिरूपकत्वादिना इच्छाविषयस्तत्तद्धातुसम्प्रदानमिति फलितम्। कर्मनिष्ठेत्यनेन कर्मणश्चतुर्थीनिमित्तत्वप्रदर्शनात् कर्मश्रुत्यपेक्षया चतुर्थीश्रुतेर्बलवत्त्वं बोध्यते। अत एव क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छतीति दण्डदानं न प्रतिपत्तिः, किन्तु द्वितीयापेक्षया बलीयस्या चतुर्थीश्रुत्या मैत्रावरुणसंस्कारकमिति **मीमांसकाः**।

अत्र केचित्, कर्त्तुरिच्छाविषयश्चतुर्थ्यर्थः, फलस्य धातुना निरूपितत्वस्य [1]संसर्गमर्यादया लाभात्। अयमेव चोद्देश्य इत्युच्यते। एवञ्च 'विप्राय गां ददाति' इत्यत्र स्वत्वतन्निवृत्त्युभयानुकूलव्यापाररूपदाधात्वर्थैकदेशे स्वत्वे चतुर्थ्यर्थस्य निरूपकतयान्वयः। एवञ्च विप्राभिन्नेच्छाविषयानिरूपितस्वत्वस्वीयतन्निवृत्त्युभयानुकूलो व्यापार इति बोधः।

यत्तु, निरूपितत्वेन कर्तु रिच्छाविषयत्वं चतुर्थ्यर्थः, दाधात्वर्थतावच्छेदकस्वत्वे च तदन्वेति, स्वत्वजनकत्यागश्च ददात्यर्थः।

एवञ्च विप्रनिरूपितत्वेनेच्छाविषयगोनिष्ठस्वत्वजनकत्यागकर्त्तेति बोध इति। तत्, न; नामार्थविभक्त्यर्थयोः क्लृप्तस्याभेदान्वयस्य भङ्गापत्तेः। सम्प्रदानस्येच्छाविषयत्वबोधकसूत्रस्वरसभङ्गाच्चेत्याहुः। तच्चिन्त्यम्; पितृभ्यः श्राद्धं दद्यादित्यादौ अनुपपत्तेः, पितृनिरूपितत्वस्य स्वत्वे बाधात्। अत एव श्राद्धस्य पित्रपेक्षया भागत्वमेव, दानत्वं तु विप्रापेक्षयेति **शूलपाण्यादयः**।

तस्मात् स्वरूपसम्बन्धरूपमुद्देश्यत्वं पदार्थान्तरं वा तदाश्रयश्चतुर्थ्यर्थः। स्ववृत्त्युद्देश्यतानिरूपकत्वेन धात्वर्थे तस्यान्वयः। दाधात्वर्थश्च स्वत्वनिवृत्तिपूर्वकपरस्वत्त्वोत्पत्त्यनुकूलस्त्यागः। न च त्यागो न परस्वत्वहेतुः, प्रतिग्रहादेरेव तत्त्वादिति वाच्यम्, विप्रोद्देशेन त्यक्तायां गवि गौरियं विप्रस्य न ममेत्यादिसार्वजनीनप्रतीतेरेव प्रमाणत्वात्। अत एव विदेशस्थपात्रमुद्दिश्य त्यक्तधने स्वीकारमन्तरेणैव पात्रस्य मरणेऽपि उद्देश्यपुत्रादिभिरेव पितृदायत्वेन तद्धनं

---

1. आकाङ्क्षयेत्यर्थः।

विभज्यते, अन्यथा तैरिवोदासीनैरपि तद्धनस्यारण्यककुशादेरिवोपादाने प्रत्यवायो न स्यात् ।

न चैवं स्वीकारो व्यर्थः, 'लब्धावष्टगुणं पुण्यम्' इति स्मृतेः प्रतिगृहीत-धनदानस्य फलातिशयहेतुतया तादृशत्वसम्पत्त्यर्थमेव तदुपयोगात् । अदृष्टार्थं दत्त-स्वीकार एव प्रतिग्रह इति परितोषदत्ततिलतुरगादेः स्वीकारो न दोषावहः ।

न च संसृष्टिस्थलेऽसाधारणस्वत्वनाशोत्तरं साधारणस्वत्वोत्पादात् तत्र ददातीति प्रयोगापत्तिरिति वाच्यम्, परमत्र स्वत्वानुकूलेति विशेषणान्न दोषः । न तत्र स्वत्वनाशः, किन्तु परस्वत्वोत्पत्तिमात्रम् । स्वत्ववति स्वत्वोत्पत्तिस्तु तत्रत्येच्छया उत्तेजकत्वादित्यन्ये ।

त्यागाभावान्न तथाप्रयोग **इत्यपरे** ।

न चोपेक्षास्थले दोषः, तत्र नियमतः परस्वत्वोत्पत्त्यभावात् । अत एव विक्रयस्थले न तथा प्रयोगः, तस्य परस्वत्वाजनकत्वात् । क्रयस्यैव तज्जन-कत्वात् । मूल्यदानपूर्वकस्वीकारस्यैव क्रयपदार्थत्वात् ।

ननु किमत्र स्वत्वमिति चेत्, शास्त्रानिषिद्धयथेष्टविनियोगोपायभूतक्रम-प्रतिग्रहादिविषयत्वम् । तच्च न बहिरिन्द्रियवेद्यम्, प्रतिग्रहादेर्मानसज्ञान-विशेषस्य बहिरिन्द्रियायोग्यत्वादिति **प्राञ्चः** । **नव्यास्तु**, प्रतिग्रहादिनाशोत्तर-मपि स्वत्वव्यवहाराद् दानादितः स्वत्वं नश्यति, प्रतिग्रहादितश्चोत्पद्यते इत्यादि-व्यवहाराच्च स्वत्वमतिरिक्तः पदार्थः । तच्च बहिरिन्द्रियवेद्यम्, स्वं पश्यामी-त्यादिव्यवहारात् । तत्साक्षात्कारे च तदीयस्वत्वव्याप्यतदीययथेष्टविनियो-ज्यत्ववदिदमित्याकारकज्ञानं हेतुः । अतो न तद्ग्रहे तदीययथेष्टविनियोज्यत्वे तदीयस्वत्वव्यभिचारित्वग्रहे च न तद्ग्रह **इत्याहुः** ।

अनुमेयमेव स्वत्वम् । स्वं पश्यामीति तु सुरभि चन्दनं पश्यामीतिवन्न विशेषणांशे लौकिकविषयत्वावगाहीति **नव्यतराः** ।

एवञ्च विप्राभिन्नोद्देश्यकः प्रागुक्तस्त्याग इति बोधः ।

एवञ्च पितृभ्यः श्राद्धं दद्यादित्यादावपि न दोषः । तत्र पितॄणामप्युद्देश्य-त्वात् । खण्डिकोपाध्यायस्तस्मै चपेटां ददातीत्यत्र संयोगविशेषानुकूलो व्यापारो दार्थः । चपेटा प्रसृतकरतलम् । न शूद्राय मतिं दद्यादित्यादौ ददातिर्बोधनार्थः, मतिशब्देन तज्जनकं शास्त्रमुच्यते । शेषत्वविवक्षायां रजकस्य वस्त्रमित्यपि साधु इति बोध्यम् ।

केचित्—तु, कर्मत्वस्य क्रियानिरूपितत्वात् 'कारके' इत्यधिकाराच्च 'तत्क्रियाकर्मणा करणभूतेन तत्क्रियाकर्मसम्बन्धजन्यफलभागित्वेन यमभिप्रैति, स संप्रदानम्' इति सूत्रार्थः। कर्मसम्बन्धजन्यं फलञ्च, गोलाभजन्यं विप्रसुखादि। तच्च समभिव्याहारबलात् तात्पर्यतश्च विशेषरूपेण भासते। कर्मसम्बन्धजन्यफलभागित्वेनोद्देश्यश्चतुर्थ्यर्थ। एवञ्च विप्राभिन्नो यो गोसम्बन्धजन्यसुखाश्रयत्वेनोद्देश्यः, तन्निरूपितगोवृत्तिस्वत्वोत्पत्तिस्वस्वत्वनिवृत्त्युभयानुकूलो व्यापार इति बोधः। एवञ्च कर्मणेत्यस्य चारितार्थ्यं स्पष्टमेव। एवं क्रियया यमित्येतत् सम्पाद्यचतुर्थ्या क्रियाजन्यफलाश्रयतयोद्देश्योऽर्थः, फलञ्च रतिलाभादीत्याहुः। तत्, न; "गत्यर्थकर्मणि" [२।३।१२] इत्यादि[1] प्रत्याख्यानपरभाष्यादिविरोधेन ईदृशार्थस्यायुक्तत्वात्, एवं शाब्दबोधे मानाभावाच्च।

अत्र सूत्रे कर्मणेत्यावर्त्तते, आवर्त्तमानञ्च क्रियापरम्। तेन कर्मरहितक्रियोद्देश्यस्यापि सम्प्रदानत्वात् 'पत्ये शेते' इत्यादिसिद्धिः। पत्युद्देश्यकशयनमिति बोधः।

'पशुना रुद्रं यजते' इत्यत्र फलाश्रयस्तृतीयार्थः, उद्देश्यो द्वितीयार्थः। पशुकर्मकरुद्रसम्प्रदानकदानमिति बोधः[2]। 'कर्मणः करणसञ्ज्ञा, सम्प्रदानस्य च कर्मसञ्ज्ञा' इति वार्त्तिकात्।

हरये रोचते भक्तिः—विषयतासम्बन्धावच्छिन्नप्रीत्यनुकूलस्तत्समानाधिकरणो व्यापारो रुचेरर्थः। आश्रयरूपसम्बन्धश्चतुर्थ्यर्थः, "रुच्यर्थानां प्रीयमाणः" [१।४।३३] इति सूत्रस्वरसात्। [3]रुच्यर्थाः। शेषषष्ठ्यपवादोऽयं रुच्यर्थफलसम्बन्धित्वमेवात्र सम्प्रदानत्वम्। एवञ्च हरिनिष्ठा भक्तिविषया या प्रीतिः,

---

1. अयमाशयः—"कर्मणा यमभिप्रैति" इत्यत्र क्रियाग्रहणमपि कृत्वा 'ग्रामाय' इत्यत्र चतुर्थी संसाध्य "कर्मणि द्वितीया" इत्यनेन 'ग्रामम्' इत्यत्र द्वितीयां संसाध्य च सूत्रमिदं प्रत्याख्यातं भगवता भाष्यकारेण।

   यद्यपि तत्र क्रियाग्रहणं प्रत्याख्यातम्, तथापि तत्फलस्यान्यथासाधनेन तद्वचनप्रत्याख्यानान्नापूर्वं वचनं कर्त्तव्यं भवति।

   अत्रेदं तत्त्वम्—सूत्रमते द्वितीयाचतुर्थ्योः कर्ममात्रमर्थः। ग्रामकर्मकं गमनमिति बोधः।

   भाष्यमते च "क्रियया यमभिप्रैति" इति सम्प्रदानसंज्ञायां चतुर्थीति ग्रामसम्प्रदानकोत्तरदेशसंयोगानुकूलव्यापारविषयक आरम्भ इति बोधः।

2. रुद्रोद्देश्यकः पशुनिष्ठस्वत्वनिवृत्त्यनुकूलो व्यापार इति त्वार्थः।

3. अत्र 'रुच्यर्थाः' इत्यतः पूर्वम् 'रुचिरर्थो येषां ते' पाठस्त्रुटितः कल्पनीयः, अन्यथा ग्रन्थासङ्गतिः।

तदनुकूलो भक्तिनिष्ठो व्यापार इति । अभिलषतेस्तु तत्सम्बन्धावच्छिन्नप्रीति-व्यधिकरणो व्यापारोऽर्थ इति न स रुच्यर्थ इति हरिभक्तिमभिलष्यतीत्यादौ न हरेः सम्प्रदानता ।

'गोपी स्मरात् कृष्णाय श्लाघते' इत्यत्र श्लाघतेर्बोधफलिका स्तुतिरर्थः । स्तुतिश्च गुणवत्त्वप्रतिपादकशब्दप्रयोगादिः । स्मरादिति हेतौ पञ्चमी । चतुर्थ्यर्थः कर्मत्वं बोधेऽन्वेति । "श्लाघ ह्नुङ्स्थाशपां ज्ञीप्स्यमानः" [१।४।३४] इति सूत्र-स्वरसाद् ज्ञीप्स्यमानपदेन च प्रधानभूतण्यर्थकर्मण एव ग्रहणं बोध्यम् । एवञ्च गोपी-कर्तृका स्मरहेतुका कृष्णबोधफलिका स्तुतिरिति बोधः । स्तुतिश्चात्मनः परस्य वेति तु प्रकरणादिगम्यम् ।

अत एव कृष्णायात्मानं श्लाघत इत्यपि भवति । इदमेवाभिसन्धाय कृष्णाया-त्मानं परं वा श्लाघ्यं कथयतीत्यर्थ इति प्राञ्चः । कृष्णस्यैव स्तुतत्वे तु परत्वात् कर्मत्वमेव । ह्नुते इत्यत्र ह्नौतेर्बोधविषयेतरादर्शनयोग्यदेशस्थापनमर्थः । आत्मान-मिति कर्मपदाध्याहारः । सपत्नीभिया च स्वस्य तथावस्थानं बोध्यम् ।

एवञ्च कृष्णनिष्ठबोधविषयात्मकर्मकतथावस्थानानुकूलव्यापारो गोपी-वृत्तिरिति बोधः । तिष्ठतेः स्वाभिप्रायबोधानुकूला स्थितिरर्थः । स्वाभिप्रायबोधानु-कूलं शपथकरणं शपेरर्थः । कृष्णकर्मकबोधानुकूला स्थितिः । तत्कर्मकबोधानुकूलं शपथकरणमिति बोधः । एवञ्च श्लाघादिधात्वर्थफलाश्रयत्वमत्र सम्प्रदानत्वमिति बोध्यमित्याहुः ।

अपरे तु—एवं हि ज्ञाप्यमान इत्येव सिद्धे सन उपादानवैयर्थ्यापत्तिः । ण्यन्ते कर्त्तुश्च कर्मण इत्युक्त्या ज्ञाप्यमानपदेन तस्यैव ग्रहणसिद्धे ज्ञीप्स्यमानपदेन यद्विषयकज्ञानानुकूलव्यापारानुकूलव्यापारः, स[ना] गृह्यते, प्रथमोपस्थितत्वेन प्रकृत्यर्थकर्मग्रहणस्यैवौचित्याच्च । तस्यापि ज्ञापनविषयेच्छाविषयत्वान्न शानजनुप-पत्तिः । श्लाघादेश्च स्तुत्यादिपूर्विका बोधनार्थः । स्तुत्या कृष्णमन्यस्य बोधयति, ह्नुतिविशिष्टं कृष्णमन्यस्य बोधयति, स्थित्या; शपथेन च कृष्णमन्यस्य बोधय-तीत्यर्थ इत्याहुः । सनः स्वारस्येनोभयोरपि ज्ञीप्स्यमानपदेन ग्रहणमिति बहवः ।

'भक्ताय धारयति मोक्षो हरिः' अत्र "धारेरुत्तमर्णः"[1] । [१।४।३५] इति भक्तः संप्रदानम् । तत्र 'धृङ् अवस्थाने' इति धातोर्णिचि अवस्थानानुकूलो धारेरर्थः । सम्बन्धश्चतुर्थ्यर्थः ।

---

1. **उत्तममृणं यस्येति बहुव्रीहिः । अत एव निपातनाद् निष्ठान्तस्य परनिपातः । उत्तमर्णो धनस्वामी ।**

एवञ्च भक्तसम्बन्धिमोक्षकर्मकावस्थित्यनुकूलो व्यापारो हरिनिष्ठ इति बोधः। धारयत्यर्थावस्थित्याश्रयसम्बन्धत्वमेतत् सम्प्रदानत्वं बोध्यम्।

ननु ऋणं नाम सजातीयद्रव्यान्तरदानमङ्गीकृत्य परदत्तपरकीयद्रव्यादानं तज्जन्योऽधमर्णनिष्ठपरिशोधननाश्योऽदृष्टविशेषो वा, उभयथापि नेह प्राप्तिः, मोक्षस्योक्तरूपऋणत्वाभावेन भक्तस्योत्तमर्णत्वाभावादिति चेत्; अवश्यदेयत्वेन तत्रापि ऋणव्यवहारादित्याहुः।[1]

'पुष्पेभ्यः स्पृहयति' इत्यत्रापि सम्बन्धश्चतुर्थ्यर्थः। पुष्पसम्बन्धीच्छेति बोधः। स्पृह्यर्थफलसम्बन्धित्वेनेप्सितत्वं तत्संप्रदानत्वं स्पृह्यर्थफलाश्रयत्व-मेवैतत्सम्प्रदानत्वम्। 'पुष्पाणि स्पृहयति' इत्यादि तु अध्याहृतदृश्यादिक्रियाकर्मतया बोध्यम्। शेषत्वविवक्षायां तु षष्ठ्येव। अत एव "स्पृहेरीप्सितः" [१।४।३६] इति सूत्रं सङ्गच्छत इत्यपरे।

'हरये क्रुध्यति, द्रुह्यतीर्ष्यति, असूयति' इत्यत्र "क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः" [१।४।३७] इति सूत्राद् हरिः संप्रदानम्। तत्र चित्तवृत्तिविशेषः क्रोधः क्रुधेरर्थः। यत्र ज्ञानविशेषः क्रोध इति, तत्र सकर्मतापत्तेः। अपकार-विषयेच्छा द्रुहेः[2]। तत्रापकारो दुःखजनिका क्रिया। अयमप्यकर्मकः, धात्वर्थोप-संगृहीतकर्मकत्वात्। एतद्द्वययोगे सम्बन्धश्चतुर्थ्यर्थः। हरिसम्बन्धी क्रोधः, तत्सम्बन्ध्यपकारेच्छेति च बोधः। विषयतया स्वार्थकोपसम्बन्धित्वमेव चैतद्योगे सम्प्रदानत्वम्। उत्कर्षगोचरो द्वेष ईर्ष्या। शौचाचारादिगुणविषये दम्भादिकृतत्व-दोषाध्यासोऽसूया। एतद्योगे कर्म चतुर्थ्यर्थः। हरिकर्मकोत्कर्षविषयो द्वेषः। हरिनिष्ठगुणविषयकं दोषाविष्करणमिति च बोधः। तद्धात्वर्थमूलभूतकोपविषयत्वे सति तद्धात्वर्थफलाश्रयत्वं तत्संप्रदानत्वं बोध्यम्। सत्यन्तेन 'भार्यामीर्ष्यति, मैना-मन्योऽद्राक्षीत्' इत्यादेर्व्युदासः। 'मित्राय द्रुह्यति प्रतापोऽपि' इत्यादौ चेतनत्वारोपो बोध्यः। 'कृष्णाय राध्यति, ईक्षते वा' इत्यत्र प्रश्नविषयपर्यालोचनं धात्वोरर्थः। तदेकदेशे प्रश्नविषये कृष्णस्यान्वयः। सम्बन्धश्चतुर्थ्यर्थः। स्वार्थप्रश्नविषयसम्बन्धि-त्वमेतद्योगे सम्प्रदानत्वं बोध्यम्।

---

1. गदाधरभट्टाचार्यास्तु— द्रव्यान्तरदानाभ्युपगमपूर्वकपरदत्तद्रव्यादानजन्योऽदृष्ट-विशेषो धारयतेरर्थः। तद्घटकदानान्वयि कर्तृत्वं चतुर्थ्यर्थ इत्याहुः।

2. 'अर्थः' इति शेषः।

विप्राय गां प्रतिश्रृणोति, आश्रृणोति वेत्यत्र धातोः प्रवर्त्तनाजन्याभ्युपगमोऽर्थः । चतुर्थ्यर्थं आश्रयत्वं प्रवर्तनान्वयि । विप्रनिष्ठप्रवर्त्तनाजन्यो देवदत्तनिष्ठोऽभ्युपगम इति बोधः । स्वार्थप्रवर्त्तनाश्रयत्वमेतद्योगे संप्रदानत्वं बोध्यम् । होत्रेऽनुगृणाति, प्रतिगृणाति वेत्यत्र शंसितृकर्मकशंसनविषयहर्षानुकूलव्यापारलक्षणं प्रोत्साहनं धातोरर्थः । होतुश्च शंसितर्यभेदेनान्वयः । कर्मसामानाधिकरण्याच्च होता कर्म । होत्रभिन्नशंसितृकर्मकहर्षानुकूलो व्यापार इति च बोधः । धात्वर्थशंसनाश्रयत्वमेतत्संप्रदानत्वं बोध्यम् ।

'शतेन शताय वा परिक्रीतः' इत्यत्र चतुर्थ्यर्थः करणतृतीयया समानः, शतव्यापारश्च दानमेव । एवञ्च तृतीयान्तपदबोध्यकरणत्वमेवात्र संप्रदानत्वं बोध्यम् ।

'फलेभ्यो याति' अत्राहर्त्तुमित्यध्याहारः । तदर्थफलाश्रयरूपं कर्म चतुर्थ्यर्थः । ननु पदजन्यपदार्थोपस्थितेः शाब्दबोधाङ्गत्वात् फलेभ्यो यातीत्यादौ चतुर्थ्यर्थान्वययोग्याहरणस्य तथोपस्थितेरभावात् कथं बोधः, न चाहर्त्तुम्पदाध्याहारः, अध्याहारश्चानुमानमुपनीतभानं वेत्यप्रयोगोऽस्त्येव । अत एव प्रकृते चतुर्थीविधायके "क्रियार्थोपपदस्य च कर्मणि स्थानिनः" [२।३।१४] इति सूत्रेऽप्रयुज्यमानार्थकस्थानिपदेन विरोधो न, प्रयोगशब्दस्योच्चारणार्थत्वादिति वाच्यम्, "स्पृहेरीप्सितः" इतिवत् "युष्मद्युपपदे" [१।४।१०५] इत्यादेरप्युच्चारितपदेऽध्याहृतपदे च प्रवृत्त्युपपत्तौ स्थानिन्यपीत्यस्य वैयर्थ्यापत्तेः । तस्मात् स्थानिपदमज्ञायमानार्थकम् । एवञ्च पदानध्याहारेऽप्यर्थमात्राध्याहारे मध्यमार्थं तत्सार्थक्यम् । अन्यथा पदनिमित्तकतया तत्र न स्यादिति चेत्, न; स्थानिग्रहणसामर्थ्यादेव पदजन्योपस्थित्यभावेऽपि अर्थमात्राध्याहारेण शाब्दबोधविषयत्वाङ्गीकारात् चतुर्थ्यैव स्ववृत्त्योपस्थितत्वाद् वृत्तिप्रयोज्योपस्थितेर्न क्षतिः । स्पष्टञ्चेदम् "अइउण्" सूत्रे कौस्तुभे । "स्पृहेरीप्सितः" इत्यादौ च पदाध्याहार एव । तत्रार्थाध्याहारो गमकसत्त्व एव, पदाध्याहारस्तु सर्वत्रेति व्यवस्था । एवञ्च फलकर्मकाहरणफलकं यानमिति बोधः ।

यत्तु, फलकर्मकाहरणे फलपदस्य लक्षणा, चतुर्थ्याश्च फलमर्थः । यद्वा, क्रियामात्रं तदर्थः, कर्मत्वप्रयोजकत्वे पूर्वपरयोः संसर्गाविति । तत्, न; सूत्रे कर्मणीत्यस्योक्तत्वेनेदृशेऽर्थे साधुत्वे मानाभावादिति दिक् ।

यागाय यातीत्यत्र भविष्यत्कालावच्छिन्नो यागो यजेरर्थः। फलं जनकत्व-सम्बन्धश्चतुर्थ्यर्थः। भविष्यद्यागजनकं यानमिति बोधः।

'न त्वां तृणाय, तृणं वा मन्ये' इत्यत्र कर्म द्वितीयाचतुर्थ्योरर्थः। प्रकृतेश्च स्वार्थसदृशे लक्षणा। तथा च त्वदभिन्नतृणसदृशकर्मकमद्वृत्तिज्ञानाभाव इति बोधः। त्वद्विशेष्यकतृणसदृशत्वप्रकारकज्ञानाभाव इति फलति। स चात्यन्ताप-कर्षप्रयुक्त एव, मन्यतेः चतुर्थीसमभिव्याहारे 'बुध्यते' इत्यर्थः, शब्दशक्तिस्वभावात्।

ग्रामं ग्रामाय वा याति—अत्रापि द्वितीयाचतुर्थ्योः कर्मैवार्थः।

अन्ये—त्वत्रोद्देश्यश्चतुर्थ्यर्थः, यातेश्चोत्तरदेशसंयोगानुकूलव्यापारविषयक-संदर्शनप्रार्थनादिकमर्थः।

एवञ्च संदर्शनादिकं प्रति तत्संयोगानुकूलव्यापारस्य कृत्रिमकर्मतया तेनाभिप्रेयमाणत्वाद् ग्रामस्य संप्रदानत्वम्। फलाश्रयत्वेऽपि तत्त्वस्याविवक्षणा-दुद्देश्यत्वस्य च विवक्षणाददोषः।

एवञ्च ग्रामोद्देश्यकोत्तरदेशसंयोगानुकूलव्यापारविषयकं संदर्शनादीति बोधः।

अतिप्रसङ्गस्त्वनभिधानेन वारणीयः। ग्रामं यातीत्यादौ तु संयोगानुकूल-व्यापारार्थकत्वमेवेत्याहुः।

इति कारकचतुर्थीविभक्त्यर्थ विचारः।

अथोपपदविभक्त्यर्थनिरूपणम्

अथोपपदविभक्त्यर्थ उच्यते

'विप्रायौदनः' इत्यत्र तादर्थ्ये चतुर्थी। तादर्थ्यमुपकारकत्वरूपः सम्बन्धः। प्रकृत्यर्थस्य प्रत्ययार्थे क्वचित् परम्परयाऽन्वयः। यथा प्रकृते स्वकर्तृकभोजननिष्ठ-जन्यतानिरूपकत्वेनैवान्वयः। ब्राह्मणकर्तृकभोजनजनक ओदन इति बोधः। क्वचित्तु साक्षात्। यथा मुक्तये हरिं भजति। अत्र स्वनिष्ठजन्यतानिरूपकत्वेनै-वान्वयः। मुक्तिजनकं हरिभजनमिति बोधः। अध्ययनाय वसति। अत्रोपकारकत्वं चतुर्थ्यर्थः। अध्ययननिरूपितोपकारकतावान् वास इति बोधः।

'भक्तिर्ज्ञानाय कल्पते' अत्र सम्बन्धश्चतुर्थ्यर्थः। भक्तिकर्तृका ज्ञानसंबन्धिनी उत्पत्तिरिति बोधः। तादर्थ्यचतुर्थ्यास्तु भक्तिकर्तृकाज्ञानजनिकोत्पत्तिरिति बोधः। प्रकृतिविकृत्योर्भेदविवक्षायां विकृतिवाचकाच्चतुर्थी। अभेदविवक्षायां तु कर्तृत्वात् प्रथमैव, 'भक्तिर्ज्ञानं कल्पते' इत्यादीति। यदा तु "जनिकर्त्तुः" [१।४।३०] इत्यपादानत्वविवक्षा, तदा पञ्चमी। भक्तेर्ज्ञानं कल्पत इति। ज्ञानस्याभिहित-कर्तृत्वात् ततः प्रथमैव।

अत्रेदं तत्त्वम्—'कल्पते' इत्यादेः 'परिणमते' इत्यर्थः। परिणामश्च रूपान्तरप्राप्तिः। तदेकदेशे रूपान्तरे ज्ञानादेर्विकारवाचकस्याभेदेनान्वये द्वितीयायां प्राप्तायाम् 'क्लृपि संपद्यमाने च' इत्यनेन चतुर्थी विधीयते। क्लृप्त्यर्थधातुयोगे उत्पद्यमानार्थवाचकाच्चतुर्थीत्यर्थः। एवञ्चात्र चरितार्था चतुर्थी तयोरभेद-विवक्षायां परत्वात् प्रथमया बाध्यते। कल्पादेरुत्पत्तिमात्रार्थत्वे उक्तरीत्या पञ्चम्यादीत्याहुः।

वाताय कपिला विद्युदित्यत्र ज्ञापकत्वरूपः सम्बन्धश्चतुर्थ्यर्थः। वात-ज्ञापिका कपिला विद्युदिति बोधः। अत्र 'उत्पातेन ज्ञापिते च' इत्यनेन चतुर्थी। प्राणिनां शुभाशुभसूचको विकार उत्पातः।

'विप्राय हितम्' अत्र सम्बन्धश्चतुर्थ्यर्थः। इष्टसाधनं हितपदार्थः। विप्र-सम्बन्धीष्टसाधनमिति बोधः। 'हरये नमः' अत्र "नमः स्वस्तिस्वाहास्वधालं-वषड्योगाच्च" [२।३।१६] इति सूत्रेण चतुर्थी। नमःशब्दार्थो नतिः। सा चाप-

कृष्टत्वज्ञानबोधानुकूलो व्यापारः। तत्रापकर्षको व्यापारश्च नमःशब्देन, व्युत्पत्तिवैचित्र्यात्। स्वप्रयोक्तृपुरुषविशेषाश्रयत्वनमस्कार्यावधित्वोपरक्त एव प्रतीयते। अन्योच्चारितपदेनान्यदीयनत्यबोधनात्। स च व्यापारः करशिरःसंयोगादिः क्वचित्, क्वचिदीदृशशब्दप्रयोग एव। तथा च हर्यवधिकस्वनिष्ठापकृष्टत्वज्ञानबोधानुकूलः प्रयोक्तृनिष्ठो व्यापार इति बोधः।

'एषोऽर्घ्यः शिवाय नमः' इत्यादौ त्यागो नमःशब्दार्थः। त्यागश्च शिवस्वत्वस्वस्वत्वनिवृत्त्युभयानुकूलो व्यापारविशेषरूपः। शिवः स्वं न प्रतिगृह्णीयादित्यादिप्रामाण्येन द्रव्ये देवताया अपि स्वत्वस्वीकारात्।

चतुर्थ्यर्थश्चोद्देश्यत्वरूपः सम्बन्धः। उद्देश्यत्वञ्च विषयताविशेषरूपम्। एवञ्च शिवोद्देश्यकत्यागविषयोऽर्घ्य इति बोधः। अचेतनदेवतापक्षे तु स्वस्वत्वाभावानुकूलव्यापारस्त्यागः। स च वेदबोधितस्वप्रयोगकर्तृकत्वोपरक्त एव प्रतीयते, व्युत्पत्तिवैचित्र्यात्। अन्योच्चारितनमःपदेनान्यदीयत्यागाप्रतीतेः। ऋत्विग्भिश्च यजमानीयतत्तद्द्रव्ये स्वीयत्वमारोप्यैव नमःशब्दः प्रयुज्यत इति न दोषः। संप्रदानचतुर्थी त्वत्र नाशङ्क्या, नमःपदार्थस्य क्रियात्वाभावात्। वेदबोधितेत्युक्तेर्न नीचोद्देश्यके त्यागे नमःशब्दप्रयोग इत्याहुः।

नमस्करोति देवान् इत्यत्र 'उपपदविभक्तेः कारकविभक्तिर्बलीयसी' इति न्यायात् कर्मत्वेन द्वितीया। धात्वर्थस्य प्रधानत्वेन नामार्थस्य चाप्रधानत्वेन प्रधानाप्रधानयोश्च प्रधाननिमित्तकार्यस्यैवौचित्यमिति हि तन्न्यायबीजम्।

ननु कथमत्र कर्मत्वं देवानाम्, न च स्वनिष्ठापकृष्टत्वज्ञानबोधानुकूलव्यापाररूपनमस्कारफलस्य तादृशज्ञानबोधस्याश्रयत्वात् तत्त्वमिति वाच्यम्, प्रेक्षितुस्तटस्थादेरपि कर्मत्वापत्तेरिति चेत्, न; स्वविषयविषयावधित्वसमानाधिकरणसमवायस्य फलतावच्छेदकसम्बन्धत्वाददोषः। स्वम् = अपकृष्टत्वज्ञानरूपं फलम्, अवधितासम्बन्धेनापकर्षाश्रयत्वात् कर्मत्वमित्यन्ये।

नन्वेवमपि 'हरये नमः' इत्याद्यनुरोधान्नमस्शब्दस्य वाचकत्वावश्यकत्वाद् नमस्शब्दार्थबोधाश्रयत्वेऽपि धात्वर्थफलाश्रयत्वाभावात् कथं कर्मत्वमिति चेत्, न; साक्षात्प्रभृतिषु पठितस्य कृञ्योगे निपातादिसंज्ञकस्य द्योतकत्वाङ्गीकाराददोषः। 'हरये नमः' इत्यादौ तु स्वरादिपठितः, प्रकृते तु न सः। अत एव सत्वसमासादिसिद्धिः। न चैवमपि नमस्शब्दार्थान्वयाभावेनोपपदविभक्तेः कथं प्राप्तिः, तद्-

द्योत्यान्वयमात्रेण तत्प्राप्तेः। यदा तु कर्मणोऽप्यस्य शेषत्वेन विवक्षा, तदा षष्ठीं बाधित्वा "नमःस्वस्ति" इति चतुर्थी एव।

यत्तु, एकस्या एवोपपदविभक्तित्वे, कारकविभक्तित्वे चायं न्याय इति। तत्, न; "नमोवरिवः" [३।१।१९] इति सूत्रस्थभाष्यविरोधात्। तत्र हि 'नमस्यति देवान्' इत्यत्र चतुर्थीवारणायायं न्याय उपन्यस्तो भगवता। एतेन स्वस्तिसाहचर्यात् सत्ववाचकनमस्शब्दस्यैव ग्रहणम्। 'नमस्करोति' इत्यादौ च न सत्त्ववाचकः, सत्वकरणेन निपातसंज्ञकत्वादिति परास्तम्। नमस्यतीत्यादावपि क्रियावाचकत्वेनासत्त्ववाचकत्वादप्राप्तौ भाष्यविरोधापत्तेः।

योगग्रहणेनैतद्योगमात्रे चतुर्थीविधानेन कर्मत्वाविवक्षायाम् 'नमस्यति देवेभ्यः, इत्यनापत्तेश्च। अव्ययमिति महासञ्ज्ञया स्वरादिपठितस्यापि लिङ्ग-संख्याकारकान्वयित्वाच्चेति दिक्।

'प्रजाभ्यः स्वस्ति' इत्यादौ स्वस्तिशब्दो मङ्गलार्थः। सम्बन्धश्चतुर्थ्यर्थः, प्रजा-सम्बन्धिमङ्गलमित्यर्थः। मङ्गलाशंसास्थले 'स्वस्त्यस्तु गोभ्यः' इत्यादौ स्वस्ति-शब्दार्थान्वये चतुर्थी, क्रियान्वये तु षष्ठी। तत्र चतुर्थ्यन्ते आशंसाविषयगोसम्बन्धि-मङ्गलकर्तृकं भवनमिति बोधः। षष्ठ्यन्ते आशंसाविषयमङ्गलकर्तृकं गोसम्बन्धि-भवनमिति बोधः।

यत्तु, 'आशीः स्वस्तिशब्दार्थः, सा च परहितविषयिणीच्छा, हितान्वयी सम्बन्धश्चतुर्थ्यर्थ इति। तत्, न; भूयादित्याशीर्लिङादेः प्रयोगानापत्तेः, स्वस्ति वृषलायेत्यादौ चतुर्थ्यनापत्तेश्च, अङ्गीकारार्थो हि तत्र स्वस्तिशब्दः। मङ्गलाङ्गी-कारार्थत्वस्यैव प्रामाणिकैरुक्तेश्चेति दिक्।

स्वाहास्वधावषट्शब्दास्त्यागार्थकनमस्शब्देन व्याख्याताः।

'दैत्येभ्यो हरिरलम्' इत्यत्रालम्शब्दार्थः सामर्थ्यवान्। चतुर्थ्यर्थश्च मारणादि-सम्बन्धित्वरूपसम्बन्धः। एवञ्च दैत्यमारणादिसम्बन्धिसामर्थ्यवान् इति बोधः।

इत्युपपदचतुर्थीविभक्त्यर्थनिरूपणम्।

अथ पञ्चमीविभक्त्यर्थविचारः

कारकविभक्तिरूपपञ्चम्या अपादानमर्थः। "अपादाने पञ्चमी" [२।३।२८] इति सूत्रात्। तल्लक्षणबोधकञ्च "ध्रुवमपायेऽपादानम्" [१।४।२४] इति सूत्रम्। अत्रापायो विश्लेषः सम्बन्धाभावः। स च न वास्तवसम्बन्धपूर्वकः, किन्तु बुद्धिपरिकल्पितसम्बन्धपूर्वकोऽपि। एवमभावोऽपि बुद्धिपरिकल्पितो बोध्यः। अत एव जुगुप्सादिपूर्वकनिवृत्तिलक्षकतामाश्रित्य 'जुगुप्साविराम' इत्यादिप्रत्याख्यानं भाष्योक्तम्; "यतश्च निर्द्धारणम्" [२।३।१४१] इति सूत्रप्रयोगः, 'यतो यतो विरज्यते' इत्यादिप्रयोगश्च संगच्छते। तज्जनकगतिविशेषोऽप्यत्रापायः—

'गतिर्विना त्ववधिना नापाय इति कथ्यते'

इति हरिस्वरसात्। अवध्यन्वययोग्यविभागानुकूलत्वं विना क्रियाया नापायशब्दवाच्येतेति तदर्थः।

अपाय इति चावर्त्तते, अन्वेतीति चाध्याह्रियते, तेनापायान्वयि यदपाये ध्रुवं गतिरूपापायानाश्रयः, तदपादानमिति तदर्थः। एवञ्च व्यपारतावच्छेदकसम्बन्धेन विभागजनकप्रकृतधातूपात्ततत्क्रियानाश्रयत्वे सति आश्रयतया तदुपात्तविश्लेषान्वयि तदपादानमिति फलितम्। कर्तृवारणाय सत्यन्तम्, धावतोऽश्वात् पतति, कुड्यात् पततोऽश्वात् पतति इत्यादिसंग्रहाय प्रकृतधातूपात्तेति। परस्परान्मेषावपसरत इत्यादिसंग्रहाय तत्क्रियेति। 'निवर्तेत ततस्ततः' इत्यादौ प्रवृत्त्यभावरूपधात्वर्थस्य विषयतासम्बन्धावच्छिन्नविशेषणतयाऽवधौ सत्त्वात् तत्राव्याप्तिवारणाय सम्बन्धविशेषनिवेशः। उदासीनेऽतिव्याप्तिवारणाय विशेष्यदलम्। स चार्थादवधिरेव। अवधित्वञ्च पूर्वोक्तविश्लेषाश्रयत्वसमानाधिकरणः स्वरूपसम्बन्धविशेषः, पदार्थान्तरं वा। तत्र विश्लेषस्य धातुलभ्यत्वादवधित्वेनावधिः पञ्चम्यर्थः।

न चावधित्वेन भाने मानाभावः, अवध्युपलक्षकध्रुवग्रहणस्य मानत्वात्। अन्यथा ह्यपायरूपक्रियान्वय्यपादानमित्यर्थकेनापायेऽपादानमित्यनेनैव सिद्धे तद्वैयर्थ्यं स्पष्टमेव। न च वृक्षस्य सम्बन्धसामान्येन पतनक्रियान्वयेऽपादानत्वाभावार्थं तत्, वाच्यवृत्त्याऽलाभात्। मातुः स्मरतीत्यादौ कर्मत्वाभाववत्तदुपपत्तेश्च।

न च कर्त्तुः पर्णस्यापादानत्ववारणाय तत् स्यात्, तदनुकूलव्यापारेऽन्वयेऽपि विभागेऽन्वयाभावात्, परत्वात् कर्तृसंज्ञया बाधाच्च। अत एव 'आश्रयोऽवधिरुद्देश्यः' इत्यादिनाऽवधेरेव पञ्चम्यर्थत्वमुक्तं हरिणा।

एतेन विभाग आश्रयश्च पञ्चम्यर्थ इत्यपास्तम्। 'वृक्षाद्विभजते' इत्यादौ विभागस्य बोधावृत्त्यापत्तेश्च। तत्रावधेरेव पञ्चम्यर्थत्वे किमर्धजरतीयेन त्वद्रीत्या पञ्चम्यास्तत्रासाधुतापत्तेश्च। न्यायनये घटं जानातीत्यादौ द्वितीयाया भवताप्यसाधुत्वस्योक्तत्वात्; अपायवदपादानमित्येव सिद्धे ध्रुवग्रहणवैयर्थ्यापत्तेश्च, विभागस्य धातुलभ्यत्वाच्च।

न च वृक्षात् पर्णं पततीत्यादौ वृक्षस्य विश्लेषाश्रयत्वात् परत्वेन कर्मतापत्तिः, वृक्षं त्यजतीतिवदिति वाच्यम्, फलतावच्छेदकसम्बन्धेन तस्य तदनाश्रयत्वात्, कर्तृनिष्ठविभागीयसम्बन्धस्यैव तत्त्वात्। वृक्षं त्यजतीत्यादौ व्यापारव्यधिकरणविभागस्यैव धात्वर्थत्वेन भवत्येव कर्मत्वम्।

एतेन विभाग एव पञ्चम्यर्थः, आश्रयत्वं प्रकृतिप्रत्ययार्थयोः संसर्गः, विभागस्य जन्यतासम्बन्धेन धात्वर्थेऽन्वय इत्यपास्तम्। विभक्त्यर्थप्रकृत्यर्थयोः क्लृप्तस्याभेदान्वयस्य त्यागापत्तेश्च। अपायोऽपादानमित्येव सिद्धे इतरवैयर्थ्यापत्तेश्च।

एवञ्च वृक्षात्पर्णं पततीत्यादाववधित्वेनावधिः पञ्चम्यर्थः। तत्राभेदेन प्रकृत्यर्थो विशेषणम्। स च संयोगानुकूलविभागानुकूलव्यापाररूपपतिधात्वर्थैकदेशे विभागे विशेषणम्। भूमिनिष्ठसंयोगानुकूलवृक्षावधिकविभागानुकूलो व्यापारः पर्णवृत्तिरिति बोधः।

न चैवमपि 'वृक्षात् स्यन्दते' इति स्यादिति वाच्यम्, आसनाच्चलित इतिवदिष्टापत्तेः। क्रियामात्रार्थत्वे तु वृक्षे स्यन्दत इत्येव।

'वलाहकाद् विद्योतते'[1] इत्यादौ विद्योततेर्निःसरणपूर्वके विद्योतने लक्षणा। निःसरणं विभागजनकक्रिया। एवञ्च वलाहकावधिकविभागजनकक्रियोत्तरकालिकं विद्योतनं विद्युद्रूपाश्रयवृत्तीति बोधः। इदमुपात्तविषयमित्युच्यते।

यदा तु प्रत्यक्षसिद्धमागमनं मनसि निधाय कुतो भवानिति प्रश्ने पाटलिपुत्रादिति चोत्तरयति, तत्र पदजन्यपदार्थोपस्थितेः शाब्दबोधजनकत्वानङ्गीकर्तृनये

1. 'विद्युत्' इत्यस्य शेषो बोध्यः।

प्रत्यक्षदृष्टोपस्थितागमन एवान्वयः। मतान्तरे तु प्रत्यक्षदृष्टार्थेन सम्बन्धिविधया स्मृतपदादुपस्थितागमनेनेति बोध्यम्। इदमेवाभिप्रेत्याहुः—'गम्यमानाऽपि क्रिया कारकविभक्तौ प्रयोजिका' इति।

केचित्तु, पदाध्याहारेऽपि साक्षात् पदस्यानुच्चारणाद् गम्यमानापि इत्यस्यैव विषयमाहुः।

तत्र किम्शब्दः प्रश्नविषयार्थः। एवञ्च प्रश्नविषयावधिकविभागानुकलो व्यापार इति बोधः। प्रश्नवाक्ये उत्तरवाक्ये च पाटलिपुत्रावधिकेत्यादिः।

एतदेवापेक्षितक्रियमित्युच्यते। वृक्षात् पततीति तु निर्दिष्टविषयमित्याहुः।

[1]'अधर्माज्जुगुप्सते, विरमति, प्रमाद्यति' इत्यत्रानिष्टसाधनताज्ञानरूपा निन्दा जुगुप्सतेरर्थः। विषयत्वं पञ्चम्यर्थः। अधर्मविषयकानिष्टसाधनताज्ञानमिति बोधः। विरमतेः कृत्यसमानाधिकरणवृत्तिध्वंसविशिष्टकृत्यभावोऽर्थः। कृतिश्च सर्वत्रैकविषयैवाकाङ्क्षावशाद् भासते। वैशिष्टचञ्च समभिव्याहृतकर्तृपदबोध्यशरीरजातीयशरीरघटितसामानाधिकरण्येन। चैत्रादिपदैर्विशिष्टात्मबोधनेन शरीरस्यापि बोधनात्। साजात्यञ्च देवदत्तादिपदोपस्थापितदेवदत्तत्वादिजात्यैव। तेन भाविदेहान्तरावच्छेदेनाधर्मकरणेऽपीदानीन्तनदेहमादाय देवदत्तोऽधर्माद्विरमति इति प्रयोगसिद्धिः। नापि युवशरीरावच्छेदेनाधर्मं कुर्वत्यपि बालशरीरावच्छिन्नचरमवृत्तिध्वंसमादाय विरमतीति प्रयोगः। नापि पूर्वापरकालयोरधर्मकरणे मध्ये मुहूर्त्तमात्रमकरणे विरमतीति प्रयोगः, तत्कृतिध्वंसस्य कृतिसमानाधिकरणत्वात्। नापि तत्तद्देहावच्छिन्नचरमकृतिध्वंसमादाय विरमतीति प्रयोगः। पञ्चम्यर्थस्तु विषयतैव। एवञ्चाधर्मविषयकृत्यसमानाधिकरणकृतिध्वंसविशिष्टकृत्यभावो देवदत्तवृत्तिरिति बोधः। एवं प्रमाद्यतेः समानदेशत्वसमानकालत्वोभयसम्बन्धेनाधिकारविशिष्टेष्टसाधनताज्ञानाभावः पञ्चम्यर्थो विषयत्वमिष्टसाधनताज्ञानेऽन्वेति। अत्र जुगुप्सादीनां यद्विषयकत्वेन विवक्षा, तदपादानम्।

1. अत्र 'जुगुप्साविराम' इत्यनेनापादानत्वम्। यद्विषयकत्वेन जुगुप्सादयो विवक्षिताः, तदपादानमिति तदर्थः। अनिष्टसाधनत्वज्ञानरूपा निन्दा जुगुप्सतेरर्थः। विषयत्वादिः पञ्चम्यर्थः, अपादानत्वशक्तिर्वा।

तादृशनिन्दापूर्वकनिवृत्तौ धातोर्लक्षणां स्वीकृत्य "ध्रुवमपाये" इत्यनेनैव अपादानत्वम्। एवमेव इदं वार्त्तिकम् उत्तरसूत्राणि च प्रत्याख्यातानि भाष्यकृता।

चोराद्बिभेति; त्रायते वा इत्यादौ अनिष्टज्ञानं भयम्, तन्निवृत्त्यनुकूलो व्यापारस्त्राणं पञ्चम्यर्थो हेतुः। "भीत्रार्थानां भयहेतुः" [१।४।२५] इति सूत्रस्वरसात्। स च धात्वर्थैकदेशेऽनिष्टेऽन्वेति। भयहेतुरित्यस्य भयैकदेशानिष्टहेतुरित्यर्थः। [1]चोरहेतुकानिष्टज्ञानम्, [2]तद्धेतुकानिष्टनिवृत्त्यनुकूलो व्यापार इति च बोधः। न च यत्कण्टकादिजन्यभयमेव न प्रसिद्धम्, ततः पञ्चमी न स्यात्, इष्टापत्तेः। पञ्चम्या इष्टत्वे तु तत्र हेतुत्वमारोप्यैव प्रयोगः। एवमेव चाकाशो न पश्यति, परमाणुं न पश्यति इत्यादिप्रयोगनिर्वाहः, दर्शनादावाकाशकर्तृत्वादिकमारोप्य तस्यैव निषेधकरणाद्, बोधाच्च, शशशृङ्गं नास्तीत्यादिवत्। तत्र हि शब्दबलात् प्रतीतस्य शशशृङ्गास्तित्वस्य निषेधः क्रियते "अत्यन्तासत्यपि ज्ञानमर्थे शब्दं करोति हि" इत्यभ्युपगमात्। अयोग्यतानिश्चयस्तु न शाब्दबोधप्रतिबन्धकः। अन्यथाऽन्यथा व्युत्पन्नं प्रति प्रतिवादिशब्दो मूक एव स्यात्। प्रतिवादिनः शब्दाद् वाक्यार्थप्रतीतौ तत्खण्डनकथाऽप्युच्छिद्येत। आहार्यः शाब्दबोधः इत्यपरे। अत एव शशशृङ्गं नास्तीत्यादेः शब्दसाधुता इष्यत एवेत्याहुः।

'अध्ययनात् पराजयते' इत्यत्र कृत्यसाध्यत्वधीसमानाधिकरणः कृत्यभावो धात्वर्थः। पञ्चम्यर्थो विषयत्वम्। कृत्योश्चैकविषयत्वं व्युत्पत्तिबललभ्यम्। एवञ्चाध्ययनविषयककृत्यसाध्यत्वधीसमानाधिकरणकृत्यभावो देवदत्तवृत्तिरिति बोधः।

---

1. अनेन 'चोरापादानकमनिष्टज्ञानम् इत्याकारको बोधो मञ्जूषाकृन्मते' इति लिखन्तः काशिकाकाराः 'अन्यस्योष्णीषमन्यमस्तके स्थापितम्' इति वाक्यं चरितार्थितवन्तः।

2. ननु यस्य चोरहेतुकमनिष्टमप्रसिद्धम्, तथापि तद्धेतुकत्वेन स्वस्यानिष्टं संभावयति, तत्र 'चोरादयं बिभेति' इति प्रयोगो न स्यात्, तदीयानिष्टे चोरहेतुकत्वस्य बाधादिति चेत्, न; तद्धेतुकान्यदीयानिष्टस्य तस्मिन्, तदीयानिष्टे वा चोरहेतुकत्वस्यारोपेणादोषात्।

अत्रापि सम्बन्धित्वेन विवक्षायां चोरपदात् षष्ठी भवति। अत एव 'कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे' इति रामायणप्रयोगः संगच्छते। अथवा 'कस्य संयुगे' इत्याकारकोऽन्वयो बोध्यः।

नैयायिकास्तु—प्रयोज्यताप्रकारकत्वं पञ्चम्यर्थः। तस्य संभावनायामन्वयः। अतः चोराधीनानिष्टस्याप्रसिद्धत्वस्थले न दोषः, चोरप्रयोज्यानिष्टसंभावनया भयस्य सत्त्वात् 'चोरो ममानिष्टं कुर्यात्' इति सम्भावनायाः सत्त्वात्। एवञ्च शत्रुभ्रमेण 'मित्रादपि बिभेति' इति वाक्यस्यापि प्रामाण्यं संगच्छते।

एवञ्च भयार्थकधातुयोगे भयहेतुत्वेन संभावनमपादानमित्येको वाक्यार्थः, त्राणार्थकधातुयोगेऽनिष्टप्रयोजकं तदित्यपरवाक्यार्थ इत्याहुः।

'शत्रून् पराजयते' इत्यत्र तिरस्कारानुकूलो व्यापारो धात्वर्थः ।

यत्तु, अनिष्टं धात्वर्थः, जन्यत्वं पञ्चम्यर्थः, "पराजेरसोढः" [१।४।२६] इति सूत्रे च 'असोढः' इत्यस्यानिष्टसाधनत्वेन विवक्षितोऽर्थ इत्याहुः, तत्, न; हेतुपदानुवृत्त्यैव सिद्धे 'असोढः' इत्यस्य वैयर्थ्यापत्तेः, कर्मक्तप्रत्ययान्तासोढशब्दात् त्वदुक्तार्थालाभाच्च ।

'यवेभ्यो गां वारयति' भक्षणादिफलजनकव्यापाराभावानुकूलो व्यापारो धात्वर्थः । "वारणार्थानामीप्सितः" [१।४।२७] इति सूत्रेणापादानत्वं यवानाम् । तत्रेप्सित इत्यस्य वारणार्थधात्वर्थतावच्छेदकफलाश्रयत्वेनेच्छाविषय इत्यर्थः । उदाहरणे च धात्वर्थतावच्छेदकसंयोगरूपफलाश्रयत्वेन गवेप्सितत्वाद् यवानामपादानत्वम् । तत्र कर्मनिष्ठव्यापारस्य भक्षणादेर्भक्षणत्वावच्छिन्नप्रतियोगिताक एवाभावो भासते, व्युत्पत्तिवैचित्र्यात् । तात्पर्यवशाच्च विशिष्यैव शक्तिः, नानार्थत्वमिष्टमेवेत्यपि कश्चित् । एवञ्च यवनिष्ठसंयोगजनकव्यापारस्य भक्षणादेर्गोवृत्तिर्योऽभावः, तदनुकूलो व्यापार इति बोधः ।

यदि तु प्रतिषिद्धे गवि भक्षयत्यपि वारयतीति प्रयोगः, तदा तादृशाभावप्रकारिकेच्छाविशिष्टो व्यापार एव धात्वर्थ इति बोध्यम् ।

अत्र **केचित्**, यत्र नान्तरीयकतया चैत्रादेर्विषादिभोजनं प्रसक्तम्, न तु स्वेच्छया, तत्र तद्भोजननिवर्त्तकव्यापारकर्त्तरि चैत्रं विषाद्वारयतीति प्रयोगवारणाय सन्प्रयोगः । अत एव तत्र सविषादन्नाद्वारयतीत्येव प्रयोगः ।

न च कूपादन्धं वारयतीति न स्यात्, न हि कूपपतनमन्धस्येच्छाविषय इति वाच्यम्, कूपपतनत्वेनेच्छाविषयत्वाभावेऽप्यभिमुखदेशगमनत्वेन तस्यापीच्छाविषयत्वाद् इत्याहुः ।

मातुर्निलीयते कृष्णः "अन्तर्धौ येनादर्शनमिच्छति" [१।४।२८] इत्यपादानत्वम् । तत्र निलयनमन्यवृत्तिव्यापारजन्यस्वकर्मकदर्शनाभावप्रयोजकदेशविशेषस्थितिः । अयमेव च सूत्रे अन्तर्धिपदार्थः । पञ्चम्यर्थो वृत्तित्वं धात्वर्थैकदेशे व्यापारेऽन्वेति ।

'उपाध्यायादधीते' इत्यस्य चोच्चारणोत्तरकालिकनियमपूर्वकस्वीकारानुकूलो व्यापारोऽधीतेरर्थः । पञ्चम्यर्थो वृत्तित्वं तदेकदेशे उच्चारणेऽन्वेति ।

'ब्रह्मणः प्रजाः प्रजायन्ते' अत्रोपादानं कारणं पञ्चम्यर्थः, "[1]जनिकर्त्तुः प्रकृतिः" [१।४।३०]इति सूत्रस्वरसात् । तत्र हि प्रकृतिशब्द उपादानकारणपर इति स्पष्टं भाष्यादौ । एवञ्च ब्रह्माभिन्नोपादानकारणजन्या प्रजावृत्तिरुत्पत्तिरिति बोध ।

[2]'पुत्रात् प्रमोदो जायते' इत्यादौ "विभाषा गुणेऽस्त्रियाम्"[२।३।२५]इत्यत्र विभाषेति योगविभागात् हेतौ पञ्चमी । उपादानत्वारोपेणेत्यन्ये ।

'हिमवतो गङ्गा प्रभवति' इत्यादौ प्रभवतेः प्रथमः प्रकाशोऽर्थः। हिमवद्धेतुको गङ्गाकर्तृकः प्रथमः प्रकाश इत्यर्थः । हेतुः [3]पञ्चम्यर्थः, "भुवः प्रभवः" [१।४।३१] इति सूत्रस्वरसात् । प्रभवत्यस्मादिति हि तत्र प्रभवः ।

'प्रासादात् प्रेक्षते' इत्यादौ आरुह्येत्यादिल्यबन्तार्थाध्याहारेण बोधः। पञ्चम्यर्थोऽध्याहृतक्रियाकर्म । 'आसनात् प्रेक्षते' इत्यादावुपविश्येत्याद्यध्याहृत-ल्यबन्तार्थाधिकरणं पञ्चम्यर्थः । अत्रापि शब्दाध्याहार एव, अनुच्चारणस्यैव 'ल्यब्लोपे कर्मणि च' इति वार्त्तिके लोपपदार्थत्वात् ।

'आजघ्ने विषमविलोचनस्य वक्षः' इति तु भेत्तुमिति तुमुनन्ताध्याहारेण व्याख्येयमित्यन्ये ।

इति पञ्चमीविभक्त्यर्थविचारः ।

---

1. जननं जनिः, तस्याः कर्तेति षष्ठीतत्पुरुषः । तृन्प्रत्ययान्तत्वान्न समासनिषेधः । ननु "न लोकाव्यय" इति षष्ठीनिषेधप्रसङ्गः, कारकषष्ठ्या एव स निषेध इति सिद्धान्तात् शेषषष्ठीप्रवृत्तौ बाधकाभावात् ।

   वस्तुतस्तु —शेषषष्ठ्यास्तृजन्तेनापि समासः सुलभ इति मनोरमाकाराः ।
2. वृत्तिकृतस्तु—एतत्प्रयोगानुरोधेन "जनिकर्त्तुः प्रकृतिः" इत्यत्र प्रकृतिपदे हेतुमात्रपरिग्रह इत्याहुः ।
3. अपरे तु—अधिकरणत्वं पञ्चम्यर्थ इत्याहुः

   व्युत्पत्तिवादकृतः—सम्बन्धाधीनत्वं पञ्चम्यर्थ इत्याहुः ।

   तार्किकरत्नाकरकृतः—तादात्म्यं पञ्चम्यर्थः, दर्शनयोग्यत्वाभावावच्छेदक-देशाव्यवहितदेशावच्छेदेन दर्शनयोग्यत्वं धात्वर्थः । तादात्म्यस्य धात्वर्थघटक-देशेऽन्वयः । एवञ्च हिमवदभिन्नो यो दर्शनयोग्यत्वाभावावच्छेदकदेशाव्यवहित-देशः, तदवच्छिन्नदर्शनयोग्यत्ववती गङ्गेति बोधः । कारकवादकृतस्तु—आद्यबहिःसंयोगो धात्वर्थः । प्रकृते बहिःपदार्थः रसातलम्, संयोग-ध्वंसाव्यवहितोत्तरक्षणवृत्तित्वं पञ्चम्यर्थः । आश्रयत्वमाख्यातार्थः ।

   एवञ्च हिमालयानुयोगिकसंयोगध्वंसाव्यवहितोत्तरक्षणवृत्त्याद्यपृथिवी-संयोगाश्रयत्ववती गङ्गेति बोधः ।

अथोपपदविभक्तिर्निरूप्यते ।

'वनाद् ग्रामो योजने योजनं वा' इति । अव्यवहितोत्तरत्वं पञ्चम्यर्थः । प्रथमासप्तम्योस्तु स्वाव्यवहितोत्तरदेशवृत्तित्वादिरूपः सम्बन्धोऽर्थः । एवञ्च वनाव्यवहितोत्तरयोजनाव्यवहितोत्तरदेशवृत्तिर्ग्राम इति बोधः ।

'कार्तिक्या आग्रहायणी मासे' इत्यत्र स्वावयवकाव्यवहितोत्तरत्वं पञ्चम्यर्थः । सप्तम्यर्थः स्वाव्यहितोत्तरकालवृत्तित्वम् । कार्तिक्यवयवकोत्तर-त्रिंशत्तिथ्यात्मकमासाव्यवहितोत्तरकालवृत्तिराग्रहायणीति बोधः ।

'अन्यो मित्रः, इतरो वा कृष्णात्'इत्यत्र "अन्यारादितरर्ते दिक्शब्दाच्चूत्तर-पदाजाहियुक्ते" [२।३।२९] इति सूत्रेण पञ्चमी । तत्रान्य इत्यर्थग्रहणम् । तदर्थश्च भेदवान् । अन्यशब्दश्च भावप्रधानः, अन्यत्वार्थक इत्यर्थः ।

अत एव घटाद्भेदो घटाद्भिन्नः इत्यादिसिद्धिः । न चैवं घटः पटो नेत्या-दावपि पञ्चम्यापत्तिः, तस्यापि भेदार्थकत्वादिति वाच्यम्, अन्यार्थकस्य तत्सदृशस्य लिङ्गसंख्यान्वयार्थप्रतिपादकस्यैव ग्रहणात्ः । अत एव तदर्थकस्येतरशब्दस्याव-युत्यानुवादः । स हीदृशानामेव तदर्थकानां ग्रहणमिति बोधनार्थः । न च 'इतरस्त्वन्यनीचयोः' इति नीचार्थस्य ग्रहणार्थं तदिति वाच्यम्, विधिवाक्या-कल्पनलाघवेन साहचर्येण चान्यार्थस्यैव ग्रहणात्, अस्मात् तारो मन्दो वेत्यादिवत् "पञ्चमी विभक्ते" [२।३।४२] इत्येव सिद्धेश्च । न चान्यार्थयोगेऽपि तेन सिद्धिः, निर्धारणप्रयोजकीभूतजात्यादिरूपविरुद्धधर्मानभिधानात् परस्परप्रतियोगिकभेदस्य परस्परवृत्तित्वेनानिर्धारकत्वाच्च ।

किञ्च, नञो द्योतकतया घटादिपदानामेव लाक्षणिकत्वाद् भेदनिबन्धन-पञ्चम्या अप्राप्तेः । न च 'एकोऽन्यार्थे प्रधाने च' इति कोशाद् अन्यार्थकैकशब्द-योगे 'घटादेकः पटः' इत्यादौ पञ्चम्यापत्तिः, इष्टापत्तेः । एवमन्योऽन्याभावव-दादिपदयोगेऽपि । न चैवं 'घटीयो भेदः' इत्यादेरनापत्तिः, षष्ठीसमर्थाद्विहितच्छस्या-प्राप्तेरिति वाच्यम्, 'घटस्यायम्' इतीदंशब्दार्थान्वये तस्य सुलभत्वात्; इदमः संनिकृष्टत्वेन बुद्धिस्थबोधकत्वेनान्यार्थकत्वाभावात् । अत एव तेषां सर्वार्थत्वेन

सर्वनामत्वम्। तद्धि एकरूपेण सर्वार्थबोधकत्वम्। तत्तद्रूपेण बोधस्तु प्रकरणादि-वशात् पार्ष्णिको मानस एव। एतेन 'घटात् सः' इति स्यादित्यपास्तम्।

वस्तुतस्तु घटे पटाद् भेदः, न तु घटादेव स इति प्रयोगादिष्टापत्तिः। घटीयो भेदः इत्यत्र तु "तत आगतः" [४।३।७४] इत्यर्थे छ इति वदन्ति। न च भिन्नशब्दो नान्यार्थः, घटं भिनत्तीत्यादाववयवविभागानुकूलव्यापारार्थकत्वेन क्लृप्तत्वाद् भिदेः क्तस्य सत्त्वादिति वाच्यम्, घटाद् भिनत्ति पटमित्यादिप्रयोगा-नुरोधेन धातूनामनेकार्थत्वेन चान्योऽन्याभावप्रकारकज्ञानार्थकत्वस्यापि स्वीकारात्। भेदानुकूलव्यपारार्थकत्वं तु न, तस्य नित्यत्वात्। अन्योऽन्याभावार्थकत्वमात्रेण कर्मण एव कर्तृत्वविवक्षायां घटाद् भिद्यते, घटाद् भिन्न इत्यादयः प्रयोगाः। विभागार्थकत्वाभावाच्च न "ध्रुवमपाये" [१।४।२४] इत्यनेन सिद्धिरत्रेति बोध्यम्।

यस्तु, इतरग्रहणं पृथक्त्वार्थम्। अत एव 'घटः पटात् पृथक्' इत्यादौ पञ्चमी। न च सोऽन्यार्थः, पृथक्त्वस्यातिरिक्तगुणत्वाङ्गीकारादिति। तत्, न; तस्य गुणत्वानङ्गीकारात्। अत एव रूपं रसात् पृथगित्युपपद्यते "पृथग्विना" [२।३।३२] इत्यादिना सिद्धत्वाच्च। प्रतियोगित्वं पञ्चम्यर्थः।

'ऋते कृष्णाद् नोत्पद्यते सुखम्'इत्यत्र ऋतेशब्दार्थोऽत्यन्ताभावः, पञ्चम्यर्थः प्रतियोगित्वम्; कृष्णशब्दश्च तद्भक्त्यादिलाक्षणिकः। एवञ्च कृष्णभक्त्यादि-प्रतियोगिकात्यन्ताभावप्रयोज्यः सुखकर्तृकोत्पत्त्यभाव इति बोधः। कृष्णाद् ऋते दुःखमित्यत्र ऋतेशब्दार्थस्य सामाधिकरण्येनेतरत्रान्वयः। कृष्णात्यन्ताभावसमाना-धिकरणं दुःखमिति बोधः। कृष्णादृते नरः शोच्य इत्यत्रात्यन्ताभाववान् तदर्थः। कृष्णात्यन्ताभावान् नरः शोच्य इति बोधः। कृष्णादृते न धनुर्धर इत्यादौ भेद-वानर्थः। कृष्णाभिन्नो न धनुर्धर इति बोधः। एतद्योगे द्वितीयापि यथा ऋते वातं वृक्षः पतितः। अत्र वाताभाववान् वृक्षः पतनाश्रय इति बोधः। वृक्षपतने वात-जन्यत्वाभावलाभस्त्वार्थः।

अन्ये तु—स्वप्रकृत्यर्थनिष्ठजनकतानिरुपितजन्यताप्रतियोगित्वं विभ-क्त्यर्थः। तस्य ऋते शब्दार्थऽभावेऽन्वयः। तस्य च पतनेऽन्वयः। एवञ्च वृक्षकर्तृकं वातजन्यत्वाभाववत् पतनमिति बोध इत्याहुः।

'पूर्वो ग्रामात्' अत्रोदयाचलसंनिहितदेशत्वं पूर्वत्वम्। तदेकदेशे संनिहितत्वे पञ्चम्यर्थावधित्वस्यान्वयः। एवं पश्चिमत्वमस्ताचलसंनिहितदेशत्वम्। सूर्योदयदिगभिमुखस्थितस्य सव्यहस्तसंनिहितदेशत्वं दक्षिणत्वम्। तथावस्थितस्य वाम हस्तसंनिहितदेशत्वमुत्तरत्वम्। ग्रामावधिकोदयाचलसंनिहितदेश[त्वम्?] इत्यादिक्रमेण बोधः।

'चैत्रात् पूर्वः फाल्गुनः' प्रतियोगितद्ध्वंसानधिकरणकालः पूर्वशब्दार्थः। चैत्रशब्दार्थस्य प्रतियोगिन्यभेदेन ध्वंसे प्रतियोगितया काले च तात्पर्यवशादव्यवहितत्वादिनान्वयः, एकस्याप्यनेकधाऽन्वयो व्युत्पत्तिवैचित्र्यात्। एवञ्च चैत्राभिन्नप्रतियोगितद्ध्वंसैतदुभयानधिकरणचैत्राव्यवहितकालवृत्तिः फाल्गुन इति बोधः। 'चैत्रात् पूर्वो माघः' इत्यादौ तात्पर्यवशाद् यथायथं त्रिंशद्दिनव्यवहितत्वादिना काले चैत्रस्यान्वयो बोध्यः। प्रागभावाङ्गीकारे तु तदधिकरणकालः पूर्वशब्दार्थः। चैत्रात् पर इत्यादौ ध्वंसाधिकरणकालः परशब्दार्थः। चैत्रस्य च ध्वंसे प्रतियोगितया काले चाव्यवहितत्वादिनान्वयः, तात्पर्यवशात् प्राग्वत्। कृष्णात् पूर्वो बलभद्र इत्यत्र कृष्णशब्दःस्वोत्पत्तिकाले लाक्षणिकः, कृष्णोत्पत्तिकालतद्ध्वंसोभयानधिकरणकालोत्पत्तिक इति बोधः। कृष्णात् पर इत्यादौ कृष्णोत्पत्तिकालध्वंसाधिकरणकालवृत्तिरिति बोधः।

प्रयागादुत्तरं काशीत्यादौ संयुक्तसंयोगवद्देशत्वमुत्तरत्वम्। तस्य च पूर्वत्वदक्षिणत्वपश्चिमत्वादिना तत्तद्रूपेण तात्पर्यवशात् तत्तत्प्रयोगेषु भानम्।

'गृहाद् गङ्गा मम परा काश्याः सैवापरा मम।'

इत्यादौ विप्रकृष्टदेशस्थत्वसंनिकृष्टदेशस्थत्वे परापरशब्दस्यार्थौ, पञ्चम्यर्थोऽवधित्वाख्यः सम्बन्धः। तेन गृहावधिकमत्सम्बन्धिविप्रकर्षवती गङ्गेत्यादिक्रमेण बोधः। ममेत्यत्र तु न पञ्चमी, प्रत्यासत्तिन्यायेन यस्य पदस्य यत्रोत्थिताऽऽकाङ्क्षा तद्वाचकादेव तत्पदनिमित्तविभक्तिस्वीकारात्। परादिपदञ्चावधावेव नियताकाङ्क्षम्, न सम्बन्धिनीति स्पष्टमेव।

प्राक् प्रत्यग्वा ग्रामादिति पूर्वादिशब्दैर्व्याख्यातम्। भवात् प्रभृति आरभ्य वा सेव्यो हरिरित्यत्र प्रभृतीत्यारभ्येत्यर्थकमव्ययम्। आरम्भ आद्यक्षणसम्बन्धः, उत्तरकालव्यापकत्वं चेतरक्रियान्वये संसर्गः, शब्दशक्तिस्वभावात्। एवञ्च भवसम्बन्ध्याद्यक्षणसम्बन्धोत्तरकालव्यापकसेवाकर्म हरिरिति बोधः। आद्यक्षण-

मारभ्येत्यादौ सम्बन्धानुकूलो व्यापारो धात्वर्थः। अत एवाद्यक्षणस्य कर्मत्वम्। कर्मत्वाविवक्षायामपि षष्ठीं बाधित्वा पञ्चम्येवेति बोध्यम्।

'ग्रामाद्बहिः' अत्र बहिःशब्देन समभिव्याहृतपदार्थतावच्छेदकानधिकरण-तत्संहित[तः]देशः कालो वा तात्पर्यादुच्यते, तत्स्थं वस्तु च। एवञ्च ग्राम-सम्बन्धी ग्रामत्वानधिकरणदेशः, तत्स्थं वस्तु वेति बोधः।

'अप हरेः, परि हरेः संसारः' इत्यत्रापपरी ऋतेशब्दसमानार्थौ।

आमुक्तेः संसारः, अत्र मर्यादा आङोऽर्थः। तत्र मर्यादा द्विविधा—कालरूपा देशरूपा च। कालगतमर्यादात्वञ्च स्वप्रागभावाधिकरणकालवृत्तिर्यः समभिव्या-हृतपदार्थः, तदनधिकरणत्वम्। मुक्तिपदञ्च मुक्त्यधिकरणकालप्रागभावपरम्। तत्राङर्थो व्यापकत्वम्। पञ्चम्यर्थो निरूपितत्वम्। व्यापकत्वस्य स्वव्याप्यीय-प्रतियोग्यवृत्तित्वविशिष्टाश्रयतासम्बन्धेन संसारेऽन्वयः। मुक्त्यधिकरणकाल-प्रागभावनिरूपितस्वप्रतियोग्यवृत्तित्वविशिष्टव्यापकतावान् संसार इति बोधः।

[स्वमुक्त्यधिकरणकालप्रागभावेः[1]] एतदर्थकयावच्छब्दयोगे तु द्वितीया।[2] कार्त्तिक्याः वैशाखीं यावत् शीतमिति यथा। अत्र यावच्छब्दार्थो व्यापकत्वम्, निरूपितत्वं द्वितीयार्थः, वैशाखीपदेन न कार्त्तिकीध्वंससमानाधिकरणवैशाखीप्राग-भावाधिकरणकालो लक्ष्यते, मर्यादार्थकयावच्छब्दकार्त्तिकीपदयोः समभिव्याहारात्।

यद्वा, कार्त्तिकीपदेन तद्ध्वंसो लक्ष्यते। तस्याश्रयतासम्बन्धेन वैशाखी-प्रागभावाधिकरणकालेऽन्वयः। तेन वैशाखीप्रागभावाधिकरणकार्त्तिकीपूर्ववर्त्ति-मासेषु शीताभावसत्त्वेऽपि न दोषः।

व्यापकत्वञ्च स्वाधिकरणस्वप्रतियोगिसजातीयकालनिष्ठाभावप्रतियोगिता-नवच्छेदकधर्मवत्त्वम्। स्वं वैशाखीप्रागभावः, साजात्यञ्च स्वप्रतियोगिपदार्थ-तावच्छेदकतिथित्वादिना। तेन प्रागभावाधिकरणयत्किञ्चिद्दण्डादिषु शीता-भावेऽपि न दोषः।

---

1. मध्येकोष्ठं पाठः प्रकृतानुपयोगी।
2. उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु।
द्वितीयाऽऽम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते॥
इत्यनेन द्वितीयेत्यर्थः

'आरभ्य तस्यां दशमीं तु यावत् प्रपूजयेत्' इत्यादौ तिथिरखण्डकालविशेषरूपैव, न तु क्रियाप्रचयः, पूजादेस्तावत्क्रियावृत्तित्वासम्भवात्। समभिव्याहृतावधिपदार्थस्य यावत्त्वप्रतियोगिनो व्यापकस्य च तत्तद्रूपेणैव भानम्, तात्पर्यवशात्। तेन भाविभूतवैशाख्यादिकमादाय न व्यापकत्वहानिः। व्यापकत्वस्य स्वनिरूपितव्याप्यतावद्वृत्तिप्रागभावप्रतियोग्यवृत्तित्वविशिष्टाश्रयतया शीतेऽन्वयः।

एवञ्च कार्तिकीध्वंससमानाधिकरणवैशाखीप्रागभावाधिकरणकालनिरूपितस्ववृत्तिप्रागभावप्रतियोग्यवृत्तित्वविशिष्टव्यापकतावच्छीतमिति बोधः। देशगतमर्यादात्वञ्च स्वसमभिव्याहृतावधिपदार्थान्तरालदेशवृत्तिपदार्थानधिकरणत्वम्। यथा प्रयागात् काशीं यावद् आयातीत्यादौ। अत्र काशीपदेन प्रयागे काश्यन्तरालदेशो लक्ष्यते। प्रयागपदं तात्पर्यग्राहकम्।

यद्वा, प्रयागपदं तदुत्तरदेशलक्षकं काशीपदञ्च तत्पूर्वदेशस्य व्यापकत्वं यावदर्थः। तस्य च स्वनिरूपितव्याप्यत्ववद्भिन्नावृत्तित्वविशिष्टाधारतया आगमनेऽन्वयः। एवञ्च प्रयागोत्तरकाशीपूर्वदेशव्यापकं तद्भिन्नदेशावृत्तिगमनमिति फलति।

आसकलाद् ब्रह्मेत्यत्राभिविधिराङोऽर्थः। सकलत्वव्यापकं ब्रह्मेति बोधः। सोऽपि द्विविधः—कालिको दैशिकश्च। तत्राद्यं यथा—कार्तिक्याश्चैत्रं यावच्छीतमिति। अत्र कार्तिकीध्वंसाधिकरणचैत्रोत्तरकालप्रागभावाधिकरणकालव्यापकत्वं शीते प्रत्याय्यते। चैत्रपदेन च कार्त्तिकीध्वंसाधिकरणचैत्रोत्तरकालप्रागभावाधिकरणकालो लक्ष्यत इत्यादि प्राग्वत्। यावदर्थो व्यापकत्वम्।

अन्त्यं यथा काशीतः पाटलीपुत्रं यावद् वृष्ट इति[1]। अत्र काशीपश्चिमदेशावधिकपूर्वदेशपाटलिपुत्रपूर्वदेशावधिकपश्चिमदेशव्यापकत्वम्। पाटलिपुत्रपूर्वदेशावृत्तित्वविशिष्टं काशीपश्चिमदेशावृत्तित्वविशिष्टञ्च वृष्टो यावच्छब्देन प्रत्याय्येते। अन्वयः प्रागुक्तदिशोह्य इति दिक्।

'प्रद्युम्नः कृष्णात् प्रति' अत्र सादृश्यवान्प्रत्यर्थः। कृष्णप्रतियोगिकसादृश्यवानिति बोधः। तिलेभ्यः प्रति यच्छति माषान् अत्र ग्रहणपूर्वकपुनःप्रत्यर्पणं प्रतिसमभिव्याहृतयच्छतेरर्थः। एवञ्च तिलसम्बन्धिग्रहणपूर्वकं माषकर्मकं प्रत्यर्पणमिति बोधः।

---

1. 'वृष्टो इति' एतदनुकरणमतश्च नासाधु।

शताद् बद्धः—अत्र हेतुः पञ्चम्यर्थः। शतहेतुकबन्धनकर्मेति बोधः। एतेन 'जाड्याद् बद्धः, धूमादग्निमान्' इत्यादिकं व्याख्यातम्। [1]धूमादिपदैस्तज्ज्ञानं लक्ष्यते।

पृथग्, विना, नाना, रामं रामाद्रामेण वा—अत्र पञ्चमीद्वितीयातृतीयानां प्रयोगित्वरूपसम्बन्धोऽर्थः। पृथक्त्वं गुणो भेदो वेत्यन्यदेतत्। विनानाने ऋते शब्दसमानार्थे।

'स्तोकेन स्तोकाद् वा मुक्तः' अत्र तृतीयापञ्चम्यौ करणार्थे। यत्नेनेत्यादि विशेष्यमध्याहार्यम्। स्तोकाभिन्नयत्नकरणकमुक्तिकर्मेति बोधः।

---

1. अत्र ज्ञाननिष्ठजन्यजनकभावस्य विषये आरोपात् पञ्चमीति प्रकृतग्रन्थकृदाशयः। एवञ्च धूमादेर्वह्न्यादिजनकत्वाभावेऽपि पञ्चम्यनुपपत्तिर्निरस्ता। तथा चात्र पक्षे धूमहेतुको वह्निरिति बोधः। ज्ञापकस्यापि हेतुपदेन ग्रहणं भवतीति कथनं तु नितान्तमसङ्गतम्, 'हेतुर्नाकारणं बीजम्' इति कोशेन हेतुपदस्य कारणार्थकत्वनिश्चयात्। लोकेऽपि कारणार्थे ज्ञापकपदस्य प्रयोगाभावाच्च।

लघुशब्देन्दुशेखरे तु—'धूमपदं स्वज्ञाने, अग्निमत्पदं च स्वज्ञानविषये लाक्षणिकम्' इति प्रतिपादितम्।

तस्यायमाशयः—धूमज्ञानस्यैवाग्निमज्ज्ञानं प्रति हेतुत्वाद् ज्ञाननिष्ठहेतुहेतुमद्भावस्य विषये आरोपः। अत्र पक्षे धूमज्ञानहेतुकवह्निमज्ज्ञानविषयपर्वत इति बोधः।

पूर्वोक्तयोः पक्षयोर्ज्ञानगतजन्यजनकभावस्य विषय आरोप इत्येव पक्षः साधीयान् प्रतिभाति।

चिन्तामणिकारास्तु—वह्निपदं वह्निज्ञानलाक्षणिकम्, धूमपदं धूमज्ञानलाक्षणिकम्, जनकत्वरूपं हेतुत्वं पञ्चम्यर्थः। प्रकृत्यर्थधूमज्ञानान्वितस्य जनकत्वस्य निरूपकतासम्बन्धेन वह्निपदार्थवह्निज्ञानेऽन्वयः। मतुबर्थो विषयतावान्, विषयता वा, वह्निपदलक्षणा वा आश्रयत्वसम्बन्धी मतुबर्थः। अथवा वह्निपदं ज्ञायमानवह्निलाक्षणिकम्, मतुबर्थः संयोगीत्याहुः।

एवञ्चैतन्मते धूमज्ञाननिष्ठजनकतानिरूपितजन्यतावद्वह्निज्ञानविषयसम्बन्धो पर्वत इति बोधः।

दीधितिकारास्तु—ज्ञानज्ञाप्यत्वं पञ्चम्यर्थः, धूमपदं मुख्यार्थकमेव। अत एवोदाहरणादिवाक्येन धूमस्यैव गमकताप्रयोजकव्याप्त्यादिकं प्रदर्श्यते। वह्निपदमपि मुख्यार्थकमेव। अत एव जिज्ञासिताभिधानं भवति, यतो वह्निरेव जिज्ञासितः, न तु वह्निज्ञानमित्याहुः।

एतन्मते धूमज्ञानज्ञाप्यो वह्निरिति बोधः।

अन्ये तु, स्तोकशब्दो धर्मपरः, यद्धर्मविशाद्धि द्रव्ये स्तोकव्यवहारः। करणत्वञ्च परम्परया तृतीयार्थे व्यापारे स्वाश्रयवृत्तित्वसम्बन्धेन प्रकृत्यर्थान्वयः। तृतीयार्थाश्रयस्य च स्वाश्रयवृत्तिव्यापारजन्यत्वसम्बन्धेन क्रियायामन्वय इत्याहुः।

ग्रामस्य दूरात् दूरेण दूरं वा गतमित्यत्र तृतीयापञ्चमीद्वितीयाः प्रातिपदिकार्थे, दूरदेशवृत्तित्वं दूरशब्दार्थः, षष्ठ्यर्थः सम्बन्धः, दूरदेशवृत्तित्वस्य चाश्रयतया गमनेऽन्वयः। न च नामार्थयोरभेदान्वयव्युत्पत्तिविरोधः, नामजन्यप्रतीतिविशेष्ययोरेवान्वये तथाव्युत्पत्त्यङ्गीकारात्, अधिकरणशक्तिप्रधानप्रातःशब्दादिवदुपपत्तेश्च।

अन्ये तु दूरदेशवृत्तित्ववानर्थ इत्याहुः।

एतेन ग्रामस्यान्तिकमन्तिकादन्तिकेन वेति व्याख्यातम्। समीपदेशवृत्तित्वादिकमन्तिकार्थः।

इति पञ्चमीविभक्त्यर्थनिरूपणम्।

अथ षष्ठीविभक्त्यर्थनिरूपणम्

षष्ठ्यर्थः सम्बन्धत्वेन सम्बन्धः, [1]"षष्ठी शेषे" [२।३।५०] इति सूत्रस्वरसादिति प्राञ्चः।

ननु षष्ठ्या सम्बन्धविशेषाणां तत्तद्रूपेणैव भानादिदमयुक्तम्। अत एव संयोगादिसम्बन्धसत्त्वेऽपि सम्बन्धविशेषतात्पर्येण 'चैत्रस्य नेदं वासः' इति प्रयुज्यते।

---

1. अयमत्र संग्रहः—"षष्ठी शेषे" इति सूत्रेण कारकप्रातिपदिकार्थभिन्नस्वस्वामिभावादिरूपसम्बन्धे षष्ठी विधीयते। स च सम्बन्धः सम्बन्धत्वेन तत्तद्रूपेण च षष्ठ्यर्थः। तात्पर्यबलात् क्वचित् तत्तद्रूपेण, क्वचिच्च सम्बन्धत्वेन प्रतीयते।

सम्बन्धत्वेन क्रियाकारकभावश्च षष्ठ्यर्थः। अत एव समानकालिकत्वाद्यनेकसम्बन्धवत्यपि वाससि 'नेदं चैत्रस्य' इति प्रयोग उपपद्यते। अन्यथा तत्र चैत्रसम्बन्धाभावेन तद्वद्भेदाभावेन च तदनुपपत्तिः स्पष्टैव।

तत्तद्रूपेण सम्बन्धस्य षष्ठ्यर्थत्वे तु स्वत्वादिमत्त्वादिमत्त्वावच्छिन्नभेदस्य अन्यदीयवस्त्रादौ सत्त्वाद् न 'चैत्रस्य नेदम्' इति प्रयोगस्यानुपपत्तिः। तत्तद्रूपेण वाच्यत्वादेव 'एकशतं षष्ठ्यर्थाः' इति "षष्ठी स्थाने योगा". इत्यत्रत्यं भाष्यं सङ्गच्छते। सम्बन्धत्वेनैव तस्य तथात्वे तु सम्बन्धत्वावच्छिन्नशक्तेरैक्याद् भाष्यानुपपत्तिः स्यात्।

द्वितीयादितस्तु क्रियाकारकभावस्यानुभवानुरोधेन कर्मत्वक्रियात्वाद्यात्मकविशेषरूपेण बोधः। 'मातुः स्मरति' इत्यादौ तु क्रियाकारकभावस्य विशेषरूपेण बोधाभ्युपगमे बाधकद्वितीयाद्यापत्त्या सम्बन्धत्वेनैव क्रियाकारकभावस्य बोधः स्वीक्रियत इति नव्याः शाब्दिकाः, तार्किकाश्च मिश्रादयः।

प्राञ्चस्तु—अत्रापि क्रियाकारकभावमूलकं विशेषणत्वरूपम्, विषयत्वं निमित्तत्वं वा सम्बन्धत्वेन विशेषरूपेण वा प्रतीयते। तदुक्तं भर्तृहरिणा—

सम्बन्धः कारकेभ्योऽन्यः क्रियाकारकपूर्वकः।
श्रुतायामश्रुतायां वा क्रियायामभिधीयते॥

सर्वत्रैव हि सम्बन्धः क्रियाकारकभावमूलक एतन्मते। 'राज्ञः पुरुषः' इत्यत्र स्वस्वामिभावसम्बन्धोऽपि क्रियाकारकभावपूर्वक एव। 'यतो हि राजा पुरुषाय वेतनदानेन तस्य स्वामी भवति' इत्यर्थकं भाष्यमेवात्र मानं वर्तते। क्रिया हि सिद्धस्वभावानां द्रव्याणां क्रियां विना परस्परसम्बन्धमभजतां निराश्रयेव सम्बन्धं करोति। 'मातुः स्मरति' इत्यत्र क्रिया श्रुता, 'राज्ञः पुरुषः' इत्यादौ तु अश्रुता दानादिक्रियाऽनुमीयत इत्याहुः।

अत एव 'एकशतं षष्ठचर्थाः' इति अस्तेरनन्तरे समीपे वेति च "षष्ठी स्थानेयोगा" [१।१।४६] इति सूत्रस्थभाष्यम्, 'एकाऽपि षष्ठी विषयभेदाद् भिद्यते' इति "आदेशप्रत्यययोः" [८।३।५९] इति सूत्रस्थं भाष्यञ्च संगच्छत इति चेत्, सत्यम्; "षष्ठी शेषे" इति सूत्रे शेषश्च उक्तादन्यः। स च तत्तद्रूपेण स्वत्वादिसम्बन्धत्वेन च सम्बन्धत्वेन रूपेण कर्मत्वादिश्च, कर्मादिपदेभ्य आश्रयत्वेनैवाश्रयबोधस्यानुभवसिद्धत्वेन तत्तद्रूपेण बोध एव द्वितीयादिविधानात्। तत्रासति बाधके नहि निर्विशेषं सामान्यमिति न्यायात् तत्तद्रूपेणैव बोधः, कदाचित् सम्बन्धत्वेनापि षष्ठ्या जन्यते, 'मातुः स्मरति' इत्यादौ च तत्तद्रूपेण बोधे द्वितीयादीनां बाधिकानां सत्त्वात् सम्बन्धत्वेनैव बोध इत्याहुः।

केचित्तु, शेषपदार्थस्योक्तादन्यरूपत्वेनावध्यवधिमतोः साजात्यस्यौचित्यात् चान्यो धर्मिरूप एव सम्बन्धो सम्बन्धित्वेन षष्ठचर्थः। प्रत्ययार्थैकदेशे सम्बन्धे

इदमत्र बोध्यम्—'राज्ञः पुरुषः' इत्यत्र राजादिः सम्बन्धे विशेषणम्, सम्बन्धश्च पुरुषे विशेषणम्। 'राजसम्बन्धी पुरुषः' इति बोधः। एवञ्च सम्बन्धस्य स्वस्वामिभावस्य द्विष्ठत्वेऽपि विशेषणवाचकाद् राजशब्दादेव षष्ठी, न तु पुरुषादिपदात्, प्रकृत्यर्थं प्रति प्रत्ययार्थस्य प्राधान्यानुरोधात्।

यद्यपि षष्ठचर्थसम्बन्धस्य संसर्गतयैव भाष्यमते भानम्, तथापि प्रकारतायाः सांसर्गिकविषयताविशेष्यतोभयनिरूप्यतया प्रकारतानिरूपकविषयताशालित्वरूपप्राधान्यमक्षतमेव। पुरुषादिशब्दात् षष्ठ्यां सत्यां तु नेदं निर्वहेत्।

अथ च विशेष्यपुरुषादौ कारकप्रातिपदिकार्थाऽन्यतरत्वस्यावश्यकत्वेन अशेषत्वात् ततो न षष्ठी।

वस्तुतस्तु शब्दशक्तिस्वभावाद् विशेषण एव सम्बन्ध उद्भूततया प्रतीयत इति विशेषणवाचकपदादेव षष्ठी। तदुक्तं हरिणा—

द्विष्ठोऽप्यसौ परार्थत्वाद् गुणेषु व्यतिरिच्यते।
तत्राभिधीयमानश्च प्रधानेऽप्युपयुज्यते॥

अयमाशयः—प्रकारतया अभेदस्य सम्बन्धत्वानङ्गीकर्तृनये 'नीलो घटः' इत्यादौ व्यभिचाराद् भेदसाहित्यानुसरणम्। भेदसहितायाः सम्बन्धनियततया विशेषण एव तदाकाङ्क्षोदयेन तत्रैव सम्बन्ध उद्भूततया प्रतीयत इति तत्रैव षष्ठी। विशेष्यस्य तु पदान्तरासन्निधाने स्वनिष्ठत्वादेव न विशेष्यतानियामकसम्बन्धाऽऽकाङ्क्षा। स्वनिष्ठत्वञ्च स्वार्थप्रवृत्तिनिमित्तनिरूपितविशेष्यतया भासमानत्वम्, तच्छालित्वं वा।

अप्रधाने षष्ठ्यादिना अंशतः प्रतीतिपथावतीर्णः सम्बन्धः प्रधानोपयोग्यपि, तस्य द्विष्ठत्वात्।

प्रकृत्यर्थस्य प्रतियोगितासम्बन्धेनान्वयः। प्रत्ययार्थश्चानुयोगिरूपेतरपदार्थेऽभेदेनान्वेति।

यद्वा, सम्बन्धप्रतियोग्यर्थः। एवञ्च प्रकृत्यर्थस्याभेदेनैवान्वयः। तस्य चेतरपदार्थे स्वावच्छेदकप्रतियोगितानिरूपितानुयोगित्वसम्बन्धेनैवान्वयः, व्युत्पत्तिवैचित्र्यात्। एवञ्च प्रत्ययार्थसंख्याया इतरविभक्तिवत् प्रत्ययार्थ एवान्वयो भवति। तथा च विभक्त्यर्थसंख्याप्रकारकशाब्दबोधे विभक्तिजन्योपस्थितिर्हेतुरिति कार्यकारणभावः।

तव तु षष्ठ्यर्थसंख्याप्रकारकशाब्दबोधे प्रकृतिजन्योपस्थितिर्हेतुरिति कार्यकारणभावान्तरमपि कल्प्यं स्यात्। न च सम्बन्ध एव तदन्वयः, एकराजकीयसम्बन्धद्वयाद्यभिप्रायेण राज्ञोरित्याद्यापत्तेः। 'सम्बन्धः शक्तिरेव वा' इति हरिकारिकायामपि सम्बन्धशब्दः 'अर्श आद्यजन्तः' इत्याहुः।

'शक्तिरेव वा' इति मतान्तरे तु सम्बन्ध एवार्थ इति ध्येयम्। स च सम्बन्धोऽपि प्रकार एव, पदार्थत्वात्।

एतेन कर्मत्वादौ शक्तिरिति पक्षे द्वितीयादीनां षष्ठ्याश्च विषयविभागो न स्यात्। धर्मिणि शक्तिरिति मते तु धर्मिणि प्रतिपाद्ये द्वितीया, धर्मे षष्ठीति व्यवस्था सम्भवतीति परास्तम्, धर्मे शक्तावपि कर्मत्वत्वादिना बोधे द्वितीयादयः सम्बन्धत्वेन बोधे षष्ठीति व्यवस्थासम्भवात्।

इयांस्तु विशेषः—धर्मिणि शक्तिरिति मते धर्मिणः सम्बन्धित्वेन विवक्षायां धर्ममात्रस्य भेदेनान्वयविवक्षायाञ्च षष्ठ्येव, उभयारपि विशेषत्वात्। धर्मे शक्तिरिति मते तु धर्मस्य सम्बन्धत्वेन विवक्षायामेवेत्यलम्। एवञ्च 'राज्ञः पुरुषः' इत्यत्र राजनिरूपितस्वत्ववान् पुरुष इति बोधः। सम्बन्धविशेषतात्पर्यविरहे तु सम्बन्धत्वेनापि सम्बन्धः षष्ठ्यर्थः। राजसम्बन्धी पुरुष इति च बोधः।

मातुः स्मरतीत्यादौ, मातृसम्बन्धिस्मरणकर्त्तेति बोधः।

अन्नस्य हेतोर्वसति—षष्ठ्यर्थो जन्यत्वम्। हेत्वभिन्नान्ननिष्ठजनकतानिरूपितजन्यतावान् वास इति बोधः।

ग्रामस्य दक्षिणतः पुरः, उपरि वाऽस्तीत्यत्र दक्षिणदेशाधिकरणत्वमग्रिमदेशाधिकरणत्वमूर्ध्वदेशाधिकरणत्वञ्च दक्षिणत इत्यादेरर्थः। सम्बन्धः षष्ठ्यर्थः।

'अग्नये छागस्य वपायाः हविषो मेदसः प्रेष्ये' इति। अत्र मेदस इति कर्मणि षष्ठी छागस्येत्यवयवावयविभावसम्बन्धे वपाया इति च सम्बन्धे छागावयवीभूत-वपासम्बन्धिहविर्भूतमेदःकर्मकः प्रैष इति बोधः।

'कृष्णस्य कृतिः' इत्यत्र कर्त्ता षष्ठ्यर्थः, कृष्णकर्त्तृका कृतिरिति बोधः।

'जगतः कर्त्ता कृष्णः' इत्यत्र कर्म षष्ठ्यर्थः, जगत्कर्मकोत्पत्त्यनुकूल-व्यापाराश्रयः कृष्ण इति बोधः।[1]

यत्त्वत्र कर्तृकर्मणोः षष्ठ्याः लक्षणेति। तत्, न; "कर्त्तृकर्मणोः कृति" [२।३।६५] इत्यादेः शक्तिग्राहकानुशासनस्य सत्त्वेन लक्षणाया अयुक्तत्वात्। नेदं शक्तिग्राहकमिति तु रिक्तं वचः। "शेषे षष्ठी" इत्यादेरपि शक्तिग्राहकता-नापत्तेः, सुविभक्तौ न लक्षणेति वृद्धप्रवादाच्चेति दिक्।

'राहोः शिरः' इत्यादौ त्वनेकावस्थाप्रयुक्तशिरस इदमेकावस्थायुक्तमवयव इति भेदमारोप्यैव षष्ठी निर्वाह्येति "आद्यन्तवत्" सूत्रे भाष्ये स्पष्टम्।

इति षष्ठीविभक्त्यर्थनिरूपणम्।

---

1. तार्किकास्तु—कर्त्तृत्वं कर्मत्वमर्थः। प्रकृत्यर्थस्य तत्राधेयतासम्बन्धेनान्वयः। कर्तृत्वादेर्निरूपकतासम्बन्धेन धात्वर्थेऽन्वयः।

कृष्णवृत्तिकर्त्तृतानिरूपककृतिमान्, जगद्वृत्तिविषयतारूपकर्मतानिरूपक-कृतिमान् कृष्ण इति बोध इत्याहुः।

अथ सप्तमीविभक्त्यर्थनिर्णयः

कारकसप्तम्याश्चाधिकरणमर्थः, "अधिकरणे सप्तमी" इति सूत्रात्। अधिकरणत्वलक्षणबोधकञ्च "आधारोऽधिकरणम्" [१।४।४५] इति सूत्रम्। तत्र कारकाधिकारात् प्रत्यासत्त्या क्रियाया एवाधारो गृह्यते। तत्र साक्षात् क्रियाधारयोः कर्तृकर्मसंज्ञाभ्यां बाधात् परम्परया तदाश्रयस्य ग्रहणम्। न च ते एव परम्परयाऽऽधारस्य स्यातामिति वाच्यम्, कर्त्तृक्रियाजन्यधातूपात्तफलशालित्वेन मुख्योद्देश्यत्वरूपस्य कर्त्तुरीप्सिततमत्वस्याभावात्। स्वतन्त्रपदसामर्थ्याच्च कर्त्तृसंज्ञासूत्रे न परम्परयाऽऽधारस्य ग्रहणम्। परम्परा च कर्त्तृकर्मद्वारिकैव।

यद्यपि प्रकरणात् क्रियया सर्वकारकाणामुपस्थितिः, तथापि योग्यताबलेन व्याख्यानेनानुभवबलेन च तयोरेव ग्रहणम्। एवञ्च कर्त्तृकर्मद्वारा क्रियाश्रयत्वमधिकरणत्वं फलितम्।

न चैवं फलस्य कर्मतायाः पूर्वं व्युत्पादनात् कर्मभूतफलद्वारा क्रियाश्रयतण्डुलादेरधिकरणत्वं दुर्वारमिति वाच्यम्, व्यापारजन्यफलाश्रयत्वस्यापि कर्मसंज्ञाप्रयोजकत्वेन तया बाधात्। कर्त्तृद्वारा क्रियाश्रयत्वं तु तण्डुलादेरसम्भावितमेव, आधारपदसामर्थ्येन साक्षाद् वृत्तिनियामकसम्बन्धेनैव कर्त्तृद्वारकत्वस्य विवक्षणात्, कालिकादिसम्बन्धस्यातिप्रसक्तत्वेन कालव्यहारातिरिक्तस्थले तस्याधिकरणतानियामकत्वास्वीकाराच्च। अत्र कर्त्रादिद्वारा क्रियाश्रयत्वविवक्षायां सप्तमी, साक्षात् फलाश्रयत्वविवक्षायां द्वितीया।

अत एव 'ग्रामे गच्छति, ग्रामं गच्छति' इत्युभयं साधु। अत एव हृदयं स्पृशति, हृदिस्पृगित्यादि सङ्गच्छते। न च देवदत्तः पचति भवतीत्यादौ पाकद्वारा भवनाश्रयत्वविवक्षायां देवदत्तस्याधिकरणत्वापत्तिः। यतः कर्त्तृकर्मणेः क्रियाभिन्नयोरेव ग्रहणं तक्रकौण्डिन्यन्यायात्, तेन न दोषः।

अन्ये तु, सत्यभिधाने इष्टापत्तिः। अन्यथाऽनभिधानादेव नेत्याहुः। न च मोक्षे इच्छास्तीत्यत्राधिकरणत्वानापत्तिः। प्रत्ययोपात्तेच्छायाः सिद्धत्वेन तामादायोपपत्तेरित्याहुः।

यत्तु, पचति भवतीत्यादौ पाकादिद्वारा भवनाश्रयत्वविवक्षायां पाकादावन्वयस्यावश्यकत्वेनान्तरङ्गत्वात् कर्तृत्वस्यैव प्रवृत्तिः। मोक्षे इच्छास्तीत्यादौ प्रत्ययोपात्तसिद्धेच्छाद्वारास्तिक्रियायामन्वयस्य विवक्षितत्वेनाधिकरणत्वं सूपपादम्। नहि तामादाय कर्मत्वप्रवृत्तिः, तस्य अक्रियात्वात्। प्रकृत्यर्थद्वारा तत्रान्वयविवक्षायां तु तस्य क्रियात्वात् कर्मत्वेन षष्ठ्यचेवेति। तत्, न;

वस्तुतः कर्तृद्वारकसम्बन्धेन क्रियायामन्वयेऽपि कर्तृवाचकपदोपात्तार्थान्वये मानाभावेनान्तरङ्गत्वादेर्दुर्वारत्वात्। तस्मादिच्छापदार्थान्वये षष्ठी, तद्द्वारकसम्बन्धेन क्रियान्वये सप्तमीत्येव तत्त्वम्।

ननु कर्तृकर्मकरणाधिकरणार्थकविभक्तीनामाश्रयमात्रमर्थ इति कुत आसां वैलक्षण्यमिति चेत्, निरूपकभेदात् सम्बन्धभेदात् तत्तत्संज्ञाविशिष्टस्यैव तत्तद्विभक्तिभिर्बोधाच्चेति गृहाण। तत्र कर्तरि धात्वर्थव्यापारः, कर्मणि तदर्थफलं निरूपकं सम्बन्धश्चाधेयतैव। करणे स्वव्यापारजन्यत्वं सम्बन्धः, अधिकरणे च स्ववृत्तिकर्तृकत्वादिरिति फलीभूते शाब्दबोधे वैलक्षण्यं बोध्यम्।

तत्राधारस्त्रिधा—औपश्लेषिकः, वैषयिकः, अभिव्यापकश्चेति। तत्र संयोगसमवायादिसम्बन्धेन कर्तृकर्मसम्बद्ध आद्यः। विषयतासम्बन्धेन तत्सम्बद्धो द्वितीयः। व्यापकत्वसम्बन्धेन तृतीयः। तत्र 'कटे शेते' इत्यत्र स्ववृत्तिकर्तृकत्वसम्बन्धेन कटवृत्तिशयनमिति बोधः। मोक्षे इच्छास्तीत्यत्र स्वविषयकर्तृकत्वसम्बन्धेन मोक्षवृत्तिरिच्छाकर्तृका सत्तेति बोधः।

सर्वस्मिन्नात्मास्ति इत्यत्र स्वव्यापककर्तृकत्वसम्बन्धेन सर्ववृत्तिरात्मकर्तृकासत्तेति बोधः। मूले वृक्षः कपिसंयोग्यस्तीत्यादावव्याप्यधर्मवत्कर्तृकक्रियासमभिव्याहारे स्ववृत्तिस्वावच्छेद्यधर्माश्रयकर्तृकत्वसम्बन्धेन क्रियायामन्वयो व्युत्पत्तिवैचित्र्यात्। यत्रापि क्रियापदं न श्रूयते तत्राप्यध्याहार्यमिति दिक्।

अधीती व्याकरणे—अत्र न कर्मणि क्तः। तथा सति कर्मणोऽभिहितत्वेन 'क्तस्येन्विषयस्य कर्मण्युपसंख्यानम्' इति सप्तमी न स्यात्। अतः "नपुंसके भावे" [३।३।१४४]इति सूत्रेण क्तः, तस्य सकर्मस्वपि प्रवृत्तेः। तस्याप्यकर्मकेष्वेव प्रवृत्तिरिति मते तु अविवक्षितकर्मकत्वात् पूर्वं भावे क्ते, पश्चात् कर्मसम्बन्धेऽपि अन्तरङ्गजातसंस्कारस्य निवृत्तौ मानाभावः। न चैवं पच्यते देवदत्तेन तण्डुलमिति प्रयोगापत्तिः, प्रयोगानुरोधेनैव विवक्षायाः सत्त्वेनादोषात्। अन्यथा 'पूर्वं धातुः

साधनेन युज्यते' इति पक्षे विजयतीति परस्मैपदापत्तिः। अधीतमनेनेति विग्रहे "इष्टादिभ्यश्च" [५।२।८८] इति कर्त्तरीनिः। अधीतवान् व्याकरणमित्यादाविव च गुणीभूतक्रियायामपि कारकान्वय इति बोध्यम्। कर्म सप्तम्यर्थः। व्याकरणकर्मकाध्ययनकर्त्तेति बोधः।

नन्वस्तीत्यध्याहारस्यावश्यकतया कर्तृद्वारा व्यापाराश्रयत्वेनात्र सप्तमी सिद्धेति चेत्, न; अध्ययनान्वये कर्मत्वेन द्वितीयाबाधनार्थमस्यावश्यकत्वात्।

चर्मणि द्वीपिनमित्यादौ फलं सप्तम्यर्थः। चर्मफलकं द्वीपिकर्मकं हननमित्यादिरीत्या बोधः। चर्मणः फलत्वम्, हननक्रियायास्तल्लाभादिविषयकेच्छाधीनत्वादिति बोध्यम्।

'गोषु दुह्यमानासु' इत्यत्र' 'यस्य च भावेन भावलक्षणम्" [२।३।३७] इति सूत्रेण सप्तमी। यस्य भावेन क्रियया क्रियान्तरं ज्ञाप्यते ततो ज्ञापकक्रियावाचकात् सप्तमीति तदर्थः।

ननु ज्ञाप्यज्ञापकभावो भूयो दर्शनाश्रयो दृष्टः, यथाग्निधूमयोः। ततश्चोदिते आदित्ये तमो नष्टमित्याद्येव तदुदाहरणं स्यात्, न त्विदम्, कदाचिद्धि गोषु दुह्यमानास्वसावागत इति चेत्, न; निर्ज्ञातदेशकालक्रियाया अनिर्ज्ञातदेशकालक्रियापरिच्छेदकत्वेन लक्षणत्वाक्षतेः।

अन्ये तु, कालविशेष एतदीयैतद्गमनव्यक्त्याश्रयः, एतद्गोदोहनाश्रयत्वात्, यत्र यत्रैतद्गमनाश्रयत्वाभावः, तत्रैतद्गोदोहनाश्रयत्वाभाव इति व्यतिरेक्यनुमानविधया ज्ञापकत्वमाहुः।

ज्ञापकत्वञ्च तत्तच्छब्दप्रयोगबोधितमेवैतच्छास्त्रप्रवृत्तौ निमित्तम्, न तु तस्य मानान्तरेण नियमतो ग्रहणापेक्षेति बोध्यम्। तत्र देशोदाहरणं सति गुणे द्रव्यत्वमस्तीत्यादौ। ज्ञापकत्वञ्च सप्तम्यर्थः, तत्र प्रकृत्यर्थस्य स्वप्रवृत्तिनिमित्तीभूतक्रियाद्वारकत्वसम्बन्धेनान्वयः। अत एवास्य क्रियायामेवान्वयः, क्रियाद्वारकसम्बन्धेन यन्निष्ठज्ञापकतानिरूपितज्ञाप्यत्वं क्रियान्तरनिष्ठम्, ततः सप्तमीति सूत्रार्थानुरोधात्।

एवञ्च स्वाश्रयक्रियाश्रयत्वसम्बन्धेन वर्त्तमानदोहनकर्मीभूतगोनिष्ठज्ञापकतानिरूपितज्ञाप्यतावद्गमनाश्रय इति बोधः। गोषु धोक्ष्यमाणास्वागत इत्यादौ भविष्यद्दोहनस्यापि बुद्ध्युपारूढस्य ज्ञापकत्वं बोध्यम्। तत्रागमनादौ भविष्यद्दोहनपूर्वकालत्वादिबोधस्त्वार्थः।

यद्वा ज्ञापकत्वरूपसप्तम्यर्थस्य तात्पर्यवशात् पूर्वकालवृत्तित्वादिसमानाधिकरणस्वनिरूपितज्ञाप्यतासम्बन्धेनान्वयः। अत एव 'जले पीते तृषा शाम्यति' इत्यादावतीतार्थकक्तसमभिव्याहारे कार्यकारणभावोऽपि सम्बन्धतया भासत इत्याहुः।

यत्तु, एतत्सप्तम्याः स्वप्रकृतिभूतकृदन्तनामप्रवृत्तिनिमित्तीभूतक्रियासम्बन्धिवर्त्तमानकालवृत्तित्वादिकमर्थः। तथा च गवाभिन्नवर्त्तमानदोहनकर्मतदीयदोहनसम्बन्धवर्त्तमानकाले आगत इत्याद्याकारस्तत्र बोध इति। तत्, न; सूत्रस्वरसविरोधात्, गोषु दुग्धास्वित्यादावुत्तरकालवृत्तित्वादेर्भानेनानन्तशक्तिकल्पनापत्तेश्चेति दिक्।

न चैवं गवां दोहे आगत इत्यादौ दोहशब्दात् सप्तम्यनापत्तिः, गोशब्दाच्च तदापत्तिरिति वाच्यम्, सतीत्यध्याहारेण दोहकर्तृकसत्ताया लक्षणत्वेनाक्षतेः। एतेन विवाहे नान्दीमुखं कुर्यादित्यादि व्याख्यातम्, करिष्यमाणे इत्यध्याहारात्। एतेन 'राहूपरागे स्नायात्,' 'क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे' इत्याद्यपि व्याख्यातम्, सतीत्यध्याहारात्। राहूपरागादीनां निमित्तत्वं सिद्धसाध्यसमभिव्याहारन्यायेन फलतीति दिक्। क्षीयन्त इत्यत्र कर्मकर्त्तरि यगादि कर्मस्थक्रियारूपार्थस्यैव कर्मस्वारोपाद् बोध्यम्। एवम् 'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः' इत्यत्रापि बोध्यम्।

अपरे तु, इदं सूत्रं यत्र मानान्तरसिद्धस्यार्थस्य कालविशेषसम्बन्धादिप्रतिपादनाय शब्दप्रयोगः, तत्रैव प्रवर्त्तते, तथैव सूत्रभाष्यस्वरसात्। एवञ्च 'विवाहे नान्दीमुखम्, राहूपरागे' इत्यादि नैतदुदाहरणम्। तस्मात्तत्र विवाहपदेन तत्प्राक्कालो लक्ष्यते। राहूपरागपदेन च तदाश्रयः काल इति तत्राधिकरणसप्तम्येव। निमित्तत्वं तूक्तन्यायेनैव फलतीत्याहुः।

'रुदति रुदतो वा प्राव्राजीत्' इत्यत्र ज्ञापकत्वं षष्ठीसप्तम्योरर्थः। धातोश्चानादरविशिष्टं प्रव्रजनं लक्ष्यम्। अत्रापि षष्ठीसप्तम्यौ तात्पर्यग्राहिके। अनादरश्च प्रत्यासत्त्या पुत्रादिविषयक एव। वैशिष्ट्यञ्च सामानाधिकरण्यस्योत्तरकालिकत्वाभ्याम्। एवञ्च रोदनकर्तृपुत्रादिज्ञाप्यमनादरविशिष्टं प्रव्रजनमिति बोधः।

'नृणां नृषु वा द्विजः श्रेष्ठः' इत्यत्र "यतश्च निर्धारणम्" [२।३।४१] इति सूत्रेण षष्ठीसप्तम्यौ। जातिगुणक्रियासंज्ञाभिः समुदायादेकदेशस्य पृथक्करणं

निर्धारणं यतः, ततः षष्ठीसप्तम्याविति तदर्थ इति वृत्तिकृतः। तत्र जातिगुण-क्रियासंज्ञाभिरित्यत्र विशिष्टस्येत्यध्याहारः। करणे वा तृतीया। पृथक्करणञ्च स्वेतरव्यावृत्तधर्मवत्त्वप्रकारकज्ञानविषयीकरणम्। यत इति पञ्चमी निर्धारणा· घटकव्यावृत्तत्वेऽन्वेति। एवञ्च स्वेतरयद्धर्मावच्छिन्नव्यावृत्तधर्मत्त्वं जात्यादि-विशिष्टस्य प्रतिपाद्यते, ततः षष्ठीसप्तम्याविति फलितम्।

यत इति किम्, यस्य जात्यादिविशिष्टस्य स्वेतरव्यावृत्तधर्मवत्त्वप्रतिपादनम्, तत एव विभक्तिर्मा भूदिति। न च षष्ठीवद्विशेषणादेवोचिता, "दूरान्तिकार्थेभ्यः" [२।३।३५] इतिवत् प्रथमापवादस्यापि सम्भवात्।

'नराणां क्षत्रियस्य शौर्यम्' इत्यादौ क्षत्रियादेर्विशेषणत्वस्य सत्त्वाच्च। 'अस्ति च नराणां विप्रः श्रेष्ठः' इत्यादौ विप्रत्वादिविशिष्टस्य तदितरनरादिव्यावृत्त-श्रेष्ठत्वधर्मवत्तया प्रतिपत्तिः। 'नरेभ्यो राक्षसः क्रूरः' इत्यादौ राक्षसत्वविशिष्टे तदितरनरादिव्यावृत्तक्रूरतमत्वविवक्षायामपि न षष्ठीसप्तम्यौ। "पञ्चमी विभक्ते:" इत्युत्तरसूत्रेणापवादभूतायाः पञ्चम्या विधानात्।

एवञ्च व्यावृत्तत्वाख्यः सम्बन्धो निर्धारणविभक्तेरर्थः। व्यावृत्तत्वञ्च विधेयतावच्छेदकावच्छिन्नाभावप्रतियोगित्वम्। तेन द्वित्वाद्यवच्छिन्नाद्यभावमादाय नातिप्रसङ्गः। तच्चाभेदान्वयि विधेयसमभिव्याहारस्थले विधेयतावच्छेदकेऽन्वेति, भेदान्वयितत्स्थले च विधेय एव, व्युत्पत्तिवैचित्र्यात्।

अभावे च प्रकृत्यर्थस्य सामानाधिकरण्यसम्बन्धेन विप्रत्वाद्यवच्छिन्नभेद-विशिष्टस्वावच्छेदकावच्छिन्नाधारतानिरूपिताधेयतासम्बन्धेनान्वयः, आकाङ्क्षा-वशात्; केवलाधेयतासम्बन्धेन श्रेष्ठत्वाभावस्य नरत्वावच्छिन्ने बाधाच्च। स्वावच्छेदकावच्छिन्नाधारत्वादेः सम्बन्धत्वात् 'गवामियं सम्पन्नक्षीरा' इति न प्रयोगः, किन्तु 'एतासां गवामियं सम्पन्नक्षीरा' इत्येव प्रयोगः, तत्र सामानाधिकरण्यसम्बन्धेन विप्रत्वाद्यवच्छिन्नभेदविशिष्टेति विशेषणाद् 'गवां सास्नावती सम्पन्नक्षीरा' इति न प्रयोगः। विधेयस्योद्देश्यतावच्छेदकावच्छेदेनान्वयात् 'पशूनां कृष्णा सम्पन्नक्षीरा' इति न प्रयोगः।

तथा च तादृशसम्बन्धेन नरवृत्त्यन्ताभावप्रतियोगिश्रेष्ठत्ववदभिन्नो विप्र इत्यादिक्रमेण बोधः। नराणां क्षत्रिये शौर्यमित्यत्र तादृशसम्बन्धेन नरवृत्त्यभाव-

प्रतियोगिशौर्यकर्तृका क्षत्रियवृत्तिसत्तेति बोधः। उद्भूतावयवभेदविवक्षया नृणामिति बहुवचनम्। तिरोहितावयवभेदविवक्षायामेकवचनमपि बोध्यम्।

अत एव 'द्वन्द्वः सामासिकस्य च' इति गीता संगच्छते।

यद्यपि गोसमूहस्याधारत्वविवक्षायां सप्तम्याः सिद्धेः, अवयवावयविभाव-विवक्षायां षष्ठीसिद्धेश्चान्यतरविभक्तेर्विधेयत्वाभावलाघवानुरोधेन स एव विभक्त्यर्थो वक्तुमुचितः।

बहुक्षीरात्वादौ कृष्णेतरगवाद्यवृत्तित्वबोधस्तु मानसः, देवदत्तो वामेनाक्ष्णा पश्यतीत्युक्ते दक्षिणेन न पश्यतीतिवत्। अत एव गोमण्डले वर्त्तमाना या कृष्णा गौः, सा बहुक्षीरेत्याधारसप्तमीघटितवाक्ये तद्बोधः सङ्गच्छते, तथापि एतदपवाद-"पञ्चमी विभक्ते" [२।३।४२] इति सूत्रोदाहरणे एतत्प्रकारस्य वक्तुमशक्य-त्वादस्मदुक्तप्रकारस्यैवावश्यकत्वात्, तदैकरूप्यायेयमेव सरणिराश्रिताऽस्माभिः, अनुभवसिद्धत्वाच्च 'पुरुषोत्तमः' इत्यादौ सामर्थ्याभावात् समासानापत्तेश्च, पञ्चमीविधायकस्यैतदपवादत्वोक्त्यसंगततापत्तेश्च, ममापि षष्ठ्यंशेऽनुवादत्वस्य सत्त्वाच्च। गोमण्डले वर्तमाना येत्यत्र तु गवामिति निर्धारणविभक्त्यन्ता-ध्याहारेणैव बोधः। अस्तु वा क्वचित् तथेति न सर्वत्र तथैवेति नियम इत्याहुः।

ननु जलपृथिव्योर्जलं स्नेहवदित्यादौ जलभिन्नयोर्जलपृथिव्योरप्रसिद्धेर्जल-पृथिव्युभयवृत्त्यभावप्रतियोगित्वस्य स्नेहे बाधेन च निर्द्धारणासम्भव इति चेत्, न; तत्राप्युभयपर्याप्तसाहित्यावच्छिन्ने जलभेदस्य तदवच्छिन्नवृत्त्यभावप्रतियोगित्वस्य स्नेहे चाबाधात्।

न चैवमप्युभयपर्याप्तसाहित्यावच्छिन्नत्वस्य जले सत्त्वेन "पञ्चमीविभक्ते" इत्यस्यैव प्रवृत्तिः स्यादिति वाच्यम्, उभयपर्याप्तसाहित्याश्रयाभेदस्यापि सत्त्वेन तदप्राप्तेः।

एतेन सांकाश्यकानां पाटलिपुत्रकाणां च पाटलिपुत्रका अभिरूपतमा इत्यादिभाष्यप्रयोगा व्याख्याताः। नृणां मध्ये द्विजः श्रेष्ठ इत्यादौ तु मध्ये इत्यव्ययेन विभक्त्या च हे चैत्र इत्यादौ संबोधनवत् समुच्चित्य सम्बन्धो द्योत्यत इति वदन्ति।

माथुराः पाटलिपुत्रकेभ्य आढ्यतरा इत्यत्र "पञ्चमी विभक्ते" इति सूत्रेण पञ्चमी। तत्र हि विभागो विभक्तं भेद इत्यर्थः। "यश्तच निर्द्धारणम्"

इत्यनुवर्त्तते । निर्द्धारणावधेर्निद्धार्यमाणस्य केनचिद्रूपेणाभिन्नस्य यत्र रूपान्तरेण भेदः, तत्र निर्धारणं भवति । यथा नृणां विप्रः श्रेष्ठ इत्यादौ नरत्वेनाभिन्नस्य श्रेष्ठत्वेन भेदः । एवञ्च सर्वत्रैव निर्द्धारणे भेदस्य सत्त्वेन विभक्तग्रहणसामर्थ्याद् यत्र भेद एव, न तु केनाप्युपात्तरूपेणाभेदः, तत्रैवास्य प्रवृत्तिः ।

एवञ्च स्वेतरयद्धर्मावच्छिन्नव्यावृत्तधर्मवत्तया निर्धारणावधितावच्छेदकाश्रयनिरूपितभेदवत एव जात्यादिविशिष्टस्य प्रतिपादनम्, ततः पञ्चमीति सूत्रार्थः । सांकाश्यकानां पाटलिपुत्रकाणां च पाटलिपुत्रका अभिरूपतमा इत्यादौ निर्धार्यमाणेषु पाटलिपुत्रकेषु निर्धारणावधिसांकाश्यकभेदसत्त्वेऽपि निर्द्धारणावधितावच्छेदकसाहित्यांश्रयपाटलिपुत्रकनिरूपिताभेदस्यापि सत्त्वेन भेदस्यैवाभावान्न दोषः ।

सांकाश्यकत्वं तु न निर्द्धारणावधितावच्छेदकम्, पाटलिपुत्रकपदस्य च शब्दस्य वैयर्थ्यापत्तेः । अत्र पञ्चम्यर्थो व्यावृत्तत्वमेव । पाटलिपुत्रकव्यावृत्ताढ्यतरत्ववन्तो माथुरा इति बोधः ।

भाष्यकृतस्तु, सांकाश्यकपाटलिपुत्रकयोरभिरूपत्वेन साम्यं ज्ञातवान् हि एतत्प्रयुङ्क्ते सांकाश्यकेभ्यः पाटलिपुत्रका अभिरूपतरा इति । तत्र बुद्धिकृतसम्बन्धाभावरूपविश्लेषस्य प्रतीतेरपादानत्वेनैव पञ्चमी सिद्धा, तत्र विभक्ता इत्यध्याहारः, सांकाश्यकावधिकविभागवन्तः पाटलिपुत्रका अभिरूपतरा इति बोधः ।

विश्लेषप्रतियोगी सम्बन्धश्चात्रैकधर्माश्रयत्वमेव । विश्लेषप्रयोजकं चाभिरूपतरत्वमेव । प्रत्यासत्तेः तस्मिन् हि प्रतीते एकजातीयाभिरूपत्वप्रतीतिर्नोत्पद्यते इति सर्वसंमतम् ।

गवां कृष्णेत्यादौ तु न विश्लेषप्रतीतिः, न हि सम्पन्नक्षीरात्वे ज्ञातेऽपि गोत्ववत्ताबुद्धिर्निवर्त्तते । एतत्सूत्रोदाहरणविषये क्रियान्वयं विना नामार्थान्वयविवक्षा तु न, अनभिधानात् । तेन न षष्ठ्यन्तप्रयोगापत्तिः ।

अत्र पक्षेऽभिरूपतरत्वे सांकाश्यकव्यावृत्तत्वमार्थमित्येतत् सूत्रं प्रत्याचख्युः ।

माथुरपाटलिपुत्रकयोः पाटलिपुत्रकमाथुरावाद्यपण्डिताविति प्रयोगे पञ्चमी न भवत्येवेति दिक् ।

'मूलेनावाहयेद् देवीं श्रवणेन विसर्जयेत्'। 'मूले श्रवणे वा' इत्यादौ मूलश्रवणशब्दौ तत्तन्नक्षत्रयुक्तकाललक्षकौ तृतीयासप्तम्योरधिकरणमर्थः। मूलनक्षत्र-युक्तकालाद्यधिकरणकं देवीकर्मकमावाहनमित्यादिक्रमेण बोधः।

अद्य भुक्त्वाऽयं द्व्यहे, द्व्यहाद्वा भोक्ता। अत्र विभक्त्यर्थः स्वानन्तर-कालवृत्तित्वम्। समभिव्याहृतकालानन्तरत्वञ्च द्वितीयं प्रकृत्यर्थविशेषणम्। आद्यं तु तद्विशेष्यम्, क्रियायां विशेषणम्, व्युत्पत्तिवैचित्र्यात्। तेनैतद्दिवसाधि-करणभोजनोत्तरकालिकमेतद्दिवसानन्तरद्व्यहानन्तरकालवर्ति यद् भोजनम्, तदाश्रय इत्यर्थः।

इहस्थोऽयं क्रोशे क्रोशाद्वा लक्ष्यं विध्येदित्यत्र स्वानन्तरं देशवृत्तित्वं समभि-व्याहृतदेशान्तरवृत्तित्वञ्च विभक्त्यर्थः। अन्वयः प्राग्वत्। एतद्देशाधिकरणक-स्थित्याश्रयकर्तृकमेतद्देशानन्तरक्रोशान्तरस्थितलक्ष्यकर्मकं व्यधनमिति बोधः। अत्र "सप्तमीपञ्चम्यौ कारकमध्ये" [२।३।७] इति सूत्रेण विभक्तिः। तत्र कारक-शब्देन तच्छक्तिराश्रयत्वादिरूपोच्यते। शक्तिद्वयमध्ये यौ कालाध्वानौ, तयोः सप्तमीपञ्चम्याविति सूत्रार्थः।

केचित्तु, स्वानन्तरकालवृत्तित्वमेवार्थः, उत्तरत्र स्वानन्तरदेशवृत्तित्वमेव। शक्तिद्वयमध्यवर्तित्वं तु कालाध्वनोर्वस्तुसन्निमित्तमित्याहुः।

अधिभुवि रामः, अधिरामे भूरित्यत्र भूनिरूपितस्वामित्ववान् रामनिरूपित-स्वत्ववती चेति बोधः।

इति सप्तमीविभक्त्यर्थनिर्णयः।

अथ सङ्ख्याविवक्षाऽविवक्षानिर्णयः

एषाञ्च सुपामेकवचनत्वद्विवचनत्वबहुवचनत्वरूपेण, तत्तद्रूपेण वा एकत्वद्वित्वबहुत्वरूपसंख्याऽप्यर्थः, "द्व्येकयोर्द्विवचनैकवचने" "बहुषु बहुवचनम्" [१।४।२२] इति सूत्रस्वरसात्। 'सुपां कर्मादयोऽप्यर्थाः संख्या चैव तथा तिङाम्' इति भाष्याच्च।

अत्रापिना संख्या समुच्चीयते, उत्तरत्र चेन कर्मादय इति बोध्यम्। तत्र कर्मादयोऽर्था इति मते संख्यायाः प्रत्ययार्थे एवान्वयः। कर्मत्वादि कर्मार्थ इति मते तु प्रकृत्यर्थे, तत्र क्वचित् प्रकृत्यर्थविशेष्येऽन्वयः, क्वचित् प्रकृत्यर्थतावच्छेदकेऽन्वयः।

अत एवानेकव्रीहितात्पर्यके सम्पन्नो व्रीहिरिति वाक्ये एकवचनं सङ्गच्छते, तत्र व्रीहित्वे तदन्वयात् स्वाश्रयाश्रयत्वरूपपरम्परासम्बन्धेन वा प्रकृत्यर्थ एवान्वयः। इदमेवाभिप्रेत्य जात्यभिप्रायेणैकवचनमिति प्राचामुद्घोषः। अत एव वेदाः प्रमाणमिति बहुवचनान्तसमभिव्याहारेऽप्येकवचनम्, प्रमाकरणत्वरूपप्रकृत्यर्थतावच्छेदके तदन्वयात्। तत्फलं तु सर्वेषामेकजातीयप्रमाणोपपादनमेव।

'शतं ब्राह्मणाः' इत्यादौ तु 'विंशत्याद्याः सदैकत्वे' इत्यादिकोशप्रामाण्यात् समुदायैकत्वाभिप्रायमेकवचनमेव, न कदापि प्रत्येकाश्रयं बहुवचनम्, प्रकृत्यर्थतावच्छेदक एवात्र संख्यान्वयः, शब्दशक्तिस्वभावात्। अन्यत्र तु प्रयोगानुरोधाद् व्यवस्थितम्, तेन घटा नील इत्यादि नापाद्यम्।

अत एव 'अग्नीषोमौ देवता, पितरो देवताः' इति व्यवस्थित एव प्रयोगः। आद्ये एकदेवत्वस्य प्रतिपिपादयिषितत्वादेकवचनमेव। द्वितीये प्रत्येकं भिन्नस्यैव तस्य प्रतिपिपादयिषितत्वेन बहुवचनमेवेत्याहुः।

दारा इत्यादौ त्ववयवगतबहुत्वस्यावयविन्यारोपादेकस्यामपि व्यक्तौ बहुवचनान्त एव प्रयोगः।

किञ्च, तत्रारोपितबहुत्वाश्रयैव विभक्तिः, न तु स्वनिष्ठैकत्वाश्रयापि, कोशादिप्रामाण्यात्। यत्र तु, कोशाद्युदासीनं तत्र यथेच्छं प्रयोगानुसारात्।

एतेनैकस्मिन्नपि 'आचार्याः कथयन्ति' 'गुरव आगताः' इत्यादिप्रयोगाः समर्थिताः ।

यत्तु, अजहत्स्वार्थलक्षणया दारादिपदानां नानागुणविशिष्टतत्तद्व्यक्तिवाचकत्वेन प्रकृत्यर्थतावच्छेदके संख्यान्वय इति । तत्, न; मुख्यार्थपरतत्पदोत्तरबहुवचनस्यासङ्गततापत्तेः ।

यदि तु निरूढलक्षणया विना केवलमुख्यार्थकप्रयोग एव नेत्युच्यते, तर्हि तेन रूपेण शक्तिरेवास्तु, किं लक्षणया ? कोशादिकञ्च तादृशार्थशक्तावेव तात्पर्यग्राहकं बोध्यम् ।

यदपि, साधुत्वमात्रार्थमेतादृशस्थले बहुवचनादिकमिति । तदपि, न; अनुशासनाभावात् । न च तवापि मते सर्वदा आरोपसत्त्वे मानाभावेन तदभावे एकवचनान्तप्रयोगापत्तिः, कोशादिप्रामाण्येन नियतारोपस्वीकारात्, नानागुणविशिष्टे शक्तिस्वीकाराच्च ।

अन्ये तु, अयोग्यतानिश्चयस्य शाब्दबोधप्रतिबन्धकत्वाभावादेकव्यक्तावपि बहुत्वान्वयः । अत एव गालिदानादिजन्यदुःखानुभवः, रूपकादिकाव्यजसुखाद्यनुभवश्च सङ्गच्छते । "बहुषु बहुवचनम्" [१।४।२१] इत्यादेश्च बहुत्ववैशिष्ट्येन बोधे बहुवचनमित्यादिरर्थः । तदुक्तम्—"अत्यन्तासत्यपि ह्यर्थे ज्ञानं शब्दः करोति हि" इति । आहार्य एव शाब्दबोधः ।

दारानानयेत्यादितो बह्वीनामानयने प्रवृत्त्यादिकं तु नापाद्यम्, अनाहार्याप्रामाण्यज्ञानानास्कन्दितज्ञानस्यैव प्रवर्त्तकत्वात् । यदा तु व्यक्तिनिष्ठबहुत्वाभिप्रायेणैव तथा प्रयोगः, तदा भवत्येव बह्वीनामानयनम् । तात्पर्यादितस्तु तन्निर्णय इत्याहुः ।

यत्तु; एतादृशस्थले पदार्थोपस्थितिमात्रं न शाब्दबोध इति, तत्, न; सर्वत्रैवमेवापत्तौ शाब्दबोधोच्छेदापत्तेरित्यन्यत्र विस्तरः ।

संख्याप्रसङ्गादुद्देश्यविधेययोः संख्याविवक्षाऽविवक्षे निरूप्येते

यत्तु मीमांसकाः, 'पशुना यजेत' इत्यादौ विधेयविशेषणत्वादेकत्वं विवक्षितम् । तथाहि—समानप्रत्ययोपात्तेन प्रातिपदिकादपि सन्निहितेन प्रधानभूतेन च कारकेणावरुद्धमेकत्वं प्रातिपदिकार्थमनादृत्य क्रियाङ्गमवगम्यमानं वाक्या-

समर्पितेन क्रियाविशेषणे सम्बध्य पश्चाद् 'अरुणैकहायनी'न्यायेन पशुनार्थात् सम्बध्यते ।

एवञ्च एकत्वस्य विवक्षितत्वात् तद्विशिष्टपशोरेव विधानान्नानेकपशुभिर्यागः । एवं विधेयविशेषणे सर्वं विवक्षितम् । 'ग्रहं सम्मार्ष्टि' इत्यादावुद्देश्यग्रहगतमेकत्वमविवक्षितम् । अन्यथा वाक्यभेदः स्यात् । तथाहि—'प्राजापत्या नवग्रहाः' इत्यत्र विहितग्रहोद्देशेन सम्मार्गो विधीयते । तत्रैकत्वविवक्षायां ग्रहं संमार्ष्टि, तं चैकमित्यर्थः स्यात् । एवञ्चोद्देश्यानेकत्वकृतो वाक्यभेदः स्पष्ट एव ।

किञ्च, ग्रहमिति द्वितीयया ग्रहस्य संस्कार्यत्वलक्षणं प्राधान्यं प्रतीयते । एवमेकत्वस्यापि । तथा च ग्रहस्वरूपवदेकत्वविवक्षायामपि 'प्रतिप्रधानं गुणावृत्तिः, इति न्यायात् सर्वत्र ग्रहे सम्मार्गसिद्धिर्व्यर्थैव तद्विवक्षा ।

यदि तु पशुवद्ग्रहाणां गुणत्वं भवेत्, तदा येन केनापि सिद्धेर्यावद्गुणं प्रधानावृत्तेरयोगाच्च परिच्छेदकत्वेन पशुवत् संख्याविवक्षा स्यात् ।

नन्वेवं गुणत्वं चात्र संस्कारकत्वमसंस्कार्यत्वं वा ? अथ संख्याविशिष्टपश्वादिविधिवदेकत्वविशिष्टग्रहानुवादेन सम्मार्गविधिः स्यादिति चेत्, तथापि सर्वेषां प्रत्येकमेकत्वात् स्यादेव प्रसङ्गः । न चैकत्वविशिष्टसम्मार्गविधिः, वैशिष्ट्यञ्च स्वाश्रयकर्मकत्वसम्बन्धेनेति वाच्यम्, तथापि द्वितीयोक्तप्राधान्यानुरोधेन 'प्रतिप्रधानं गुणावृत्तिः' इति न्यायात् सर्वत्र सम्मार्गप्रसङ्गात् । तस्मादुद्देश्यगता संख्याऽविवक्षितैव, यथा प्रकृते ग्रहत्वमित्याहुः ।

तद्वैयाकरणैर्नाश्रयितुं शक्यम्, "आर्धधातुकस्येड्वलादेः" [७।२।३५] इत्यत्र वलादित्वविशिष्टमार्धधातुकमनूद्येड्विधानेनार्धधातुकविशेषणवलादित्वादिविवक्षायाः सर्वसम्मतत्वात् । न चैव ग्रहेष्वपि न दोषः, तत्राकाङ्क्षाविरहात् फलाभावाच्चेत्युक्तम् । तत् किमनुवाद्यविशेषणं विवक्षितमेव, न; "उपेयिवाननाश्वाननूचानश्च" [३।२।१०९] इत्यादौ नञ्प्रभृतेर्विवक्षाया उपेत्यस्याविवक्षायाश्च स्वीकारात् । सुप्सुपेत्यादावेकत्वस्य विवक्षणाच्च ।

एवं विधेयविशेषणं विवक्षितमित्यपि न नियमः, "रदाभ्यां निष्ठातो नः पूर्वस्य च दः" [८।२।४२] इत्यत्रैकत्वाविवक्षणात्; तथात्वे भिन्न इत्यत्र नद्वयलाभो न स्यात् । न च वाक्यभेदेन तल्लाभः, तत्कल्पने गौरवाद् मानाभावाच्च । 'पूर्वस्य च' इति चकारस्य "एकः पूर्वपरयोः" [६।१।८४] इति सूत्रस्थैकग्रहणवत्

सत्त्वात्। न च तत्रैकत्वाविवक्षायामनन्तनकारापत्तिः, न चैकेन शास्त्रस्य चारितार्थ्यात् न बहूनामापत्तिः, भिन्न इत्यत्र नद्वयानापत्तेः। सवर्णदीर्घादिवदुभयोरेकतोपपत्तेः। मम तु वाक्यभेदाद् न दोषः, तत्र चकारस्तात्पर्यग्राहक इति वाच्यम्, चकारस्य पूर्वोक्तरीत्यैकादेशविधानार्थत्वस्यापि वक्तुं शक्यत्वेन वाक्यभेदे तवापि मानाभावात्।

तस्माद् यदि लक्ष्यानुरोधेन वाक्यभेद एव, चकारस्तात्पर्यग्राहक इत्युच्यते, तदा एकत्वविवक्षा व्यर्थैव, वाक्यभेदेन नकारद्वयस्य ममापि लाभात्। एकेन शास्त्रस्य चारितार्थ्याद् न बहूनामापत्तिः।

नन्वेवमनियमे सति "आद्गुणः" [६।१।८७] इत्यादावेकत्वं विवक्षितं कृत्वा 'एकः पूर्वपरयोः' इत्यत्रैकग्रहणं प्रत्याख्येयमिति चेत्, इष्टापत्तेः, भाष्ये प्रत्याख्यानात्। एवञ्च, "अस्य च्वौ" [७।४।३२] इत्यादौ अनुवाद्यविशेषणत्वाद् ह्रस्वत्वादेरविवक्षेत्यादिकैयटादिग्रन्थाश्चिन्त्या एवेति दिक्।

इति संख्याविवक्षाऽविवक्षाविचारः।

इति सुबर्थनिर्णयश्च समाप्तः।

समासशक्तिनिरूपणम्

[1]अथ सुबन्तप्रकृतिकसमासशक्तिर्निरूप्यते ।

तत्रादावजहत्स्वार्थानिरूपणम्

तत्र "समर्थः पदविधिः" [२।१।१] इति सूत्रम् । सामर्थ्यञ्चात्रै-कार्थीभावः, 'किं समर्थं नाम ? पृथगर्थानामेकार्थीभावः समर्थवचनम् । क्व पुनः ? पृथगर्थानि क्वैकार्थानि ? राज्ञः पुरुष इति वाक्ये पृथगर्थानि, राजपुरुष इति समासे एकार्थानि' इति भाष्यात् ।

अस्यार्थः—एकार्थत्वं नामैकोपस्थितिविषयार्थकत्वम् । अन्यथा घटपदस्यापि घटघटत्वतत्सम्बन्धरूपनानार्थत्वादेकार्थत्वं न स्यात् । एवं पृथगर्थत्वं नानोपस्थिति-विषयार्थकत्वम् ।

---

1 'पदशक्त्यैव निर्वाहे पदसमूहात्मकसमासशक्तिस्वीकारो निष्फलः' मतमिदं निराकरिष्यन् समासशक्तिं समर्थयितुमुपक्रमते—अथेति ।
समासशक्तौ निरूपणीयायां घटकतया प्रविष्टस्य समाससामान्यस्य पूर्वं निर्वचनमावश्यकमपि मूले उपेक्षितमिति तत्र किञ्चित् प्रस्तूयते—

पाणिन्यादिसंकेतसम्बन्धेन समासपदवत्त्वं समासत्वम् । इदञ्च लक्षणं व्याकरणशास्त्रविषयकमेव । अतोऽन्यत्रास्य विपरीतार्थकत्वेऽपि न क्षतिः । अत एव चेदं पारिभाषिकपदमित्यपि वक्तुं शक्यते ।

अथ 'अर्थबोधफलकविभक्त्यव्यवहितपूर्ववर्तित्वप्रकारकज्ञानाविषय-पूर्वपूर्वपदघटितनामसमुदायत्वं समासत्वम्' इत्येवास्तु । 'राजपुरुषः' इत्यादावपि राजादिपदे कस्यचित् पुंसो विभक्त्यनुसन्धानसत्त्वेऽपि तस्यार्थ-बोधफलकत्वाभावाद् नासम्भवोऽव्याप्तिर्वा ।

'दधि सुन्दरमस्ति' इत्यादौ तत्तद्विभक्त्यनुसन्धानसत्त्व एव शाब्द-बोधोदयाद् न तत्रातिव्याप्तिः, समासस्थले तु पूर्वपदे विभक्त्यनुसन्धानं विनैव शाब्दबोधोपगमाद् न दोष इति तु न वक्तव्यम्, 'दधि सुन्दरम्' इत्यादौ विभक्तिमजानतोऽपि बोधोदयात् तत्रातिव्याप्तेः ।

ननु विभक्त्यनुसंधानं विना बोधानङ्गीकारेण नातिव्याप्तिरिति चेत्, न; विनिगमनाविरहेण समासेऽपि तथा वक्तुं शक्यतयाऽसंभवापत्तेः ।

न च समासे पदयोरव्यवहितपूर्वापरीभावरूपाकाङ्क्षायाः शाब्दबोधे हेतुत्वेन विभक्त्यनुसन्धानं नापेक्ष्यते, असमासे तु प्रातिपादिकस्य विभक्त्य-

इदमेव ध्वनयितुं पृथगर्थानामित्युक्तम्, न त्वनेकार्थानामिति।

वृत्तिवाक्ययोर्भिन्नत्वात् च्विप्रत्ययोऽनुपपन्न इत्याशयेन 'क्व पुनः' इत्यादि प्रश्नभाष्यम्।

उत्तरस्यायमाशयः—कार्यंशाब्दिका हि वाक्यादेवेयं वृत्तिर्निष्पन्नेति मन्यत इति।

मतान्तरेऽपि सादृश्याद् वाक्यीयत्वाध्यवसायमाश्रित्य च्विप्रत्यय इति। च्विप्रत्ययार्थ एव पृथगर्थानामित्यनेनान्वाख्यायते। इदमेव ध्वनयितुं समासे पुनरेकार्थानीत्यत्र च्विप्रत्ययानुपादानम्।

अयं भावः—वाक्ये यथा पृथक् पदैः पदार्थानामुपस्थितावाकाङ्क्षादि-वशाद् विशेष्यविशेषणभावापन्नविशिष्टार्थप्रतीतिः, नैवं वृत्तौ, किन्त्ववयवशक्तिभ्यां समुदायशक्तिसहकृताभ्यां पदार्थोपस्थितिरेव जायमाना [1]विशेष्यविशेषणभावापन्न-विशिष्टविषया भवति सर्वत्रैव।

न च वैयाकरणनये तत्र विशिष्टस्य शक्तिग्रहः। इत्थं राजपुरुषादिपदं राजसम्बन्धवत् पुरुषे शक्तमित्याद्याकारः प्राप्ताप्राप्तविवेकेन विशिष्टशक्तिः सम्बन्धमात्राद्यंशे पर्यवस्यति। संसर्गांशे समुदायशक्तिस्वीकारेण को विशेषो वाक्यवृत्त्योरिति वाच्यम्, तत्र हि फलबलात् पदार्थोपस्थितिसमये नियमतः संसर्गांशे उद्बोधकासमवधानकल्पनेन पृथगुपस्थितयोः पदार्थयोः पश्चात् संसर्ग-बोधः। वृत्तौ तु पदार्थोपस्थितिकाल एव नियमतः संसर्गांशेऽप्युद्बोधककल्पनाद् विशिष्टैवोपस्थितिरिति विशेषात्।

व्यवहितपूर्ववर्तित्वप्रकारकज्ञानविषयस्यैवाकाङ्क्षात्वेन विभक्त्यनुसन्धान-मपेक्ष्यत इत्येव विनिगमकमिति वाच्यम्, अलुक्समासे व्यभिचारादिति चेत्, एवमपि 'पर्यभूषत्', 'पचतभृज्जता' इत्यादावव्याप्तेर्दुर्वारत्वात्। अलक्ष्यत्वेन परिहारस्तु बुद्धिसम्बन्धशून्यतामेव प्रकाशयेत्।

केचन तार्किकास्तु—यादृशमहावाक्योत्तरस्त्वतलादिप्रत्ययो यादृशार्थ-विषयतानिरूपितस्वार्थविषयताशालिबोधजनकः, तादृशवाक्ये तादृशोऽर्थः समासः। तादृशबोधकतादृशवाक्यत्वं समासत्वमिति यावत्।

भवति हि 'कृष्णश्रितः' इत्यादौ तदुत्तरत्वादिप्रत्ययेन पूर्वपदार्थविशि-ष्टोत्तरपदार्थान्वितस्वार्थबोधजननात्। पाचकादिकं पाकक्रियाकर्त्रर्थवाक्यमपि स्वघटकानेकनामलभ्यतादृशार्थप्रतिपादकत्वरूपमहत्त्वाभावाद् न महावाक्य-मिति न तत्रातिव्याप्तिरित्याहुः। अधिकन्तु तत एवागवन्तव्यम्।

1. 'संसृष्टार्थं समर्थम्' इति भाष्यादिति शेषः।

अत एव 'प्राप्तोदकः' इत्यादौ विशेष्यविशेषणभाववैपरीत्येन बोधः। तत्राप्रयुज्यमानषष्ठ्याद्यर्थः, संसर्गश्चेत्युभयमेव समुदायशक्तिसाध्यम्, अनन्यलभ्यत्वात्, क्लृप्तशक्त्यैव राजादेरुपस्थितिसम्भवे तत्र समुदायशक्तिकल्पने गौरवाच्च।

नामार्थयोरभेदान्वयादिव्युत्पत्तयश्च पृथगुपस्थितनामार्थादिविषयाः। अत एव राजपुरुषैकदेशे राज्ञि वाक्य इव ऋद्धस्येत्यादिविशेषणान्वयो न, तस्य पदार्थैकदेशत्वात्।

न च राजपदार्थत्वं तस्यास्त्येवेति वाच्यम्, विशेषणान्वये विशेष्यस्येतरानन्वितत्वेनोपस्थितेस्तन्त्रत्वेनादोषात्। राज्ञ इत्यादौ तु पृथगुपस्थितयोरेव प्रकृतिप्रत्ययार्थयोरन्वयेन विशेषणान्वये बाधकाभावात्। एतन्मूलकैव 'पदार्थः पदार्थेनान्वेति, न तु पदार्थैकदेशेन' इति व्युत्पत्तिरिति बोध्यम्। अत एव च राज्ञः पुरुषोऽश्वश्चेतिवद् राजपुरुषोऽश्वश्चेति न, एकत्र विशेषणत्वेनान्वितस्यापरत्र विशेषणत्वेनान्वयायोगात्।

एवं राज्ञः पुरुषो भार्यायाश्चेतिवत् एकत्र द्वयमिति विषयताशालिबोधजनकं राजपुरुषो भार्यायाश्चेति न। एकविशेषणवैशिष्ट्यनैवोपस्थितेः। अत एव राज्ञो यः पुरुषः, स भार्याया इति वाक्यान्न तथा बोधः। राजसम्बन्धविशिष्टे भार्यासम्बन्धबोधकविशिष्टवैशिष्ट्यविषयताशालिराजपुरुषो भार्याया इति प्रयोगस्तु 'राजपुरुषः सुन्दरः' इतिवदिष्ट एव।

न चैवं प्रधानस्य सविशेषणत्वात् तत्र वृत्तिरिति व्यवहाराद्युच्छेदः, त्वद्रीत्या वृत्तौ केवलविशेष्ये विशेषणान्वयस्यैवाभावादिति वाच्यम्, सुन्दरत्वादेः पुरुषादिमात्रे विश्रान्तिसत्त्वेन तथा व्यवहारोपपत्तेः।

यत्तु—भेदः[1] संसर्गश्चादिवाच्यः। एवञ्चापुरुषस्वामिभिन्नराजसम्बन्धी अराजकीयभिन्नः पुरुष इति बोध इति, तत्, न; अनुभवविरोधात्, गौरवाच्च, रामकृष्णाविति द्वन्द्वे भेदादेर्वाच्यताया उपपादयितुमशक्यत्वाच्च। देवदत्तयज्ञ-

1. भेदोऽत्रान्योन्याभावः। ननु भेदस्य वाच्यत्वे राजपदार्थस्य पुरुषे भेदः, पुरुषस्य, राजविशिष्टपुरुषस्य वा राज्ञि भेदः प्रतीयेत। तत्र नाद्यः पक्षः सम्भवति, पुरुषविशेषणतापन्नस्य राज्ञो भेदे एकत्र विशेषणत्वेनान्वितत्वाभावात्, राजभेदस्य राजसम्बन्धिपुरुषमात्रे सत्त्वेन तद्भेदस्याव्यावर्तकत्वाच्च।

न द्वितीयः, पुरुषत्वरूपान्वयितावच्छेदकावच्छिन्नप्रतियोगिताकभेदस्य राजनि बाधितत्वात् तत्प्रतियोगिताकभेदस्याव्यावर्तकत्वात्, 'राजधनम्' इत्यादौ धनत्वावच्छिन्नप्रतियोगिताकभेदस्य पूर्वपदार्थे सत्त्वेऽपि तद्बोधस्यानुपयोगाच्च।

दत्तोभयस्वामिके गजाश्वभार्यादिस्वामिदेवदत्तस्वामिके च देवदत्तसम्बन्धमात्रविवक्षायां देवदत्त पुरुष इत्यस्यानापत्तेश्च। युधिष्ठिरभार्या द्रौपदीत्यस्यानापत्तेश्च।

एतेन भेद एव वाच्यः, 'अराजकीयभिन्नः पुरुषः' इति च बोधः। तथा चैतद्विरोधादेव राजपुरुषो भार्याया इति न प्रयोगः। संसर्गस्त्वनुमेय एव।

यद्वा, संसर्ग एव शक्यः, राजसम्बन्धीत्येव बोधः। अत्र पक्षे अराजकीयभेदोऽनुमेयः, तथा च तद्विरोधान्नातिप्रसङ्ग इति परास्तम्। भेदसंसर्गयोर्व्यभिचरितत्वाच्च। अपृथगुपस्थितेरेव च नोद्देश्यविधेयभावेनान्वयः, पृथगुपस्थितेस्तथान्वये तन्त्रत्वात्।

एतदेवाभिप्रेत्याविमृष्टविधेयांशदोषनिरूपणावसरे 'यत्रोद्देश्यविधेययोः पदाभ्यां पृथगुपस्थितिः, तत्रैव तथान्वयः। न च समासे पदात् पृथगुपस्थितिः, अपृथगुपस्थितौ च न तथा व्युत्पत्तिरिति **प्रदीपकृतः**।

यत्तु मीमांसकाः—उद्देश्यविधेययोरपि क्रियान्वयेन परस्परमनन्वयादसामर्थ्यमिति, तत्, न; अरुणाधिकरणरीत्या कारकमात्रस्य क्रियायामन्वयेन परमेण कारकेण कृतम्, परमकारकेण कृतमिति समासानापत्तेः। पार्ष्णिकपरस्परान्वयकृतं सामर्थ्यं तत्रेति चेत्, सत्यं प्रकृतेऽपि।

द्रष्टुं गतः कृष्णम्, श्रितो गुरुकुलं रामः' इत्यादौ च न समासः, कृष्णश्रितयोः परस्परमसम्बन्धेनैकार्थीभावाभावात्। अत एव च समासस्यार्थवत्त्वात् प्रातिपदिकत्वसिद्धिः।

यत्तु, राजपदेन राजपुरुषोभयोपस्थानं पुरुषपदेनापि तदुभयोपस्थापनमित्येकार्थीभावः। राजपुरुषाभिन्नो राजपुरुष इति बोध इति। तत्, न; बोधावृत्त्यापत्तेः, अनुभवविरोधाच्च।

इदमेवाभिप्रेत्य वाक्ये पृथगर्थत्वेऽपि पदानामाकाङ्क्षादिवशाद् विशेष्यविशेषणभावेन विशिष्टार्थप्रतीतिः। वृत्तौ तु विशिष्ट एवार्थो राजपुरुषशब्दाभ्यामभिधीयत इति कैयटेनोक्तम्।

ननु विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य हेतुत्वाद् विना पृथक्पदार्थोपस्थितिं विशिष्टबुद्ध्यनुपपत्तिरिति चेत्, न; घटपदाद् घटत्वविशिष्टस्मरणवदुपपत्तेः, विशेषणविषयकत्वेनैव तस्य हेतुत्वाच्च। अत एव विशिष्टकृति-

---

अत एव न तृतीयोऽपि, तद्बोधस्यानुपयोगादिति चेत्, न; राजसम्बन्धीति बोधेनादोषात्।

साक्षात्कारोपपत्तिरिति स्पष्टमनुमानदीधितौ। वृत्तिजन्योपस्थितेस्तु नापेक्षा, पदार्थोपस्थितेः स्मृतित्वात्।

नन्विदं वृत्तेर्विशिष्टार्थत्वम्, किं लोकव्यवहारसिद्धम्, उत शास्त्रैकगम्यमिति चेत्, अत्र **केचित्**—लोकव्यवहारसिद्धम्। न ह्यत्र शास्त्रेऽर्थविधानं क्रियते, "अचतुर"[५।४।७७]इत्यादावदर्शनात्, वृक्षादीनामर्थाविधानाच्च। "चार्थे द्वन्द्वः" [२।२।२९]इत्यादि अनुशासनं तु चार्थे यो वर्त्तते, स द्वन्द्व इत्येवं लोकसिद्धार्थानुवादेन द्वन्द्वसंज्ञामात्रविधानार्थम्। अर्थस्यापि विधाने वाक्यभेदः स्यात्। स्वसमानार्थकवाक्यस्यानिवृत्तये विभाषाधिकारश्च कर्तव्यः स्यात्। **मम तु** वृत्त्यवृत्त्योः स्वभावसिद्धत्वान्न तदावश्यकम्।

किञ्च, वृत्तिलक्षणं च कर्तव्यं स्यात्, अर्थवत्त्वस्यापि शास्त्रैकगम्यत्वात्। मम तु लोकव्यवहारादेव तदपि सिद्धम् इत्याहुः।

अन्ये तु, शास्त्रैकगम्यम्। अनेकं सुबन्तं चार्थे वर्त्तते। यदा च चार्थो वर्त्तते, तदा द्वन्द्वसञ्ज्ञमिति सूत्रार्थ इत्याहुः।

[1]सोऽयमेकार्थीभावो ग्रन्थेषु [2]अजहत्स्वार्थात्वेन व्यवह्रियते। अयं चैकार्थीभावः "अनेकमन्यपदार्थे" [२।२।२४], "समर्थःपदविधिः" [२।१।१] सौत्रानुवादबलेनालौकिके विग्रहवाक्येऽपि आरोप्यते। अत एव तत्र समाससंज्ञायामर्थवत्त्वनिबन्धनप्रातिपदिकत्वे विभक्तिलुगादिसिद्धिः, "षष्ठी" इत्यादिशास्त्रानुरोधेन भेदोपस्थितिनिबन्धनषष्ठ्यादिनिर्वाहाय पृथगर्थत्वमपि। न च विरोधः, शास्त्रप्रामाण्येन काल्पनिकयोर्विरोधस्यैवाभावात्, अलौकिकसिद्धेर्भूषणमेतत्, न तु दूषणमिति न्यायाच्च।

नन्वत्र पक्षे 'बहुव्रीहेस्तत्पुरुषोऽन्तरङ्गः' इत्यादिव्यवहारोच्छेदः, बहिर्भूतपदार्थविषयकबोधजनकत्वं हि बहुव्रीहौ बहिरङ्गत्वम्। न चात्र पक्षे तदस्ति,

---

1. यत् किञ्चित्पदजन्यपृथगुपस्थितिविषयार्थकत्वेन लोके दृष्टानां शब्दानां विशिष्टविषयैकशक्त्या एकोपस्थितिजनकत्वमेकार्थीभावत्वम्।

तादृशशब्दानां तथात्वं तु सादृश्यादवधेयम्। 'दृष्टानाम्' इत्यन्तोपादानं विभक्त्यन्तेऽतिप्रसङ्गं रासाय। विभक्त्यर्थस्य यथा विभक्त्या प्रतिपत्तिः, न तथा केनाप्यन्येन शब्देनेति विभक्तेस्तथाविधार्थकत्वाभावात् तदन्ते नातिप्रसङ्गतादवस्थ्यम्।

'उपगोरपत्यम्' इत्यादावपत्यरूपार्थस्यापत्यपदजन्योपस्थितिविषयत्वं लोके दृष्टमिति औपगवादिसंग्रहः स्यात्, तदर्थं यत् किञ्चित्त्वनिवेशः। यथा पदानामसत्त्वेऽपि तत्सत्ताव्यवहारो गौणः, तथा पदानामेकार्थव्यवहारोऽपि गौण इति सूचयितुं निर्देशः।

2. न जहति स्वानि पदानि यानर्थान् ते अजहत्स्वाः, प्राप्तानेकवद् बहुव्रीहिसमासः। अजहत्स्वा अर्था यस्यां सा अजहत्स्वार्थेति बहुव्रीहिगर्भो बहुव्रीहिः।

अन्यपदार्थेऽपि विशिष्टशक्यत्वेन स्वपदार्थस्यैव सत्त्वादिति चेत्, न; स्वघटकपदघटितवाक्यदृष्टार्थमात्रविषयकतत्पुरुषीयशक्तिग्रहापेक्षया बहुव्रीहिसञ्ज्ञकपदीयशक्तिग्रहस्य स्वघटकपदघटितवाक्यदृष्टार्थातिरिक्तबहिर्भूतान्यपदार्थविषयकत्वेन बहिरङ्गतया तस्य बहिरङ्गत्वमित्यक्षतेः ।

एतेन षष्ठीतत्पुरुषात् कर्मधारयो लघीयानित्यपि व्याख्यातम् । कर्मधारयसंज्ञकपदीयशक्तिग्रहापेक्षया षष्ठीतत्पुरुषादिपदीयशक्तिग्रहस्य स्वाघटकषष्ठ्याद्यर्थरूपाधिकविषयतया गुरुत्वात् ।

एवञ्च [1]निषादस्थपत्यादिशब्दानां निषादरूपस्थपतिनिषादसम्बन्धिस्थपतिनिषादस्वामिकपुरुषान्तररूपनानार्थत्वेऽपि नानार्थे 'तात्पर्याद्विशेषावगतिः' इति न्यायात् क्व तात्पर्यमिति संदेहे शक्तिग्रहपदार्थोपस्थितिलाघवानुरोधाद् निषादरूपे तत्रैव कल्प्यते । परेषामपि सति तात्पर्ये 'यष्टीः प्रवेशय' इतिवत् लक्षणाया दुर्वारत्वात् तात्पर्यमेव कल्प्यकोटावविशिष्यत इति न दोषः । इदमेवाभिप्रेत्य—

पर्यवस्यच्छाब्दबोधाविदूरप्राक्क्षणस्थितेः ।
शक्तिग्रहेऽन्तरङ्गत्वबहिरङ्गत्वचिन्तनम् ॥

इति वैयाकरणमतोन्मज्जने दीक्षिताः ।

इत्यजहत्स्वार्थानिरूपणम्

---

1. अयंभाव.—'निषादस्थपतिं याजयेत्' इति श्रूयते । तत्र निषादस्थपतिशब्दे षष्ठीतत्पुरुषः; निषादानां स्थपतिः = स्वामी । स्थपतिशब्दः स्वामिपर्यायः । निषादः स्थपतिर्यस्येति बहुव्रीहिः । निषादश्चासौ स्थपतिः इति कर्मधारयो वेति संशये कर्मधारये वेदे निषादानामधिकाराभावाद् यजनासम्भवेनापूर्वं वेदाध्ययनं कल्पनीयमिति गौरवं स्यात् । बहुव्रीहौ च समासे शक्त्यभावेन वाक्यलक्षणायां गौरवात् लाघवाद् षष्ठीतत्पुरुष एवेति पूर्वपक्षे; तत्पुरुषस्यापि तुल्ययुक्त्या पूर्वपदलाक्षणिकतया कर्मधारयापेक्षया गौरवाद् लाघवात् कर्मधारय एव, अपूर्वविद्याध्ययनस्योत्तरकालकल्प्यत्वेन तादृशगौरवस्य फलमुखतयाऽदोषत्वाद्; इति सिद्धान्तितम् । एतच्च समासशक्तिवादिनये विरुद्धचेत, तत्पुरुषेऽपि गौरवानवकाशादिति चेत्, मैवम्; निषादरूपे स्थपतौ, निषादसम्बन्धिस्थपतौ निषादस्वामिकपुरुषान्तरे च इत्येवं सर्वत्र शक्तत्वान्नानार्थत्वेन 'नानार्थे तात्पर्याद् विशेषावगतिः' इति न्यायेन, 'क्व तात्पर्यम्' इति संशये समासघटकप्रत्येकपदशक्त्युपस्थापितार्थमात्रविषयककर्मधारयीयशक्तिग्रहस्यान्तरङ्गत्वेन प्रथमोपस्थितार्थ एवोपस्थितिलाघवाद् निषादस्थपतिशब्दस्य तात्पर्यमवसीयते । तेन विशेषावगतिः, न तु बहिर्भूतपदार्थविषयकशक्तिग्रहोपस्थापिते, तदुपस्थितेर्विलम्बितत्वादिति प्रघट्टकार्थः ।

अथ जहत्स्वार्थनिरूपणम्

यद्वा, अवयवशक्तिं लक्षणां चाजानतां बालानां समुदायशक्त्यैव बोधस्य सर्वानुभवसिद्धत्वेन प्रागुक्तरीत्या चावश्यकल्प्यया तयैव राजविशिष्टपुरुषबोधसंभवे राजपुरुषपदयोः पुनस्तद्बोधकत्वं न कल्प्यम्, वृषभादिपदे वृषादिवत्। आनुपूर्व्यन्तरघटकत्वाभावविशिष्टानुपूर्व्या एव शक्ततावच्छेदकत्वात्। अन्यथा रामादिपदादपि द्रव्यचतुर्मुखनारायणादीनामवयवार्थानां पदार्थोपस्थितिशाब्दबोधयोरापत्तिः, अवान्तरसुबुत्पत्त्यापत्तिश्च, धनमित्यादौ जस्त्वाद्यापत्तिश्च, पटुजातीयायेत्यादौ सर्वनामत्वाद्यापत्तिश्च।

वाक्ये तु पदान्यर्थवन्त्येव। 'राजसम्बन्धवान् पुरुषः' इत्याद्यर्थे 'राज्ञः पुरुषः, पुरुषो राज्ञः' इति विशिष्टानुपूर्वीद्वयस्य शक्ततावच्छेदकत्वकल्पनापेक्षया पदशक्तिकल्पनाया एव लघीयस्त्वात्। एकार्थत्वञ्चैकवत्त्यार्थबोधकत्वम्। च्विप्रत्ययस्तु प्राग्वदेव।

न च वृत्त्यन्तर्गतानामर्थवत्त्वहानौ तन्निमित्तकप्रातिपदिकत्वपदत्वयोरपि हान्यापत्तिः, समासादिषु तयोरुपजीव्यत्वेन तदानीं वृत्तिस्वीकारात्, "समर्थ" सूत्रप्रामाण्येनोपजीव्यस्याप्यर्थस्य बाधाच्च।

"सास्य देवता", "कर्त्तरि कृत् [४।२।२४], "चार्थेद्वन्द्वः" [३।४।६७] इत्यादि तु "लः कर्मणि" [३।४।६९] इतिवत् काल्पनिकार्थमादाय।

न च वृत्तिघटकधातुप्रातिपदिकादीनामनर्थकत्वात्तेषां विशिष्टरूपोपादानविहित "पथिमथि" [७।१।८५] इत्यात्वाद्यनापत्तिः, अर्थवद्ग्रहणेऽनर्थकस्याग्रहणादिति वाच्यम्, "प्रत्ययोत्तरपदयोश्च"[७।२।९८]इत्यादिसूत्रस्थभाष्यादिप्रामाण्येन वृत्तिप्राग्वर्त्त्यर्थारोपेण शास्त्रप्रवृत्त्याऽक्षतेः।

न चैवम् 'वाप्यश्वः' इत्यादौ "ईदूतौ च सप्तम्यर्थे"[१।१।१९]इति प्रगृह्यत्वमाशङ्क्य जहत्स्वार्थायां वृत्तावानर्थक्याद् न दोष इति भाष्योक्तं विरुध्येत,

आरोपितार्थमादाय इतरशास्त्रवत् तस्यापि प्रवृत्तिसम्भवादिति वाच्यम्, तत्रार्थग्रहणसामर्थ्येनेदृशार्थस्याग्रहात्; इति स्पष्टमस्मत्कृतशब्देन्दुशेखरे।

यत्तु, 'अर्थवद्ग्रहण'परिभाषा नास्त्येव, तज्ज्ञापकैः "टिड्ढाणञ्०" [४।१।१५], "दयायासश्च" [३।१।३७] इत्यादिसूत्रस्थाञ्ठञ्दयादिग्रहणैर्विशिष्टरूपोपादा[1]नेऽन्यानेकदेशभूतस्यैव ग्रहणं ज्ञाप्यत इति न दोष इति, तत्, न; लौकिकन्यायसिद्धाया 'अर्थवत्'परिभाषायाः प्रत्याख्यातुमशक्यत्वात्। त्वत्पक्षे 'प्रौढघट' इत्यादौ वृद्धचनापत्तिश्चेति, यत्किञ्चिदेतत्।

न च समासात् पूर्वं पदानामर्थवत्त्वम्, तदुत्तरमनर्थकत्वं विरुद्धमिति वाच्यम्, एकस्यैव मणेरुत्तेजकासमवधानसमवधानाभ्यां प्रतिबन्धकत्वाप्रतिबन्धकत्ववदुपपत्तेः। पङ्कजादौ तु योगार्थान्तर्भावेणैव समुदायशक्तिरिति न योगरूढ्युच्छेदः।

वृक्षविशेषशक्ताश्वकर्णपदादौ योगार्थस्य शक्तावननुप्रवेशात् केवलरूढतैव। 'शिव इव सत्यासक्तमनाः' इत्यादौ त्वनेकार्थशक्तानेकसमासात् तन्त्रेणोच्चारितादनेकार्थबोधः।

न च [2]ओङ्कारोऽकारमकारैर्विष्णुत्वशिवत्वब्रह्मत्वादिना बोधकत्वप्रतिपादकाथर्वशिखादिविरोध इति वाच्यम्, वर्णसमाम्नायादौ ऋषिभिर्व्यञ्जनस्यार्धमात्रिकत्वाभिधानाद् मकारेण सह प्रश्नोपनिषदुक्तमात्रात्रयस्याथर्वशिखोक्तसार्धमात्रात्रयस्य चरमार्धमात्रायां नादविन्दुकलाविकलेति भेदस्यानेकश्रुतिपुराणाद्युक्तस्यैवमप्यनुपपत्तेः।

उपासनात्वेन च तद्वदेव वर्णत्रयकल्पनस्याप्युपपत्तेः।

---

1. अत्र "...विशिष्टरूपोपादानादन्यत्रैकदेशभूतस्यैव...." इति पाठः प्रकरणानुकूलः प्रतिभाति, अन्यथा अर्थासङ्गतिः।

2. अत्र 'ओङ्कारस्य अकारोकारमकारैर्ब्रह्मत्वविष्णुत्वशिवत्व...' इत्यादि साधुपाठः कल्पनीयः, अन्यथा क्रमभङ्गप्रसङ्गः।

एवञ्च 'ओमित्येकाक्षरं ब्रह्म' इति भगवद्वचनादखण्डैकाक्षररूपस्य प्रणवस्य नारायणशिवब्रह्ममायावच्छिन्नैकेश्वरचैतन्यबोधकत्वमिति बोध्यम् ।

नन्वत्र पक्षे राजादिपदैः सर्वथा स्वार्थस्य त्यागे तद्भानं न स्यात्, पुरुषमात्रस्यानयनञ्च स्यात् ।

किञ्च, राजपदार्थः पुरुषे विशेषणमिति च व्यवहारो न स्यादिति चेत्, न; विशिष्टेनैव राजसम्बन्धिपुरुषोपस्थानेनाद्यदोषाभावात् । [1]निष्कीर्णास्वपि सुमनस्सु आमोदान्वयमात्रेण चम्पकपुट इत्यादिव्यवहारवत् तत्सदृशार्थान्वयमात्रेण तथा व्यवहारोपपत्तेश्च । अयमेव च पक्षो ग्रन्थेषु जहत्स्वार्थेति व्यवह्रियते ।

यद्यपीदं पक्षद्वयं प्रागुक्तरीत्या भाष्यसम्मतम्, 'एकार्थीभावो वा सामर्थ्यम्, व्यपेक्षा वा' इति प्रतीकमुपादाय 'पृथगर्थानाम्' इति च प्रतीकमुपादाय कैयटेन स्पष्टमेवोक्तम् "ईदूतौ च सप्तम्यर्थे" [१।१।१९] इत्यादिसूत्रेषु भाष्ये व्यवहृतञ्च, तथापि जहत्स्वार्थापक्षो न युक्तः, अवयवानां क्लृप्तार्थवत्त्वत्यागेनारोपिततत्स्वीकारे गौरवात् ।

कस्यचिद्विशिष्टशक्तिग्रहाद् बोधस्तु नानर्थकत्वमवयवानां साधयितुमीष्टे । वाक्यादपि कस्यचित् तथाबोधेन तत्राप्यवयवानर्थक्यापत्तौ वाक्ये 'पृथगर्थौ' इति भाष्यविरोधापत्तेः, अर्धजरतीयापत्तेश्च ।

एतदेवाभिप्रेत्य **हरदत्तेनोक्तम्** 'जहत्स्वार्थावृत्तिरवयवानां नैरर्थक्यमिति वयं न रोचयामहे' इति । बोद्धृभेदेनेदं पक्षद्वयं कस्यचिदवयवशक्त्यज्ञानपूर्वकविशिष्टशक्त्यैव बोधेन कस्यचित् तज्ज्ञानपूर्वकमेव बोधेनोभयोरप्यावश्यकत्वाद् इति तत्त्वम् ।

इति जहत्स्वार्थानिरूपणम्

अयञ्चैकार्थीभावः पचतीत्यादौ न, कल्पकाभावात् । अत एव तत्र उद्देश्यविधेयभावेनान्वयः सङ्गच्छते । तदुक्तं भाष्ये—'एकार्थीभावे सामर्थ्ये समास एकः

1. अत्र 'सुमनस्' इति शब्दो नित्यबहुवचनान्तः स्त्रीलिङ्गः, अत एव 'निष्कीर्णासु' इति विशेषणं सङ्घटते, उक्तञ्चैतत् 'स्त्रियः सुमनसः पुष्पम्…' इत्यादिकोशात् (द्र० नामलिङ्गानुशासनस्य द्वितीयकाण्डे वनोषधिवर्गः) ।

सङ्गृहीतः, विभक्तिविधानं पराङ्गवद्भावश्चासङ्गृहीतम्' इति। अत्र समासपदं[1] वृत्तिमात्रोपलक्षणम्। अत एव 'पदविधि'ग्रहणं चरितार्थम्। पदोद्देश्यकविधिमात्रग्रहणार्थं हि तत्। शेषमुपरिष्टाद् वक्ष्यामः।
येऽपि नित्या अखण्डा निरवयवाः सर्वे शब्दाः, शास्त्रं तु [2]रेखागवयन्यायेन प्रकृति प्रत्ययादिविभागकल्पनयान्वाख्यानमात्रमिति वदन्ति, तेषामपि वृत्तौ पचतीत्यादिवद्विशेषणान्वयादिवारणाय विलक्षणव्युत्पत्तिकत्वरूपैकार्थीभाव आवश्यक इत्यलं पल्लवितेन।

व्यपेक्षावादिनस्तु परस्परान्वयरूपा व्यपेक्षैवात्र सामर्थ्यम्, "इसुसोः सामर्थ्ये" [८।३।४४] इत्यादौ तथा क्लृप्तत्वात्, पराङ्गवद्भावानुरोधाच्च। अन्यथा पराङ्गवद्भावे एतत् समासादावेकार्थीभाव इति वाक्यभेदः स्यात्, तत्र परिभाषाप्रवृत्त्यभावे तु 'ऋतेन मित्रावरुणावृतावृधावृतस्पृश' इत्यादौ ऋतेनेत्यादेः "सुबामन्त्रिते" [२।१।२] पराङ्गवद्भावे "आमन्त्रितस्य च [६।१।१९८] इत्याद्युदात्ततापत्तिः। मित्रवरुणावित्यस्य सम्बोधनप्रथमान्ततयामन्त्रितस्य परस्य सत्त्वात्।

न च 'तन्निमित्तग्रहणं कर्तव्यम्' इति वार्त्तिकात्, तस्यामन्त्रितार्थस्य यन्निमित्तं तत्प्रतिपादकं यत्, तदेव पराङ्गवत् स्यादित्यर्थकाद् नायं दोष इति वाच्यम्, समर्थपरिभाषामाश्रित्य तत्प्रत्याख्यानस्यैव न्याय्यत्वात्। ऋतेन मित्रावरुणावित्येतयोरानशाथे इत्यर्थकेनाशाथे इत्यनेनान्वयेन परस्परमसामर्थ्यात्। मित्रावरुणावृतावृधा इत्यनयोस्तु पार्ष्णिकान्वयसत्त्वादस्त्येव सामर्थ्यम्। स्पष्टचेदं वेदभाष्यकौस्तुभयोरिति दिक्।

---

1. कृदन्तादिवृत्तीनामित्यर्थः। एकोपस्थितिजनकसमुदायशक्तिरूपवृत्त्याश्रयत्वात् तेषां वृत्तित्वव्यवहारः।
'विग्रहवाक्याभिधाने शक्तः सन् साधुः' इति सूत्रार्थस्य भाष्याल्लाभात् समासपदं वृत्तिमात्रोपलक्षणम्।
पदोद्देश्यकविधित्वञ्च कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपासु पञ्चस्वपि वृत्तिष्वस्त्येव।

2. यथा चित्रे चित्रितस्य गवयादिलाङ्गूलादेः सादृश्येन वास्तवलाङ्गूलादिबोधनद्वारा वास्तवपशुबोधकत्वम्, तथा प्रकृतिप्रत्ययादिसादृश्येन अखण्डपदवाक्यगतप्रकृतिप्रत्ययादिबोधद्वारा वास्तवपदवाक्यबोधो भवति। शास्त्रं तु परिचायकमात्रम्।

अत एव 'पुरुषो राज्ञः' 'भार्या देवदत्तस्य' इत्यत्र समासो न। 'ऋद्धस्य राजपुरुष' इत्यपि न, राजपदस्य राजसम्बन्धिनि लक्षणया राज्ञः पदार्थैकदेशत्वेन तत्र विशेषणान्वयासम्भवात् ।

न च 'शोभनायां गङ्गायां घोषः' इत्यादौ लाक्षणिके लिङ्गशोभनादिविशेषणान्वयवत् प्रकृतेऽपि तदन्वयो दुर्वार इति वाच्यम्, तत्रापि गङ्गापदस्यैव शोभनगङ्गातीरे लक्षणायां पदान्तरस्य तात्पर्यग्राहकत्वात् ।

न चैवमपि 'चैत्रस्य नप्ता' इत्यादाविवैकदेशा[1]न्वयो दुर्वारः, तत्र हि नप्तृत्वं स्वजन्यजन्यपुंस्त्वम्, तदेकदेशे जन्यत्वे चैत्रस्यान्वय इति वाच्यम्, [2]ससम्बन्धिकातिरिक्ते तथानङ्गीकारात् ।

यद्वा—तत्रापि स्वजन्यपुत्रसम्बन्धेन नप्तर्येवान्वयः । एवं घटादन्य इत्यादावपि स्वप्रतियोगिकभेदसंसर्गेणान्यस्मिन्नेवान्वय इति न दोषः ।

अत एव 'देवदत्तस्य गुरुकुलम्' इत्यादौ समासो भवत्येव । पक्षद्वयमपीदं **समर्थसूत्रे भाष्ये** स्पष्टम् ।

न च राजसम्बन्ध एव लक्ष्योऽस्तु, तस्य च भेदेन पुरुषेऽन्वयोऽस्तु, किं सम्बन्धिलक्षणयेति वाच्यम्; 'ओदनः पचति' इत्यादावन्वयबोधवारणायाभेदातिरिक्तसंसर्गकनामार्थप्रकारकशाब्दबोधे तद्विहितप्रत्ययजन्योपस्थितेर्हेतुत्वात् ।

प्रत्ययत्वञ्च संङ्केतविशेषसम्बन्धेन प्रत्ययपदवत्त्वं जातिविशेषो वेति नाननुगमः । न चैवं राजसम्बन्ध इत्यादौ सम्बन्धादिपदे ङस्पदत्वभ्रमदशायां जायमानस्य भेदसम्बन्धेन राजादिप्रकारकसम्बन्धादिविशेष्यकान्वयबोधस्यानुपपत्तिः,

---

1. यत्किञ्चित् पदार्थनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबुद्धित्वावच्छिन्नं प्रति मुख्यविशेष्यतया यत्किञ्चित् पदजन्योपस्थितिः कारणम्, इत्येतादृशकार्यकारणभावमूलकेन 'पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेन' इति नियमेन विरोधादिति भावः ।

2. घटत्वगोत्वादौ नित्यपदार्थान्वयतात्पर्येण 'नित्यो घटः, नित्यो गौः' इत्यादेः प्रामाण्यवारणायोक्तव्युत्पत्तिस्वीकारेऽपि 'देवदत्तस्य नप्ता' इत्यादौ देवदत्तस्य निरूपितत्वसम्बन्धेन गुरुत्वादावेवान्वयस्याभिमततयोक्तकार्यकारणभावे अभेदसम्बन्धावच्छिन्नायाः प्रकारताया नित्यसाकाङ्क्षेतरावृत्तिविशेष्यताया वा कार्यतावच्छेदककोटौ निवेशेन देवदत्तनिष्ठप्रकारताया अभेदसम्बन्धावच्छिन्नत्वाभावेन, जन्यत्वस्य नित्यसाकाङ्क्षत्वेन वा व्युत्पत्तेर्विषयत्वाभावाद् न दोष इति फलितार्थः ।

वस्तुतः प्रत्ययजन्योपस्थितेरभावात्। तथा 'राज्ञः पुरुषः' इत्यादौ ङसादिषु सम्बन्ध-पदत्वभ्रमदशायां सम्बन्धाद्यंशे भेदसम्बन्धेन राजादिप्रकारकान्वयबाधापत्तिरिति वाच्यम्, साधारणधर्मदर्शनाभावेन तथाविधभ्रमस्यैवाभावात्।

यदि तु अस्त्यानुभविकस्तव तथा भ्रमः, तदा प्रत्ययभिन्नत्वेनागृहीतं यत्, तज्जन्योपस्थितेर्हेतुत्वाद् न दोषः। प्रत्ययत्वेन गृहीतमिति तु नोक्तम्, 'राज्ञः पुरुषः' इत्यादौ षष्ठ्यादेः प्रत्ययत्वादिनाऽनुपस्थितिदशायामपि तथाबोधानुभवादित्यलं भ्रान्तविचारेण।

अभेदसंसर्गकतद्बोधे च धातुप्रातिपदिकान्यतरजन्यैवोपस्थितिर्हेतुः। 'नीलो घटः' इत्यादौ च विशेषणविभक्तिः साधुत्वार्था। तथा च "अनभिहित" सूत्रे भाष्यम्—'कट एव कर्म, तत्सामानाधिकरण्याद्भीष्मादिभ्यो द्वितीया' इति। 'भीष्मादीनां स्वयमकर्मत्वेऽपि विशेष्यसम्बन्धिन्यैव विभक्त्या भाव्यम्, तदेकयोग-क्षेमत्वात्' इति **कैयटः**।

अत एव "पूरणगुण" [२।२।११] इति षष्ठीसमासनिषेधः सङ्गच्छते।

न चैवम् "घटो न पटः, चन्द्र इव मुखम्' इत्यादौ नञर्थभेदे इवार्थसादृश्ये च घटपटादेर्भेदेनान्वयो न स्यात्, नञाद्यर्थस्य च पटादौ तथान्वयो न स्यादिति वाच्यम्, भेदान्वये निपातप्रत्ययान्यतरजन्योपस्थितेस्तन्त्रतयाऽभेदबोधकार्यकारण-भावे निपातातिरिक्तत्वविशेषणदानेन चादोषात्।

न च समासातिरिक्तत्वविशेषणदानाद् ममापि न दोषः, गौरवापत्तेः, क्लृप्तलक्षणायां सम्बन्धिविषयकत्वकल्पनयैव निर्वाहाच्च। निपातानां द्योतकत्वनये घटपदस्य घटभिन्ने, चन्द्रपदस्य तत्सदृशे लक्षणया तत्राक्षतेश्च।

न च देवदत्तो घटमानयतीत्यत्र सति तात्पर्ये देवदत्तघटयोरभेदान्वयापत्ति-रिति वाच्यम्, विशेष्यतासम्बन्धेनाभेदसंसर्गकतन्नामार्थप्रकारकशाब्दबोधं प्रति तन्नामोत्तरसार्थकविभक्त्युपस्थित्यकालिकतन्नामसमभिव्याहृतपदजन्योपस्थितेः कारणत्वादक्षतेः। अत एव राज्ञः सुतस्य धनमित्यादौ न दोषः।

सार्थकत्वं च सङ्ख्यातिरिक्तार्थकृतं विवक्षितम्। तेन 'वेदाः प्रमाणम्' 'शतं विप्राः' इत्यादौ न क्षतिः। आद्ये एकजातीयप्रमाणत्वव्युत्पादनाय विभक्तेः प्रकृत्यर्थतावच्छेदकगतैकत्वार्थकत्वे, द्वितीये समुदायगततदर्थकत्वे च न क्षतिः।

[1]समानवचनत्वसमानलिङ्गत्वे च नाभेदान्वयबोधे तन्त्रम्, 'वेदाः प्रमाणम्' 'राज्ञः सुतस्य धनम्' 'शैत्यं हि यत्सा प्रकृतिर्जलस्य' इत्यादौ व्यभिचारात्।

यद्वा, तथा बोधं प्रति तन्नामसमभिव्याहृतनामजन्याविरुद्धरूपेणानुपस्थितिस्तन्त्रम्। प्रकृत्यर्थतावच्छेदकगतैकत्वञ्च व्यक्तिगतबहुत्वेन न विरुद्धमिति न दोषः।

अत एव व्यक्तिगतैकत्वाद्यभिप्रायेण प्रयुक्तान्नीलो घट इति वाक्याद् न तथाबोधः। विरोधश्च लिङ्गातिरिक्तकृतो ग्राह्यः। [2]"तेन तुल्यं क्रिया" [५।१।११५] इत्यादौ न दोषः। एवञ्चासति विशेषविधौ शिष्टप्रयोगे च समानाधिकरणविशेष्यबोधकपदयोः समानलिङ्गसमानवचनविभक्त्यन्तप्रयोग एव साधुः, नान्य इति बोध्यम्।

नामजन्योपस्थितिश्च विशेष्यत्वावच्छिन्नैव ग्राह्या। अतो घटो नित्य इत्यादौ लक्षणां विना न घटत्वे नित्याभेदान्वयः। अभेदश्चात्र तादात्म्यं स्ववृत्त्यसाधारणधर्मरूपम्।

एतेनाभेदो भेदत्वावच्छिन्नाभावश्चेत्, अप्रसिद्धिः, भेदप्रतियोगिकाभावश्चेद्वह्न्यादावपि द्वित्वादिना नीलभेदाभावस्य सत्त्वाद् वह्निर्नील इत्यादेरापत्तिरिति परास्तम् इत्याहुः।

न च प्रत्ययान्ततन्नामार्थप्रकारकाभेदातिरिक्तसंसर्गकबोधं प्रति तद्विहितप्रत्ययजन्योपस्थितेर्हेतुत्वान्न दोष इति वाच्यम्, 'दधि भुक्तम्' इत्यादौ सति तात्पर्ये प्रथमान्तदधिपदार्थस्य भोजने करणत्वेनान्वयापत्तेः। न च लुप्तप्रत्ययतयेदं प्रत्ययान्तमेव, प्रकृतेऽपि तुल्यत्वात्, गुरुतरकार्यकारणाभावापेक्षया सम्बन्धिनि लक्षणाया एव लघुत्वाच्च। अतः सम्बन्धिन्येव लक्षणा निरादीनाञ्च क्रान्ताद्यर्थे लक्षणास्वीकारान्न निष्कौशाम्ब्यादौ क्रान्तादीनां पृथक् प्रयोगः, [3]उक्तार्थत्वात्। सा च निरूढलक्षणा, नियततात्पर्यानुरोधात्। तेन लक्षणाया अभावे तथा प्रयोगापत्तिरिति निरस्तम्।

1. अत्र 'समानवचनत्वं समानलिङ्गत्वञ्च' इति पाठः समीचीनः। यथाश्रुतपाठे चस्य वैयर्थ्यं स्यात्।
2. अत्र 'तेन' इत्यतः पूर्वम् 'अत एव' इति 'तेन' इति वा पाठोऽपेक्ष्यते। अन्यथा परस्परमसम्बद्धत्वापत्तिः स्यात्।
3. 'उक्तार्थानामप्रयोगात्' इति नियमात्।

नन्वत्र पक्षे समासस्यानर्थक्यात् प्रातिपदिकत्वं न स्यादिति चेत्, न; अर्थवत्पदसामर्थ्येनार्थवाचकघटितसमुदायेऽनर्थकेऽपि तत्स्वीकारात्। अन्यथा 'अधातुः' इत्यादिपर्युदासेनार्थवत्त्वे लब्धे तद्वैयर्थ्यं स्पष्टमेव। अत एव प्रत्ययान्तपर्युदासश्चरितार्थः, 'बहुपटवः, शशश्रृङ्गम्' इत्यादौ दोषाभावश्च। पचतकीत्यादौ च प्रत्ययान्तत्वान्निषेधः, समासग्रहणस्य नियमार्थत्वाच्च वाक्ये न दोषः।

[2]यत्तु, सर्वत्र समासे उत्तरपदे लक्षणा प्रातिपदिकसंज्ञापि तस्यैवेति। तत्, न; तन्मात्रस्य प्रातिपादिकसंज्ञायां पूर्वपदोत्तरसुपोलुगनापत्तेः, उत्तरपदमात्रस्य प्रत्ययान्तत्वेन तदसम्भवाच्चेति दिक्।

कर्मधारये तु, अवयवशक्त्योपस्थापितपदार्थयोरभेदस्य संसर्गविधयैव मानसम्भवेन न शक्तिः, न वा लक्षणा। 'उपकुम्भम्' इत्याद्यव्ययीभावे समीपकुम्भादिपदानां लक्षणा। उपादिपदं तात्पर्यग्राहकम्। अतो धववन्तमानयेत्यादौ कर्मत्वाद्यन्वयवारणाय क्लृप्तया 'प्रत्ययानां सन्निहितपदार्थगतस्वार्थबोधकत्व'व्युत्पत्त्या विरोधो न। अत एव पाणिपादमित्यादिसमाहारद्वन्द्वेऽपि उत्तरपदस्य पाणिपादादिसमाहारे लक्षणा।

यत्तु, समुदाये लक्षणेति। तत्, न; तस्य शक्त्यभावात्। 'शक्यसम्बन्धो हि लक्षणा'। ननु [3]ज्ञाप्यसम्बन्ध एव लक्षणा, 'गभीरायां नद्यां घोषः' इत्याद्यनुरोधेन तस्या एवोचितत्वात्। तथाहि—न तावद् गभीरपदं तीरलक्षकम्, नद्यामित्यनन्वयापत्तेः, नहि तीरं नदी। अत एव न नदीपदेऽपि गभीरपदार्थानन्वयापत्तेः। न च पदद्वये प्रत्येकम्, विशिष्टनदीतीराप्राप्तिप्रसङ्गात्। न च नदीपदेन गभीरनदीतीरं लक्ष्यते, गभीरपदं तात्पर्यग्रहकमिति वाच्यम्, विनिगमनाविरहात्। न च 'प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्व'व्युत्पत्त्या नदीपद एव, न गभीरपदे, तद्विभक्तेः साधुत्वार्थत्वादिति वाच्यम्, नैयायिकैरभेदार्थकतया मीमांसकैश्च 'अरुणाधिकरण'न्यायेनार्थवत्त्वस्वीकारात्। गभीरपदे लक्षणायां

---

1. 'असति प्रयोजने शक्यार्थबाधप्रतिसन्धानपूर्वकतत्सम्बन्ध्यपरार्थबोधे निरूढा लक्षणा' यथा 'त्वचा ज्ञातम्' इत्यादौ त्वगादिशब्दानां त्वगिन्द्रिये लक्षणा। अत्र लक्षणायां किमपि प्रयोजनं नास्ति। परम्परैवात्र प्रमाणम्।
2. 'यत्तु' इत्यादिना नैयायिकमतं प्रदर्श्य प्रत्याचष्टे।
3. मीमांसकमतमुपस्थाप्य निराकरोति 'ननु' इत्यादिना।

तस्यैव विशेष्यत्वसम्भवाच्च। न च नदीपदस्य द्रव्यवाचकतया साक्षात्सम्बन्धानुरोधेन तत्रैव सेति वाच्यम्; गभीरपदस्यापि नित्यगुणिवाचकतया तेनापि साक्षात् सम्बन्धस्यैव सत्त्वात्। तस्माद्विनिगमनाविरहात् पदद्वयलक्षणायां गौरवात् लाघवेन समुदाये एव साङ्गीकार्या। अत एवार्थवादवाक्ये प्राशस्त्यलक्षणामाहुरिति चेत्, न; अपभ्रंशेऽपि लक्षणापत्तेः। तज्ज्ञाप्यस्य सत्त्वात्।

किञ्चैवं प्रत्येकं पदैर्वाक्येन च विनिगमनाविरहात् पदयोर्वाक्ये च तदापत्तावतिगौरवं स्यात्।

अपि च, 'ज्ञाप्यसम्बन्धः' इत्यस्य स्वनिष्ठज्ञापकतानिरूपितज्ञाप्यतावदर्थसम्बन्ध इत्यर्थः।

तत्र ज्ञापकत्वं किं वृत्त्यार्थबोधजनकत्वम्, उतार्थबोधजनकज्ञानविषयत्वमात्रम् ?

नाद्यः, वाक्ये लक्षणानापत्तेः। नान्त्यः, प्रत्येकवर्णानामप्यर्थवत्त्वापत्तौ विभक्त्याद्युत्पत्त्यापत्तिः। अपि च एवं सति पदघटिताप्यानुपूर्वी लक्षकतावच्छेदिका वाच्येत्यतिगौरवम्। मम तु वाक्ये तद्विरहाद् न सा तथेति लाघवम्। ज्ञाप्यसम्बन्धस्य लक्षणात्वे एतत्सम्बन्धिज्ञापकमिदमिति ज्ञानजन्योपस्थितिरेव लक्षणा, जन्येति पर्यवसितम्। तथा च समवायादिना घटादिपदज्ञाप्याकाशसम्बन्धिनोऽप्युपस्थितस्य शब्दबोधविषयतापत्तिरित्यपि वदन्ति।

तस्मात् 'शक्यसम्बन्धो लक्षणा' इत्येव युक्तम्। सा च न समुदाय इति स्पष्टमेव। समाहारस्य वादनकर्मत्वादिकं तु स्वाश्रयवृत्तित्वादिरूपपरम्परया बोध्यम्।

यद्वा, न तत्र समाहारः प्रतीयते, अतो न लक्षणा। एवञ्च साक्षादेव कर्मत्वम्। द्विवचनादिकं त्वनुशासनेनासाधुत्वबोधनाद् न। समाहारद्वन्द्वादिव्यवहारस्तु प्राण्यङ्गादिद्वन्द्वे एकवचनविधानात् समाहार इव द्वन्द्व एकवचननिमित्तत्वादिति गौणो बोध्यः। एवमितरेतरयोगेऽपि साहित्यविशिष्टयोर्लक्षणा। अत एव द्विवचनाद्यन्वयः। समाहारे तु साहित्यं विशेष्यमिति ततो भेदः।

यद्वा, नात्रापि लक्षणा, एकस्मृत्युपारूढपदद्वयात् स्वस्वशक्त्योपस्थितयोरर्थयोर्द्वित्वाद्यन्वयसम्भवात्, एकक्रियान्वयित्वरूपस्यैकबुद्ध्यवच्छिन्नत्वरूपस्य वा

[1]साहित्यस्य पश्चादेवागमेन पूर्वं लक्षणाया अनौचित्याच्च।

न च साहित्याभानेऽन्यतरस्यान्यतरक्रियान्वयविवक्षायां पश्य धवम्, खदिरं छिन्धीति वाक्यवत् पश्य धवखदिरौ छिन्धीति प्रयोगापत्तिरिति वाच्यम्, द्वित्वरूपैकधर्मावच्छिन्नस्यैकत्रान्वयस्यैवौचित्यात्। न च द्वित्वान्वययोग्यतावच्छेदकसाहित्यमन्तरेण द्वित्वान्वयो दुर्लभ इति वाच्यम्, योग्यतावच्छेदकोपस्थितेरनपेक्षणात्, उपस्थिते योग्य एव तदन्वयनियमात्। अत एव घटेन जलमाहरेत्यादौ छिद्रेतरस्यैव योग्यताबलेनान्वयः, न तु च्छिद्रेतरत्वप्रकारकशाब्दबोधः, प्रकृत्यर्थतावच्छेदकस्यैव द्वित्वच्छेदनाद्यन्वये योग्यतावच्छेदकत्वे क्षत्यभावाच्च।

ननु सङ्ख्यायामन्वयितावच्छेदकव्याप्यत्वविशिष्टपर्याप्त्या प्रकृत्यर्थेऽन्वयो वाच्यः, केवलपर्याप्त्या तदन्वये तु एकव्यक्तिपराकाशादिपदादपि द्विवचनापत्तेः, घटाकाशादौ द्वित्वादेः पर्याप्तिसत्त्वेन प्रत्येकमाकाशादौ तदभावस्य वक्तुमशक्य[2]त्वात्, प्रत्येकावृत्तेः समुदायावृत्तित्वात्।

न चैवमेको न द्वावित्यतो बोधानुपपत्तिः; एकस्मिन्नपि केवलपर्याप्तेः सत्त्वेन केवलपर्याप्तिसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकताकभेदस्य बोधयितुमशक्यत्वात्, एकत्वव्याप्यपर्याप्तिसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकताकभेदश्चाप्रसिद्ध एवेति वाच्यम्, द्वित्वादिपर्याप्तेरुभयादिवृत्तिधर्मावच्छेद्यत्वनियमेन तदनवच्छेदकैकमात्रवृत्तिधर्मावच्छेदेन तद्वद्भेदस्य तद्वति वृत्तौ बाधकाभावात्।

न चैवं पर्याप्त्यङ्गीकार एव व्यर्थः, अन्वयितावच्छेदकव्याप्यत्वविशिष्टसमवायस्यैव सम्बन्धत्वे क्षत्यभावादिति वाच्यम्, समवायस्यैकत्वनये घटनिष्ठद्वित्वादिसमवायस्य पटादावपि सत्त्वाद् घटत्वाव्याप्यत्वेन घटावित्यादिप्रयोगाणामप्रामाण्यापत्तेः। तस्य नानात्वे तु तादृशव्याप्यत्वविशिष्टतत्तत्सम्बन्ध एव पर्याप्तिरस्तु। न चैवमपि घटद्वयवृत्तिद्वित्वस्य घटत्वव्याप्यपर्याप्तिसम्बन्धेनैक-

1. एकधर्मावच्छिन्नस्य एकधर्मावच्छिन्नसंसर्गेण एकधर्मावच्छिन्नेऽन्वयः साहित्यम्। एकधर्मश्च समुदायत्वरूपः। एवञ्च 'ईश्वरं गुरुञ्च भजस्व' इति प्रयोगे ईश्वरस्य गुरोश्च ध्यानसेवनरूपविभिन्नक्रियायामन्वये साहित्यस्याभावात् समासाभावः।

एवम् 'भिक्षामट, गाञ्चानय' इत्यादौ भिक्षायाः कर्मतया 'अट' धात्वर्थक्रियायाम्; गोश्च कर्मतया 'आनयन' क्रियायाम् अन्वयेन तयोः समासः।

2. 'न हि प्रत्येकमपर्याप्तस्य समुदाये पर्याप्तिः' इति नियमादिति भावः।

घटेऽपि सत्त्वेनैकघटाभिप्रायेणापि घटाविति प्रयोगापत्तिरिति वाच्यम्, व्यासज्य-वृत्तिधर्मबोधकपदसमभिव्याहारस्यान्वयितावच्छेदकावच्छिन्नयावत्स्वाश्रयान्वयि-स्वार्थबोधकारणतया दोषाऽभावात्।

न च तत्समभिव्याहारस्य यावत्स्वाश्रयान्वयिस्वार्थबोधकत्वमेवाङ्गी-क्रियताम्, किं व्याप्यत्वनिवेशेन, किञ्च पर्याप्त्येति वाच्यम्, आकाशावत्रेति वाक्यात् योग्यताभ्रमदशायामेकव्यक्तिमात्रविषयद्वित्वाद्यन्वयबोधेन तथा कार्य-कारणभावस्य कल्पयितुमशक्यत्वाद् द्वित्वादेरेकत्ववादिमतेऽसम्भवाच्च।

एवञ्च धवखदिरौ छिन्धीत्यादौ साहित्यभानमावश्यकम्। अन्यथान्वयिता-वच्छेदकधवत्वखदिरत्वादिव्याप्यद्वित्वादिद्वयप्रतीत्यापत्तेः। तथा चैकैक-धवखदिरादितात्पर्येण तथाप्रयोगानुपपत्तिरिति चेत्, न; यत्रैकधर्मस्यान्वयि-तावच्छेदकता, तत्रैव तादृशपर्याप्तेः संसर्गतानियमः। यत्र त्वनेकधर्मस्यैव तथात्वम्, तत्र केवलपर्याप्तेस्तथा। समवायस्यैव वा तत्त्वाभ्युपगमाद् न दोषः। एषैव च पुष्पवन्तादिपदे गतिः, नहि तत्र साहित्यभाने मानमस्ति।

किञ्चैवमनङ्गीकारे साहित्यभानाङ्गीकारेऽपि अनुपपत्तितादवस्थ्यमेव। तथाहि—साहित्यान्वये प्रत्येकधर्मयोरेवान्वयितावच्छेदकतया तत्तद्व्याप्यसाहित्य-द्वयबोधापत्तिः। तस्मात् प्रागुक्तरीतिरेव शरणम्।

न चैवम् 'क्षौमे वसानावग्निमादधीयताम्' इत्यादौ समुच्चितयोरन्वयलाभो न स्यादिति वाच्यम्, 'यत्कर्तव्यम्, तदनया सह' इति वाक्यात् तत्सिद्धेः। यद्यपि द्वन्द्वे परस्परान्वयरूपव्यपेक्षासामर्थ्यं नास्ति, तथापि "चार्थे द्वन्द्वः" [२।२।२९] इति विधिसामर्थ्यात् समासः। समुच्चयान्वाचययोस्त्वनभिधानात् समासो नेति स्पष्टं भाष्ये।

यत्त्वेकस्यां क्रियायां कर्मत्वाद्येकरूपेणान्वयित्वं सामर्थ्यम्, 'कृतः सर्वो-मृत्तिकया' इत्यादिवारणायैकरूपेणेति। तत्, न; समर्थसूत्रे वाक्यभेदापत्तेः। न चैवं विभक्त्यर्थानन्वयः प्रत्ययानां प्रकृत्यर्थान्वयित्वव्युत्पत्तेः। अत्र च या प्रकृतिः, न तदर्थौ धवखदिरौ, यदर्थौ च तौ, तयोर्न प्रकृतित्वमिति वाच्यम्, प्रत्ययानां सन्नि-हितार्थबोधकत्वव्युत्पत्तेरेवाङ्गीकारात्। सन्निधानञ्चानुशासनिकम्। तथा च यदुत्तरं यः प्रत्ययोऽनुशिष्टः, स तद्घटकार्थगतस्वार्थबोधक इत्यर्थः।

अत्र च पदसमुदायाद् विभक्तिरनुशिष्टा। तत्र क्वचित् पूर्वपदार्थे, क्वचिदुत्तरपदार्थे, क्वचिदुभयत्रेत्यत्र योग्यतादिकं नियामकमिति 'अर्धपिप्पलीम्, राजपुरुषं पश्य' इत्यादौ न दोषः। एवं चित्रगुरित्यादिबहुव्रीहावपि अन्यपदार्थे उत्तरपदस्यैव लक्षणा।

न च गोपदेन गोस्वामिलक्षणायां तत्र चित्रान्वयो न स्यात्, [1]पदार्थैकदेशत्वादिति वाच्यम्, शक्यार्थयोरन्वयबोधोत्तरं लक्षणाभ्युपगमात्। चित्रपदस्य तात्पर्यग्राहकतया गोपदेनैव चित्रगोस्वामि[2]लक्षणाद्वा न दोषः। व्युत्पत्तिवैचित्र्यादेकदेशेनाप्यन्वयोऽत्र इत्यन्ये।

गोपदेन शक्या गौः, लक्षणया स्वामी, एकपदार्थयोरपि परस्परान्वयो व्युत्पत्तिवैचित्र्यादित्यपरे। एवञ्च न क्वापि विशिष्टशक्तेः, एकार्थीभावस्य वा आवश्यकत्वम्। एतदेवाभिप्रेत्य भगवता भाष्यकारेणोक्तम् 'परस्परव्यपेक्षां सामर्थ्यमेके इच्छन्ति' इति वदन्ति। अयमेव च पक्षो नैयायिकादिसम्मतः॥

अत्र वदन्ति—पङ्कजशब्दादावपि प्रत्ययादेः पद्मत्वविशिष्टे निरूढलक्षणयैवोपपत्तौ रूढिशक्त्युच्छेदापत्तिः, अवयवमवयवशक्तिञ्चाजानतोऽपि बोधात्, बाधादिप्रतिसन्धानं विनापि बोधाच्च, नियततात्पर्यानुरोधाच्च, प्रामाणिकानां शक्तिव्यवहाराच्च, सा सिध्यतीति चेत्, समं प्रकृतेऽपि।

किञ्च 'कण्ठे कालः' 'दास्याः पुत्रः' इत्यादौ लक्षणायां मानाभावेन सुन्दरे इत्यादिविशेषणान्वयापत्तिदुर्वारा, न च तत्रापि दासीपदस्य दासीसम्बन्धिनि लक्षणा, दासीसम्बन्धिसम्बन्धीति बोधापत्तेः। षष्ठ्यन्तस्य लक्षणा तु दुरुपपादा, शक्त्यभावात्। षष्ठ्याः सम्बन्धिनि लक्षणायामपि दासीपदार्थस्यैकदेशत्वं दुरुपपादम्।

अपि च 'पुरुषो राजसम्बन्धी' 'भार्यासम्बन्धी च' इतिवद् राजपुरुषो भार्यासम्बन्धीत्यस्य राजसम्बन्धी पुरुषोऽश्वश्चेतिवद् राजपुरुषोऽश्वश्चेत्यस्य चापत्तिः। समासे भिन्नैव व्युत्पत्तिरिति चेत्, सिद्ध एकार्थीभावः।

अपि च कमण्डलुपाणिं छात्रमद्राक्षीदित्यत्र कमण्डलुशब्दात् "इत्थम्भूतलक्षणे" [२।३।२१] इति तृतीयापत्तिः, न च "सुपो धातुप्रातिपदिकयोः"

---

1. 'पदार्थः पदार्थेनान्वेति, न तु पदार्थैकदेशेन' इति व्युत्पत्तिरिति भावः।
2. 'चित्रगोस्वामिनो लक्षणीयत्वाद्वा' इति पाठः समीचीनः प्रतिभाति।

[२।४।७१] इति लुक्, समासोत्तरं जायमानत्वेन प्रातिपदिकानवयवत्वात्, 'तन्मध्यपतित'न्यायात् तद्ग्रहणेन ग्रहणेऽपि तदवयत्वे मानाभावात्, 'लक्ष्ये लक्षणस्य' इति न्यायाच्चेति स्पष्टम् "इत्थम्भूतलक्षणे" सूत्रे भाष्यकैयटयोः।

अपि च कृत्तद्धितसमासादिसाधारण[1]वृत्तिलक्षणस्य त्वन्मते दुर्वचत्वम्, पूर्वोक्तसामर्थ्यवत् समुदायत्वस्य वाक्येऽति प्रसक्तत्वात्। [2]अन्यतमत्वस्य गुरुतरत्वाच्च। मम तु एकार्थीभाववत् समुदायत्वं सुवचमेव।

किञ्च, समानार्थकवाक्यस्यानिवृत्तये वा वचनारम्भे तव गौरवम्। न च लक्षणया प्रयोगे समासः, अन्यथा वाक्यमिति व्यवस्थायाः सम्भवात् ममापि तदनावश्यकम्, कर्मधारये लक्षणाया अभावात्। मम त्वेकार्थीभावे वृत्तिः, अन्यथा वाक्यमिति न्यायसिद्धार्थकथनं तत्।

अपि च, 'वाप्यश्वः' इत्यादौ प्रगृह्यत्वापत्तिः। न चात्र वापीपदस्य तदधिकरणके लक्षणासत्त्वेन सप्तम्यर्थमात्रपर्यवसन्नत्वाभाव इति न दोष इति वाच्यम्, 'सोमो गौरी अधिश्रितः' इत्यादावप्यनापत्तेः। तत्रापि विभक्तिलुकः सत्त्वेन नामार्थयोरन्वयानुरोधाद् गौरीपदस्य गौर्यधिकरणके लक्षणायास्तुल्यत्वात्। मम तु न दोषः, इतरासंसृष्टत्वेनोपस्थितिजनकत्वरूपसप्तम्यर्थमात्रपर्यवसन्नत्वाभावात्।

इदमेवाभिप्रेत्य 'अजहत्स्वार्थायाञ्च न दोषः समुदायार्थोऽभिधीयते' इति भाष्ये उक्तम्।

एतेन जहत्स्वार्थतैवैकार्थीभावः, अजहत्स्वार्था च व्यपेक्षैव, "ईदूतौ" [१।१।१९] इति सूत्रस्थमिदं भाष्यञ्च व्यपेक्षावाद एवेत्यपास्तम्।

अपि च, 'ऋद्धस्य देवस्य पुरुषः' इति वाक्यवत् कर्मधारयघटितऋद्धदेवस्य पुरुष इत्यादेर्विशिष्टस्य वैशिष्टचमिति विषयताशालिबोध इव विशेष्ये विशेषणम्। तत्र च विशेषणान्तरमिति विषयताशालिबोधेऽपि साधुत्वापत्तिः। मम तु न दोषः, ऋद्धैकार्थीभूतस्य तद्वैशिष्ट्यस्यैवेतरान्वयात्।

---

1. कृत्तद्धितैकशेषसनाद्यन्तधातुरूपपञ्चवृत्त्यन्यतमत्वरूपवृत्तित्वलक्षणस्येत्यर्थः।
2. तदभिन्नाभिन्नत्वमन्यतमत्वम्। एवञ्च भेदप्रतियोगितया निखिलस्य वस्तुजातस्य प्रवेशाद् गौरवमिति भावः।

किञ्च, समुदायस्यार्थवत्त्वाभावात् प्रातिपदिकसञ्ज्ञा दुरुपपादा। प्रागुक्तप्रकाराश्रयेण [1]तूत्तरसूत्रे तदन्तविधिलाभो न स्यात्। मम त्वर्थवत्पदानुवृत्तिसामर्थ्यात् तल्लाभ इति स्पष्टमाकरे। तव तु, तदनुवृत्तावपि कृत्तद्धितयोरेवार्थवत्त्वेन विपरीतो दोष एव स्यात्।

किञ्च, 'पूर्वशालाप्रियः' इत्यादिघटकपूर्वशालाशब्दे प्रातिपदिकत्वापत्तिः। पराङ्गवद्भावे तु न दोषः, तन्निमित्तग्रहणादेव ऋतेनेत्यादेः पराङ्गवद्भाववारणात्। मित्रावरुणावित्यादेस्तु छान्दसत्वात् स बोध्यः।

यद्वा, ऋतकर्मकवर्धनकर्तृत्वात् तयोस्तन्निमित्तत्वमप्यस्त्येव। अत एव "सुबामन्त्रित" [२।१।२] इति सूत्रे 'सुबिति किमर्थम्? करोष्यटयन। नैतदस्ति। असामर्थ्यादत्र न भविष्यति। नैष दोषः। 'समानाधिकरणमसमर्थवत्' इत्यस्य 'अधात्वभिहितम्' इत्येवं निषेधात्' इत्युक्त्वा षष्ठचन्तमामन्त्रितार्थं प्रति यत्कारकञ्च, तदेव पाराङ्गवद्भवतीत्यर्थकम् 'षष्ठचामन्त्रितकारकवचनं वा कर्तव्यम्' तन्निमित्तग्रहणं वा कार्यम्। 'मद्राणां राजन्, परशुना वृश्चन्' इत्यत्रैव यथा स्यात्, क्षत्रेणाग्ने स्वायुः संरभस्व, मित्रेणाग्ने मित्रधेये यतस्व' इत्यादौ 'क्षत्रेण मित्रेण' इत्यनयोर्मा भूद्' इति भाष्योक्तं सङ्गच्छते, समर्थपरिभाषोपस्थाने हि असामर्थ्याद् एवाप्राप्तौ भाष्यासङ्गतिः स्पष्टैव॥

यत्तु; कैयटेन क्षत्रेणेत्यादौ [2]'क्रियाद्वारकं व्यपेक्षालक्षणं सामर्थ्यमस्ति' इत्युक्तम्। तत्, न; व्यपेक्षावादे 'कृतः सर्वो मृत्तिकया' इत्यादौ समासापत्तेः। एवञ्च भो देवदत्त, भगो देवदत्त' इत्यादौ भोशब्दादेः पराङ्गत्वं न भवत्येव। यद्यपि भाष्ये वचनद्वयमारब्धम्, तथापि तन्निमित्तग्रहणमेव ज्यायः, 'गोषु स्वामिन्' इत्यत्रापि पराङ्गवद्भावासिद्धेः। अत एव 'वस्त्रं राज्ञः पुरुषागच्छ' इत्यादौ न पराङ्गवत्त्वम्। वेदभाष्यं तु फणिभाष्यविरोधादनादेयमेवेति दिक्।

यत्तु, 'राजपुरुषः' इत्यादौ पूर्वपदे सम्बन्धिनि लक्षणास्वीकारे कर्मधारयत्वापत्तिः, समानाधिकरणतत्पुरुषत्वस्यैव तत्त्वात्। न च समासपूर्वदशायां यत्राभेदान्वयः, तत्र कर्मधारयः, यत्र भेदेन, तत्र तत्पुरुषमात्रमिति वाच्यम्,

---

1. **"कृत्तद्धितसमासाश्च" इति सूत्र इत्यर्थः।**
2. **'क्रियाद्वारकं तु व्यपेक्षालक्षणं सामर्थ्यमस्तीति स्यात् पराङ्गवद्भावः। इह वचनेनातिप्रसङ्गे निरस्ते पूर्वसूत्र एकार्थीभाव एव सामर्थ्यमाश्रितम्। अन्यथा तु द्विविधमपि सामर्थ्यमाश्रीयेत' इत्येवमानुपूर्वीकः कैयटग्रन्थः।**

नित्यसमासे विग्रहशून्यत्वेन तादृशतत्पुरुषकर्मधारययोरव्याप्तेः, अलौकिकविग्रहस्य सत्त्वेऽपि तस्यान्वयबोधे स्वरूपायोग्यत्वात्।

न च समासात्पूर्वं यत्र तुल्यविभक्तित्वम्, तत्रैव कर्मधारयत्वम्, नान्यत्रेति वाच्यम्, पूर्वावस्थाया असमासार्थविवक्षानुसारेणैव कल्प्यतया तव समासवाक्ये बोधाविशेषेण तद्वैलक्षण्यकल्पनस्याप्यसम्भवादिति। तत्, न; यत्र समासघटक-पदार्थस्य विशेष्यत्वे सति तद्घटकीभूतपदानां स्वोत्तरमुत्पत्तियोग्यविभक्त्यर्थ-वदन्तर्भावेण लक्षणां विना सामानाधिकरण्यम्, तत्र कर्मधारयत्वम्, तदन्तर्भावेण लक्षणया सामानाधिकरण्ये त्वन्य इति विभागसम्भवात्। सत्यन्तेन 'पञ्चमूली' इत्यादिव्यावृत्तिः।

यदपि 'ओदनः पचति' इत्यादिवारणाय 'प्रातिपदिकार्थप्रकारकबोधमात्रं प्रति सुप्जन्योपस्थितिर्हेतुः' इत्येव कार्यकारणभावो लाघवात्, न त्वभेदातिरिक्त-संसर्गेणेत्यादिनिवेशः। नीलं घटमानयेत्यादौ च प्रत्येकं विशेषणविशेष्ययोर्द्वयोरपि भावनायामन्वयः, पार्ष्णिकस्त्वभेदान्वयः। तदुक्तं भाष्ये 'कटोऽपि कर्म, भीष्मा-दयोऽपि' इति।

नन्वत्र परमेण कारकेण कृतमित्यर्थे परिनिष्ठितविभक्त्या समासानुपपत्तिः, असामर्थ्यात्। पार्ष्णिकाभेदान्वयमादाय सामर्थ्यमिति चेत्, अलौकिके तत्कल्पने क्रियान्वयनिमित्तविभक्तेरपगमापत्तिः, निमित्तापगमादिति चेत्, न; समानाधि-करणप्रकरणे समासविधायकशास्त्रप्रामाण्येन निमित्तापायेऽपि नैमित्तिक-स्थितिस्वीकारात्।

चैत्रः पचति, नीलो घटः, स्तोकं पचतीत्यादौ प्रथमादेरभेद एवार्थः। न चाभेदस्य संसर्गतया भानोपपत्तौ विभक्तेर्वृत्तिकल्पने गौरवमिति वाच्यम्, यत्राभेदे विशेषणविभक्तेर्लक्षणा, तत्र नीलो घट इति वाक्याद्भेदप्रकारकबोधस्या-व्युत्पत्त्या तादृशसमभिव्याहारज्ञानस्य द्विविधबोधहेतुत्वकल्पनापेक्षया वृत्तिकल्पनस्य लघुत्वात्।

न चैवमेतन्मते 'घटो न नीलः' इति वाक्यान्नीलाभेदाभावप्रतीतिरेव स्यात्, न तु नीलभेदप्रतीतिः, यादृशसमभिव्याहारान्नञः सत्त्वे धर्मिणि येन सम्बन्धेन यद्वत्त्वं प्रतीयते, तादृशसमभिव्याहारस्थले नञा तत्र धर्मिणि तत्सम्बन्धावच्छिन्न-प्रतियोगिताकतदभावबोधस्यैव व्युत्पत्तिसिद्धत्वादिति वाच्यम्, इष्टापत्तेः। नीलभेद-

प्रतीतिस्त्वार्थ्यैव। [1]अभेदाभावस्य प्रतियोगिस्वरूपत्वाच्च। समनियताभावानामैक्येन भूतले घटो नास्तीत्यादौ घटकर्तृकसत्ताभावप्रतीतौ घटाभावप्रतीतेरिव तत्प्रतीतेरुपपत्तेश्च।

एवञ्च विभक्त्यर्थमद्वारीकृत्य प्रातिपदिकार्थस्यान्वयाभावाद्राजसम्बन्ध्यभिन्नः पुरुषः इत्याद्यन्वयानुपपत्तिस्तदवस्थैवेति। तदपि न, तद् दधि तिष्ठतीत्यादावन्वयानापत्तेः। न च [2]लुप्तस्मरणात् तत्र बोधः, लुकमजानतो बोधानापत्तेः। न च तत्र दध्नो न नामत्वमिति चेत्, राज्ञोऽपि सुपो लुप्तत्वेनातथात्वमिति तुल्यम्।

न च दधिपदस्य दधिकर्मके लक्षणाग्रहदशायामपि तस्य द्वितीयेतरविभक्त्यन्तत्वभ्रमदशायां दधिकर्मकदर्शनान्वयबोधानुदयाद् द्वितीयान्तदध्यादिपदसमभिव्याहृतपश्यादिसमभिव्याहारस्य हेतुत्वावश्यकत्वेन लुप्तद्वितीयानुसन्धानस्यावश्यकत्वमिति वाच्यम्, राजपुरुष इत्यादावपि षष्ठ्यतिरिक्तविभक्त्यन्तपदघटितसमासत्वभ्रमदशायां राजसम्बन्धिपुरुष इति बोधानुदयेन तत्रापि लुप्तषष्ठ्यनुसन्धानस्यावश्यकत्वात्। तात्पर्यादिज्ञानकारणतया निर्वाहे तु सममस्माकमिति दिक्।

अपि च, नीलो द्रव्यञ्च घट इत्यादाविव कर्मधारये नीलघटो द्रव्यमित्यादावपि घटे धर्मिण्येकत्र द्वयमिति न्यायेन नीलद्रव्ययोस्तादात्म्येनान्वयापत्तिः। न च नामार्थस्य तादात्म्यावच्छिन्नविधेयतया बोधे प्रथमान्तपदजन्योपस्थितिर्हेतुरिति न दोष इति वाच्यम्, दधि द्रव्यमित्यादावपि तथाबोधानापत्तेः। लुप्तप्रथमया प्रथमान्तत्वं तु प्रकृतेऽपि समानम्। समासे उद्देश्यविधेयभावेनान्वयस्य दूषयिष्यमाणत्वेन नीलपदार्थस्येव तस्यापि शुद्धप्रकारतया तेन न्यायेनान्वयस्य दुर्वारत्वाच्च।

अपि च 'पण्डितो ब्राह्मणः, पाचकः, पाठकः' इतिवत् पण्डितब्राह्मणः, पाचकपाठक इत्यादावुद्देश्यविधेयभावेनान्वयवारणायैकार्थीभाव आवश्यकः। सति हि तस्मिन् घटपटात् घटघटत्वयोरिवेतरसंसृष्टस्वार्थस्यैवोपस्थित्या तथान्वयनियामिकायाः पृथगुपस्थितेरभावान्न दोषः। अत एव 'वषट्कर्त्तुः प्रथमभक्षः'

1. अत्यन्ताभावाभावस्य प्रतियोगिरूपत्वम्, भेदाभावाभावस्य च प्रतियोगितावच्छेदकरूपत्वमिति सिद्धान्तः सर्वैरपि स्वीक्रियते। अत्र च ग्रन्थकृता अभेदाभावस्य प्रतियोगिरूपत्वं स्वीकृतमिति तृतीयः कश्चन पन्थाः।
2. लुप्तविभक्तेः स्मरणादित्यर्थः।

इत्यत्र वषट्कर्तृविशिष्टभक्षानुवादेन प्राथम्यविधानापत्तिमाशङ्क्य 'प्रथमभक्षः' इति समस्तमेकं पदम्। तत्रैकप्रसरत्वान्नैकांशेन वषट्कर्तृविशिष्टभक्षणमुद्दिश्य अपरांशेन प्राथम्यविधानं युक्तम्, तथा सति प्रसारभेदात् सामर्थ्यविघातात् समासो न स्यात्। एतेन केवलभक्षानुवादेन प्राथम्यं विधीयत इत्यप्यपास्तम्।

न च [1]सविशेषणत्वाद् वृत्तिर्न स्यात्, प्रधानस्य सत्त्वेऽपि क्षत्यभावात्। तस्माद्भक्षान्तरविधिरयमिति मीमांसकाः।

न चात्र पक्षे उद्देश्यतागमकस्य प्राथम्ययद्वृत्तयोगादेः, विधेयताबोधकपश्चात्तद्वृत्तयोगादेश्चाभावेन कथं तथान्वयापादनमिति वाच्यम्, 'प्रथमो भक्षः, पण्डितो ब्राह्मणः' इत्यादावपि तथाबोधदर्शनेन तस्य व्यभिचरितत्वात्। तस्मात् तथान्वयबोधे उद्देश्यवाचकसमभिव्याहृततदसंसृष्टार्थबोधकविधेयवाचकपदजन्योपस्थितिरेव तन्त्रम्।

एतेन विशेष्यतयोपस्थितिर्विधेयत्वे नियामिकेत्यपि परास्तम्, पदाद्विशेष्यतयैवोपस्थितेश्च।

यत्तु, आलङ्कारिकैरुद्देश्यानन्तर्याभावेऽपि विधेयाविमर्श उक्तः 'न्यक्कारोऽयम्' इत्यादौ, तत्र न विधेयत्वाप्रतीतिर्दूषकताबीजम्, किन्तु विपरीतानुपूर्वीप्रतिसन्धानपूर्वकं बिलम्बेन तथाप्रतीतिरेव। अविलम्बिता प्रतीतिर्हि काव्ये उद्देश्या। ध्वनितञ्चेदं वृद्धिसंज्ञासूत्रस्थभाष्यकैयटकौस्तुभादिषु।

वस्तुतस्तत्रोत्सर्गपरित्यागेन सहृदयोद्वेगमात्रं तथेत्यन्यत्र विस्तरः।

न च तथा शाब्दबोधं प्रति उद्देश्यविधेयवाचकघटितैकसमस्तपदभिन्नपदजन्योपस्थितिर्हेतुरिति पूर्वोक्ते 'पीतवासाश्चतुर्भुजः' इत्यादौ च न दोष इति वाच्यम्, सकलवृत्तिभेदघटितगुरुतरकार्यकारणभावकल्पनापेक्षयैकार्थीभावस्वीकारस्य लघुत्वात्।

न चैवम् 'सप्तदशारत्निर्वाजपेयस्य यूपो भवति', 'लोहितोष्णीषा ऋत्विजः प्रचरन्ति', यद्यपि 'चतुरवत्तो यजमानः पञ्चावत्तंव् वया कार्या' इत्यादौ वाजपेययूपारत्निमुष्णीषवन्तं चानूद्य सप्तदशत्वलौहित्यपञ्चत्वानां विधानं न स्यादिति वाच्यम्, अत्र यूपारत्न्युष्णीषावत्तानामतिदेशप्राप्ततयाऽतिदेशादुपदेशस्य बलवत्त्वेन

---

1. 'सविशेषणानां वृत्तिर्न, वृत्तस्य च विशेषणयोगो न' इति नियमाद् वृत्तिर्नेत्यर्थः।

तत्प्रवृत्तेः। पूर्वमेतैर्विशिष्टविध्यङ्गीकारेणाक्षतेः। तत्पर्यालोचनायां तु लौहित्यमात्रस्य तात्पर्यं गम्यत इति तावन्मात्रविधित्वव्यवहारः।

न चैवमनया रीत्या प्रथमभक्ष इत्यत्रापि भक्षान्तरविधिर्न स्यादिति वाच्यम्, तत्रोभयोरप्युपदेशेन तथा वक्तुमशक्यत्वादित्याहुः।

यत्तु, कर्मधारयेऽप्युत्तरपदलक्षणयैव विशिष्टार्थोपस्थितेर्नोद्देश्यविधेयभावेनान्वय इति, तत्, न; षष्ठीतत्पुरुषात् कर्मधारयस्य बलवत्त्वानापत्तेः। एतेन कर्मधारये एकार्थीभावो नावश्यक इति परास्तमिति दिक्।

अपि च, एवं द्वन्द्वसमासे 'सुन्दरं घटं पटं च' इत्यादौ सुन्दरमित्यादिविशेषणवद् द्वन्द्वसमासे तद्वारणायैकार्थीभाव आवश्यकः।

किञ्च, विग्रह इव द्वन्द्वेऽपि च शब्दप्रयोगापत्तिः। अत एव समर्थसूत्रे भाष्ये 'वाक्ये यथा स्वचयोगः—राज्ञो गौश्चाश्वश्च पुरुषश्चेति। यथा च स्वामित्वयोगः—देवदत्तस्य च यज्ञदत्तस्य च गौरिति। तथा न समासे राज्ञो गवाश्वपुरुषा इति देवदत्तयज्ञदत्तयोर्गौरितीत्युक्तम्।

न चैकक्रियान्वयित्वरूपसाहित्यस्य पश्चादेवावगमनेन तत्र शब्दस्य वृत्तिरिति वाच्यम्, एकरूपेणैकक्रियान्वयित्वादिसमनियतसमस्यमानपदार्थपर्याप्तपदार्थान्तरभूतसाहित्यभानानुभवानुरोधेन वृत्तेरावश्यकत्वात्। अत एव "चार्थे द्वन्द्वः"[२।२।२९] इत्यनुशासनेन तदर्थे समासविधानं सङ्गच्छते।

न च पदार्थानां वस्तुगत्यैकक्रियाद्यन्वयित्वरूपसाहित्ये सति द्वन्द्व इति तस्यार्थः, न तु तच्छक्तिग्राहकमिति वाच्यम्, एकक्रियान्वयित्वे च शब्दशक्त्यभावात्, क्रियाया वारद्वयं बोधापत्तेश्च। "अनेकमन्यपदार्थे"[२।२।२४]इति साहचर्येण शक्तिग्राहकताया एवौचित्याच्च साहित्याभाने द्वन्द्वस्थले समुदितस्य देवतात्वानापत्तेश्च। साहित्यविषयकबोध एव द्वन्द्वसाधुताया भाष्यकारादिभिरङ्गीकाराच्च।

किञ्च, द्वन्द्वविग्रहवाक्येऽपि नियमेन च शब्दप्रयोगानापत्तिः, एकक्रियान्वयित्वस्य द्वन्द्वे इव तत्र पश्चादेवावगम्यमानत्वात्। न चैकक्रियान्वये स तात्पर्यग्राहकः 'अहरहर्नयमानो गामश्वं पुरुषं पशुम्' इत्यादौ तदभावेऽप्येकक्रियान्वयदर्शनात्।

अथ तत्र साहित्यम् 'च'शब्दार्थः, तर्हि वृत्तिविग्रहयोस्तुल्यार्थत्वनिर्वाहाय समासेऽपि साहित्यभानमावश्यकम् ।

किञ्च, 'पश्य धवं खदिरं छिन्धि' इति वाक्यवत् 'पश्य धवखदिरं छिन्धि' इति प्रयोगापत्तिः ।

किञ्च, 'देवदत्तयज्ञदत्तौ पचतः' इत्यादावाख्यातोपात्तद्वित्वान्वयेऽन्वयितावच्छेदकलाभाय साहित्यभानमावश्यकम् । न च सुबुपात्तद्वित्वमेव तथा, 'चैत्रो मैत्रश्च गच्छतः' इत्यादौ द्विवचनाभावेनानन्वयापत्तेः । न च शब्द एव तद्बोधकः, कोशभाष्यादावनुक्तत्वात् । चार्थे द्वन्द्वविधानेन द्वन्द्वोत्तरञ्च शब्दस्येव द्विवचनस्याप्यनापत्तेश्च ।

किञ्च, 'देवदत्तो यज्ञदत्तश्च पचति, देवदत्तश्च यज्ञदत्तश्च पचतः' इत्येकवचनद्विवचनव्यवस्थार्थमितेरतरयोगे तद्भानमावश्यकम् ।

अपि च, सुबुपात्तद्वित्वाद्यन्वयेऽन्वयितावच्छेदकलाभाय साहित्यभानमावश्यकम् ।

यत्तु उक्तम्— नानाधर्माणामन्वयितावच्छेदकत्वे केवलपर्याप्तेरेव संसर्गत्वमिति । तत्, न; कालाकाशपदयोर्द्वन्द्वे बहुवचनस्य साधुतापत्तेः । कालाकाशघटनिष्ठबहुत्वस्य शुद्धपर्याप्त्या कालाकाशयोरपि सत्त्वात् । अन्वयितावच्छेदकव्याप्यपर्याप्तेः संसर्गत्वे त्वन्वयितावच्छेदकप्रत्येकधर्मव्याप्याया द्वित्वादिपर्याप्तेरप्रसिद्ध्या द्विवचनस्याप्यनापत्तेः ।

न च नानाधर्मस्यान्वयितावच्छेदकत्वे यावत् स्वाश्रयान्वयित्वव्युत्पत्तेर्न तथाप्रयोग इति वाच्यम्, 'कालाकाशौ' इत्यतो योग्यताभ्रमदशायां व्यक्तिद्वयमात्रविषयकबहुत्वबोधदर्शनेन तस्याः कल्पयितुमशक्यत्वाद्, [1]द्वित्वादेरेकत्वमतेऽसम्भवाच्च । साहित्याभाने तु न दोषः, अन्वयितावच्छेदकव्याप्यत्वविशिष्टपर्याप्तेः संसर्गत्वाभ्युपगमात् ।

न च साहित्यान्वयेऽपि दुरवस्थैवेति वाच्यम्, धर्मिग्राहकमानेन साहित्ये यावत्स्वाश्रयान्वयित्वस्यैवाङ्गीकारात् पुष्पवन्तादिपदेऽपि साहित्यमेवान्वयिता-

1. 'अयमेकः, अयमेकः;' इत्याद्यपेक्षाबुद्धिजन्या द्वित्वादिसंख्या नास्ति, किन्तु संख्यात्वव्याप्यः परिच्छेदकः कश्चन धर्मविशेषः । स चैक एवेति वादिनां मत इत्यर्थः ।

वच्छेदकम् । इदमेवाभिप्रेत्य 'एकयोक्त्या पुष्पवन्तौ दिवाकरनिशाकरौ' इत्यमरः । एकयोक्त्येत्यस्यैकशक्यतावच्छेदकप्रकारेणेत्यर्थः ।

यत्तु, पुष्पवन्तपदं चन्द्रे सूर्ये च शक्तमित्याकारः शक्तिग्रहः, तत्कार्यतावच्छेदकञ्च चन्द्रत्वप्रकारकत्वे सति सूर्यत्वप्रकारकस्मृतित्वं तादृशशाब्दत्वञ्च, चन्द्रसूर्योभयनिष्ठाया एव तस्याः शक्तेश्चन्द्रत्वसूर्यत्वयोर्व्यासज्यवृत्त्यवच्छेदकतास्वीकारात् केवलसूर्यत्वादिप्रकारकबोधे च केवलतद्धर्मे शक्यतावच्छेदकतापर्याप्त्यवगाहिज्ञानस्य हेतुत्वात् । उभयत्र शक्यतावच्छेदकतापर्याप्त्यवगाहिज्ञानस्य चोभयप्रकारकबुद्धित्वमेव कार्यतावच्छेदकम्, अतो न तत एकतरमात्रबोधः । नानार्थपदे च प्रत्येकधर्मावच्छिन्नस्यापि प्रतीत्या प्रत्येकं धर्मे एवावच्छेदकतापर्याप्तेः सत्त्वेन न दोष इति । तत्, न; अवच्छेदकताया एकधर्मिनिष्ठैकविशेष्यतानिरूपितविशेषणतापन्नेषु नानाधर्मेष्वेव पर्याप्तिस्वीकारेणात्र तदभावात् प्रकृते चन्द्रसूर्ययोर्भेदेन तन्निष्ठविशेष्यताया ऐक्यासम्भवात् ।

यदि तु—यत्र नानाधर्मान् धर्मितावच्छेदकीकृत्य व्यासज्यवृत्तिधर्मान्तरभानम्, तत्र विभिन्नधर्मिविशेषणेष्वपि नानाधर्मेष्ववच्छेदकतापर्याप्तिरावश्यकी । यथा 'घटपटौ न स्तः' इत्यत्र उभयत्वावच्छिन्नाभावप्रतीतौ घटत्वपटत्वयोस्तादृशाभावप्रतियोगितावच्छेदकतापर्याप्तिरिति विभाव्यते, तर्हि प्रकृतेऽपि साहित्यविशिष्टे शक्तिरावश्यकी । तत्र साहित्यं शक्यतावच्छेदकमेव, न शक्यमित्यादि नामार्थोक्तरीत्यानुसन्धेयम् ।

न च 'घटपटौ न स्तः' इत्यत्रोभयत्वमेव प्रतियोगितावच्छेदकम्, न तु घटत्वादीति वाच्यम्, यत्किञ्चिदुभयवति तादृशप्रतीत्यनापत्तेरिति दिक् ।

यदपि, पुष्पवन्तादिपदजनानार्थानुभवे तत्पदज्ञाने नानार्थानुभवजनकत्वनिश्चयः कारणम्, एकमात्रानुभवे च प्रतिबन्धकः, अतो न दोषः । अत एव तादृशनिश्चयविरहिणः कदाचिच्छक्त्याप्येकमात्रबोधः, उभयधर्मावच्छिन्ने शक्तिग्रहेऽप्युद्बोधकवशादेकधर्मावच्छिन्नमात्रस्मृतिसम्भवादुभयधर्मावच्छिन्नस्मृतावपि योग्यतावशादेकधर्मावच्छिन्नस्यैव शाब्दबोधसम्भवाच्चेति ।

तदपि न, बोधकतातिरिक्तशक्त्यभावस्य निर्णीतत्वात् । एकधर्मावच्छिन्नबोधकत्वग्रहवतस्तथाबोधेऽपि कोशादिविरोधाद् न तत्र साधुत्वम् । यथा स्त्र्यर्थकदारशब्दस्यैकवचनादौ ।

वस्तुतस्तु पुष्पवन्तपदं चन्द्रत्वसूर्यत्वोभयप्रकारकबोधजनकमित्येव तत्र शक्तिग्रह इति नैकतरमात्रबोधस्ततः। एकयोक्त्या इत्यस्य चैकया शक्त्या इत्यर्थः। 'पुष्पवन्तौ' इत्यस्य च पुष्पवन्तपदप्रतिपाद्यावित्यर्थः।

यद्वा—एकयोक्त्येत्यस्यैकोच्चारणेनेत्यर्थः। नानार्थस्थले तु नावृत्तिमन्तरेण नानार्थबोधः। प्रकृते तु शक्त्यैक्यात् सकृदुच्चारितात् सकृदेवार्थद्वयप्रत्यय इत्यन्यत्र विस्तरः।

यत्तु, एकबुद्धिविषयत्वमेव चार्थ इति। तत्, न; तस्यापि पश्चाद् ग्रहात्, तत्प्रकारकबोधस्यानुभवविरुद्धत्वाच्च, घटः कर्त्तेत्यत्र द्वन्द्वापत्तेश्च। बुद्धिविशेषविषयत्वं तथेति चेत्, अननुगतत्वेनानन्तशक्त्यापत्तेः।

एतेन भेदश्चार्थ इत्यप्यपास्तम्, तस्य केवलान्वयित्वेनाव्यावर्त्तकतया चार्थ इत्यस्य वैयर्थ्यापत्तेश्च।

न च कर्मधारयविषये द्वन्द्ववारणार्थं तत्, 'ग्रामं गतः' इत्यादौ द्वितीयातत्पुरुषेणेव तेनापि बाधसम्भवात्। अन्यथा द्वितीयातत्पुरुषविषये भेदस्य सत्त्वेन द्वन्द्वो दुर्निवारः स्यात्। चार्थः साहित्यम्, परं भिन्नानामेवेत्यन्यदेतत्। तस्मात् साहित्यविषयकबोधार्थं तदिति तत्त्वम्।

साहित्यञ्चैककालिकैकदेशिकैकक्रियाकर्तृत्वादिसमनियतम्, एकरूपेणैककालिकैकपदोपस्थाप्यक्रियान्वयित्वसमनियतञ्च पदार्थान्तरमेव। अत एव सहिताभ्यां कृतम्, सहितौ दृष्टौ, सहितेभ्यो दत्तम्, सहितयोरन्वय इत्यादिव्यवहारः सङ्गच्छते। द्वन्द्वे त्वविशेषात् सर्वं भासते। अत एव द्वन्द्वे साहित्यावगमादेकं देवतात्वमिति मीमांसका व्यवजह्रुः।

यत्र तु पूर्वस्य बाधः, यथा धवखदिरौ छिन्धीत्यादौ, तत्र द्वितीयमेव भासते। आद्यस्यापि चैककालिकत्वरहितस्यैकजातीयक्रियाकर्मत्वसमनियतस्य भानम्।

'पित्रोः श्राद्धं कुर्यात्' इत्यादौ तु शास्त्रस्याल्पविषयतापत्तिबाधकादुद्देश्यविशेषणत्वाद् बाधस्य त्यागः। एकक्रियान्वयित्वसमनियतं तु सार्वत्रिकम्। इदमेवाभिप्रेत्य तुल्यवदेकक्रियान्वयित्वं साहित्यमिति प्राञ्चः।

तुल्यवदित्यस्यैककालमेकरूपेण चेत्यर्थः। तच्चेतरेतरयोगे विशेषणम्, व्युत्पत्तिवैचित्र्यात्। अत एव तत्प्रकरणस्य नियामकत्वं भाष्याद्युक्तं संगच्छते।

तच्च समुदायसमाहारद्वन्द्वे तु समाहार एव विशेष्यः, स च समुदायः, स चातिरिक्त एव विशिष्टवत्। न च समुदायिन एवैकबुद्धिविषयाः समुदायोऽस्तु, किमतिरिक्त-तत्कल्पनया। एकत्वप्रतीतिरपि एकबुद्धिविषयत्वौपाधिकीति वाच्यम्, घटानां समाहारः = समूहः इत्यादौ भेदनिबन्धनषष्ठ्यनापत्तेः।

न चारोपितो भेदः, तावतैव द्वन्द्वसाधुत्वस्य व्यवहारस्य चोपपत्तेः। तस्मात् समुदायो विलक्षणसमुदायिसंयोगजन्योऽतिरिक्त एव तद्विशेष्यक-बोधायैकार्थीभाव आवश्यकः।

वस्तुतस्तु उद्भूतावयवभेदसमूहस्य विशेष्यत्वे इतरेतरयोगः। अनुद्भूताव-यवभेदस्य तत्त्वे तु समाहार इति बोध्यम्।

एवञ्च समाहारस्यैकत्वादेवैकवचने सिद्धे तदर्थं वचनं नारम्भणीयम्। अत एव तत्प्रकरणस्य नियामकत्वं भाष्याद्युक्तं सङ्गच्छते। तच्च समुदायशक्यमेव, अन्यतरपदलक्षणायां विनिगमनाविरहात्।

न च प्रत्ययानां सन्निहितपूर्वपदार्थगतस्वार्थबोधकत्वव्युत्पत्तिरुत्तरपदे तत्करणे विनिगमिका, 'राज्ञः पुरुषः' इत्यादौ षष्ठ्यर्थस्य पुरुषेऽन्वयवारणाय पूर्वपदार्थेतीति वाच्यम्, सर्वक इत्यादौ व्यभिचारात्।

दधीयद् ददातीत्यादौ वतुबर्थान्वयापत्तेश्च, सांनिध्यसत्त्वात्। दधि बहुवटु-र्ददातीत्यादौ दध्नि बहुजर्थान्वयापत्तिः, पटानन्वयापत्तिश्च।

अपि च, तथा सति द्वन्द्वस्यैवानापत्तिः। चार्थे वर्त्तमानानेकसुबन्तानामेव तद्विधानात्। अन्यपदार्थेऽपि पूर्वोक्तरीत्योत्तरपदस्यैव लक्षणयाऽन्यपदार्थे वर्त्त-मानानेकसुबन्ताभावेन चित्रग्वादौ बहुव्रीह्यनापत्तेश्च।

अपि च, घटादिपदेष्वपि घटादिधातुभ्यो विहिताच्प्रत्ययादिरूपचरम-वर्णस्यैव लक्षणया शक्त्या वा उपपत्तौ विशिष्टशक्तिकथैवोच्छिद्येत। तात्पर्यग्राह-कत्वेऽपि बोधकारणताया आवश्यकत्वेन शक्तेर्दुर्वारत्वाच्च। न च अवयवमव-यवशक्तिं चाजानतामपि समुदायव्युत्पत्त्या बोधात् तत्र विशिष्टे सा, प्रकृतेऽपि तुल्यत्वात्।

अत एव राजपुरुषादौ समुदायव्युत्पत्त्या समुदायार्थबोधेऽपि व्याकरण-व्युत्पत्तिं विना पदविभागसामर्थ्याभाव इत्यनुभवसिद्धम्।

न च समुदायशक्त्यज्ञानेऽवयवलक्षणाज्ञानेनापि बोधाद् न शक्तिः, गङ्गादिपदानां तीरादौ शक्तिं गृहीतवतो लक्षणया प्रवाहबोधात्, गङ्गापदस्य प्रवाहे शक्तिसिद्ध्यनापत्तेरिति दिक् ।

अपि च, एवं प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तिभङ्गः, उत्तरपदमात्रस्याप्रकृतित्वात् ।

न च प्रकृत्यर्थशब्देन वृत्त्या प्रकृतिजन्यज्ञानविषयस्य ग्रहणाद् दोषः । यद्वा, प्रकृतित्वं न तत्र पर्याप्त्यधिकरणत्वम्, किन्तु तदाश्रयत्वमात्रम्, तच्चावयवमात्रेऽपीति वाच्यम्, 'चित्रगुमानय' 'दण्डिनं पश्य' इत्यादौ सति तात्पर्ये विना लक्षणां चित्रगोदण्डादावानयनकर्मताद्यन्वयप्रसङ्गात् । न च दण्डादीनां पदार्थैकदेशत्वाद् न तत्रान्वयः, 'ऋद्धस्य राज्ञः पुरुषः' इत्यादौ राजादीनामिव स्वातन्त्र्यस्याबाधात् । अन्यथा 'वह्निमान् धूमात्' इत्यादौ पञ्चम्यर्थज्ञानज्ञाप्यत्वस्य वह्नावनन्वयापत्तिः । एतेन यदुक्तम् 'सन्निहितार्थगत' इत्यादि, 'सन्निधानञ्चानुशासनिकम्' इत्यादि; तदप्यापस्तम् ।

न च दण्डिनमित्यादावनासन्नत्वादेव नान्वय इति वाच्यम्, न हि पदाव्यवधानमासत्तिः, गिरिरग्निमान् भुक्तं देवदत्तेनेत्यर्थे तात्पर्यग्रहवतोऽपि पुंसो गिरिर्भुक्तमग्निमान् देवदत्तेनेत्यतो वाक्याद बोधानापत्तेः । किन्तु पदजन्यपदार्थोपस्थितिमात्रं सा । सा च समूहालम्बनादिरूपास्त्येव । अत एव 'भजे सरोरुहसदृशं भगवतश्चरणारविन्दम्' इत्यादितः शाब्दबोधः सङ्गच्छते ।

एतेन प्रत्ययाव्यवहितप्राग्वर्त्तिपदजन्योपस्थितिविशेष्यत्वं प्रकृत्यर्थत्वम् । तच्च द्वन्द्वादावुभयोः, अव्ययीभावादौ पूर्वपदाद्यर्थस्यैव । अव्यवधानांशनिवेशाद् दण्डिनमित्यत्र प्राग्वर्त्तिदण्डपदजन्यबोधविशेष्ये दण्डेनातिप्रसङ्ग इति परास्तम् । 'बहुपटुः, सर्वकः, इत्यादावव्याप्तेः । दधीयद् ददातीत्यादौ दध्नि वतुबर्थान्वयापत्तेश्च ।

यस्मात् प्रत्ययविधानावधित्वमेव प्रकृतित्वम्, प्रकृतिवृत्त्युपस्थितिविशेष्यत्वञ्च प्रकृत्यर्थत्वम् ।

ननु 'प्रत्ययानां प्रकृत्यर्थान्वयः' इत्यस्य कोऽर्थः ? न च प्रत्ययार्थविषयकशाब्दबोधे प्रकृतिजन्योपस्थितिर्हेतुरित्यर्थ इति वाच्यम्, प्रत्ययत्वप्रकृतित्वाद्यजनतां तथा कार्यकारणभावग्रहासम्भवात्, 'घटः कर्मत्वम्' इत्यतस्तथाव्युत्पन्नस्य बोधे व्यभिचाराच्च । तस्माद् घटप्रकारककर्मत्वविशेष्यकबोधे घटबोधकतत्तत्पदसमभिव्याहृतकर्मत्वार्थकतत्तज्जन्योपस्थितिर्हेतुरिति विशिष्यैव स वाच्य इति

न दोष इति चेत्, न; तत्तत्कारणग्रहैस्तस्य तस्य तथा तथा व्युत्पन्नस्य तथा तथा बोधसम्भवेऽपि स्वस्वप्रकृतिवृत्त्युपस्थाप्यार्थान्वय एव प्रत्ययानां साधुत्वम्, स्वस्वप्रकृतिकप्रत्ययार्थान्वये एव च तत्तत्प्रकृतेः साधुत्वम्, नान्यथेत्येतावत एवार्थस्य विचारविषयत्वात् ।

ननु तत्रैव साधुत्वे किं मानमिति चेत्, प्रातिपदिकात् कर्मत्वेऽर्थे 'अम्' भवतीत्युक्ते प्रत्यासत्तिन्यायेन तल्लाभात् । न च प्रकृतिघटकार्थान्वयेऽपि तदस्त्विति वाच्यम्, दण्डस्य कर्मत्वान्वये दण्डिनं पश्येत्यादेर्विनापि लक्षणां साधुत्वापत्तेः ।

एवमुद्देश्यविधेयभावेनान्वये पृथगुपस्थितिजनकपदसमुदाय एव साधुरित्यर्थः, एका संज्ञा परं कार्यमित्यादिनिर्देशैर्बोध्यते । एवमन्येऽपि व्युत्पत्त्यंशाः साधुत्वनिर्णायकास्तत्तत्सूत्रभाष्यादिबलात् सुधीभिरुन्नेयाः । उक्तञ्च हरिणा—

भेद्यभेदकसम्बन्धोपाधिभेद[1]नियन्त्रितम् ।

साधुत्वं तदभावेऽपि बोधो नेह निवार्यते ॥ इति ।

इति दिक् ।

अत्रेदं बोध्यम्—संख्यातिरिक्तप्रत्ययार्थस्यैव प्रकृत्यर्थविशेष्यान्वयित्वनियमः । अत एव 'सम्पन्नो व्रीहिः' इत्यादौ संख्याया जातावन्वयेऽपि न दोषः । न च यत्र पाककर्त्रादेर्द्वित्वादिकं बाधितम्, पाकादेस्तदबाधितम्, तत्र पचन्तौ पश्येत्यादिप्रयोगापत्तिरिति वाच्यम्, धातुना निवृत्तभेदाया एव क्रियाया उपस्थानात् तत्र द्वित्वान्वयानुपपत्तेः । अत एव पचन्तीत्यादौ धात्वर्थे न सङ्ख्यान्वय इत्याहुः ।

वस्तुतो यत्र विशेष्ये प्रत्ययार्थान्वयबाधः, तत्र विशेषणेऽपि तदन्वयः । अत एव पण्डितरूप इत्यादौ पाण्डित्ये प्राशस्त्यान्वयः । यत्र तु अबाधः, तत्र विशेष्य एव । अत एव धात्वर्थफलस्य तदर्थभावनायां कर्मत्वकरणत्वादिनान्वये धातोस्तृतीयाद्यापादनम्, अप्रातिपदिकत्वान्नेति समाधानञ्च प्राचां सङ्गच्छत इति दिक् ।

एवञ्च समुदाये शक्तिरावश्यकी । एतेन सामर्थ्याभावेऽपि विधानसामर्थ्याद् द्वन्द्व इति परास्तम्, एकार्थीभावसामर्थ्यस्य सत्त्वात् । अत एव समुच्चयान्वाचययोर्न समासः । समुच्चये हि परस्परनिरपेक्षस्यैकधर्मावच्छिन्नेऽन्वयः ।

1. आधुनिकेषु मुद्रितपुस्तकेषु 'निबन्धनम्' इत्येव पाठ उपलभ्यते ।

चकारस्त्वनेकस्यैकक्रियान्वयमात्रे तात्पर्यग्राहकः, तत्क्रिययोरेककालिकत्व-द्योतकश्च। 'अहरहर्नयमानो गामश्वं पुरुषं पशुम्' इत्यादौ तु चकाराभावेऽपि तात्पर्यवशात् तथान्वयो बोध्यः। अन्वये परस्परनैरपेक्ष्यं चैकस्य क्रियान्वयोत्तर-मपरस्यावृत्त्या तदन्वयात्, अन्वयश्च विशेष्यतया विशेषणतया वा।

अत एव 'देवदत्तः पचति, हसति च' इत्यादौ क्रियासमुच्चये नाव्याप्तिः। काल एकत्वं बुद्धिविशेषविषयत्वमिति भजनद्वयस्यैककालिकत्वाभावात् 'ईश्वरं गुरुञ्च भजस्व' इत्यादौ समुच्चयो न स्यादिति न वाच्यम् किन्तु समुच्चयेऽपि साहित्यभानम्। अत एव समुच्चये देवदत्तो यज्ञदत्तश्च पचतीत्यादौ नित्यमेक-वचनान्ताख्यातप्रयोग एवेत्याहुः।

एवञ्च चार्थेऽनेकसुबन्तानां वृत्त्यभावात् समासस्य प्राप्तिरेव नास्ति। अत एव तत्र नैकार्थीभावः।

इतरेतरयोगे मिलितस्यैककालमेवैकधर्मावच्छिन्ने इतरान्वयः, 'धवखदिरौ छिन्धि' इत्यादौ तथैवानुभवात्। अत एव तद्विग्रहवाक्ये चकारद्वयप्रयोगः। [1]तेन ह्यन्योऽन्यस्मिन्नन्योऽन्यसाहित्यं गम्यते। साहित्यमेव च चार्थः। न च चाभ्यां साहित्यद्वयप्रतीत्यापत्तिः, चाभ्यामेव तद्द्योतनात्। अत एवेतरेतरयोगे 'देवदत्तश्च यज्ञदत्तश्च पचतः' इत्यादौ नित्यं द्विवचनान्ताख्यात एव।

एतेनार्थचतुष्टयानुस्यूतं साहित्यमेव चार्थ इत्यपास्तम्।

एवञ्च तत्र तद्बोधनार्थमेकार्थीभाव आवश्यक एव। यत्र तु अहरहरित्यादि-वत् प्रकारान्तरेग गृहीततात्पर्याच्च विनापि समुच्चयम्, तत्रैकचकारप्रयोगेऽपि साहित्यावगतिर्भवत्येव। यथा[2] सांकाश्यकानां पाटलिपुत्रकाणां च पाटलिपुत्रका अभिरूपतमा इत्यादौ। स्पष्टञ्चेदम्[3] "द्विवचनविभज्य" [५।३।५७] इत्यत्र भाष्यकैयटयोः।

'एकधर्मावच्छिन्ने' इत्युक्तेः 'अजां ग्रामं नयति' इत्याद्यर्थे अजाग्रामौ नयतीति न प्रयोगः।

---

1. चकारेण हीत्यर्थः।
2. सांकाश्यकावयवः समुदायः सांकाश्यकशब्देनोच्यते, पाटलिपुत्रकावयवश्च पाटलि-पुत्रकशब्देनोच्यते।
3. 'एकचकारप्रयोगेऽपि साहित्यावगतिर्भवति' इदञ्चेत्यर्थः।

अत एव च 'विकृताविकृता देहं घ्नन्ति ःते वर्त्तयन्ति च' इत्यादेः साधुत्वसिद्धिः। साहित्यावच्छिन्नक्रियाद्वये प्रथमतः समुदायान्वये तदनन्तरं पार्ष्णिकप्रत्येकान्वयबोधादित्याहुः।

न चैवम् 'यदग्नये च प्रजापतये च' इत्यादौ परस्परसाहित्यावगमेन समुदितस्यैव देवतात्वं स्यादिति वाच्यम्, प्राधान्येन चस्य प्रत्ययार्थे एवान्वयेन देवतात्वयोरेव समुच्चयेनादोषात्।

किञ्च, तत्र समासे एकपदोपस्थाप्यसमप्रधानयोरेककालमेवेतरान्वयस्य व्युत्पत्तिसिद्धत्वेन पुष्पवन्तादौ क्लृप्तत्वेन च समुच्चयत्वस्यैव भङ्गापत्तेः।

एतेनान्वाचये समासापादनं निरस्तम्, तत्रानुषङ्गिकत्वस्य चद्योत्यत्वेऽपि एकस्यैव तद्द्योतनेन चार्थेऽनेकसुबन्ताभावाच्च।

प्रायेणान्वाचयश्चस्य क्रियान्वये भवति। यत्र तु क्रियान्वयेऽपि चद्वयम्, यथा 'पचन्ति च, हसन्ति च' इत्यादो, तत्र परस्परसाहित्यावगमान्नानुषङ्गिकत्वप्रतीतिः।

इदमेवाभिप्रेत्या[1]र्थग्रहणसामर्थ्यात् समुच्चयान्वाचययोर्न समास इति भाष्ये उक्तम्। 'चे द्वन्द्वः' इति न्यासे हि चप्रयोगयोग्यसमभिव्याहारघटितानेकसुबन्तानां द्वन्द्व इत्यर्थः स्यादिति तद्भाव इति दिक्।

एतेन बहुव्रीहावप्युत्तरपद एवान्यपदार्थलक्षणेत्यपास्तम्।

अत एव अरुणाधिकरणारम्भ उपपद्यते। तत्र हि 'किमरुणिमा वाक्याद् भित्वा प्रकरणे निवेश्य, उत क्रीणातिना सम्बध्य आश्रयतया तत्परिच्छेदकत्वात् तदङ्गमेकहायन्यादीति संशये, क्रीणातिना सम्बन्धे हि अरुणयेति करणकारकं स्यात्। न चामूर्त्तस्य तद्युक्तमिति नास्य क्रयसम्बन्ध इति ततः पृथग्भूय प्रकरणे निविशते। यत्किञ्चिद्येन द्रव्येण क्रियते तदरुणगुणकेनेति पूर्वपक्षितम्। त्वद्रीत्या एकहायनीपदादेरपि पिङ्गाक्षित्वैकहायनत्वादेरेव वाच्यत्वात् तेषां चामूर्त्तत्वात् क्रीणातौ करणत्वासम्भवेनारुण्यांश एव शङ्काया निर्बीजत्वापत्तेः। निरूढलक्षणया द्रव्याभिधायकत्वमपि त्रयाणां समम्।

---

1. "चार्थे द्वन्द्वः" इत्यत्र अर्थग्रहणसामर्थ्यादित्यर्थः। तत्र हि—'चे द्वन्द्वः' इतीयता सिद्धम्। कथं पुनश्चे नाम वृत्तिः स्यात्, शब्दो ह्येषः? शब्दे कार्यासम्भावदर्थे कार्यं विज्ञास्यते। सोऽयमेवं सिद्धे सति यदर्थग्रहणं करोति तस्यैतत् प्रयोजनम्—एवं यथा विज्ञायेत—चेन कृतोऽर्थश्चार्थं इति भाष्ये उक्तम्।

किञ्च, प्रकरणोपात्तद्रव्यनिवेशापेक्षया स्ववाक्योपात्तद्रव्यनिवेश एव उचितः। प्रकरणाद् वाक्यस्य बलवत्त्वादिति सिद्धान्तोऽप्ययुक्तः स्यात्, तयोरपि द्रव्यवाचकत्वाभावात्। लक्षणा तु अरुणपदेऽपीति स्वपदीयद्रव्यनिवेशसम्भवेन वाक्यीयद्रव्यनिवेशो दूरापास्त एव स्यात्। शक्तौ तु शीघ्रोपस्थितेः पिङ्गाक्ष्यादिपदोपात्तेऽन्वये सम्भवति बिलम्बोपस्थितलाक्षणिकान्वयो न, द्रव्यांशे निराकाङ्क्षत्वात्। अरुणपदस्य लक्षणैव वा नेति उपपद्यते सर्वम्।

किञ्च, 'प्राप्तोदको ग्रामः' इत्याद्यषष्ठ्यर्थबहुव्रीहौ त्वदुक्तरीत्या प्राप्तिकर्त्रभिन्नमुदकमिति बोधोत्तरं तत्सम्बन्धिग्रामलक्षणायामप्युदककर्तृकप्राप्तिकर्मग्राम इति विवक्षितार्थानिर्वाहस्तदवस्थ एव। न च प्राप्तेति क्तप्रत्ययस्य कर्त्रर्थकस्य कर्मणि लक्षणेति वाच्यम्,[1]समानाधिकरणप्रातिपदिकार्थयोरभेदाऽन्वयव्युत्पत्तेरुदकाभिन्नप्राप्तिकर्मसम्बन्धीति बोधापत्तेः।

न च प्राप्तावुदकस्य कर्तृतासम्बन्धेनान्वय इति वाच्यम्, उदककर्तृकप्राप्तिकर्त्रेत्यादिबोधकतदर्थानापत्तेः। न च क्तप्रत्ययार्थो न विवक्षितः, मानाभावात्।

किञ्च,[2] अविवक्षायामपि [3]तण्डुलः पचतीत्यादिवारणायाभेदातिरिक्तसम्बन्धेन नामार्थप्रकारकशाब्दबोधे तद्विहितप्रत्ययजन्योपस्थितेर्हेतुत्वस्य क्लृप्तत्वेन तथान्वयासम्भवात्।

अथोदकाभिन्नकर्तृकाप्राप्तिरिति बोधोत्तरं तत्कर्मग्रामो लक्ष्यत इति चेत्, न; प्रत्ययार्थप्राधान्यस्यान्यत्र क्लृप्तत्वात्, 'सत्त्वप्रधानानि नामानि' इति वचनाच्च तथाबोधासम्भवात्। 'घटो नित्यः' इत्यादौ नित्याभिन्नघटत्ववानिति बोधवारणायाभेदसंसर्गेण नामार्थकप्रकारकशाब्दबोधे[4]विशेष्यतावच्छिन्ननामजन्योपस्थितेर्हेतुतया कर्त्तरि उदकाभेदान्वयासम्भवाच्च। न चोदकपदेनोदककर्तृकप्राप्तिकर्मीभूतो लक्ष्यते, प्राप्तपदञ्च तात्पर्यग्राहकमिति वाच्यम्, विनिगमनाविरहात्, स्ववाच्यार्थ-

1. अभेदसम्बन्धेन शाब्दबोधं प्रति समानविभक्तिकपदजन्योपस्थितिः कारणमिति कार्यकारणभावस्वीकारादित्यर्थः।
2. क्तप्रत्ययार्थविवक्षायामिति भावः।
3. 'तण्डुलं पचति' इत्यर्थे 'तण्डुलः पचति' इति प्रयोगस्य वारणायेत्यर्थः।
4. अभेदसंबन्धेन शाब्दबोधं प्रति मुख्यविशेष्यतया प्रातिपदिकजन्या उपस्थितिरपेक्ष्यते। 'घटो नित्यः' इत्यत्र घटस्य प्रकारतयोपस्थितत्वेन न तत्राभेदेन नित्यस्यान्वय इति भावः।

घटितलक्षणायां तात्पर्यग्राहकत्वस्य चित्रगुरित्यादौ क्लृप्तस्य भङ्गापत्तेश्च। व्युत्पत्त्यन्तरस्वीकारे तु सिद्धमेकार्थीभावेन। एवम् 'ऊढरथः' इत्यादावप्यूह्यम्।

मम तु न दोषः, सर्वव्युत्पत्तीनां विभिन्नोपस्थितिजनकशब्दविषयत्वात्, विशेष्यविशेषणभाववैपरीत्यान्तर्भावेणैव संसर्गेऽन्यपदार्थे च शक्तिकल्पनाच्च।

तदेतत् सकलमभिसन्धाय भाष्य उक्तम्—'अथैतस्मिन् व्यपेक्षायां सामर्थ्ये योऽसावेकार्थीभावकृतो विशेषः, स वक्तव्यः' इति।

यत्तु मीमांसकाः—बहुव्रीहौ चित्राणां गवामयमिति विग्रह उचितः, न तु चित्रा गावोऽस्येति, तथा सति 'राज्ञः पुरुषः' इत्यादौ प्रथमान्तपुरुषपदार्थस्य प्राधान्यमिव चित्रगवामेव तत् स्यात्, न षष्ठ्यन्तार्थस्य। अनुभवसिद्धञ्च देवदत्तादेरेव प्राधान्यम्। एवं हि वृत्तिविग्रहयोः समानार्थत्वमपि निर्वहतीति। तत्, न; एवं विग्रहेऽपि षष्ठ्यर्थसम्बन्धस्य भेदेनायमित्यत्रान्वये चित्रगोसम्बन्धवानिति सम्बन्धनिष्ठप्रकारतानिरूपितभेदसंसर्गीयसांसर्गिकविषयताशाली बोधः। समासे तु चित्रगोनिष्ठप्रकारतानिरूपितसम्बन्धिनिष्ठविशेष्यताशालीति भेदस्य तदवस्थत्वात्। एवं षष्ठीतत्पुरुषादावपि।

न च वृत्तिविग्रहयोर्नातिसमानार्थत्वनियमः, तर्ह्यस्मदुक्तविग्रहेऽपि न दोषः। किञ्चाषष्ठ्यर्थबहुव्रीहौ प्राप्तस्योदकस्यायमिति विग्रहेऽपि उदककर्तृकप्राप्तिकर्म ग्राम इति समासबोध्यार्थो दुर्लभ एव।

अपि च, त्वदीयविग्रहस्य 'अप्रथमाविभक्त्यर्थे बहुव्रीहिः, शेषो बहुव्रीहिरित्यतः शेषः' इत्यादिमुनिवचनविरुद्धत्वम्। न चालौकिके प्रथमान्तानामेव प्रवेशेन न तद्विरोध इति वाच्यम्, अलौकिके प्रविष्टानामेव पक्षान्तरे परिनिष्ठतेऽपि प्रयोगसम्भवः, उपस्थितपरित्यागेनानुपस्थितघटितलौकिकवाक्यकल्पनाया अनुचितत्वात्।

तथा हि—कृत सु विश्व सु इत्यादिस्थितौ विभाषासमाससंज्ञायां यदा सा जाता, तदा प्रातिपदिकत्वे विभक्तिलुक्, यदा तु न सा, तदा तस्या विभक्तेः को निवारयितेति तदुत्तरप्रवृत्तानुशासनात् तच्छ्रवणमेवायाति।

एतेन षष्ठीतत्पुरुषादावपि राजा चासौ पुरुषश्चेति विगृह्णन्तः परास्ताः। षष्ठीसमासादिविधायकस्यालुग्विधायकस्य तत्पुरुषे "तुल्यार्थतृतीया" [६।२।२] इत्यादीनाञ्च निर्विषयतापत्तेः।

ननु प्रथमान्तानामेवास्तु बहुव्रीहिः, पक्षे चित्रा गावो यस्येत्यपि वाक्यमस्तु, परन्तु विग्रहत्वं चित्राणां गवामित्यस्यैव, अतिसमानार्थत्वात्। अन्यथाविग्रहाच्छक्तिनिर्णयो न स्यात्। एवं प्राप्तोदक इत्यत्रोदककर्तृकप्राप्तिकर्म ग्राम इत्येव विग्रहः।

न च समस्यमानपदैर्विवरणविरहाद् बहुव्रीहेर्नित्यसमासतापत्तिः, समासार्थबोधकतद्घटकपदघटितवाक्यासंभव एव नित्यसमासत्वान्न दोषः। प्रकृते तु तस्यापि सम्भवोऽस्त्येव। तत्र सर्वथा समानार्थत्वेनाग्रह इति चेत्, न; यथा अक्षकरणकभावनाश्रय इत्यर्थकाक्षिक इत्यस्याक्षनिष्ठव्यापारजन्यभावनेत्यर्थकाक्षैर्दीव्यतीत्येतद्विविशेष्यविशेषणभावांशे समानार्थत्वविरहेऽपि विवरणं शक्तिनिर्णायकञ्च, तथा प्रकृतेऽपि स्यादिति क्लिष्टकल्पनाश्रयणं व्यर्थमेव। अपि च को देवदत्त इति प्रश्ने चित्राणां गवामयमिति वाक्यादिव चित्रगुरिति वाक्यादपि जिज्ञासानिवृत्त्यनापत्तिरिति दिक्। तस्मात् सर्वत्र समासे एकार्थीभाव आवश्यकः।

ननु सर्वत्रैकार्थीभावाङ्गीकारे समर्थसूत्रे च तस्यैव ग्रहणे "चार्थे द्वन्द्वः" इति सूत्रस्थं भाष्यं विरुध्येत। तथाहि—तत्र भाष्ये रामकृष्णावित्यादौ परस्परमनन्वयात् सामर्थ्याभावे समासो न स्यादित्याशङ्क्य, 'युगपदधिकरणवचने द्वन्द्वः' इति न्यासेन समाहितम्। त्वद्रीत्यैकार्थीभावसामर्थ्यस्य दुर्वारत्वेन "चार्थे द्वन्द्वः" इति न्यासेनैव सिद्धे न्यासान्तरे प्रवृत्तेर्वैयर्थ्यापत्तेः। [1]अधिकरणम् = वर्त्तिपदार्थौ, तयोर्युगपत् पदद्वयेनाभिधाने द्वन्द्वो भवतीति तदर्थः। रामपदेन रामकृष्णयोः, कृष्णपदेन च तयोरभिधानात् तयोरभेदान्वयरूपसामर्थ्यस्याक्षतेरिति तद्भावः।

न च घटकुम्भावितिवत् 'विरूपाणामपि' इत्येकशेषेण बाधाद् रामकृष्णाविति द्वन्द्वस्यासाधुतापत्तिः, द्वन्द्वविधिसामर्थ्येन 'समानार्थानाम्' इति सामर्थ्येन च युगपदधिकरणवचनतां विनापि समानार्थतायामेवैकशेषात्। ननु "अनेकमन्यपदार्थे" [२।२।२४] इत्यनेनानेकसुबन्तानामन्यपदार्थप्रतिपादकत्वे बहुव्रीहिविधानात् चित्रगवादिपदानां सर्वेषां तदभिधायकत्वे युगपदधिकरणवचनताप्तत्वाद् द्वन्द्वापत्तिः। उत्सर्गापवादन्यायेन बहुव्रीहिणा बाधेनाक्षतेर्बोधावृत्तिरपि

---

1. अधिक्रियते शब्दो यत्रेति विग्रहेण अधिकरणमर्थः। अत्र प्रत्यासत्त्या विग्रहघटकपदार्थो गृह्यते। अधिकरणशब्दस्यार्थपरत्वम् "युष्मद्युपपदे समानाधिकरणे मध्यमः" इत्यत्राचार्यैर्व्याख्यातम्।

द्वावितिवत् परिहरणीयेति चेत्, न; 'सेयं युगपदधिकरणवचनता दुःखा दुरुपपादा च' इत्यादिना भाष्य एव तस्या दूषितत्वात्।

तत्र दुःखत्वम्, दोषाक्रान्तत्वात्। तथाहि—वृद्धव्यावहाराद्धि शब्दार्थाध्यवसायः। न च प्लक्षशब्दस्य न्यग्रोधाभिधायित्वं लोके दृश्यते। न च प्लक्षशब्दस्य लक्षणा, न्यग्रोधशब्देनैव न्यग्रोधस्य प्रतिपादितत्वात्।

अपि च, द्वन्द्वैकवद्भावप्रकरणस्य नियमार्थतानुपपत्तिः, सर्वत्रैव द्विवचनबहुवचनयोः प्रसङ्गे एकवचनविधानेन चारितार्थ्यात् साहित्यस्य समाहारस्य च तव मतेऽभानात्। अपि च एवं विग्रहे चशब्दप्रयोगानुपपत्तिः।

दुरुपपादेति। दुष्टं निःसारमुपपादनं यस्याः सा तथा, निष्प्रमाणेत्यर्थः। तथा हि—न तावद् द्यावाक्षामेत्यादौ व्यासे परस्परसाहचर्येणोभाभ्यामप्यर्थद्वयप्रतिपादनदर्शनात् समासे सा स्वीकार्येति वाच्यम्, द्यावाक्षामेत्यस्य छान्दसत्वात्।

न च परस्परान्वयाभावेनैकशेषसमासयोरप्राप्तेस्तत्सिद्धये सेति वाच्यम्, वचनसामर्थ्यादेव तत्प्राप्तेः।

किञ्च, धवौ च खदिरौ चेति न विग्रहः, प्रक्रियादशायां प्रथमप्रवृत्तस्यैकवचनस्य त्यागायोगात्।

समुच्चयान्वाचययोः समासाभावार्थमित्यपि न, तयोस्तदभावस्योपपादितत्वात्, एकार्थीभावसामर्थ्यस्यैव प्रागुक्तदिशा भाष्ये सिद्धान्तितत्वेन दोषाभावाच्च। न च समासाद् द्विवचनबहुवचनोत्पत्त्यर्थं तदावश्यकता, पुष्पवन्तादिपदवत् समासादनेकार्थप्रतीत्यैव तत्सिद्धेः। न चैवम् 'अङ्गवङ्गकलिङ्गाः' इत्यादौ "तद्राजस्य बहुषु तेनैवास्त्रियाम्" [२।४।६२] इति लुग् न स्यात्, अपत्यकृतबहुत्वविवक्षायां तद्राजस्य लुगिति हि तदर्थः। न हि विना युगपदधिकरणवचनतां प्रत्येकतद्राजार्थे बहुत्वान्वयः, तस्य व्यासज्यवृत्तित्वादिति वाच्यम्, तद्राजस्य लुग् बहुत्वेऽर्थे, तद्बहुत्वं तद्राजार्थेनैव कृतं चेत्, तद्राजार्थेनेव बहुत्वान्वयश्चेदित्यर्थे तदनङ्गीकारेऽपि दोषाभावात्, 'प्रत्येकं बहुत्वसमवायस्य सत्त्वात्' इत्यादि स्पष्टमस्मत्कृतशब्देन्दुशेखरे। सर्वथापि युगपधिकरणवचनतामादाय लौकिकेऽलौकिके च विभक्तिप्रवेशो न युक्त इति दिक्।

एवञ्च अजहत्स्वार्थायां वृत्तौ सर्वत्र समासपदादवयवशक्तिभ्यां समुदायशक्तिसहकृताभ्यां विशिष्टस्यैव पदार्थस्योपस्थितिर्बहुव्रीहावन्यपदार्थोऽपि

समुदायशक्य एव। अन्यपदार्थश्च यस्येत्यादौ प्रकृतिप्रत्ययार्थव्यत्यासेन सम्बन्ध्यादिः। प्राप्तोदक इत्यादौ प्राप्तादिपदेभ्यो विशेषणविशेष्यभावव्यत्यासेनोपस्थितिरन्यपदार्थकर्मणश्चोपस्थितिः समुदायशक्तिसाध्यैव। अत एवाभिहितत्वान्न द्वितीयादय इत्याकरः।

एवं द्वन्द्वे साहित्यमपि समुदायशक्यमेव। जहत्स्वार्थायां तु सर्वत्र समुदायशक्तिरेव, अवयवा निरर्थका एवेति पक्षनिष्कर्षः।

स चायमेकार्थीभावः कृत्तद्धितसनाद्यन्तधातुसुबेकशेषसमासेषु। तत्र समासे उपपादितः। कृदन्तेऽप्युपपदनिमित्तकपदोद्देश्यकविधित्वेन, तत्रैव समर्थपरिभाषाप्रवृत्तेः। अत एव सूत्रे पदपदं चरितार्थम्। अन्यथा व्याकरणस्थसर्वविधीनां पदसम्बन्धित्वाविशेषात् तद्ग्रहणवैयर्थ्यं स्पष्टमेव। अत एव शोभनं कुम्भकार इति न।

न चात्र समासस्यापि नित्यत्वेन तदीयैकार्थीभावेनैव निर्वाहे कृतामप्येकार्थीभावे मानाभाव इति वाच्यम्, मूलकेनोपदंशमित्यादौ समासस्य वैकल्पिकत्वात् तदभावे सुन्दरेण मूलकेनापदंशमित्यादेर्मूलकेनाद्रेण चोपदंशमित्यादेर्मूलकस्योपदंशनं स्पर्शनं च कृत्वा भुङ्क्ते इतिवद् मूलकेनोपदंशं स्पर्शं च भुङ्क्ते इत्यादेश्च वारणाय एकार्थीभावः कृत्स्वावश्यकः। अत एव "तत्रोपपदम्" [३।१।९२] इत्यत्र भाष्ये उक्तम्—'महान्तं कुम्भं करोतीत्यत्राण् प्राप्नोति। नैतदस्ति 'उपपदम्' इति महती संज्ञा क्रियते—उपोच्चारितं पदमिति। यावता चेदानीं पदगन्धोऽस्ति पदविधिरयं भवति। पदविधिश्च समर्थानां भवति, तत्रासामर्थ्यान्न भविष्यति' इति। केवलकृत्सु तु नैकार्थीभावः, मानाभावात्। अत एव शोभनमित्यादिविशेषणान्वयः सङ्गच्छते। कुम्भकार इत्यादावेकार्थीभावेऽपि कारकान्वयो भवत्येव, तदंशे नित्यसापेक्षत्वात्। अत एव "कर्तृकर्मणोः" [२।३।६५] इति सूत्रे कृतपूर्वीकटमिति प्रत्युदाहरणं सङ्गच्छते। शोभनमित्यन्वयस्तु न, एकार्थीभावात्।

न चास्यापि क्रियाविशेषणत्वेन कारकत्वमस्त्येव, तत्त्वेऽप्यस्य नित्यसाकाङ्क्षत्वाभावात्। ईदृशकारकस्य चोत्थाप्याकाङ्क्षयान्वयः, न तूत्थिताकाङ्क्षयेति स्पष्टमेव। स्पष्टञ्चेदम् "कुत्सने च सुपि" [८।१।६९] इत्यत्र कैयटपदमञ्जर्योः।

ननु यत्रैकार्थीभावो मानान्तरसिद्धः, तत्र पदविधिरिति सूत्रार्थः, न तु यत्र पदविधिः, तत्रैकार्थीभाव इति। एकार्थीभावस्तु विलक्षणार्थबोधेन मानान्तर-

सिद्ध इति किमुच्यते परिभाषाप्रवृत्त्या निरुपपदकृतम्, तेनैकार्थीभाव इति चेत्, सत्यम्; विलक्षणार्थबोध एव क्वेति संशये यत्र समर्थसूत्रप्रवृत्तिर्दृश्यते साहचर्यादि वा, तत्र लक्षणैकचक्षुष्कैरस्माभिस्तदनुमानान्न दोषः।

वस्तुतस्तु "कर्मण्यण्" इत्यादिसाहचर्यात् "कर्त्तरि कृत्" इत्यादेरैकरूप्याय च सर्वत्र कृत्स्वेकार्थीभावः।

अत एव पाचको गमनस्य चेति न प्रयोगः। न चैवम् 'गमनकर्तृकः पाकः' इत्यर्थे गमनस्य पचतीति प्रयोगवारणाय तिङ्क्ष्वपि स स्यादिति वाच्यम्, आख्यातार्थकारकस्य क्रियानिरूपितविशेषणतायामेव आख्यातान्तप्रयोगसाधुतायाः 'क्रियाप्रधानमाख्यातम्' इत्यनेन बोधनेनाक्षतेः। तस्य च तिङर्थं प्रति क्रियैव प्रधानं क्रिया प्रधानमेव चेत्यर्थः। अत एव पचतीत्यादौ कारकक्रिययोरुद्देश्यविधेय-भावप्रतीतिः। सुबन्तेषु तु न दोषः। 'न केवलः' इति निषेधेन तदर्थान्वयिविभक्ति विना प्रातिपदिकप्रयोगस्यैवाभावात्। इतरेषु त्वेकार्थीभावोऽस्त्येव। एतन्मूलिकैव 'प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्व'व्युत्पत्तिः, 'प्रकृतिप्रत्ययौ सह ब्रूतः' इति च तदर्थयोरेव सहान्वयः, न त्वितरेणापीति तदर्थः। स चोपस्थितिरूपः, शाब्दबोधरूपो वेत्यन्यत्।

अत एव व्यापारान्वयविवक्षायामादिः पाचक इति न। फलविशेषणानां त्वेकदेशान्वयो भवत्येव। "पूजनात्पूजितम्" [८।१।६७] इति सूत्रे भाष्ये 'दारुणा-ध्यापकः' इत्यत्र समस्ताध्यापकपदार्थैकदेशे फले दारुणपदार्थस्य क्रियाविशेषण-तयान्वयस्वीकारात्।

किञ्च, कर्तृप्रत्ययसमभिव्याहारे फलावच्छिन्नव्यापारस्यैव धात्वर्थत्वेन शोभन पचतीत्यादावेकदेशान्वयस्तत्राप्यावश्यकः। न च फलव्यापारयोः पृथक् शक्तिः, तथैवोपस्थितिश्चेति न दोषः। अत एव न शक्यतावच्छेदकगौरवम्, अन्यथा कर्मप्रत्ययसमभिव्याहारे व्यापारावच्छिन्नफलबोधेन तथाशक्तेरप्यावश्य-कत्वेन गुरुशक्यतावच्छेदकशक्तिद्वयकल्पनापत्तिरिति वाच्यम्, एवं हि फल-व्यापारयोरुद्देश्यविधेयभावेनान्वयापत्तेः। विक्लित्तिसंयोगोभयजनकव्यापार-वानित्यर्थे विक्लिद्यते, गच्छतीत्यादिप्रयोगाणामापत्तेश्च। कार्यकारणभावादि-कल्पनया तत्र कार्यकारणभावज्ञानवतां बोधवारणेऽपि तदजानतां जायमान-तादृशे बोधेऽपि साधुतापत्तिर्दुर्वारैव। गौरवञ्च तदवस्थमेव। अत एव समासादि-शक्तिसिद्धिः।

तस्मात् फलविशिष्टे व्यापारे व्यापारविशिष्टे फले च धातूनां शक्तिः। कर्त्तृकर्मार्थकतत्तत्प्रत्ययसमभिव्याहारश्च तत्तद्बोधे नियामकः। पचतीत्यादौ प्रकृतिप्रत्ययार्थयोरुद्देश्यविधेयभावेनान्वयो भवत्येवेति। समासतद्धितादि-साधारण्येनैकार्थीभावं स्वीकुर्वद्भिरास्थेयम्।

न च ज्योतिष्टोमेन धात्वर्थस्वर्गभावनोद्देशेन तदर्थफलभूतत्यागरूप-धात्वर्थस्य विधेयत्वं न स्यात्। यजेर्हि तत्र त्यागकरणकव्यापारे स्वर्गविषये शक्तिः। यद्यपि स व्यापारस्त्यागविषयोऽपि, तथाऽपि तस्य करणत्वेनैवोपस्थि-तिरस्तु, सुरूपत्वेनापुरुषार्थतयान्यभाव्यत्वमिति वहिर्भूतस्वर्ग एव भाव्यत्वे-नान्वेति। यागस्य करणत्वञ्च भावनाभाव्यनिर्वर्त्तकत्वम्। कुठारादेरपि पुरुष-व्यापारनिर्वर्त्यच्छेदनिर्वर्त्तकत्वेनैव करणत्वादिति वाच्यम्, विधिबोध्यप्रवर्त्तना-विषयत्वरूपविधेयत्वस्य प्रकृत्यर्थतया सम्पूर्णधात्वर्थे शब्दाद्बोधेऽपि 'लोहितोष्णीषा ऋत्विजः प्रचरन्ति' इत्यादावितरस्याप्राप्तत्वेन लौहित्य इवेहापि स्वर्गस्य सुखरूपतया स्वत एवेष्टत्वेन तद्व्यापारे स्वरसत एव प्रवृत्तेः, सिद्धत्वेन च विशेषणे फले पर्यवसानेनादोषात्।

इदञ्च भावनायाः प्रत्ययार्थत्ववादिमीमांसकमतेऽप्यावश्यकम्। तेषामपि समानपदोपात्तत्वप्रत्यासत्त्या लिङर्थप्रवर्त्तनायास्तदुपात्तभावनायामेवान्वयेन पर्यवसानगत्यैव धात्वर्थे तद्विषयतायाः स्वीकर्त्तव्यत्वात्। प्रवर्त्तनाविषयत्वोप-लक्षिताप्राप्तत्वसमानाधिकरणाखण्डोपाधिरूपविधेयत्वावच्छिन्नविषयतया तद्रूप-विषयतया चान्वयस्तु नास्त्येव। तादृशविषयतयानन्वय एव चाख्यातानां साधकत्वात्। एवञ्चेतोऽपि भावनाप्रत्ययार्थ इति मीमांसकमतमयुक्तम्, भिन्नपदोपस्थाप्यत्वेन तथान्वयापत्तेरित्यलम्।

तद्धितेऽपि 'सुन्दरस्यौपगवः' 'औपगवो देवदत्तस्य' इत्यादिवारणायोद्देश्य-विधेयभावेनानन्वयाय च स आवश्यकः। सुबन्तात् तद्धितोत्पत्तेः पदोद्देश्यक-विधित्वं स्पष्टमेव। सनाद्यन्तेष्वपि 'महान्तं पुत्रीयति, पिपठिषति, गन्तुम्, शोभनं पिपठिषति, सुन्दरः कृष्णति, महान्तं घटयति' इत्यादिवारणाय स आवश्यकः। तत्र "सुप आत्मनः" [३।१।८] इत्यादेः पदोद्देश्यकविधित्वं स्पष्टमेव। सन्विधौ तत्त्वाभावेन परिभाषाप्रवृत्त्यभावेऽपि "सुप आत्मनः" [३।१।८]इत्यादौ ततः कर्मण इच्छायामित्यनुवृत्तेरर्थाधिकारानुरोधेन सन्नन्ते तत्कल्पना।

तथा च भाष्यम् 'वा वचनानर्थक्यं नित्यत्वात् सनः'—'इह द्वौ पक्षौ वृत्तिपक्षश्च अवृत्तिपक्षश्च। तत्र स्वभावत एतद्भवति—वाक्यञ्च वृत्तिश्चेति। वृत्तेरेकार्थीभावविषयत्वात्, वाक्यस्य व्यपेक्षाविषयत्वात्, भिन्नार्थत्वेन बाध्यबाधकभावाप्रसङ्गः' इति कैयटः। "गुप्तिज्" [३।१।५] इति सूत्रद्वयविहितसनि तु न, मानाभावात्, पदविधित्वाभावाच्च। अत एव कण्ड्वादियगन्ते न, यगादीनां स्वार्थिकत्वेन विजातीयार्थवद् द्वितीयाभावेन निरूपयितुमशक्यत्वाच्च। अत एव स्तोकादीनां तत्प्रकृत्यर्थेऽन्वयः।

अत एव "कृञ्चानुप्रयुज्यते" [३।१।४०] इत्यादिविषये नैकार्थीभावः। प्रातिपदिकप्रकृतिकक्विपः 'कर्त्तुः क्यङ्' [३।१।११] इति सूत्रे उपसङ्ख्यानात्, पूर्वोत्तरसाहचर्याच्च तत्रैकार्थीभावः। अत एव 'सर्वप्रातिपदिकेभ्यः' इत्यनेन सिद्धे 'आचारेऽवगल्भ' इति 'आत्मनेपदानुबन्धासञ्जनार्थम्' इति भाष्यं सङ्गच्छते। अन्यथा 'आचारेऽवगल्भ' इत्यत्र सुप इत्यस्य सम्बन्धे बाधकाभावेन तस्यैकार्थीभाव एव प्रवृत्तेस्तत्सार्थक्यं स्पष्टमेव। अस्मिंस्तु प्रातिपदिकग्रहणसामर्थ्यात् सुप इत्यस्यासम्बन्धः। अत एव राजानतीत्यादौ नलोपादिकं नेत्याहुः।

एवं प्रातिपदिकप्रकृतिकणिच्यपि साहचर्यात् सः। "सत्याप" [३।१।२५] इति सूत्रस्थणिजिति योगविभागात् तत्सङ्ग्रहेण तस्यापि प्रकरणस्थत्वात्। अत एव "हेतुमति च" [३।१।२६] इति सूत्रे भाष्ये 'तत्करोतीत्युपसंख्यानम्; सूत्रं करोति सूत्रयति। इह व्याकरणस्य सूत्रं करोतीति वाक्ये षष्ठी। व्याकरणं सूत्रयतीति प्रत्यये द्वितीया। केनैतदेवं भवति? योऽसौ सूत्रव्याकरणयोरभिसम्बन्धः, स उत्पन्ने प्रत्यये निवर्तते। अस्ति च करोतेर्व्याकरणेन सामर्थ्यमिति द्वितीया भविष्यति' इति भाष्यं सङ्गच्छते। सुबन्ताण्णिचि तु स्पष्ट एव[1] सः, पदविधित्वस्यैव सत्त्वात्।

एकशेषेऽपि द्वन्द्व इत्यनुवर्तनादेकार्थीभावः।

तथाहि—तद्विधायकञ्च "सरूपाणामेकशेष एकविभक्तौ" [१।२।६४] इति सूत्रम्। तेन ह्येवकारापकर्षात् लौकिके प्रयोगे विभक्तित्वावच्छेदेन वैरूप्याभाववतामेकशेषो विधीयते। अत एव जननीवाचिपरिच्छेत्तृवाचिनोर्मातृशब्दयोर्भ्यामादावपि नैकशेषः, औजसादौ वैरूप्यात्। हरिणस्त्रीवाचकहरिणीशब्दहरितवर्णविशिष्टस्त्रीवाचकहरिणीशब्दयोस्त्वेकशेषो भवत्येव, पुंवद्भावेन तद्धितादौ

1. एकार्थीभाव इत्यर्थः।

वैरूप्येऽपि विभक्तौ वैरूप्याभावसत्त्वात्। स चायमन्तरङ्गत्वाद्विभक्त्युत्पत्तेः प्रागेव, विभक्तेः सारूप्ये उपलक्षणमात्रत्वात्।

ननु तन्त्रेणैवेदं सिद्धम्, तथा हि द्विविधं तन्त्रम्—शब्दतन्त्रम्, अर्थतन्त्रञ्च। 'अर्थभेदाच्छब्दभेदः' इति नये सकृत्ताल्वोष्ठपुटव्यापाराच्छब्दोच्चारणे श्रोतुर्यत्र विनिगमनाविरहाच्छब्दद्वयज्ञानम्, तत्राद्यम्। तद्भेदेऽपि शब्दैक्यमिति नये सकृत्ताल्वोष्ठपुटव्यापारप्रकाशितैकशब्देन विनिगमकाभावादनेकार्थबोधे द्वितीयम्।

यद्वा, 'श्वेतो धावति' इति सभङ्गस्थले आद्यम्, 'विद्वन्मानसहंस' इत्यादाविवार्थद्वयेऽप्येकानुपूर्वीकत्वे द्वितीयम्। 'सकृदुच्चरितः' इति नियमे च न मानम्। तादृशनियमाङ्गीकर्तृमते पुनः पुनरनुसन्धानकल्पने आवृत्तिः।

वस्तुतः शब्दतन्त्रमेवावृत्तिपदेनोच्यते। अर्थतन्त्रञ्च तन्त्रपदेनेति बोध्यम्। शब्दसारूप्यमेव चोभयत्रापि बीजम्।

एवञ्च तेनैव सिद्धे एकशेषो व्यर्थ इति चेत्, न; 'सरूपाणामेक एव' इति नियमार्थत्वात्। तेन प्रत्यर्थं शब्दनिवेशस्यापि दृष्टत्वेन घटघटावित्यादिवारणार्थं तत्, "सरूपाणम्" इत्यत्र तन्त्राद्याश्रयणेन 'एकविभक्तौ यानि सरूपाण्येव, तेषामेव एकशेषः' इत्यपरनियमाश्रयणाद् मातृभ्यामित्यादौ न लोकन्यायसिद्धं तन्त्रमपि। अयञ्च नियम एकार्थीभावविषयसहविवक्षायामेव 'द्वन्द्वे' इत्यनुवर्त्य द्वन्द्वविषय एव नियमप्रवृत्तिस्वीकारात्। एवञ्च व्यपेक्षायां वाक्यं भवत्येव, अन्यथा एकशेषस्य नित्यत्वाद् वाक्यं दुर्लभमेव स्यात्।

एवञ्च द्वन्द्वे इवैकशेषेऽपि साहित्यभानम्। एवञ्च साहित्यविवक्षायां सरूपाणामेकशेष एव, न द्वन्द्वप्रयोगः। मानसेत्यादौ कदाचित् तन्त्रेण प्रयोगः, कदाचित् पृथगपि 'विद्वन्मानसमानस' इति। 'द्वन्द्वे' इत्यननुवर्त्य साहित्यागर्भनियमाङ्गीकारे तु एकशेषेण द्वन्द्वस्येव कर्मधारयस्यापि बाधापत्तौ मानसमानसेत्यादीनामसाधुतापत्तिः, वाक्यस्यासाधुतापत्तिश्च।

एवञ्च साहित्यप्रकारकबोध एकशेषव्यवहारः, तदभावे तन्त्रव्यवहारः। पुनः पुनरनुसन्धानेन शब्दतन्त्रे आवृत्तिरित्यभिप्रेत्यैव 'तन्त्रावृत्त्येकशेषाणामन्यतमस्तु'इति व्यवहारः। क्रियापृथक्त्वे खल्वपि द्रव्यैकशेषो यथा 'अक्षाः भज्यन्ताम्, भक्ष्यन्ताम्, दीव्यन्ताम्'इति "युष्मद्युपपदे" [१।४।१०५] इति सूत्रस्थ-

भाष्ये तु एकशेषशब्देन तत्फलकत्वात् तन्त्रमुच्यत इति न विरोधः। व्याख्यातञ्चैवमेव [1]उपाध्यायैः। 'द्वन्द्वे' इत्यस्य साधारणत्वेन समाहारद्वन्द्वविषयेऽप्येकशेषो बोध्यः। न च नपुंसकतापत्तिः, समाहारद्वन्द्व एव तदनुशासनात्। अत एव 'घटघटम्'इति प्रयोगो न। अन्यथा समाहारद्वन्द्वाविषये एकशेषाभावेन दुर्वारो द्वन्द्वोऽत्र स्यात्।

एवञ्च प्रत्यर्थशब्दनिवेशपक्षेऽपि 'न ब्राह्मणं हन्यात्'इत्यादौ सकलव्यक्तिसङ्ग्रहस्यैकशेषेणैव सिद्धेः प्रतिव्यक्ति लक्षणं नावर्त्यं भवतीत्यपरमनुकूलम्। समुदायस्यैकत्वादेकवचनमेवात्र बोध्यम्। हननंतु तत्र बाधितत्वाद् व्यक्तिष्वेव भवति, 'ब्राह्मणानां शतं भोज्यम्' इतिवत्।

न चैवम् "नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम्" [१।२।६९] इति सूत्रे एकवदिति व्यर्थम्, विशेषसूत्राणां समाहारद्वन्द्वविषयेऽप्रवृत्त्यर्थत्वादिति निरूपितं शब्देन्दुशेखरे। एवञ्च रामावित्यादौ शिष्टरामपदेनैव साहित्यविशिष्टरामद्वयबोधनम्।

यत्तु, द्वितीयरामशब्दस्मरणाद् बोधः। अत एवानेकार्थानां पदानामेकार्थीभवनरूप एकार्थीभाव एकशेषे सङ्गच्छते इति। तत्, न; इतरनिवृत्तिमजानतो बोधानापत्तेः, प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वभङ्गापत्तेश्च। एकार्थीभावव्यवहारस्तु गौणः कारणीभूतो दण्ड इतिवदुपपाद्यः। 'द्वौ च द्वौ च, एकश्चैकश्च' इत्यादावेकशेषद्वन्द्वावनभिधानान्न भवतः। विंशतीत्यादावेकशेषस्त्विष्ट एव।

ननु 'व्यक्तिः पदार्थः' इति पक्षे यावद्व्यक्तिशब्दप्रयोगनिवारणाय सूत्रस्यावश्यकत्वेऽपि 'जातिरेव पदार्थः' इति पक्षे एकाकृतियुक्तानेकव्यक्तिबोधस्य तत्तद्विभक्तिसमभिव्याहारेण तात्पर्येण वा एकस्मादपि सम्भवेनेदं व्यर्थमिति चेत्, न; 'अक्षाः, पादाः, माषाः' इत्यादौ नानाकृतियुक्तानेकव्यक्तिबोधार्थं तत्पक्षेऽपि आवश्यकत्वात्।

न च जातिनिष्ठजातिमङ्गीकृत्य तदर्थमपि सूत्रं न कार्यमिति वाच्यम्, सर्वत्र तादृशजातेः शक्यतावच्छेदकत्वे नानार्थोच्छेदापत्तेः, तज्जात्यंशे प्रमोषदशायां पृथिवीत्वादिप्रकारकबोधविवक्षायामेकशेषसिद्ध्यर्थं सूत्रस्यावश्यकत्वाच्च। तद्विषय-

1. उपाध्यायैः = कैयटोपाध्यायैरित्यर्थः।

कोद्‌बुद्धसंस्कारस्य स्मृतेः, वोपनायकत्वेन तदंशे उद्‌बोधकासमवधानस्यैव मोषपदार्थत्वात् ।

एतेन 'शाब्दबोधे शब्दस्यापि मानम्' इति वादिनां मते जात्यादिवत् शब्दस्यापि प्रकारत्वादुभयसाधारणशब्दस्यैव शक्यतावच्छेदकत्वम् इत्यपास्तम् । शक्तेः पदार्थघटितत्वेनार्थभेदाभिन्नतया शब्दस्यैकसम्बन्धे नानेकार्थवृत्तित्वाभावेन तस्यानुगतत्वाभावाच्चेति दिक् ।

'विभक्त्यन्तानामेकशेषः' इत्यादिपक्षदूषणं तु शब्देन्दुशेखरे स्पष्टम् ।

'ब्राह्मणश्च ब्राह्मणी च ब्राह्मणौ' अत्र "पुमान् स्त्रिया" [१।२।६७] इत्येकशेषः । स्त्रियां सहोक्तौ पुमान् शिष्यते, स्त्रीपुमर्थातिरिक्तकृतविशेषश्चेन्न भवतीति तदर्थः । अत एव गौरेष, गौश्चैषा एतौ गावावित्येव ।

ये तु, 'तदर्थकृतविशेषसत्त्वे एकशेषः' इति व्याचक्षते, तेषामत्रास्याप्रसक्तौ "सरूपाणाम्" इत्येकशेषे कदाचित् स्त्रीशेषस्याप्यापत्तिः । एवमन्यत्राप्यूह्यमित्यधिकं शब्देन्दुशेखरे द्रष्टव्यम् ।

यत्तु, समर्थसूत्रे 'किमर्थं पदग्रहणं क्रियते ? वर्णाश्रये आनन्तर्यमात्रे कार्यं यथा विज्ञायेत, 'तिष्ठतु दध्यशान त्वं शाकेन, तिष्ठतु कुमारीच्छत्रं हर देवदत्त' इत्यादिना भाष्ये पदग्रहणस्य वर्णग्रहण एव व्यावर्त्यदर्शनात् पदशब्देनात्रार्थबोधकमुच्यते । तेनार्थवत्समुदायोद्देश्यको विधिः समर्थाश्रित इति सूत्रार्थः । एवञ्चैकशेषे प्रातिपदिकप्रकृतिकद्विवादौ च न दोषः, तत्राप्यर्थवत्समुदायस्योद्देश्यत्वात् ।

अत एव "समासेऽङ्गुलेः सङ्गः" [८।३।८०] इत्यादौ समासग्रहणं चरितार्थम् । तत्र सकारस्यैवोद्देश्यत्वादिति बोध्यम् । तत्, न; विभक्त्यन्तेऽप्येकार्थीभावापत्तेः । न च तवापि "नेर्विशः" [१।३।१७], "अन्तरान्तरेण" [२।३।४] इत्यादेः पदविधित्वादेकार्थीभावाभावे अप्रवृत्त्यनापत्तिः, यत्रैकार्थीभावः, तत्रैव पदोद्देश्यको विधिरिति तदर्थादिति वाच्यम्, सामर्थ्यात् प्रवृत्तेः, साक्षात्पदस्य यत्रोद्देश्यता, तत्रैव तत्परिभाषाप्रवृत्तेश्च । अत एव पचतीत्यादावुद्देश्यविधेयभावेनान्वयः सङ्गच्छते । तस्मादिदं भाष्यप्रयोजनोपलक्षणम् । ध्वनितञ्चेदं तत्रैव भाष्ये ।

न चैवं पञ्चपाकाश्रय इत्यर्थे 'पञ्चपाचकः' इति प्रयोगापत्तिरिति वाच्यम्, केवलकृत्स्वप्येकार्थीभावाङ्गीकारात् ।

किञ्च, निवृत्तभेदाया एव क्रियाया धातुना बोधनात् तदर्थे सङ्ख्यान्वयस्य दुरुपपादत्वेन न तथा प्रयोग इति दिक् ।

समासत्वञ्च संकेतविशेषसम्बन्धेन समासपदवत्त्वमेव ।

यत्तु, समासत्वमर्थबोधायाननुसन्धीयमानविभक्तिकपूर्वपदकनामसमुदायत्वम्, दधि मधुरमस्तीत्यादावपि लुप्तविभक्त्यनुसन्धानाददोषः । अत एव भावनान्वये प्रथमान्तपदजन्योपस्थितेर्हेतुत्वं सङ्गच्छते । नीलोत्पलादौ तु नानुसन्धानम्, लोपमजानतोऽपि बोधात् । अत एव षष्ठीतत्पुरुषात् कर्मधारयस्य ज्यायस्त्वं सङ्गच्छते । लुप्तषष्ठ्यादिस्मरणाङ्गीकारे तु लक्षणाविरहात् तदसङ्गतिरेवेति । तत्, न; अनन्तस्थले विभक्त्यनुसन्धानकल्पने गौरवेण लोपमजानतो बोधेन च अप्रथमान्तपदभिन्नपदजन्योपस्थितिरेव भावनान्वयहेतुत्वेन चाक्षतेः ।

न च तद्दधि भुङ्क्ष्वेत्यादावपि भावनान्वयापत्तिः, तस्य कर्मत्वेनैवान्वये तात्पर्यात् । अन्यथा तवापि "स्वमोर्नपुंसकात्" [७।१।२३] इत्यादिशास्त्र-बलाद् विनिगमनाविरहाद् विभक्तिद्वयस्याप्यनुसंधाने दोषानुद्धारस्तदवस्थ एव ।

किञ्च, न घटोऽस्तीत्याद्यानुपूर्वीतो बोधे व्युत्पन्नानां तत एव बोधेन तत्रातिव्याप्तिः ।

एतेनाननुसन्धीयमानविभक्तिकत्वं शाब्दबोधप्रयोजकानुपूर्व्या ग्राह्यम् । तेनात्र नातिव्याप्तिः, घटो नेत्याद्यनुपूर्वीज्ञानत्वेनैव बोधहेतुत्वादित्यपास्तम् । एवम् 'श्रुतेरिवार्थम्' इत्यादाविवार्थमिति समुदायेऽतिव्याप्तिरिति दिक् ।

एवं तत्पुरुषत्वादिकमपि तेन सम्बन्धेन तत्पुरुषादिपदवत्त्वमेव ।

यत्तु, पूर्वपदार्थप्रधानोऽव्ययीभावः, उत्तरपदार्थप्रधानस्तत्पुरुषः, अन्यपदार्थ-प्रधानो बहुव्रीहिः, उभयपदार्थप्रधानो द्वन्द्व इति । तत्, न; उन्मत्तगङ्गमित्यन्य-पदार्थप्रधानेऽव्ययीभावे तल्लक्षणाव्याप्तेः, बहुव्रीहिलक्षणातिव्याप्तेश्च, तथा सूपप्रतीत्युत्तरपदार्थप्रधानेऽव्ययीभावे तल्लक्षणाव्याप्तेः, तत्पुरुषलक्षणाति-व्याप्तेश्च । अर्धं पिप्पालीत्यादितत्पुरुषे तल्लक्षणाव्याप्तेः, अव्ययीभावलक्षणाति-व्याप्तेश्च । द्वित्रा इत्युभयपदार्थप्रधानबहुव्रीहौ तल्लक्षणाव्याप्तेः, द्वन्द्वलक्षणाति-व्याप्तेश्च ।

किञ्च, असम्भवोऽप्येषां लक्षणानां जहत्स्वार्थायामानर्थक्यात् । अजहत्स्वा-र्थायामपि पदानां पृथगुपस्थितिजनकत्वाभावेन इयान् पूवपदार्थः, इयानुत्तरपदार्थ इत्यस्य निर्णेतुमशक्यत्वात् । भूतपूर्वगतिलभ्यमादाय तदुपपादनापेक्षयाऽस्मदुक्त-लक्षणानामेव लघुत्वादिति यत्किञ्चदेतत् ।

इदं पुनरिहान्यदवधेयम्—वृत्तौ सर्वत्रोपसर्जने विशेषसङ्ख्याव्यञ्जकाभावेऽभेदैकत्वसंख्या प्रतीयते। संख्यात्वेन संख्यैव चाभेदैकत्वसंख्यापदेन व्यवह्रियते। इदमेवाभिप्रेत्य संख्याविशेषाणामविभागेनावस्थानम्, परित्यक्तविशेषं संख्यासामान्यं वाऽभेदैकत्वं संख्येत्याहुः[1]।

अत एव 'द्विपुत्रः, मौद्गिकः, मासजातः, तावकीनः' इत्यादौ संख्याविशेषभानेऽपि न क्षतिः, आद्ये प्रातिपदिकस्यैव संख्याविशेषार्थत्वात्, द्वितीये मुद्गैः क्रीत इत्यर्थाद् न ह्येकेन क्रयः संभवति। एवं कारकमध्य इत्यादावपि बोध्यम्। न ह्येकस्य मध्यमस्ति। तृतीये विशिष्टकालावगमाय प्रयोगात् संख्याविशेषावसायः, चतुर्थे आदेशादेकत्वावसायः।

एवं प्रकरणादितोऽपि तदवसायः, यथा 'भवद्गिरामवसरप्रदानाय' इत्यादौ। यत्र तु न तथा, तत्र संख्यात्वेन संख्याभानमेव।

अयमर्थः—राजादिपदेन 'राजपुरुषः' इत्यादौ संख्यावद्राजसम्बन्धी लक्ष्यते। सति तु प्रकरणादौ तत्तत्संख्यावद्राजसम्बन्धीति। अत एव 'राजपुरुषः' इत्युक्ते राज्ञः, राज्ञोः, राज्ञां वेति जिज्ञासा सङ्गच्छते। एतेनैकत्वत्वेनैव भासत इत्यपास्तम्, विशेषजिज्ञासायाः सामान्यज्ञानपूर्वकत्वनियमात्। एतेन संख्या नैव भासत इत्यप्यपास्तम्। एवञ्च 'एकवचनमुत्सर्गतः करिष्यते' इति न्यायाद् विग्रहे एकवचनमेव। यत्र तु प्रकरणादिना संख्याविशेषस्यैव वृत्तौ भानम्, तत्र तद्विग्रहेऽपि बहुवचनादिकम्। एतदेवाभिप्रेत्य चित्रा अस् गो अस् इत्यलौकिकविग्रहवाक्यं चित्रगुरित्यादिसमासानां तत्र तत्राकरे दृश्यते।

---

1. 'भर्तृहरयः' इति शेषः। तथाहि—

यथौषधिरसाः सर्वे मधुन्याहितशक्तयः।
अविभागेन वर्त्तन्ते सङ्ख्यां तां तादृशीं विदुः॥ इति।

आहितशक्तयः = समर्पिता तत्तद्दोषविभेदनिबन्धनविरोधरूपा शक्तिर्यैरित्यर्थः। त्यक्तविरोधेति यावत्। अत एव अविभागेन = अविरोधेनेत्यर्थः। ताम् = अभेदैकत्वसङ्ख्याम्। तादृशीं मधुनिष्ठरसस्थितितुल्यामित्यर्थः।

अस्मिन् पक्षे संख्यात्वेन संख्यासामान्यस्यैव भानम्, न संख्याविशेषस्य। यद्यपि विशेषानालिङ्गितसामान्यासत्त्वादिदमसङ्गतमिव भाति, तथापि 'वन्ध्यासुतः' 'राहोः शिरः' विकल्पात्मकस्य संभवेन नासङ्गतम्। तदुक्तम्—

'अत्यन्तासत्यपि ह्यर्थे ज्ञानं शब्दः करोति हि' इति।

इन्द्रगोपादिवाचिवर्षासुजादौ तु सत्यपि बहुवचने संख्यात्वेनैव संख्या प्रतीयते, न बहुत्वत्वादिना, अवयवबहुत्वाद्यपेक्षया बहुवचनस्य सत्त्वात्। अत एवैकस्मिन्नपि वर्षतौ जातस्य बोधस्ततः संगच्छते। स्पष्टञ्चेदं भाष्ये समर्थसूत्रे।

न च सति प्रकरणादौ 'स्तोकाभ्यां मुक्तः' इति समासेऽलुकि च साधु स्यादिति वाच्यम्, अनभिधानेन तत्र समासाभावस्य भाष्ये सिद्धान्तितत्वात् स्तोकान्मुक्त इत्यादित एव प्रकरणसहकृतात् तथा प्रतीतिरिति तद्भावः। एकवचनं त्वौत्सर्गिकम्। इदमेवाभिप्रेत्य 'दन्तोष्ठस्य दन्ताः स्निग्धतराः' इत्यादौ पारिभाषिकद्विवचनाभावेन समाहारस्यैकत्वेन गुणभूतवर्तिपदार्थानां च बहुत्वेन द्विवचनोपपदत्वाभावात् तरप् न प्राप्नोति' इत्याशङ्क्य, वृत्तौ भेदस्य परित्यागादभेदलक्षणैकत्वसंख्यायाश्चोपादानादेवम्भूतदन्तोष्ठलक्षणार्थद्वयाश्रयः प्रत्यय इति "द्विवचनविभज्योपपदे" [५।३।५७] इति सूत्रस्थभाष्यादावुक्तम्। यदा तु तत्रापि प्रकरणादिना संख्याविशेषावगमः, तदा न भवत्येव तरप्। 'प्लक्षन्यग्रोधानां प्लक्षा दीर्घतमाः' इत्यादौ तु न तरप्, बहुवचनेनावयवेषु संख्याविशेषस्यैव प्रतीतेः।

नन्वस्या अभेदैकत्वसंख्याशब्देन व्यवहारे किं विनिगमकम्? अभेदद्वित्वादिशब्देनापि तत्संभवादिति चेत्, [1]कपिञ्जलाधिकरणन्यायेनैकत्वस्य प्रथमोपस्थितत्वादिति गृहाण। एवञ्चैतदर्थोऽप्येकार्थीभाव आवश्यक इत्याहुः।

अपरे तु, नात्र संख्यात्वेन संख्यावत् स्वसम्बन्धिनि लक्षणा, मानाभावात्, तथाबोधानुभवाभावाच्च। न च जिज्ञासानुरोधात् तथाकल्पनम्, न हि शब्दजन्यतथाज्ञानं विशेषजिज्ञासायां नियामकम्। आम्रफलदर्शनमात्रेण विशेषरसजिज्ञासानापत्तेः, द्रव्यस्य संख्याऽव्यभिचारेण तज्ज्ञानसम्भवाच्च, ज्ञानेच्छयोर्विशिष्य हेतुहेतुमद्भावानुरोधेन विशिष्यैव वाच्यतापत्तेश्च। तस्मात् संख्याया अभावमेव।

---

1. 'कपिञ्जलानालभेत' इति वाक्येन बहुत्वव्याप्यसंख्याविशिष्टकपिञ्जलालम्भनं विधीयते। तत्र त्रयाणां चतुरादीनां वा आलम्भनमिति संशये बहुत्वव्याप्यत्वस्य त्रित्वादिषु सर्वेष्वविशिष्टत्वात् यथाप्राप्तमेवालब्धव्यमिति पूर्वपक्षे चतुरादीनामालम्भनम् 'मा हिंस्यात्' इति सामान्यशास्त्रविहितनिषेधस्यालम्भनवद् व्यक्तीतरपरत्वरूपतात्पर्यसंकोचकल्पने गौरवाद् गणनायां प्रथमोपस्थितत्रित्वपरतयापि वचनस्य चारितार्थ्यात् लाघवाच्च बहुत्वेन त्रित्वमेव बहुवचनार्थं इति सिद्धान्तितम्। तन्न्यायादत्रापि संख्यात्वेनैकत्वस्यैव वृत्त्यर्थत्वम्, न तु द्वित्वादीनाम्, अप्रतीयमानविशेषधर्मकैकत्वमभेदैकत्वमिति व्युत्पत्तेरित्यधिकरणस्य तात्पर्यम्।

'अभेदैकत्वसंख्या'इत्यस्य **चायमर्थः**—भेदशब्देन तत्सहचरितं द्वित्वादि। तस्यैकत्वस्य चाप्रतीतिरित्येव 'वर्षासुजः' इत्यादावपि तद्भानमेव। प्रकरणादिसत्त्वे तु भवत्येव विशिष्य तद्भानम्। तत्र परं भवत्येव तेन रूपेण लक्षणा। ध्वनितं चेदम् "पञ्चम्यास्तोकादिभ्यः" [६।३।२]इति सूत्रे पदमञ्जर्यामिति प्राहुः। "समर्थ" सूत्रे कैयटे च मतद्वयमपि स्पष्टम्।

यत्तु मीमांसकाः—"समर्थः पदविधिः" इति सूत्रे सामर्थ्यमितरनैरपेक्ष्यम्, पदविधिशब्देन च पदस्य सम्पादको विधिः "कर्तृकरणयोः"[२।३।१८]इत्यादिः गृह्यते। तथा च पदविधिविधेय इतरनिरपेक्षत्वार्थबोधक इत्यर्थः। अत एव 'व्रीहिभिर्यजेत, यवैर्वा यजेत' इत्यादिवाक्येभ्य इतरनिरपेक्षैर्व्रीहिभिर्यवैश्च यागसिद्धिः। इतरच्च सजातीयमेव गृह्यते। तेन 'दण्डेन चक्रेण घटं करोति' इत्यादीनां नासाधुता। समर्थसूत्रावृत्त्या च भवदुक्तार्थस्यापि सिद्धिरिति। तत्, न; आवृत्तौ मानाभावात्।

'पश्य मृगो धावति,' 'पचति भवति' इत्यादौ त्वदुक्तसामर्थ्यप्रत्यायकाभावेऽपि विशेषणस्यायोगव्यवच्छेदान्ययोगव्यवच्छेदफलकत्वेन न्यायत एवेतरनिरपेक्षकर्मत्वादिबोधस्येव व्रीहिभिरित्यादावपि तस्य संभवेन फलाभावाच्च। गार्ग्य इत्यादौ प्रत्ययविधेः पदत्वसम्पादकत्वाभावेन त्वदुक्तार्थकपरिभाषाऽप्रवृत्तौ इतरनिरपेक्षगर्गापत्यत्वादिबोधानापत्तेश्च। यथाकथञ्चित् पदविधित्वाश्रयेण तु व्याकरणशास्त्रमात्रस्य तथात्वेन 'पदविधिः' इत्यस्य वैयर्थ्यापत्तिः, पदविधिरित्यस्य तद्विधेये लक्षणापत्तेश्चेति सर्वेष्टसिद्धिः।

अथ समस्तपदेषु क्लिष्टेषु बोधो लिख्यते

पूर्वं भूतो भूतपूर्वः । पूर्वमिति क्रियाविशेषणम्, भूधातुरुत्पत्त्यनुकूलव्यापारार्थः, पूर्वशब्दश्च पूर्वकालवृत्तिपरः । एवञ्च पूर्वकालवृत्त्यतीतोत्पत्त्यनुकूलव्यापाराश्रय इति बोधः ।

अपदिशम्—अत्र वृत्तिविषये 'अप'शब्दो मध्यद्योतकः, दिशोर्मध्यमित्यर्थः ।
हरौ इत्यधिहरि—अत्राधिः अधिकरणशक्तिद्योतको हरिरूपाधिकरण इत्यर्थः।
उपकृष्णमित्यत्र उपः समीपद्योतकः कृष्णसमीपम् इत्यर्थः ।

दुर्यवनम्—इत्यत्र दुःशब्दः ऋद्ध्यभावस्य द्योतकः । यवनसम्बन्धी ऋद्ध्यभाव इति बोधः । ऋद्धिर्धनादिमत्त्वम् ।

निद्रा सम्प्रति न युज्यते इत्यतिनिद्रम्—अत्र निद्राशब्देन निद्राकर्तृकवर्त्तमानयुक्तत्वक्रियाभावो लक्ष्यते । एतद्द्योतकोऽतिः । अतिनिद्रमासीदित्यादिप्रयोगेषु अतिनिद्रमित्यस्य तथा व्यवहारविषये लक्षणेत्याहुः ।

वृत्तौ विशेष्यविशेषणभाववैपरीत्येन वर्त्तमानयुक्तत्वाभाववती निद्रेति बोध इत्यन्ये ।

इतिहरीति—हरिशब्दः स्वरूपपरः, इतिः प्रकाशद्योतकः, हरिशब्दसम्बन्धी प्रकाश इति बोधः ।

अनुरूपमित्यस्य रूपप्रतियोगिकयोग्यतावदित्यर्थः । योग्यताद्योतकोऽनुः ।
यथाशक्ति—समभिव्याहृतपदार्थानतिक्रमोऽत्र यथाशब्दद्योत्यः ।
सहरि देवदत्तः—इत्यत्र देवदत्तवृत्तिहरिप्रतियोगिकसादृश्यमिति बोधः ।
अनुज्येष्ठं प्रणमतीत्यादौ ज्येष्ठक्रमेण प्रणमतीत्यर्थः ।

सचक्रमित्यत्र चक्रप्रतियोगिकैककालिकत्वसमनियतसाहित्यवदिति बोधः, यौगपद्यार्थेन समासविधानादिति बोध्यम् । प्रकृतेऽपि यौगपद्यस्य गुणतया प्रवेशान्न दोषः ।

सक्षत्रम्—अत्र क्षत्रशब्दो भावप्रधानः, क्षत्रियत्वविषया संपत्तिरिति बोधः । सहशब्दः सम्पत्त्यर्थः । अनुरूप आत्मभावः संपत्तिः—योग्यस्वप्रवृत्तिनिमित्तवत्त्वमिति यावत् ।

सतृणमत्ति—अत्र बुद्धिविशेषविषयत्वरूपं साहित्यं सहार्थः। तृणसहितमित्यर्थः। तेन हि सकलमभ्यवहार्यं भुङ्क्त इति प्रतीयते, यस्तृणानि भक्षयेत्, कथमन्यत् स परित्यजेदिति प्रतीतेः। अत्रैव चास्य तात्पर्यम्, न तु तृणभक्षणे। एतावतैव साकल्यद्योतकता सहस्य बोध्या, उत्तरपदं साधुत्वमात्रार्थे। साकल्येनात्तीत्येव बोध इत्यपि कश्चित्।

सागिन अधीते—अत्रापि अग्निग्रन्थसहितमिति वाच्योऽर्थः। तत्सहिताध्ययनेन च तदन्तग्रन्थाध्ययनसमाप्तिर्गम्यते। एतावतैवान्तवचनत्वं सहस्य।

केचित्तु, अन्तत्वं साहित्यञ्च सहद्योत्यम्। तेनान्त्याग्निग्रन्थसहितकर्मकमध्ययनमिति बोध इत्याहुः।

यावच्छ्लोकमच्युतप्रणामाः—परिमाणपरिच्छेद्यत्वं यावद्द्योत्यम्, श्लोकपरिमाणभूतसंख्यापरिच्छिन्नाः प्रणामा इति बोधः।

अक्षपरीत्यादौ विपरीतवर्त्तनं पर्यर्थः। वैपरीत्यञ्च जयापेक्षया। अक्षाणाञ्च करणत्वेनान्वयः। अक्षकरणकविपरीतवर्त्तनमिति बोधः। पराजय इति यावत्।

अनुवनमशनिर्गतः—अत्र वनशब्दस्य समोपपरत्वम् तद्गतलणत्वञ्चानुद्योत्यम्। एवञ्च वनसमीपदेशनिष्ठज्ञापकतानिरूपितज्ञाप्यतावद्गमनकर्मीभूतोऽशनिरिति बोधः।

अनुगङ्गं वाराणसी—इहायामः, तद्गतलक्षणत्वञ्चानुद्योत्यम्। लक्ष्यञ्च वाराणस्यायामः, वाराणस्याः स्वरूपेणाज्ञाप्यत्वात्। एवञ्च गङ्गापदेन गङ्गादैर्घ्यज्ञाप्यदैर्घ्यवती लक्ष्यते। दैर्घ्यज्ञापकत्वं दैर्घ्यस्य सदृशत्वेनेति बोध्यम्।

पारेगङ्गादिति, गङ्गापारादिति, षष्ठीसमासेन व्याख्यातम्।

द्विमुनि व्याकरणस्य—व्याकरणसम्बन्धिवंश्यत्ववन्तौ द्वौ मुनी इति बोधः। वंश्यत्वमेकार्थीभावगम्यम्।

द्विमुनिव्याकरणमित्यत्र वंश्यत्ववद्द्विमुन्यभिन्नं व्याकरणमिति बोधः। विद्यातद्वतोरभेदविवक्षया साधु।

सप्तगङ्गमित्यादौ सप्तगङ्गासमाहार इति बोधः। उन्मत्तगङ्गमित्यादौ उन्मत्तगङ्गाधिकरणीभूत इति बोधः।

इत्यव्ययीभावः।

अथ तत्पुरुषविचारः

कृष्णश्रितः—इत्यादौ च कृष्णकर्मकश्रयणकर्त्तेत्यादिरीत्या बोधः। कृष्णादेः समुदायशक्तिलभ्यकर्मतादिसंसर्गेणोत्तरपदार्थेऽन्वयः। एवमन्यत्राप्यूह्यम्।

स्वयङ्कृतः—इत्यस्य स्वकर्तृककृतिकर्मेति बोधः। स्वयमित्यात्मना इत्यर्थे कर्तृशक्तिप्रधानः।

खट्वारूढशब्दोऽसमीक्ष्यकारिणि केवलरूढः। अत एवायं नित्यसमासः, वाक्यात् तदर्थाप्रतीतेः।

मासप्रमित इति। मासविषयकपरिच्छेदकर्त्तेति बोधः। "आदिकर्मणि क्तः कर्त्तरि च" [३।४।७१]।

शङ्कुलया कृतः खण्डः, शङ्कुलाखण्ड इत्यादौ कृद्द्वारकसामर्थ्य एव प्रवर्त्तते, न साक्षात् परस्परान्वये, नाप्यन्यक्रियाद्वारा सामर्थ्ये इति भाष्ये स्पष्टम्।

धान्येनार्थः, धान्यार्थः—प्रकृत्यादित्वात् तृतीया। अर्थशब्दो धनवाची, धान्याभिन्नं धनमिति बोधः।

मासेन पूर्वो मासपूर्वः—अत्रावध्युत्पत्तिकालतद्ध्वंसानधिकरणकालोत्पत्तिकः पूर्वशब्दार्थः। तदेकदेशे काले मासस्याभेदेनान्वयः।

माषेणोनं माषोनम्। ऊनार्थोऽभाववान्। तत्र अभावे माषादेः, प्रतियोगितयाऽन्वयः।

वाक्कलहः—कलहः क्रोधपूर्वको व्यापारः। तत्र वाचः सम्बन्धित्वेनान्वयः।

आचारनिपुणः—आचारहेतुकनैपुण्यवानित्यर्थः।

गुडमिश्रः—अत्र मिश्रशब्दार्थः संयोगवान्। तदेकदेशे संयोगे गुडस्य प्रतियोगितयान्वयः।

आचारनिपुणेनाचारश्लक्ष्णो व्याख्यातः। श्लक्ष्ण उज्ज्वलः।

काकपेया नदी—काककर्तृकपानकर्मेत्यर्थः। पूर्णाम्भस्त्वेन स्तुतिः, अल्पाम्भस्त्वेन निन्दा वा व्यङ्ग्या।

दध्योदनः—अत्र दध्युपसिक्त ओदन इति बोधः। एकार्थीभावलभ्य उपसेकः।

यूपाय दारु यूपदारु। अत्र तादर्थ्यचतुर्थ्यन्तेन समासः। सोऽपि प्रकृति-विकृतिभाव एव। अश्वघासादयस्तु षष्ठीतत्पुरुष इत्यन्यत्र विस्तरः।

सर्वेषां श्वेततरः सर्वश्वेतः। द्रव्यान्तराधेयश्वेतापेक्षया सर्वेषां पटाना-मधिकोऽयं श्वेतो गुण इत्यर्थः। यद्वा सर्वेषां मध्ये श्वेततर इत्यर्थः। न च तमबापत्तिः, बहूनां निर्धारणेऽपि क्वचित् तरपः स्वीकारादित्याहुः।

पूर्वकायोऽर्धपिप्पलीत्यादौ कायसम्बन्धिपूर्वोऽवयव इत्यादिक्रमेण बोधः। पूर्वपदार्थप्राधान्यमत्र। यदा तु कायादिशब्दानां तदवयवे लक्षणा, तदा काया-वयवाभिन्नः पूर्वो भाग इति बोधः।

मासो जातस्य मासजातः। अत्र यद्यपि विग्रहे मासः प्रधानम्, तथापि वृत्तौ जातो मासजातो दृश्यतामित्यादौ जातस्यैव दर्शनकर्मत्वादिप्रतीतेः। इदमेव ध्वनयितुं विग्रहे 'यस्य सः' इत्यपि प्रयुज्यते कैश्चित्। विशेषणविशेष्यभाव-व्यत्यासश्चैकार्थीभावसाध्यः। जातपरिच्छेदको मास इति बोधो विग्रहे, मास-परिच्छेद्यो जात इति वृत्तौ। जातस्य परिच्छेद्यत्वं तु परिच्छेदजननाश्रयत्वेन। अस्य जातस्य कियान् काल इति प्रश्ने मासजात इत्यस्योत्तरत्वं त्वार्थं बोध्यम्।

परे तु जातोत्तरमास इति विग्रहे बोधः। उत्तरकालिकत्वं षष्ठ्यर्थः, समासे जातोत्तरमासम्बन्धीति बोधः। जातोत्तरत्वं च जननोत्तरत्वमादाय। इदमेव ध्वनयितुम् 'यस्य सः' इत्युक्तम्। असामानाधिकरण्याद् बहुव्रीह्यप्राप्ति-रित्याहुः। तत्तु क्वचिद्व्यधिकरणानामपि बहुव्रीहिदर्शनाच्चिन्त्यम्।

पूर्वं स्नातः, पश्चादनुलिप्तः स्नातानुलिप्तः। स्नाताभिन्नः स्नानोत्तर-कालिकानुलेपनाश्रय इति बोधः। इदञ्चैकार्थीभावगम्यम्। पञ्चानां गवां समाहारः पञ्चगवम्; पञ्चसंख्याकगोसमाहार इत्यर्थः।

घनश्यामः—घनसदृशाभिन्नः श्याम इति, घनाभिन्नः श्याम इति वा बोधः। इह वृत्तौ विग्रहे च पूर्वपदं तत्सदृशे लाक्षणिकम्, आरोपितं वा। इदमेव ध्वनयितुं विग्रहे इवः प्रयुज्यते। अत एव मृगीव चपला मृगचपलेत्यादौ

समानाधिकरणोत्तरपदपरत्वनिबन्धनपुंवद्भावः। सादृश्यञ्चोपस्थितश्यामत्वादिनेत्यन्यत्र विस्तरः।

पुरुषव्याघ्रः—अत्रोत्तरपदं तत्सदृशे लाक्षणिकम्, आरोपितं वा। पूर्वपदार्थविशेष्यको बोधः। "उपमितं व्याघ्रादिभिः सामान्याप्रयोगे" [२।१।५६] इति समासः।

प्रसन्नेन दृगब्जेनेत्यादौ नोपात्तधर्मेण सादृश्यम्, किन्त्वनुपात्तेनैवेति सामान्याप्रयोगोऽस्त्येवेति न दोषः।

वस्तुत इदं सूत्रं समानलिङ्गवचनत्व एव प्रवर्त्तते, समानाधिकरणाधिकारात्। अत एव "परवल्लिङ्गम्" [२।४।२६] इति सूत्रे 'तत्पुरुषश्चापि कः प्रयोजयति, यः पूर्वपदार्थप्रधान एकदेशिसमासः' इति भाष्यम्, 'द्वन्द्वैकदेशिनोः' इति न्यासं कृत्वा तत्पुरुषग्रहणं प्रत्याख्यातञ्च भाष्योक्तं संगच्छते। अन्यथा दृगब्जेनेत्यादौ पूर्वपदार्थप्रधानस्य दृश्यमानपरवल्लिङ्गस्य त्यागे बीजाभावेन तदसंगतिः स्पष्टैव। दृगब्जमित्यादौ तु विशेषणसमास एव। दृगब्जेन वीक्षत इत्यादौ वीक्षणान्वयस्तु प्रधाने [वे]दृक्तादात्म्यप्रतीत्या निर्बाध एव। अत एवात्र परिणामालङ्कारमाहुरालङ्कारिकनव्याः।

मुखचन्द्र इत्यादावपि विशेषणसमास एव। चन्द्ररूपकत्वव्यवहारस्तु समानवित्तिवेद्यतया चन्द्रप्रतियोगिकाभेदस्यापि मुखे प्रतीतेरार्थमादाय।

अन्यो राजा राजान्तरमित्यादेस्तु मयूरव्यंसकादित्वादेव परवल्लिङ्गता बोध्या। तत्रान्तरशब्दो भिन्नवाची, अभेदेन पूर्वपदार्थे विशेषणम्। पूर्वपदजन्यबोधप्रकाराश्रयबुद्धिस्थयत्किञ्चित् प्रतियोगित्वञ्च भेदे व्युत्पत्तिविशेषबललभ्यमित्याहुः।

अपरे तु, "उपमितम्" इति समासोऽप्युत्तरपदार्थप्रधान एवेत्याहुः।

नञ्समासे बोधस्तु नञर्थनिर्णये निरूपितः।

प्रगत आचार्यः प्राचार्यः, निष्क्रान्तः कौशाम्ब्या निष्कौशाम्बिरित्यादौ गतक्रान्ताद्यर्थभानं वृत्तावेकार्थीभावबलात्।

इति तत्पुरुषविचारः।

अथ बहुव्रीहिविचारः

प्राप्तमुदकं यं स प्राप्तोदको ग्रामः। अत्रोदककर्तृकप्राप्तिकर्मीभूतो ग्राम इति बोधो वृत्तौ। यत्कर्मकप्राप्तिकर्त्रुदकमिति विग्रहे। एवमूढरथोऽनड्वान् इत्यादावप्यूह्यम्। तदुपपत्तिस्तु प्रागुक्तैव।

दशानां समीपे ये सन्ति, ते उपदशाः। आत्रोपः समीपपरः। दशपदार्थस्य स्ववृत्तिदशत्वप्रतियोगिकत्वसम्बन्धेन सामीप्येऽन्वयः। दशसमीपवन्त इति बोधः। ईदृशसम्बन्धेनैवान्वयेऽस्य साधुत्वम्, एकार्थीभावबलात्; "संख्ययाऽव्यय" [२।२।२५] इत्यादिसूत्रबलाच्च बोध्यम्। अत एव नवैकादश वाऽनेन प्रत्याय्यन्ते, न तु दशानां वृक्षादीनां समीपे ये गवादयः, ते प्रत्याय्यन्ते। एतेनासन्नविंशाः, अदूरत्रिंशा इति व्याख्यातम्।

अधिकचत्वारिंशाः—अत्र चत्वारिंशद्भ्योऽधिका इत्यर्थः। द्वौ वा त्रयो वा द्वित्राः—अत्र वाशब्दो विरोधद्योतकः। स चैककालिकैकाधिकरणावृत्तित्वरूपविरोधो भासते।

क्वचित्तु, 'व्रीहिभिर्यजेत, यवैर्यजेत' इत्यादौ वाशब्दं विनापि तात्पर्यवशात् तृतीयया निरपेक्षसाधनत्वबोधनेन समुच्चयासम्भवाच्च विकल्पो बोध्यते, चं विनापि समुच्चयवत्। अत्रापि परस्परनिरपेक्षस्यैव अनेकस्य क्रियायामन्वयः, एकस्य क्रियान्वयोत्तरमपरस्यावृत्त्या तदन्वयात्। एवञ्चात्र समभिव्याहृतकारकविशिष्टक्रियायां विभिन्नकालिकत्वं वाशब्दद्योत्यम्।

क्वचित्तु, समभिव्याहृतार्थप्रतियोगिकाभावोऽपि वाशब्दद्योत्यः। यथा "दीर्घात् पदान्ताद् वा" [६।७।१७६] इत्यादौ स्थाणुर्नवेत्यादौ संशयात्मकज्ञानजनक एकाधिकरणावृत्तित्वरूप एव विरोधो वार्थः, अन्यतरकोटेः सर्वथा बाध्यत्वात्। भिन्नभिन्नकोट्युपस्थितिरपि वाशब्दसमभिव्याहारादेव; अन्यथा स्थाणुर्नेत्युक्ते स्थाणुभिन्न इत्येव प्रतीत्यापत्तिः।

क्वचित्तु, एककालिक एकाधेयानधिकरणत्वरूपो विरोधो वार्थः। यथा पटे घटे वा सौन्दर्यमित्यत्र कार्यान्वये च विकल्पः, न तु शब्दादुपस्थितौ। अतः शब्दान्नियमेन बहूनामुपस्थितेर्नित्यबहुवचनान्ततैवेत्यन्यत्र विस्तरः।

द्विरावृत्ता दश द्विदशाः । अत्र सुजर्थान्तर्भावेण वृत्तिः, एकार्थीभावबलादित्याहुः ।

दक्षिणस्याः पूर्वस्याश्च दिशोऽन्तरालं दक्षिणपूर्वा इत्यादौ दणिपूर्वोभयमध्यदिगित्यर्थः, एकार्थीभावबलात् । समुदायस्य हि मध्यदिक् शक्या ।

केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तं केशाकेशि । अत्र विग्रहे क्त्वाप्रत्ययोऽध्याहृतस्थित्यादिक्रियामादाय बोध्यः । ग्रहणकर्मत्वञ्च प्रत्यासत्त्या केशादिविशिष्टपुरुषयोरेव । परस्परग्रहणादिरूपः कर्मव्यतिहारः समुदायशक्यः, युद्धादिरूपक्रिया च । एवञ्च परस्परकेशाधिकरणकतद्वत् पुरुषकर्मकग्रहणोत्तरकालिकस्थितिकर्तृपुरुषकर्तृका क्रिया इति बोधः । क्रिया युद्धादिरूपेति क्वचित् प्रकरणात्, क्वचिद् युद्धादिवाचकपदसमभिव्याहारात् । यथा—

मृधं किमछत्रकदण्डताण्डवं
भुजाभुजि क्षोणिभृतां दिदृक्षवः ।

इत्यादौ ।

एतेन 'कर्णाकर्णि प्रथितमयशः' इति, 'हस्ताहस्तिमिषात् स्पृशन् कुचतटीम्' इत्यादि व्याख्यातम् । आद्ये कर्णाभ्यां कर्णाभ्यामाकर्ण्य इदं प्रधनं प्रवृत्तमिति विग्रहः, प्रथितमिति क्रियाविशेषणमेतत् ।

एतेनेदृशसमासो युद्धरूपार्थे एवेति कैयटाद्युक्तं परास्तमित्यन्यत्र विस्तरः ।

सपुत्रो गत इत्यादि सहपुत्रेण गत इत्यनेन सुबर्थवादे निरूपितबोधेन व्याख्यातम् ।

इति बहुव्रीहिविचारः ।

अथ द्वन्द्वविचारः

धवखदिरौ इत्यादौ सहितौ धवखदिराविति बोधः।

पाणिपादमित्यादौ पाणिपादसमाहार इति बोधः।

उपदशम्, दन्तोष्ठमित्यत्र दशसमीपदन्तोष्ठसमाहारः। समाहरे दशसमीपत्वञ्च स्ववृत्तिदशत्वसंख्याप्रतियोगिकसामीप्यवत्संख्यावदवयवकत्वेनेति बोध्यम्। उपदशमित्यव्ययीभावः।

बहुव्रीहेस्तु नानुप्रयोगः, तस्य नित्यबहुवचनान्तत्वेन दन्तोष्ठमित्यनेनान्वयायोग्यत्वात्। अनयैव दिशा अन्यत्राप्यूह्यम्।

इति द्वन्द्वविचारः।

इति समासादिशक्तिविचारः।

अथ सुबन्तप्रकृतिकक्यजाद्यर्थो निरूप्यते

तत्र 'घटमिच्छतीति घटीयति देवदत्तः' इत्यत्र क्यजर्थ इच्छा, प्रकृतेश्च कर्तृसम्बन्धिनि घटे लक्षणा। अत एव पुत्रीयत्यात्मानं देवदत्त इति न। अत एव 'अस्याकर्मकत्वादितः कर्मणि लकारो न' इति "सुप आत्मनः" [३।१।८] इति सूत्रस्थं भाष्यं सङ्गच्छते।

अत्र च क्यजेव तात्पर्यग्राहकः। "सुप आत्मनः क्यच्" इति सूत्रात् एषितृसम्बन्धीछाकर्मवाचकादिच्छायां क्यजिति तदर्थः। एवञ्च एकदेवदत्तकर्त्तृका स्वसम्बन्धिघटकर्मिकेच्छेति बोधः। कर्मत्वं तु विशिष्टशक्तिलभ्यम्। काम्यचि अप्येवमेव।

तथा "उपमानादाचारे" [३।१।११०]इति सूत्रेणापि क्यच्। उपमानवाचकात् कर्मणः आचारे क्यजित्यर्थः। उपमानञ्चात्राचारनिरूपितमेव गृह्यते, प्रत्यासत्तेः। 'विष्णूयति द्विजम्' इत्युदाहरणम्। तत्र विष्णुपदं विष्णुकर्मकाचारसदृशार्थकम्। आचारः क्यजर्थः। एवञ्च 'एकदेवदत्तकर्त्तृको द्विजकर्मको विष्णुकर्मकाचारसदृश आचारः' इति बोधः। तत्र प्रत्यासत्त्या विष्णुकर्मकाचारोऽपि देवदत्तादिकर्त्तृक एव, 'आत्मनः' इत्यनुवृत्तेर्वा।

न चैतन्मते 'सुपर्वभिः शोभितं त्रिविष्टपं भारतायते' इत्यत्राप्यनुपपत्तिः, भारताचारसदृशाचारस्य त्रिविष्टब्वृत्तेरप्रसिद्धेः। सुपर्वभिः शोभितमित्यत्र तु श्लेषेणाभेदाध्यवसाय एव, न सादृश्याध्यवसाय इति वाच्यम्, एकशब्दोपात्तत्वेनाभेदबुद्धेरिव शब्दरूपसाधर्म्येण सादृश्यबुद्धेरप्युपपत्तेः।

'कृष्णायते देवदत्तः' इत्यत्र कृष्ण इवाचरतीत्यर्थे क्यङ्। अत्रापि क्यङ्प्रकृतेः कृष्णकर्तृकाचारसदृशोऽर्थः। क्यङर्थ आचारः। तथा च 'कृष्णकर्तृकाचारसदृश एकदेवदत्तकर्तृक आचारः' इति बोधः। विष्णुद्विजयोः कृष्णदेवदत्तयोश्च उपमानोपमेयभावोऽर्थाद् गम्यते, न तु शाब्द इति ध्येयम्।

अत्र पुत्रकृष्णादिपदार्थानां क्यजाद्यर्थेनैकार्थीभावे साध्यत्वेनैव भानम्, शब्दशक्तिस्वभावात्। अत एव 'व्याकरणस्य सूत्रं करोति' इतिवाक्ये सम्बन्धित्वेनान्वितस्यापि व्याकरणस्य 'व्याकरणं सूत्रयति' इत्यादौ कर्मत्वमित्याद्यूह्यम्।

इति क्यजाद्यर्थविचारः।

अथ सुबन्तप्रकृतिकतद्धितार्थो निरूप्यते

तत्र "तस्यापत्यम्" [४।१।९२] इत्येवञ्जातीयसूत्रैर्विहितानामपत्याद्यर्थः। षष्ठ्याद्यर्थश्च समुदायगम्यः। तेन 'औपगवः' इत्यादेः 'उपगुसम्बध्यपत्यम्' इत्यर्थः। अत्राप्येकार्थीभावाङ्गीकारान्न विशेषणाद्यन्वय इति निरूपितम्।

"सास्य देवता" [४।२।२४] इत्यस्योदाहृणे आग्नेयादौ देवताविशिष्टं[1] देयं प्रत्ययार्थः। प्रकृत्यर्थः प्रत्ययार्थैकदेशे अभेदेन विशेषणम्।

यद्वा, [2]देवतायां प्रदेये च भिन्नैव शक्तिः, अतो नैकदेशान्वयः। एवञ्च 'अग्न्यभिन्नदेवतासम्बन्धी' इति बोधः। प्रदेयञ्च सम्बन्धित्वेनैव प्रत्ययार्थः, प्रदेयमिति मन्त्रस्याप्युपलक्षम्।

न चैन्द्रादिपदैरेव देवताया उपस्थितत्वेन तत्र प्रत्ययस्य शक्तिर्व्यर्थेति वाच्यम्, देवतात्वेन रूपेण तत उपस्थित्यभावात्। आमिक्षादिपदैश्च सम्बन्धित्वेन बुद्धस्यैव प्रदेयस्य विशेषसमर्पणं क्रियत इति[3] **प्राञ्चः**।

नव्यास्तु, चतुर्थ्यादौ प्रकृत्यर्थस्य प्रकृत्यैव लब्धस्य चतुर्थ्योद्देश्यत्वमात्रं यथोच्यते। एवमत्रापि देवतात्वं प्रदेयश्च प्रत्ययार्थः। तत्र प्रदेये देवतात्वस्य निरूपकतासम्बन्धेनान्वयः। एवञ्चाग्निवृत्तिदेवतात्वनिरूपकमिति बोधः।

नन्वेवम्—

तद्धितेन चतुर्थ्या वा मन्त्रवर्णेन वा पुनः।
देवतासंगतिस्तत्र दुर्बलं तु परम्परम्॥

इति मीमासकोक्तेदौर्बल्यं कथमिति चेत्, इत्थम्—चतुर्थ्यां वाक्याद्देवतात्वसम्बन्धलाभः, तद्धिते समानपदोपादानश्रुत्येति श्रुतिवाक्यबलाबलाधीनं तत्, इत्याहुः।

---

1. वैशिष्टचञ्च स्वस्वामिभावसम्बन्धेन, स्वोद्देश्यकत्यागकर्मत्वसम्बन्धेन वा बोध्यम्।
2. देवतात्वञ्च 'दिवेरैश्वर्यकर्मणो देवता' इति "देवात्तल्" इति सूत्रभाष्याद् मन्त्रकरणकहविस्त्यागजन्यस्वर्गादिफलातिरिक्तफलाश्रयत्वम्, मन्त्रस्तुत्यत्वं च अनुक्रमणिकायामुक्तम्—यस्य वाक्यम्, स ऋषिः, याऽनेनोच्यते सा देवतेति। अत एव ऐन्द्रो मन्त्रः, ऐन्द्रं हविरिति द्विविधप्रयोगसिद्धिरिति।
3. भूषणकारा इत्यर्थः।

अपरे तु, देवतात्वेनोपस्थितये प्रकृतेर्लक्षणैवाङ्गीकार्या, प्रत्ययश्च तत्र तात्पर्यग्राहकः। तथा चानन्यलभ्ये प्रदेय[1] एव प्रत्ययस्य शक्तिः। सूत्रेऽपि देवतेत्येतत् प्रकृत्यर्थविशेषणमेव। सा चेयं प्रकृतेर्लक्षणा[2] = निरूढलक्षणा, अनादिप्रयोगावच्छिन्नलक्षणाया एव निरूढलक्षणात्वात्। सम्बन्धस्तु संसर्गः। न च द्रव्यमपि दध्यादिपदलभ्यत्वेनाशक्यं स्यात्, तदश्रवणेऽपि ऐन्द्रपदमात्रात् प्रदेयमात्रप्रतीतेः ऐन्द्रदधीत्यादिसामानाधिकरण्याच्चेत्याहुः।

सुवृत्तिदेवतात्वनिरूपकत्वसम्बन्धेन प्रकृत्यर्थस्य प्रत्ययार्थे अन्वय इति तत्त्वम्।

एवम् "तदस्यां प्रहरणमिति क्रीडायां णः" [४।२।५७] इत्यत्रापि प्रहरणविशिष्टा क्रीडा, प्रहरणक्रीडे, क्रीडामात्रं वार्थः।

एवम् 'सोऽस्य निवासः'[3] [४।३।८९], "सास्मिन् पौर्णमासी" [४।२।२१] इत्येवञ्जातीयकेषूह्यम्।

"तेन दीव्यति" [४।४।२] इत्यादिना अक्षैर्दीव्यत्याक्षिक इत्यादौ प्रत्ययः। तत्र दीव्यतीत्यत्र तिङन्ते क्रियायाः प्राधान्येऽपि वृत्तौ विशेषणविशेष्यभावव्यत्यासो बोध्यः, 'सत्त्वप्रधानानि नामानि' इति सिद्धान्तात्, पूर्वोत्तरसाहचर्याच्च, तेनाक्षकरणकदेवनकर्त्तेति बोधः। कालपुरुषसंख्यास्तु न विवक्षिता एव। एवमन्यत्राप्यूह्यम्।

एवम् 'तदधीते तद्वेद' [४।२।५९] इत्यादावप्यूह्यम्।

"तेन तुल्यं क्रिया चेद्वतिः" [५।१।११५] उपमेयस्य क्रियात्वे उपमानवाचकात् तृतीयान्तात् तुल्यमित्यर्थे वतिरिति सूत्रार्थः। नन्वेवम् 'ब्राह्मणवदधीते' इत्यादौ न स्यात्, नहि वा ब्राह्मणप्रतियोगिकसादृश्यमध्ययनक्रियायाम्, अत्यन्तभेदात्।

---

1. 'एव'कारो देवताव्यावृत्तये।

2. तथा च शक्यादन्येन रूपेण ज्ञाते भवति लक्षणा' इति वृद्धोक्तेदेवताया इन्द्रस्वरूपायाः शक्यत्वेऽपीन्द्राभिन्नदेवतात्वेन तद्भानार्थं सोचितैवेति भावः।

3. एतत्सूत्रविहितप्रत्ययस्य निवासः सम्बन्धो चार्थः। अत्र निवासशब्दोऽधिकरणघञन्तः। निशब्देन च वासे नैरन्तर्यरूपातिशयः प्रत्याय्यते। स च प्रकरणादिना तत्तत्कालघटितो ग्राह्यः। तथा च स्रुघ्नाभिन्नवासाधिकरणसम्बन्धीति बोधः। निवासश्च प्रत्यासत्त्या प्रत्ययार्थसम्बन्धिकर्त्तृक एव। अत एव कादाचित्कस्रुघ्नवासकर्त्तरि न तथा प्रयोगः।

न च ब्राह्मणादिशब्दानां तत्कर्तृकाध्ययने लाक्षणिकत्वान्न दोषः, सौष्ठवादिश्च साधारणो धर्म इति वाच्यम्, मन्दत्वात् स्थातव्यतुल्यं गमनं स्थातव्यवद् गमनमित्यादावलाक्षणिके चारितार्थ्यादिति चेत्, न; तृतीयोपात्तविभक्त्यर्थान्वयेन, साधारणधर्माधारत्वेन च तस्यापि सत्त्वरूपतया मुख्यक्रियावाचकस्यासम्भवेन सामर्थ्याद् भूतपूर्वग्रहणे ब्राह्मणवदधीत इत्यादावप्यदोषात्। एवञ्चास्य क्रियान्वय एव साधुत्वम्।

अरविन्दवत् सुन्दरमुखमित्यादौ भवतिक्रिया अध्याहार्या। अरविन्दपदेन च सुन्दरारविन्दभवनं लक्ष्यते। तथा च सुन्दरारविन्दभवनसदृशं सुन्दरमुखभवनमिति शाब्दबोधः। ततः पश्चादरविन्दमुखयोः सौन्दर्यधर्मकसादृश्यं व्यञ्जनया, मनसा वा बुध्यत इति बोध्यम्। अत एव ब्राह्मणेन तुल्याऽस्य गौरित्यादौ न वतिः, "तत्र तस्येव"[५।१।११६]इति वतिः तद्द्रव्यगुणादितुल्येऽपि। यथा मथुरावत् पाटलिपुत्रे प्राकारः। मथुरावत्पाटलिपुत्रस्य विस्तार इत्यादि। तत्र सादृश्यं वत्यर्थः। मुथुराप्रतियोगिकसादृश्यवत्पाटलिपुत्रे प्राकार इति बोधः। उपमानोपमेययोः समानविभक्तित्वस्य "उपमानानि सामान्यवचनैः"[२।१।५५] इत्यनेन ज्ञापनादुपमाने सप्तमी। प्राकारश्च सादृश्यमूलकाभेदज्ञानविषयः साधारणो धर्मः। वस्तुतो मथुरायामिवेति वाक्यप्राकारादिपदाध्याहारेणैव बोधः। प्राकारयोश्च उपमानोपमेयभावः।

एवञ्च प्राकारनिरूपिताधिकरणत्वे एवोभयत्रापि सप्तमी। वृत्तौ तु मथुरादिपदानां तदधिकरणकप्राकारादौ लक्षणा, मथुरापाटलिपुत्रयोः सादृश्यार्थमेवेति बोध्यम्।

अन्ये तु—विग्रहेऽपि मथुरादिपदं वृत्ताविव लाक्षणिकम्। सप्तमीषष्ठ्यौ तु अस्मादेव ज्ञापकात् प्रथमार्थे। ध्वनितञ्चेदं भाष्ये इत्याहुः।

विधिवत् पूज्यत इत्यत्र विधिकर्मकं देवदत्तकर्तृकं पूजनमिति बोधः। विधिशब्देन तदुक्तः प्रकार इत्याद्यूह्यम्।

अथ भावप्रत्ययार्थो विचार्यते—

अत्र केचित्—घटत्वमित्यादौ प्रकृतिः शब्दस्वरूपपरा, तत्तद्रूपेण प्रकारत्वाद्यर्थः। स चाकाङ्क्षावशात् प्रकृतिजन्यबोधीयमुख्यविशेष्यतानिरूपितप्रकारता-

श्रय एव। तेन राजपुरुष इत्यादौ राजत्वादेः प्रकारत्वेऽपि न क्षतिः। जन्यबोध-प्रकारत्वं तु संसर्गः। एवञ्च गोत्वमित्यादौ गोशब्दजन्यबोधप्रकारो गोत्वमित्यर्थः। स च प्रकारः प्रवृत्तिनिमित्तभूत एव।

अत एव शाब्दबोधे शब्दस्यापि भानमितित्रादिनां मते घटत्वमित्यादौ न शब्दे भावप्रत्ययः। तथा च भाष्यम्—'सर्वे भावाः स्वेनार्थेन भवन्ति, स तेषामर्थ इति। तदभिधाने त्वतलौ भवतः' इति। भवन्ति वाचकत्वेन प्रवर्त्तन्त इति भावाः शब्दाः, ते स्वस्य वाच्यो योऽर्थः, तेन भवन्ति। वाचकत्वेन प्रवर्त्तन्ते, अर्थप्रत्यायनार्थं शब्दप्रयोगात्। शब्दभवनेऽर्थस्य करणत्वविवक्षया तृतीया। यत्तदोर्नित्यसम्बन्धात् यस्मादित्यपेक्ष्यते। यत्प्रवृत्तिनिमित्तवशाद् वाच्यार्थेन करणेन स्वप्रत्यायनाय लोके शब्दाः प्रयुजन्ते, स प्रवृत्तिनिमित्तोऽर्थः। प्रागुक्तसम्बन्धेन शब्दसम्बन्धी भाव-प्रत्ययार्थं इति भावः।

प्रवृत्तिनिमित्तं घटादिषु घटत्वादिजातिः, शुक्लादिशब्देषु गुणाः, पाचका-दिषु शब्देषु क्रिया, राजपुरूषादिशब्देषु सम्बन्धः, डित्थादिषु शब्दस्वरूपमेवेति सर्वमनुभवानुरोधादवसेयम्। एवञ्च तत्तच्छब्दप्रवृत्तिनिमित्तमित्यादिप्रकारेण बोधः।

यत्तु वदन्ति—'शब्दोऽपि शाब्दबोधे भासते' इति नामार्थनिर्णये निर्णीतम्। स च शक्तिसम्बन्धेनैव प्रकारः। शक्तिश्च शब्दैक्येऽपि नानैवेति न नानार्थोच्छेदः।

अस्तु वा, एका शक्तिः, तथापि न नानार्थोच्छेदः, सर्वनामवत्। तथाहि—यथा सर्वनामस्थलेऽनुभवानुरोधात् सर्वनाम्नां विशिष्योपस्थापकत्वमिति सर्व-सिद्धम्। यथा च तत्र बुद्धिविषयत्वरूपेणोपस्थापितघटत्वपटत्वादिशालिषु बुद्धि-विषयवति शक्तं तत् पदमित्येव शक्तिग्रहः। बुद्धिविषयत्वं तूपस्थितावनुगमक-मात्रम्, न तु शक्यमिति न तच्छाब्दबोधे भासते। किन्तु घटत्वादिकमेव। तथाऽ-त्रापि बुद्धिविषयत्वरूपेणोपस्थितपाशत्वविभीतकत्वादिशालिषु बुद्धिविषयवति शक्तमक्षपदमिति शक्तिग्रहेऽपि तत्तद्रूपेण बोधमात्रेण नानार्थत्वम्।

वस्तुतोऽत्र अनेकजात्यादीनामप्यवच्छेदकत्वाद् नानार्थत्वं सूपपादम्। तस्माच्छब्द एव त्वप्रत्ययवाच्यः सर्वत्र, न तु जात्यादिकम्। सर्वे शब्दाः स्वेनार्थेन स्वरूपं प्रकारमाश्रित्यार्थेषु प्रवर्त्तन्ते। अतस्तदेव भावप्रत्ययार्थं इति भाष्यार्थं इति।

तत्, न; अनुभवविरोधात्। नानात्वं यौगपद्यमित्यत्रापि नानादिशब्द-जन्यबोधप्रकारोऽसहभावो युगपद्भावश्चार्थः। संज्ञाशब्दे तु शब्द एव प्रवृत्ति-निमित्तत्वमिति तत्रैव भावप्रत्ययः। शक्तिग्रहे धर्मितावच्छेदकताख्यविषयत्वेन व्यक्तिरूपशक्यविशेषणतया भासमानत्वं प्रवृत्तिनिमित्तत्वम्। यथा च शब्दस्य तत्त्वं तथोक्तं नामार्थवादे। 'कुत्वं कस्मात्' इत्यादौ तु कुशब्दस्वरूपशक्तस्य कुत्व-पदस्यं तद्बोध्येषु लक्षणया न दोषः। औपगवो राजपुरुष इत्यादौ षष्ठ्यर्थ-सम्बन्धस्य वृत्तौ प्रवेशात्, स एव प्रवृतिनिमित्तमिति तत्रैव भावप्रत्ययः।

इदञ्च जहत्स्वार्थावृत्तिपक्षे। तदा राजपुरुषादिपदं राजसम्बन्धवत्पुरुषे शक्तमिति शक्तिग्रहात्।

अजहत्स्वार्थावृत्तिपक्षेऽपि राजपुरुषपदं राजसम्बन्धवत्पुरुषे शक्तमित्येव विशिष्टशक्तिग्रहः। प्राप्ताप्राप्तविवेकन्यायेन सम्बन्धमात्रे विशिष्टशक्तिः पर्यवस्यतीति न सम्बन्धस्य प्रवृत्तिनिमित्तत्वहानिः। उक्तश्च हरिणा—'कृत्तद्धित-समासेभ्यो भावप्रत्ययेन सम्बन्धाभिधानम्'[1] इति न्यायसिद्ध एवायमर्थः।

न च कृति न सम्बन्धस्य प्रवृत्तिनिमित्तत्वम्, कर्तृत्वादेः क्रियाकारक-सम्बन्धरूपत्वमित्यभिमानात्। इदमपि प्रायिकम्, दामोदरत्वम्, कृष्णसर्पत्वम्, पटे शुक्लत्वम्, सत्तेत्यादौ जातिगुणप्रकारकबोधस्यैवानुभवसिद्धत्वात्। तदुक्तम्—'अन्यत्र [2]रूढ्यभिन्नरूपाव्यभिचरितसम्बन्धेभ्यः' इति। तत्र दामोदरत्वमित्यादौ रूढिः, शुक्लत्वमित्यभिन्नरूपम्; पटः शुक्ल इत्यादिव्यवहारात् सत्तेति तृतीयम्। नहि सत्सत्तयोः सम्बन्धः कदापि व्यभिचरित इति बोध्यम्।

यत्तु मीमांसकाः—दण्डीत्यादौ मतुपः प्रकृत्यर्थविशिष्टद्रव्यमात्रवाचित्वमेव, सम्बन्धस्य वाक्यार्थविधयैव प्रतीतेः। एवं पाचक इत्यादावपि। न चानन्तद्रव्येषु

1. कृत्तद्धितसमासेभ्यो मतभेदनिबन्धनम्।
   त्वतलोरर्थकथनं टीकायां हरिणा कृतम्॥
   इति सम्पूर्णं हरिवचनमिदम्।

2. रूढिरत्र कथमप्यज्ञातयोगादर्थविशेषप्रसिद्धेत्यर्थः। अभिन्नरूपम् = प्रत्ययान्त-त्वेऽपि प्रत्ययलुका प्रकृतिसमानाकरात् 'शिष्यमाणं लुप्यमानार्थाभिधायि' इति न्यायेन प्रकृत्यर्थान्वितप्रत्ययार्थाभिधायीत्यर्थः। अव्यभिचरितसम्बन्धेभ्यः—अव्यभिचरितः = व्यक्तिनिष्ठात्यन्ताभावाप्रतियोगी, सम्बन्धः = समवायात्मको यस्य जात्यादेः, तद्विशिष्टवाचकादित्यर्थः। अतः पाकादिना नाशेन स्वाश्रयनिष्ठाभावप्रतियोगिना न सत्त्वम्।

शक्तिग्रहासम्भवः, एकमुपलक्षणीकृत्य संभवात्। न चोपलक्षणीभूतदण्डादयोऽपि नाना, तद्वृत्तिजात्यानुगमात्। न च तदपि दण्डत्वकुण्डलत्वरूपमनेकम्, प्रकृत्यर्थत्वेन तदनुगमादिति। तत्, न; दण्डित्वमित्यादौ सम्बन्धप्रतीत्यनापत्तेः।

न च त्वप्रत्ययवैयर्थ्यभिया तत् कल्प्यते, घटत्वमित्यादौ क्लृप्तप्रकृत्यर्थतावच्छेदकशक्त्यैवोपपत्तेः।

'कृत्तद्धितसमासेभ्यः' इति न वचनम्, किन्तु न्यायसिद्धार्थानुवादिका हर्युक्तिः। न च तत्रानुभवानुरोधात् तथाशक्तिकल्पनमिति वाच्यम्, शक्त्यन्तरकल्पनामपेक्ष्य इनादीनां क्लृप्तशक्तावेव धर्मिवत् सम्बन्धविषयकत्वकल्पनयैवोपपत्तौ पृथक् शक्तिकल्पनाया अनुचितत्वात्। तथा सति क्लृप्तप्रवृत्तिनिमित्तशक्त्यैव दण्डित्वमित्यादौ तद्भानसम्भव इति वदन्ति।

अपरे तु—प्रकृतिरर्थपरैव, लक्षणायां मानाभावात्। वस्तुतः प्रकृतिजन्यबोधप्रकारः, प्रवृत्तिनिमित्तभूतो घटत्वादिः तत्तद्रूपेण त्वाद्यर्थः। तत्र घटत्वमित्यत्र जातिविशिष्टा व्यक्तिः प्रकृत्यर्थः। स च आधारतानिरूपितवृत्तित्वसम्बन्धेन प्रकारः, आकाङ्क्षावशात्। एवञ्च घटवृत्तिघटत्वमित्यादिरूपेण बोधः। एवं घटत्वत्वमित्यादौ घटत्वपदजन्यबोधप्रकारो घटत्वत्वमेव त्वप्रत्ययार्थः।

न च गौरवात् तत्र लक्षणैव, न शक्तिरिति वाच्यम्, शक्तावेव तदादरः, न लक्षणायामित्यत्र, विनिगमकाभावात्।

किञ्च, आविद्यकधर्मविशेषरूपम्, घटत्वत्वादिकञ्च घटत्वपदशक्यतावच्छेदकम्। अतो न गौरवम्।

वस्तुतः स्ववृत्तित्वादिसम्बन्धेन व्यक्तिरेव प्रकारः, शक्तिर्निरवच्छिन्नैव। गुणादेर्वाच्यत्वे तु तद्गतजातिः शक्यतावच्छेदिका। न चैवं नानार्थतापत्तिः, इष्टापत्तेः। तदुक्तं भाष्ये—'यस्य गुणस्य भावाद् द्रव्ये शब्दनिवेशः, तदभिधाने त्वतलाविति। अत्र गुणपदं धर्ममात्रोपलक्षणम्। 'यस्य भावात्' इत्युच्यमाने पुत्रस्य भावात् पितरि पितृशब्दप्रयोगात्। पितृत्वमिति पुत्रे भावप्रत्ययः स्यात्। भावाद् विद्यमानादित्यर्थः। द्रव्यशब्देन विशेष्यभूतः सत्त्वभावापन्नोऽर्थ उच्यते। तत्र ये रूपादयो गुणमात्रवृत्तयः, तेभ्यो गुणवृत्तिजातौ भावप्रत्ययः। शुक्लादिभ्यो गुणिपरेभ्यो गुणे गुणपरेभ्यो जातावेव।

ये त्वण्वादयः शब्दाः परिमाणिनि वर्त्तन्ते, तेभ्यः परिमाणरूपे गुणे, 'पाचकः' इत्यादौ क्रियाविशेषणकबोधात् तदुत्तरभावप्रत्ययेन विशेष्यतया सैवाभिधीयते। घटत्वमित्यादौ तु जातिः।

न च जातेर्ब्रह्मसत्तारूपतयैकत्वेन घटत्वमित्यत्र स्ववृत्तित्वसम्बन्धेन पटस्यापि प्रकारतापत्तिः। उपाधिभेदेन भिन्नाया एव तस्या घटत्वादिरूपत्वात्। जातिमात्रपरगवादिभ्यः तद्वृत्त्याविद्यकधर्मविशेषरूपे गोत्वत्वादौ शक्तिः।

कैयटस्तु—जातिमात्रवाचिभ्यः शब्दस्वरूपे भावप्रत्ययः। अर्थे जातौ शब्दस्वरूपमध्यस्यते यो गोशब्दः, स एवार्थ इति ततः शब्दस्वरूपमेव प्रवृत्तिनिमित्तम्, नान्यदित्याह।

यत्तु—धर्मत्वेन धर्ममात्रं शक्यं त्वादेः, न तु तत्तद्रूपेण, नानार्थतापत्तेः। घटत्वमित्यादौ घटत्वत्वादिना प्रतीतिस्तु अनादितथासंस्कारात्। न चैवं धर्मत्वस्य शक्यत्वे न मानम्, शक्तेरवच्छेद्यत्वनियमात्। अन्यथा मास्तु तदवच्छेदकम्। अत एव पङ्कजपदे पद्मत्वं प्रयोगोपाधिरिति तान्त्रिकाः।

प्रयोगे नियमेन संस्कारवशाद् यो भासते, स प्रयोगोपाधिरित्युच्यते इति। तत्, न; एवं हि घटत्वं पटत्वमित्यादौ प्रतीतिवैचित्र्यानापत्तेः। संस्कारवशाद्विशेषभानमिति चेत्, तस्य वृत्त्यविषयत्वे शाब्दबोधविषयत्वानापत्तेः। न च शक्यतावच्छेदकमेव भावप्रत्ययशक्यं चेत्, पूर्वमतात् को विशेष इति वाच्यम्, पूर्वमते शब्दः प्रकारः, अत्र व्यक्तिरित्येव भेदादित्याहुः।

केचित्तु—जात्यादिसाधारण्येनैकशक्तौ सम्भवन्त्यामनेकतत्कल्पने गौरवात्, अस्तु धर्मत्वेन तेषां वाच्यता। परन्तु प्रकृत्यर्थो व्यक्तिरेव, स्वेतरावृत्तित्वावच्छिन्ना निखिलस्ववृत्तित्वसम्बन्धेन प्रकार इति स्वीकारेणातिप्रसङ्गः। सत्त्वमित्यादौ तु समवेतत्वमेव सम्बन्धः। नियामकं चात्राङ्काक्षामात्रमिति वदन्ति।

यवानां द्वौ भागौ निमानमस्योदश्विद्भागस्य द्वियवमुदश्विद् यवानाम्। अत्र "संख्याया गुणस्य निमाने मयट्" [५।२।४७] इत्यनेन मयट्। गुणो भागः, निमानं मूल्यम्, भागस्य मूल्ये वर्त्तमानात् प्रथमान्तात् संख्यावाचिनः षष्ठ्यर्थे मयट् इति तदर्थः। निमानस्य निमेयस्य च भागरूपत्वे एवास्य प्रवृत्तिरिति

आकरे स्पष्टम्। द्विशब्दस्य नित्यसापेक्षत्वाद् यवानामित्येतत्सापेक्षत्वेऽपि प्रत्ययः। यवसम्बन्धिभागद्वयरूपमूल्यप्राप्योदश्विद्भाग इति बोधः।

यद्यपि उदश्विद्भागे प्रत्ययः, तथापि तस्यापि उदश्वित्त्वाद् द्वियवमुदश्विदिति प्रयुक्तम्। अभिधानस्वाभाव्याद् वा भागे विधीयमानो भागवन्तमाहेति बोध्यम्।

इदञ्च सूत्रं निमेयसंख्यापेक्षया निमानसंख्याया आधिक्ये एव प्रवर्त्तत इत्यन्यत्र विस्तरः।[1]

"तदस्यास्त्यस्मिन्निति मतुप्" [५।२।९४] अत्र सूत्रे उभयोपादानम्, तत्तत्प्रकारकबोधे मतुपः साधुत्वार्थम्। 'अस्ति' इति पुरुषवचने न विवक्षिते। तयोः प्रथमातिक्रमे कारणाभावेन प्रवृत्त्या निर्देशेन शास्त्रसङ्कोचे मानाभावात्। कालस्तु वर्त्तमानत्वरूपो विवक्षित एव, अत एव गवामतीतत्वेऽनागतत्वे वा मतुपो न साधुत्वम्। स्पष्टं चेदं भाष्ये।

अस्तीति प्रत्ययार्थोऽपि प्रकृत्यर्थविशेषणम्। एवञ्च गोमान् इत्यतो वर्त्तमानसत्ताश्रयगोसम्बन्धीति बोधः। गोमानासीत्, भवितेत्यादौ तु तथाव्यवहार-विषये लक्षणेत्येके। प्रकारान्तरमपि शब्देन्दुशेखरे स्पष्टम्।

ईषदसमाप्त्यादिविहितकल्पबादिषु तु ईषदसमाप्त्यादिप्रत्ययार्थोऽपि प्रकृत्यर्थविशेषणमेव, आकाङ्क्षावशात्, प्रकृतेस्तादृशार्थे लक्षणायां प्रत्ययस्तात्पर्य-ग्राहक इत्यप्याहुः।

अतिशयेन पटुः पटुतरः—इत्यत्रातिशये तरप्, अतिशयरूपप्रत्ययार्थश्च प्रकृत्यर्थविशेषणम्। यद्यपि प्रकृत्यर्थस्य न स्वरूपतोऽतिशयः, तथापि तरप्गत-प्रवृत्तिनिमित्तगुणाद्यतिशयेनैव तदतिशयः। गोतर इत्यदौ यद्यपि प्रवृत्तिनिमित्त-जातेरपि प्रकर्षाभावः, तथापि तत्सहचरितवाहदोहादिगतातिशयेनैव तदतिशयो बोध्यः।

---

1. सूत्रेणानेन प्रथमान्तादस्त्यर्थोपाधिकात् सम्बन्धिनि, अधिकरणे च मत्वर्थीया विधीयन्ते। यद्यपि 'अस्य' इत्युक्तेः षष्ठ्यर्थसम्बन्ध एव मतुबादिविधान-माभाति, तथापि 'गोमांश्चैत्रः' इति सामानाधिकरण्यानुरोधात् सम्बन्धिवाचक-तैवेति। एवञ्च 'गोमान्' इत्यादौ गोनिरूपितस्वामित्वसम्बन्धवान् इत्याद्यन्वय-बोधः।

एवञ्च तरबादिसमभिव्याहारे प्रकृत्तेरतिशयितपटुत्वादिविशिष्टे लक्षणा बोध्या। तत्र तरप् अर्थद्वयप्रतिपादकशब्दे उपपदे। यथा अनयोरयं पटुतर इति, अस्माकं देवदत्तस्य च देवदत्तोऽभिरूपतर इति भवति। दन्तोष्ठस्य दन्ताः स्निग्धतरा इत्यत्र वर्तिपदस्य परित्यक्तभेदाङ्गीकृताभेदलक्षणे एकत्वसंख्याकदन्तोष्ठलक्षणार्थद्वयप्रतिपादकत्वेन न दोषः।

बह्वर्थके तूपपदे तमबेव बह्वर्थकेऽपि विभागप्रतियोगिनि उपपदे तरबेव-उदीच्याः प्राच्येभ्यः पटुतरा इति यथा। एवं बहूनां मध्ये निर्धारणे डतमच्-कतमो भवतां कठः। द्वयोर्निर्धारणे डतरच्—अनयोः कतरो वैष्णवः। वैपरीत्यमपि, भाष्यप्रमाण्यात्।

काकतालीयमिति। काक इव तालमिवेति विग्रहे, "समासाच्च तद्विषयात्"[६।३।१०६]इति प्रत्ययविधायकशास्त्रप्रामाण्याद् इवार्थेऽपि "सह सुपा"[२।१।४]इति समासः। तद्विषयादित्युक्तेस्तालकाकमिति न।

यत्तु हरदत्तेनोक्तम्—अयं समास एतद्विषय एव। तेन स्वातन्त्र्यमुपाध्यन्तरयोगो विग्रहश्च नेति। तत्, न; काकागमनमिव तालपतनमिव काकतालम्। काकतालमिव काकतालीयमिति भाष्यविरोधात्। तत्र पूर्वपदं काकागमनसदृशे लाक्षणिकम्। उत्तरपदञ्च तालपतनसदृशे स्वभावाच्च क्रियान्तरभावेन लक्षणा, तयोश्च सामानाधिकण्येनान्वयः। काकागमनसदृशसमानाधिकरणं तालपतनसदृशमिति समासार्थः।

एतेन पूर्वोत्तरपदार्थयोरन्वयाभावेनासामर्थ्यात् समासो दुर्लभ इत्यपास्तम्। ततः काकतालमिवेत्यर्थे छः, तत्रैतदधिकारस्थप्रत्ययार्थे प्रकृत्यर्थस्य प्रतियोगितयान्वयस्य क्लृप्तत्वेन काकतालशब्दस्य तालकृतकाकमरणे वृत्तिविषया निरूढलक्षणा। तत्र लक्ष्यार्थस्य प्रतियोगित्वेन प्रत्ययार्थेऽन्वयः शक्यार्थस्य च प्रयोज्यत्वसम्बन्धेनान्वयः।

एवञ्च काकागमनसदृशसमानाधिकरणतालपतनसदृशप्रयोज्यं तालकृतकाकमरणसदृशं देवदत्तमरणमिति बोधः। सादृश्यञ्च अकस्मादुपातत्वादिना।

यद्यपि इवार्थऽस्य विधानम्। इवार्थश्च सादृश्यम्, तथापि प्रत्ययस्य वृत्तौ सादृश्यवत् परत्वं बोध्यम्, शब्दशक्तिस्वभावात्। एवमन्यत्रापि अश्वक इत्यादावह्यम्।

वस्तुतः—काकतालशब्दस्य काकतालसमागमप्रयोज्ये लक्षणा। तस्यैव च प्रतियोगित्वेन छप्रत्ययार्थेऽन्वयः। उपमेयवाचकतत्तत्पदसमभिव्याहारेण काकताल-समागमप्रयोज्यत्वेन कदाचित् काकमरणस्य, कदाचित् काककृतोपभोगस्य भानम्। इदमेवाभिसन्धाय छप्रत्ययोपमायामुपमानलोप इत्यालङ्कारिकाः।

उपमानतावच्छेदकरूपेण बोधकाभाव इत्याशयः। पूर्वमतेऽप्युपमानमात्र-वाचकाभावात् लोपव्यवहार इत्याहुः।

प्राचि देशे इति। प्रागिति प्राचीनं ग्रामादाम्राः। अत्रास्तात्यन्तप्राक्शब्दस्य प्राच्यां दिशीत्यर्थः। तच्चाधिकरणशक्तिप्रधानाव्ययत्वाद् निर्लिङ्गम्। ततः खे तु तस्य स्वभावेन आधेयप्रधानतया अव्ययत्वाभावात् लिङ्गयोगः, तच्च न स्त्री-त्वादि, प्रकृत्या सहात्यन्तविरोधापत्तेः, स्वार्थिकानां प्रकृतितुल्यत्वोक्तेः, किन्तु नपुंसकत्वमेव, एकवचनमेव च। एवञ्च ग्रामाधिकप्राग्देशवृत्तय आम्रा इति बोधः।

यदा प्रागादिशब्दानां देशादिवाचकानां तत्सम्बन्धिलक्षणया आम्रादि-वृत्तित्वम् ततश्चार्थे खः, तदोपस्थितविशेष्यलिङ्गत्यागे मानाभावात् प्राचीना आम्रा इत्यपि इत्यन्यत्र विस्तरः।

'पञ्चकृत्वो भुङ्क्ते' अत्र "संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्" [५।४।१७] इति सूत्रेण कृत्वसुच्। तत्राभ्यावृत्तिर्जन्म। अत्र पञ्चशब्दः पञ्चत्व-संख्याविशिष्टोत्पत्तौ लाक्षणिकः। तस्य च क्रियायामेवान्वयः, सूत्रस्वरसात्। आख्यातेन पञ्चसंख्याकोत्पत्तिकापि भुजिक्रियानिवृत्तभेदाऽभिधीयते। समुदायस्या-परिसमाप्तत्वाच्च वर्त्तमानत्वम्।

एवञ्च पञ्चसंख्योत्पत्तिका ओदनादिकर्मिका भुजिक्रियेति बोधः।

'पञ्चकृत्वः पच्यते ओदनः' इत्यत्र एकौदनाश्रयकं पञ्चसंख्योत्पत्तिकक्रिया-जन्या विक्लित्तिरिति बोधः। अत्र भिन्ना अपि विक्लित्तयो धातुना निवृत्तभेदा एवोच्यन्ते। अतस्तदाश्रयस्य समुदायस्यैव कर्मत्वमिति कर्मैक्यम्।

उद्भूतावयवभेदसमुदायविवक्षायां तु 'पञ्चकृत्वः पच्यन्ते ओदनाः' इत्यपि भवत्येव, एककर्तृकाणामेकजातीयकर्मकारकाणामेकजातीयानामेव क्रियाणां जन्म-संख्यानेऽस्य साधुत्वं स्वभावात्।

'पञ्चकृत्वो दण्डी'इत्यादि तु अध्याहृतभवतिक्रियामादाय साधु। 'पञ्चकृत्व उत्पद्यते' इत्यादावप्युत्पत्त्यनुकूलव्यापारस्य धात्वर्थत्वात् तदुत्पत्तिगणनैव बुध्यत इत्यदोषः। एतेनोत्पत्तेरुत्पत्त्यभावादत्र दोष इत्यपास्तम्।

'पञ्चकृत्वः पाचकः' इति तु न, पदार्थैकदेशत्वेन क्रियायास्तत्रान्वयासम्भवात्। अत एव 'पञ्चकृत्वः पक्वः' इत्यादि न, क्रियाया एवास्य।वृत्तिसंभवेन तावतैव क्रियालाभे सूत्रे क्रियाग्रहणेन प्रधानीभूतक्रियाया एव ग्रहणाच्च। विनिगनाविरहात् क्रियाग्रहणं यत्र साध्यस्वभावैव क्रिया, तत्रैव कृत्वसुजित्यर्थमपि बोधयति। तेन 'पञ्चकृत्वः पाकः' इत्यपि न। 'द्विः प्रयोगः' इत्यादि तु "द्विर्वचनेऽचि"[१।१।५९]इति ज्ञापकान्निर्वाह्यम्। स्पष्टञ्चेदं सर्वं भाष्ये इत्याहुः।

अकृष्णः कृष्णः सम्पद्यते, तथा करोति कृष्णीकरोति—अत्र "कृभ्वस्तियोगे सम्पद्यकर्त्तरि च्विः"[५।४।५०]इति सूत्रेण च्विः प्रत्ययः। तत्र 'अभूततद्भावे इति वाच्यम्' इति वार्त्तिकम्। तत्र तद्भाव इति करणतृतीयान्ततच्छब्देन समासः। अभूतपदेन कर्तृषष्ठयन्तेन समासः। अभूतत्वञ्च प्रत्यासत्त्या तद्भावशब्दघटकतच्छब्दार्थकरणकत्वेनैव ग्राह्यम्। एवञ्च येन रूपेण प्रागभूतम्, तेन रूपेण तस्य भावोऽभूततद्भाव इति फलितम्।

एवञ्च यत्र प्रकृतिरेव विकाररूपतामापद्यमाना विकाराभेदेन विवक्ष्यते, तत्रैवायं प्रत्ययः। विकारवाचकादेव च प्रत्ययः। एवञ्च अकृष्णः कृष्णः सम्पद्यते, तथा भवति कृष्णीभवतीत्यत्र भवतिक्रियाकर्तृत्वं प्रकृतिभूतस्याकृष्णस्यैव। 'अभूततद्भावे' इति शब्दबलेन तथैव लाभात्।

किञ्च, कृष्णीत्यादेर्निपातत्वेन द्योतकतया भूधातुनैव तदर्थस्य क्रोडीकारेण तस्य कर्तृत्वाद्यसम्भव एव। अत एव 'संघीभवन्ति ब्राह्मणाः', 'त्वद्भवति देवदत्तः' इत्यादौ वचनपुरुषव्यवस्था।

एवं कृष्णीकरोतीत्यादौ कर्मत्वमपि प्रकृतेरेव। अन्यत्र तु प्रकृतिविकृत्योः कर्तृत्वादावनियमः, 'सुवर्णपिण्डः खदिराङ्गारसदृशे कुण्डले भवतः' इति पस्पशायां भाष्यप्रयोगे विकृतेः कर्तृत्वदर्शनात्; 'एको वृक्षः पञ्च नौका भवति' इति लोके प्रकृतेरपि कर्तृत्वदर्शनाच्च।

एवञ्च

प्रकृतेर्विकृतेर्वापि यत्रोक्तत्वं द्वयोरपि ।
वाचकः प्रकृतेः संख्यां गृह्णाति विकृतेर्न तु ॥

इति प्राचीनप्रवादः च्विप्रत्ययविषयक एव। अन्यत्रास्य योजनं तु पूर्वोक्त-भाष्यप्रयोगविरोधेन प्रामादिकम्। च्व्यन्तस्य च स्वार्थसदृशेन लक्षणा। अत एव तस्य गौणत्वाद् अमहान् महान् भवतीत्यादौ "आन्महतः" [६।३।४६] इत्याद्यात्वाद्यभावः, 'गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः' इति न्यायात्।

न चैवम् "सान्तमहतः संयोगस्य" [६।४।१०] इति दीर्घस्याप्यनापत्तिः, गौणलाक्षणिके उपात्तविशिष्टरूपपदान्तरसम्बन्धनिमित्तकार्यस्यैवाप्रवृत्तेरदोषात्।

'महद्भूता ब्रह्मणी' इत्यत्र पुंवद्भावस्तु यथाकथञ्चित् सामानाधिकरण्य-माश्रित्य 'पुंवत्' इति योगविभागाद् वा इति निरूपितं शब्देन्दुशेखरे।

'गोमतीभूता' इत्यत्र तु भाष्यप्रयोगादेव न पुंवत्। स्पष्टञ्चेदम् "प्रत्यय-लक्षण" [१।१।६२] सूत्रे, "ओत्" [१।१।१५] सूत्रे, "आन्महतः" [६।३।४६] इति सूत्रे च भाष्यकैयटादिषु।

कारणीभूतो दण्डः, 'ब्रह्मीभूतः' इत्यादौ च्विप्रत्ययस्तु अकारणत्वाद्यारोप-पूर्वककारणत्वाद्यारोपेणैव बोध्यः।

यदा तु पूर्वावस्था, उत्तरावस्था वा नाश्रीयते, तदा च्वेरभावः। तन्तवो भवन्ति, पटो भवतीति यथा। इत्यलं विस्तरेण।

इति तद्धितार्थनिर्णय।

इति निरूपितो वर्णस्फोटः।

अथ पदवाक्यस्फोटौ निरूप्येते

एवमादेशानां वाचकत्वे स्थिते घटेनेत्यादौ व्याकरणभेदेनादेशभेदात्; संहितावशात् प्रकृतिप्रत्ययभेदानवगमेन च प्रत्येकं ताभ्यामर्थानुपस्थितेर्विशिष्ट-स्यैव शक्तिरिति पदस्फोटपक्षः।

तथाहि—घटेनेत्यत्र घट इति प्रकृतिः, एनेति प्रत्ययो वा, घटे इति प्रकृतिर्नेति, प्रत्ययो वेत्यादिप्रकारेण विनिगमकाभावादनन्तशक्ततावच्छेदक-कल्पनापत्तेः, तत्तदजानतां बोधानापत्तेश्च, वस्नसादौ समुदायस्यैव विधानेन तद्विभागस्य सर्वथा ज्ञातुमशक्यत्वाच्च, अवैयाकरणानां प्रत्येकं तदज्ञानेऽपि समुदायव्युत्पत्तिमात्रेण बोधाच्च।

एवं हरेऽव, विष्णोऽवेत्यादौ प्रागुक्तरीत्या पदयोः स्पष्टमज्ञानेऽपि समुदाय-शक्त्या बोधात् समुदायस्यैव विशिष्टवाक्यार्थे शक्तिरिति वाक्यस्फोटः।

अर्थवन्ति वाऽनर्थकानि वाक्यानि दृश्यन्ते इत्यादिना "वृद्धिरादैच्" [१।१।१] सूत्रादिषु भाष्ये व्यवहृतोऽयम्।

ननु अन्वयरूपवाक्यार्थस्यापूर्वत्वात् तत्र शक्तिग्रहासंभवः, तद्विषयक-शक्तिग्रहे तस्यापूर्वत्वक्षतिश्च।

यत्र तु वृद्धव्यवहारात् प्राथमिकशक्तिनिर्णयो यथा मनसा, तथाऽत्रापि पदैः पदार्थोपस्थितौ आकाङ्क्षाज्ञानादिसहकृतमनसा तदुपस्थितौ तत्र शक्तिग्रह इति। तत्, न; पदानां स्पष्टमज्ञानेन पदैः पदार्थोपस्थित्यसम्भवात्, आकाङ्क्षाया एव वाक्यशक्तित्वेन तद्ग्रहातिरिक्तशक्तिग्रहाभावाच्च।

यदपि, तात्पर्यज्ञानविषयतयोपस्थितेऽन्वयांशे तात्कालिकशक्तिग्रहसंभवः। तात्पर्यञ्च तत्तदर्थविषयकबोधजननेच्छया वक्त्रुच्चारितत्वम्। घटमानयेत्यादितो घटकर्मत्वप्रकारकनिरूपितत्वसंसर्गकानयनविशेष्यकबोधजननेच्छया वक्त्रुच्चारि-तत्वाभावज्ञाने, अन्यबोधजननेच्छयोच्चारितत्वज्ञाने वा तथा बोधानुदयेन तयोः प्रतिबन्धकत्वकल्पनापेक्षया प्रागुक्ततात्पर्यप्रकारकनिश्चयत्वेनैव हेतुतायां लाघवेन तस्यावश्यकत्वात्।

अर्थस्य प्रकारताविषयतादिविशेषणत्वेन भानाद् येन रूपेण वाक्याद् बोधः, तेन रूपेण तात्पर्यज्ञानाविषयत्वेन वाक्यार्थस्यापूर्वत्वहानिरिति। तत्, न; तस्यापूर्वत्वे तद्विषयकशक्तिग्रहवत् तद्विषयकतात्पर्यनिश्चयस्याप्यसंभवात्, शक्तिग्रहेऽपि अर्थस्य प्रकारतादिविशेषणतयैव भानेनापूर्वत्वाक्षतेश्च, शुकादिवाक्ये तात्पर्यव्यतिरेकनिश्चयेऽपि शाब्दबोधेन तद्धेतुत्वासंभवाच्च।

न चेश्वरं तत्र तात्पर्यम्, तस्य फलैकोन्नेयतया प्राग् दुर्ज्ञेयत्वात्। अत एवेश्वरासत्त्वनिश्चयवतां **मीमांसका**दीनां बोधः, वेदवाक्याद् बोधानापत्तेश्च।

न च तत्राध्यापकतात्पर्यम्, मूर्खाध्यापकोक्ते तदभावात्। **मीमांसोपयो**गस्तु न्यायजन्यलाघवादिज्ञानस्य वेदजन्यशाब्दबोधे, तत्प्रामाण्यनिश्चये वा हेतुत्वात्।

न च विज्ञवक्तृकवाक्यजन्यबोधे तात्पर्यधियो हेतुत्वेन शुकादिवाक्यस्य वेदस्य चातथात्वेन न दोष इति वाच्यम्, विज्ञत्वस्यानियतत्वात्।

अपि च, 'अस्माद् वाक्यादर्थद्वयविषयकः शाब्दबोधो जायते, प्रकरणादितस्तु कस्येति न जानीम इति सर्वजनीनानुभवविरोधाद् न तस्य शाब्दबोधहेतुत्वम्। अत एव 'पय आनय' इत्युक्तेऽप्रकरणज्ञस्य दुग्धं वानेयम्, जलं वेति प्रश्नादिकं सङ्गच्छते।

न च तत्र पदार्थोपस्थितिरेव न शाब्दबोध इति वाच्यम्, पयःकर्मत्वमानयनं प्रेरणेति वाक्यजन्यपदार्थोपस्थितावपि तदापत्तेः, सर्वत्रैवमेवापत्तौ शाब्दबोधोच्छेदापत्तेश्च।

एतेन मानस एव तत्र बोध इति उपस्थितपदार्थानामसंसर्गाग्रहमात्रेण प्रश्नादिसिद्धिरिति च परास्तम्। शाब्दयामीत्यनुव्यवसायाच्च। तात्पर्यनिर्णयादेरुपयोगस्तु प्रामाण्यनिश्चयद्वारा प्रवृत्ताविति गृहाण।

न चैवमश्वतात्पर्यकत्वेन निर्णीताद् गेहे सैन्धवमस्तीति वाक्याद् गेहे लवणमस्ति, न वेति संशयस्याप्युच्छेदापत्तिः, तत्राप्रामाण्यसंशयेन तदनुच्छेदात्। तदभावे त्विष्टापत्तिरेव। तत्परत्वाभावज्ञानस्यान्यपरत्वज्ञानस्य च फलबलात् प्रतिबन्धकत्वमेव कल्प्यम्।

यदि तत्सत्त्वे तत्तदर्थविषयबोधाननुभवः, प्रामाणिकगौरवस्यादोषत्वादिति चेत्, न; वृद्धव्यवहारेण उपस्थितविशिष्टे उपदेशादिना वा तद्ग्रहसंभवात्, वस्नसादौ युष्मदाद्यर्थस्य कर्मत्त्वादेश्च। संसर्गे शक्तिग्रहस्यैवमेवोपपाद्यत्वात्। इदमेवाभिप्रेत्य अर्थे विशिष्य सम्बन्धाग्रहणं चेत, समं पदे। लक्षणादधुना चेत्, तत्पदेऽर्थेऽप्यस्तु। तत्तथा इति **वैयाकरणमतोन्मज्जने दीक्षिताः**। लक्ष्यतेऽनेनेति लक्षणं मनः; उपदेशो वा। अपिर्भिन्नक्रमः वाक्येऽपीत्यर्थ इति दिक्।

एवं घटमानयेत्यादौ संसर्गरूपो वाक्यार्थ एव समुदायशक्यः, वृद्धव्यवहारात्। प्रथमतो विशिष्टे वाक्यार्थे शक्तिग्रहेऽपि आवापोद्वापाभ्यां पदार्थानां पदेषु शक्तिकल्पनात् वाक्यस्य परिशेषेण संसर्ग एव तत्सिद्धेः।

नन्वाकाङ्क्षादिसहकारेण पदैरेव संसर्गस्यापि भानोपपत्तौ तत्र वाक्यस्यापि शक्तिकल्पने मानाभावो गौरवञ्च। आङ्क्षाक्षा च घटकर्मकानयनमित्यादिबोधे घटपदोत्तराम्पदस्य, ततो धातो; तत आख्यातस्य; इत्यादिसमभिव्याहार-विशेषाणां ज्ञानस्य कारणत्वरूपात्तज्ज्ञानञ्च कारणम्। अत एव घटः कर्मत्वमान-यनं कृतिरित्यादितो विपरीतव्युत्पन्नस्य बोधः, सद्व्युत्पन्नस्य चाबोध उपपद्यते।

एतेन यत्पदं यदर्थेन सह तात्पर्यविषयीभूतयादृशाऽर्थान्वयबोधजनकम्, तत्पदे तस्य पूर्ववर्तित्वोत्तरवर्त्तित्वादिरूपः समभिव्याहारः, तादृशबोधे आकाङ्क्षा, तज्ज्ञानं कारणमिति परास्तम्। सद्व्युत्पन्नासद्व्युत्पन्नविभागोच्छेदापत्तेः। यदि तत्परिहाराय यादृशबोधे यत्समभिव्याहारः कारणम्, तादृशबोधे तत्कारणत्वज्ञान-मपि तथेत्युच्यते, तर्हि आवश्यकत्वात् सैवाकाङ्क्षास्तु।

यत्तु, अकारणत्वनिश्चयः प्रतिबन्धकः, तत्पदव्यतिरेकप्रयुक्ततात्पर्यविषय-तावच्छेदकावच्छिन्नान्वयाननुभावकत्वनिश्चयो वा कारणम्।

अत्र विशिष्टं कारणमित्येके। तादृशनिश्चयत्वेनान्वयानुभवाभावप्रतियोगिता-वच्छेदकावच्छिन्नविषयकश्रोतृनिष्ठतात्पर्यज्ञानत्वेन वा हेतुत्वे विनिगमनाविरहात् पृथगेवान्वयाननुभावकत्वतात्पर्यनिश्चययोर्हेतुतेति तत्त्वमिति। तत्, न; घटमान-येत्यादितो घटपदाम्पदयोः प्रत्येकं गृहीतशक्तिकस्य तादृशानुपूर्वीज्ञानादि-मतोऽकारणत्वनिश्चयाभाववतश्च विपरीतव्युत्पन्नस्य बोधापत्तेः, गौरवाच्च।

एतेनान्त्योऽपि परास्त इति चेत् न; पदानां पदार्थेऽपि शक्तिसिद्धयना-पत्तेः। घटत्वप्रकारकघटविशेष्यकबोधे घटपदज्ञानस्प तत्कारणत्वज्ञानस्य च

कारणतयैवादोषात् । न चेश्वरेच्छादिविषयत्वरूपशक्तेः क्लृप्तत्वेन न किञ्चिदधिकं मम कल्प्यम्, 'अस्माद्वाक्यादयं संसर्गो बोद्धव्यः' इति ईश्वरेच्छाविषयत्वस्य ममापि क्लृप्तत्वात् ।

न च सा न शक्तिः, विनिगमनाविरहात् । न च जनकत्वस्य बहुपदार्थघटितत्वेन तस्य कारणतावच्छेदकत्वापेक्षयातिरिक्तशक्तेरेव तत्त्वमुचितमिति वाच्यम्, ममापि तुल्यत्वात्, अतिरिक्तपदार्थकल्पने गौरवाच्च ।

यदि तु, जनकत्वमेवाखण्डोपाधरूपं स्वीकृत्य तदेव शक्तिरिति ब्रूषे, तदा सिद्धो वाक्यस्फोटः । पदज्ञानकारणत्वरूपपदशक्तिज्ञानस्येव तत्समुदायज्ञानकारणत्वरूपवाक्यशक्तिज्ञानस्य हेतुतायाः त्वयाप्यभ्युपगमात् । न च जनकतायाः शक्तित्वे 'पदं शक्तम्' इति व्यवहारानापत्तिः, नहि पदं बोधकारणम्, अपि तु तज्ज्ञानमिति वाच्यम्, अनुमितौ लिङ्गस्येव स्वज्ञानद्वारा तस्यापि तत्त्वात् ।

एवञ्च वाक्यशक्तेरेवाकाङ्क्षेतिपरपरिभाषामात्रमवशिष्यते । अत एव 'संसर्गो वाक्यार्थः' इति किंवदन्ती संगच्छते ।

प्राथमिकशक्तिग्रहस्य च सर्वथा न बोधः । अत एव च समासग्रहणं वाक्येऽतिव्याप्तिवारणायेति भाष्यादिग्रन्थाः सङ्गच्छन्ते । तदुक्तं हरिणा ।

'अशाब्दो यदि वाक्यार्थः पदार्थोऽपि तदा भवेत्' इति ।

केचित्तु घटमानयेत्यादावप्येकैव शक्तिर्विशिष्टवाक्यार्थनिरूपिता, समुदाये व्युत्पन्नानां तत एव बोधस्यानुभविकत्वात् । व्यवहाराधीन प्रथमव्युत्पत्त्या समुदाये विशिष्टनिरूपिताया एव शक्तेर्ग्रहाच्च ।

न च अवापोद्वापाभ्यामवयवशक्तिनिर्णयेन तस्याप्रामाणिकत्वमिति वाच्यम्, असंजातविरोधित्वेनोत्तरकालजस्यैव तत्त्वकल्पनात्, हरेऽवेत्यादौ तथावश्यकत्वाच्च ।

न च विशिष्टशक्त्यज्ञानेऽपि प्रगुक्तरीत्या शक्तिग्रहाद् बोधे व्यभिचारः, त्वदुक्ततदग्रहेपि विशिष्टशक्तिग्रहमात्रेण बोधे तवापि व्यभिचारात् । विशिष्टशक्तिग्राहके नियमतस्तद्ग्राहकत्वस्यापि स्वीकारान्न दोष इति चेत्, तर्हि—ममापि न दोषः ।

तथाहि—तदादिवत्कारकविभक्तिविशिष्टपदधातुपदयोर्विशिष्टयोः कारकविशिष्टं क्रियाबोधकत्वमिति सामान्यतः शक्तिग्रहे, अनन्तरं पदविशेषसमभिहार-

ज्ञाने सति तात्पर्यवशात् पदार्थविशेषविशिष्टक्रियाबोध इत्यभ्युपगमेन त्वयापि सामान्यतः कार्यकारणभावाङ्गीकारेण च तत्तत्कार्यकारणभावग्राहकस्यैव नियमतो विशिष्टशक्तिग्राहकत्वस्वीकारादित्याहुः ।

तदपरे न क्षमन्ते, 'घटम्' इत्येतावतापि घटकर्मत्वबोधदर्शनात् तस्य तत्र शक्तेरावश्यकत्वेन तथैव तद्बोधसंभवे पुनः समुदायशक्तेरपि तद्विषयकत्वकल्पने मानाभावात्, विशेषविशिष्टक्रियाबोधाय पदशक्तेस्तवाप्यावश्यकत्वाच्च, कारकत्वविभक्तित्वधातुत्वाद्यजानतां तथा शक्तिग्रहासम्भवाच्च ।

तस्माद्यस्य यथा शक्तिग्रहः, तस्य तत एव बोधः । अव्यवहितोत्तरत्वादिनिवेशेन च कार्यकारणभावे व्यभिचारपरिहारः ।

वाक्यशक्तिग्रहोऽपि कस्यचिद्विशिष्यैव, कस्यचित् कारकत्वादि जानतः प्रागुक्तरीत्यैव सामान्यतः, कस्यचित् प्रकारान्तरेणैवेत्यनियत एव । स च तत्तत्पदार्थनिष्ठप्रकारतानिरूपिता तत्तत्पदार्थनिष्ठविशेष्यतानिरूपिता च या सांसर्गिकी विषयता, तदर्थे समुदायः शक्त इत्येवं विशेषणविशेष्यभावापन्नार्थ एव ।

एतेन स्वतन्त्रवृत्तिज्ञानाद् विशृङ्खलपदार्थोपस्थितौ सत्यां विशेष्यविशेषणभावव्यत्यासेनान्वयः स्यादित्यपास्तम् ।

जातिशक्तिवादे संसर्गवृत्तिधर्म एव वाक्यस्यापि शक्यो बोध्यः ।

यत्तु, विशिष्टशक्तिग्रहे पदशक्तिग्रहः कारणम्, प्रत्येकपदशक्तिग्रहाभावे वाक्यार्थबोधस्याजायमानत्वात् तत्सत्त्वेऽपूर्ववाक्यश्रवणेऽपि तस्य जायमानत्वाच्चेति । तदसारम्; वाक्यशक्त्यग्रहे तदभावादेव तदभावोपपत्तेः । तत्सत्त्वे तु जायत एव । अत एव समुदायव्युत्पत्त्या समुदायार्थबोधेऽपि व्याकरणव्युत्पत्तिं विना पदविभागसामर्थ्याभावोऽनुभवसिद्धः सङ्गच्छत इत्याहुः ।

न च वाक्यशक्त्यङ्गीकारे समभिहारानन्त्येन गौरवम्, प्रामाणिकत्वात्, तवापि तावत् कार्यकारणभावावश्यकत्वाच्च ।

ननु घटप्रकारकशाब्दबोधमात्रे घटार्थकपदोत्तरसार्थकप्रत्ययनिपातान्यतरजन्योपस्थितिर्हेतुः । एवं विशेष्यतासम्बन्धेन कर्मत्वविषयकशाब्दबोधमात्रे कर्मत्वार्थकप्रत्ययप्रकृतिजन्योपस्थितिर्हेतुरिति सामान्यत एव कार्यकारणभावः ।

न च 'घटः कर्मत्वम्' इत्यतो विपरीतव्युत्पन्नस्य तथा बोधाद् व्यभिचारः, घटबोधकपदोत्तरपदजन्यज्ञानत्वेन कर्मत्वबोधकपदप्राग्वर्त्तिपदजन्यज्ञानत्वेन च हेतुत्वाददोषः ।

न चैवमपि पटादिलाक्षणिकघटपदघटितघटमानयेति वाक्यात् तथा बोधवारणाय घटबोधकत्वं घटबोधफलोपहितत्वं निवेश्यम् । एवञ्चान्योन्याश्रयात् तादृशकार्यकारणभावग्रहासम्भव इति वाच्यम्, तत्र घटस्य वृत्तिजन्योपस्थित्यभावादेव तथा बोधवारणेन स्वरूपयोग्यत्वनिवेशेऽपि क्षत्यभावादिति चेत्, न; कर्मत्वं घटः, 'अम् घटः'; इत्येतादृशसमभिव्याहारव्युत्पन्नानां ततस्तथाबोधे व्यभिचारात्, सद्व्युत्पन्नासद्व्युत्पन्नविभागोच्छेदापत्तेश्च ।

न च तादृशहेतुताज्ञानस्यापि कारत्वात् न दोष इति वाच्यम्, सामान्यविधतज्ज्ञानस्यापि सत्त्वात् ।

न च तत्तद्व्युत्पत्तिविशिष्टशाब्दबोधे तत्तद्व्युत्पत्तिवैशिष्ट्यञ्च स्वाव्यवहितोत्तरोत्पत्तिकत्व स्वसामानाधिकरण्योभयसम्बन्धेनेति न दोष इति वाच्यम्, अनन्तकार्यकारणभावतादवस्थ्यात् । प्रत्ययत्वनिपातत्वाद्यजानतस्तथा कार्यकारणभावग्रहासम्भवाच्च ।

नन्वस्तु वाक्ये तद्बोधकतयेच्छाविषयत्वादि, परन्तु तस्य वृत्तित्वे किं मानम् ? इति चेद्, विनिगमहनाविरहः कार्यकारणभावलाघवञ्चेति गृहाण ।

तथाहि—मम मते[1] तद्धर्मावच्छिन्नतद्विषयकशाब्दबुद्धित्वावच्छिन्नं प्रति

---

1. ननु शब्दस्य ज्ञानजनकत्वे सर्वेभ्यः शब्देभ्योऽपि निखिलश्रोतृणां बोधापत्तिभिया तद्विषयकशाब्दबोधं प्रति अन्वयव्यतिरेकाभ्यां वृत्तिज्ञानजन्योपस्थितेः कारणत्वमवश्यमङ्गीकर्त्तव्यम् ।

वृत्तिश्च दाहं प्रति वह्न्यादिवत् न स्वरूपेण हेतुः, तस्याः स्वरूपतः सर्वत्र सत्त्वात् सर्वेषां बोधापत्तिरिति ज्ञाताया एव तस्या हेतुत्वमभ्युपेयम्, तत्तत्पदनिष्ठवृत्तिज्ञानशून्यस्य पुरुषस्य तत्तत्पदश्रवणेऽपि बोधानुदयात् ।

यद्यपि शब्दश्रवणमात्रेण सर्वेषां बोधो मा भूदिति तद्वद्विषयकशाब्दबोधं प्रति तद्वन्निरूपितवृत्तिज्ञानस्य कारणत्वं स्वीकर्त्तव्यम् । तथा च पटत्ववद्विषयकबोधं पटत्ववन्निरूपितवृत्तिज्ञानस्य हेतुत्वात् न पटपदात् घटादिबोधः, नाप्यज्ञातवृत्तिकाद् बोधः, इति सर्वं सुस्थम् ।

तथापि एतादृशकार्यकारणभावस्वीकारे गुडत्वादिधर्मवद् गुडनिरूपितवृत्तिज्ञानेन मधुरज्ञानेन मधुरत्वादिप्रकारकबोधो मा भूदिति प्रकारीभूतधर्मनिरूपितत्वमपि वृत्तेरङ्गीकार्यम् ।

तद्धर्मावच्छिन्नतन्निरूपित[1]वृत्तिविशिष्टज्ञानं हेतुरित्येक एव कार्यकारणभावः।

तव तु सांसर्गिकविषयताशालितद्विषयकशाब्दबुद्धौ आकाङ्क्षाज्ञानकार्यकारणभावोऽधिकः। वृत्तिज्ञानकार्यकारणभावे च प्रकारताविशेष्यतयोर्विशिष्य निवेश इत्यपरश्च गौरवम्। विशेषणविशेष्यभावव्यत्यासेन गृहीतशक्तिकात् घटत्वपदात् घटत्वविशिष्टघटबोधवारणाय तद्धर्मावच्छिन्नेति। तद्वृत्तिवैशिष्टयञ्च स्वविषयकोद्बुद्धसंस्कारसामानाधिकरण्यस्वाश्रयविषयकत्वोभयसम्बन्धेन ज्ञाने बोध्यम्। अतो [2]नागृहीतवृत्तिकस्य बोधः, नापि पदाद्यज्ञानवत इत्याहुः।

एतेन विशेष्यप्रकारकसंसर्गसाधारणविषयतासत्त्वे मानाभावेन विशेष्यादित्रितयव्यवहारानुरोधेन विशेष्यतादित्रयस्यावश्यकत्वेन विषयतेति सामान्यशब्देन त्रय्या एवाभिधानसंभवाच्च। विषयतात्रयस्य कार्यकारणभावे निवेशापेक्षया द्वयोर्निवेश एव लाघवम्।

ननु यद्यपि विषयता न विषयस्वरूपा, घटो विषय इत्यतो घटो घटस्वरूपवानित्यत इव बोधानापत्तेः, अतीतानागतज्ञानादेर्विषयरूपविषयताविरहेण निर्विषयत्वप्रसङ्गाच्च, घटत्वादिना निर्णयेऽपि विषयो न वेति संदेहाच्च, घटभूतलसंयोगानुयोगित्वादीनोत्यादिसमूहालम्बनघटवद्भूतलमिति विशिष्टबुद्ध्योर्वैलक्षण्यानुपपत्तेश्च। तथापि ज्ञानस्वरूपैव सा, नातिरिक्ता, मानाभावात्; गौरवाच्च।

एवञ्च तत्तज्ज्ञानसम्बन्धेन शाब्दत्वमेव कार्यतावच्छेदकमिति गौरवम्। न च ज्ञानस्वरूपत्वे घटवद्भूतलमित्यादिज्ञाननिरूपितानां घटभूतलादिवृत्तिविषय-

---

तथा च यद्धर्मप्रकारकवृत्तिज्ञानं तद्धर्मप्रकारक एव बोधः। गुडपदेन च गुडत्वप्रकारक बोधस्यैव दर्शनात् मधुरत्वाद्यनेकधर्मसत्त्वेऽपि गुडत्वप्रकारिकैव गुडपदे वृत्तिरिति न मधुरत्वादिप्रकारकबोधः इत्याशयं मनसि निधायाह तदधर्मावच्छिन्नेत्यादि।

1. अयमाशयः—तार्किकैः शाब्दबोधं प्रति वृत्तिज्ञानं पदज्ञानञ्च स्वातन्त्र्येण कारणं प्रतिपादितम्। परन्तु पृथक् पृथक् तयोः कारणत्वस्वीकारे कार्यकारणभावद्वयकल्पने महद् गौरवं स्यादिति लाघवाद् विशिष्टस्य कारणत्वं शाब्दिकैः स्वीक्रियते। तदेव प्रतिपादयति—वृत्तिविशिष्टेति।

2. वैशिष्टयघटकप्रथमसम्बन्धस्य फलमाह—नागृहीतवृत्तिकस्येति। द्वितीयस्य फलमाह—नापि पदाद्यज्ञानवत इति। तादृशस्थले पदे विषयतया पदज्ञानासत्त्वात् तदात्मनि च समवायेन पदज्ञानाभावात्।

शरीरावयवसञ्चालनादिनापि अर्थज्ञानसम्भवादतिव्याप्तिवारणाय पदेत्युक्तिः।

तानामभेदापत्त्या तादृशज्ञानान्तरं घटप्रकारकज्ञानवानहमितिवत् भूतलप्रकारज्ञानवानहमित्याद्यनुव्यवसायापत्तिः ।

किञ्च, घटपटाविति समूहालम्बनजज्ञानस्य भ्रमत्वापत्तिः, पटनिष्ठतज्ज्ञानरूपविशेष्यतायाः घटत्वप्रकारतानिरूपिततद्रूपविशेष्यत्वाभिन्नत्वेन तस्य घटत्वादिनिष्ठप्रकरतानिरूपिततदभाववत्पटादिनिष्ठविशेष्यतानिरूपकत्वात् ।

अपि च, यथाज्ञानं स्वरूपेण घटादिना सम्बद्धमिति घटादिविषयकत्वव्यवहारमाधत्ते, तथा स्वरूपेण कालादिनापि सम्बद्धत्वात्तद्विषयत्वव्यवहारमप्यादध्यात् ।

किञ्च, ज्ञाने घटो विषय इत्यतो बोधानुपपत्तिः, एकस्य निरूप्यत्वनिरूपकत्वयोरसम्भवादिति वाच्यम्, घटवद्भूतलमित्यादिज्ञानानां घटादिनिष्ठप्रकारताभूतलादिनिष्ठविशेष्यतारूपत्वाङ्गीकारेऽपि फलबलात्, अनुभवबलाच्च घटनिष्ठविशेष्यताभूतलनिष्ठप्रकारताद्यनात्मकत्वाददोषः । अन्यथातिरिक्तत्वाङ्गीकारेऽपि तज्ज्ञानानां घटादिनिष्ठप्रकारतानिरूपकवत्तन्निष्ठविशेष्यतानिरूपकत्वं कुतो नेति प्रश्ने मूकतैव तवोत्तरं स्यात् ।

एवं समूहालम्बनस्य घटत्वनिष्ठप्रकारतानिरूपितघटन्निष्ठविशेष्यतात्मकत्वेपि तन्निरूपितपटनिष्ठविशेष्यतानात्मकत्वात् न भ्रमत्वम् । ज्ञानत्वेन निरूपकस्य विशेष्यतात्वेन निरूप्यत्वसम्भवाच्च ।

न च ज्ञानस्वरूपस्य ज्ञानाद्यजन्यत्वात्, ततः पूर्वं ज्ञात इति प्रतीत्यापत्तिरिति वाच्यम्, ज्ञानसत्त्वे इष्टापत्तेः । तदभावे स्वरूपाभावादेव प्रतीत्यभावोपपत्तेरिति चेत्, न; ज्ञानव्यक्तीनामननुगतत्वेनानुगतकार्यकारणभावासम्भवस्य तदवस्थत्वादित्यपास्तम्, विषयतात्वस्यातिरिक्तस्याङ्गीकारेणानुगमसम्भवाच्च । विषयो विषय इत्याद्यनुगतव्यवहारेण प्रागुक्तकार्यतावच्छेदकतया चातिरिक्तैकविषयताया अप्यङ्गीकारे क्षत्यभावाच्चेत्याहुः ।

नन्वाकाशोऽस्तीति वाक्यं शृण्वत आकाशपदवृत्त्यंशेऽनुद्बुद्धसंस्कारस्य तत एव पदात् समवायेन स्मृते आकाशे तद्विषयशाब्दबोधापत्तिरिति चेत्, न; प्रकारताविशेष्यतान्यतरसम्बन्धेन शाब्दं प्रति तेनैव वृत्तिजन्योपस्थितेरपि हेतुत्वेनादोषात् । वृत्त्या पदजन्यपदार्थोपस्थितिरेवासत्तिपदेनोच्यते ।

अत एव प्रत्यक्षदृष्टस्य तण्डुलादेः पचतीत्येतज्जन्यशाब्दबोधविषयता न । 'पदाव्यवधानमासत्तिः' इति तु न युक्तम्, गिरिर्भुक्तमग्निमान् देवदत्तेनेत्यत्र

योजनयाऽन्वयबोधानापत्तेः। योजनावाक्यादेवान्वयबोध इति चेत्, न; प्रथम-वाक्यस्याबोधकत्वापत्तेः। योजनावाक्यञ्च तात्पर्यग्राहकत्वेन प्रकरणादिवद् उपयुज्यत इति बोध्यम्।

न च घटमानयेति वाक्यं हस्तिनश्च समूहालम्बनविधया स्मरतो घटपटादिभ्यो घटादेर्हस्तिनश्च हस्तिपकस्य समूहालम्बनस्मरणे सति घटानयनवत् हस्तिपकस्यापि शाब्दबोधविषयतापत्तिः, समूहालम्बनरूपपदार्थोपस्थितौ वृत्तिजन्यत्वसत्त्वादिति वाच्यम्, शक्तिज्ञानपदार्थोपस्थित्योः कार्यकारणभावे समानविषयत्वदानेनाक्षतेः।

यत्तु—विषयतया शाब्दं प्रत्येव तेन सम्बन्धेन वृत्तिजन्योपस्थितिर्हेतुरिति। तत्, न; अनुपस्थितस्यैव संसर्गस्य भानमिति सकलतान्त्रिकसिद्धान्तविरोधापत्तेः।

किञ्च, वाक्यज्ञानकार्यतावच्छेदं विशिष्टबुद्धित्वमेव वाच्यम्, प्रागुक्तयुक्तेः। तथा चोपस्थित्यैव कृतकृत्यतया शाब्दबोधोच्छेदापत्तिः, तादृशज्ञानद्वयस्यानुभवविरुद्धत्वाच्च।

नन्वेवमपि पदार्थोपस्थितिसमये वाक्यार्थोपस्थितिरपि कुतो न, तेन वाक्यस्यापि सम्बन्धग्रहात्।

किञ्च, पदार्थानामिव वाक्यार्थस्यापि स्मरणमेव स्यात्, नानुभवः, सम्बन्धिज्ञानतयैव पदज्ञानवत्तदुपयोगादिति चेत्, न; फलबलात् पदार्थोपस्थितेः पूर्वं नियमतो वाक्यर्थांश उद्बोधकासमवधानकल्पनात्।

एवं वस्नसादौ हरेऽवेत्यादौ च विविष्टशक्त्यैव संसर्गांशे उद्बोधकसमवधानात् प्राक् पदार्थोपस्थितिमात्रम्। ततस्तदंशेऽप्युद्बोधकसमवधाने तद्विषयको वाक्यार्थबोधः। अत एवापूर्वो वाक्यार्थ इति प्रवादः सङ्गच्छते। अपूर्वत्वञ्च शाब्दबोधप्राक्क्षणवर्त्तितज्जनकशब्दजन्यस्मृत्यविषयत्वमित्याहुः।

यत्तु 'किञ्चेत्यादि', तत्, न; वाक्यार्थप्रतीतेरनुभवत्वाभावात् स्वर्गनरकादिकं शृण्वतोऽपि तदनुभवामीत्यप्रतीतेः। तस्माच्छाब्दत्वं जातिविशेष एव, अनुभवबलात् कल्प्यते, नानुभवत्वव्याप्यम्।

किञ्च, वाक्यज्ञानस्य तादृशविजातीयज्ञानत्वमेव कार्यतावच्छेदकम्। अतो न ततः स्मृतिः। अन्यथा तवापि वाक्येनाकाङ्क्षारूपसम्बन्धस्य सत्त्वात् ततः स्मृतिजननाशङ्का दुरुद्धरैव स्यात्। एतदेव पदार्थोपस्थितिकार्यतावच्छेदकम्।

न चैवमस्याः स्मृतित्वात् समभिव्याहारकारणत्वज्ञानांशेऽनुद्बुद्धसंस्कारस्यापि वाक्यार्थबोधः स्यादिति वाच्यम्, फलानुरोधेन तत्राप्युद्बुद्धसंस्कारस्य हेतुत्वकल्पनात्। पदार्थोपस्थितिश्च स्मृतिरेव।

एवञ्च केवलघटपदात् घटत्वविशिष्टस्मरणमेव, न शाब्दबोध इति न तत्र वृत्तिजन्योपस्थित्यपेक्षा। एवम् 'राजपुरुषः' इत्यादितोऽपि वृत्तावेकार्थीभावकल्पनासामर्थ्येन पदार्थोपस्थितिसमय एव संसर्गांशेऽपि नियमत उद्बोधकसमवधानकल्पनाद् विशिष्टविषयैव पदार्थोपस्थितिः।

शब्दजन्यत्वमात्रेण परं तस्यापीतरस्मृतिविलक्षणः शाब्दयामीति व्यवहारो बोध्यः, न तु वाक्यज्ञानपदार्थोपस्थितिकार्यतावच्छेदकीभूतजातिविशेषाक्रान्तताऽस्या इति बोध्यम्।

यत्तु—पदार्थोपस्थितेः स्मृतित्वे स्मारकतातिरिक्तमूलभूतसम्बन्धकल्पनापत्तिः। एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकम्, न तु स एव सम्बन्धः, हस्तिपकादिषु तथाऽदर्शनात्। पदार्थयोस्तु बोधकतैव सम्बन्धः, तदतिरिक्तशक्त्यभावस्य वक्ष्यमाणत्वात्। बोधश्च त्वन्मते पदात् स्मृतिरूप एव, नान्य इति स्पष्टमेवेति।

तत्, न; पदज्ञानस्योभयसाधारणतदर्थविषयकबोधत्वं कार्यतावच्छेदकमिति स्मारकतातिरिक्तशाब्दबोधजनकत्वरूपस्य सम्बन्धस्य क्लृप्तत्वात्। पदैर्हि पदार्थोपस्थितौ तैरेव वाक्यशक्तिसहकारेण पदार्थविषयकः, तत्संसर्गविषयकश्च शाब्दबोधो जन्यते इति क्रम इत्यलं विस्तरेण।

यत्तु मीमांसकाः—लक्षणयैवोपपत्तौ वाक्यार्थे शक्तिकल्पना न युक्ता। न चापूर्वत्वं प्रागविज्ञातहरिद्रानामकनदीविशेषणपुंसा 'हरिद्रायां न घोषः' इति वाक्ये श्रुते नदीपदसमभिव्याहारेण तदानीमेव हरिद्राशब्दस्य नदीविशेषे शक्तिग्रहपूर्वकं नदीलिङ्गात् तत्संबन्धित्वेनावगततीरप्रत्ययवत् पदैः पदार्थानामुपस्थितौ आकाङ्क्षाज्ञानादिसाचिव्यात् तत एवोपस्थिते वाक्यार्थे तद्ग्रहसम्भवात्।

तथोपस्थितस्यापि वृत्त्यानुपस्थितत्वात् न स बोधः शाब्द इति शाब्दत्वप्रकारकबोधानुभवात् मध्ये लक्षणाग्रहः। स च स्वबोध्यसम्बन्धितया तदुपस्थितिः, स्वबोध्यसम्बन्धिनः स्वबोध्यस्योपस्थितेरेव प्राचीननयेन लक्षणात्वात्।

यद्वा—स्वसम्बन्धिपदार्थबोधकं वाक्यमिति तद्ग्रहः, तीरसम्बन्धिप्रवाहबोधकं गङ्गापदमितिवत्। लक्षकत्वञ्च स्वसम्बन्ध्यर्थबोधकत्वमेव।

बोध्यसम्बन्ध एव च लक्षणा। पदजन्यपदार्थोपस्थित्याकाङ्क्षाद्यसहकृतबोधकत्वं चाधिगतार्थगन्तृत्वमिति न वेदस्यानधिगतार्थगन्तृतारूपप्रामाण्यहानिरिति।

तत्, न; तादृग्बोधद्वयाननुभवात्, अनुपपत्तिप्रतिसन्धानाभावेन लक्षणाया अयोगाच्च। तात्पर्यान्यथानुपपत्त्या लक्षणेत्यपि वक्तुमशक्यम्, तस्य सर्वत्राहेतुत्वात्, नियमतः पूर्वं तात्पर्यज्ञानस्यापि कल्पनापेक्षया शक्तिकल्पनाया एवौचित्यात्।

वस्तुतस्तु 'शक्यसम्बन्ध एव लक्षणा, न बोध्यसम्बन्ध इति एकार्थीभाववादे प्रपञ्चितम्। तथा च तन्मते लक्षणा वक्तुमशक्यैवेति दिक्।

यत्तु—वाक्यार्थे वाक्यस्य न शक्तिः, किन्तु पदानामेवान्विते शक्तिः, पदैरेव तदर्थप्रतीत्युपपत्तौ वाक्येऽपि शक्तिकल्पने मानाभावात्।

किञ्च, वृत्तिविषयत्वं विना शाब्दबोधविषयत्वासम्भवाद् वाक्यार्थविषयावृत्तिरवश्यं स्वीकार्या। सा चातिरिक्ता, गौरवान्नेति क्लृप्तपदार्थशक्तिरेव तद्विषया कल्प्यते। पदानाञ्च सामान्यत इतरान्विते शक्तावपि विशेषाविषयसामान्यबुद्धयभावात्। तत्तत्पदसामान्यशक्तिभिरेव समभिहारविशेषकारणत्वादिरूपाकाङ्क्षाज्ञानबलात् तत्तत्पदार्थीयविशेषनिरूपितान्वयविशेषबोधः सिध्यति।

एतेन पदानामेवेतरान्विताभिधायकत्वे घटादिपदस्येतरान्विते शक्तिग्रहवतो घटमानयेत्यानुपूर्वीज्ञानवतः प्रागुक्तकार्यकारणभावाग्रहवतोऽपि घटकर्मकमानयनमिति बोधापत्तिः।

किञ्च, विशेष्यविशेषणभावो विनिगमनाविरहात् सामान्यतः शक्त्येतरान्वितो घटः, इतरान्वितं कर्मत्वं तथानयनं तथाकृतिरित्येवं बोधचतुष्टयापत्तिः, न घटीयं कर्मत्वमिति।

अपि च—घटः कर्मत्वमानयनं कृतिरित्यत इतरान्वितकर्मत्वादौ शक्तिग्रहवतस्तथाबोधापत्तिश्चेति निरस्तम्।

किञ्च, एकपदप्रयोगेऽप्यन्वयविशेष्यस्य नियमेन जिज्ञासादर्शनात्, तस्याश्च अन्वयसामान्यज्ञानपूर्वकत्वनियमात् तज्ज्ञानस्य शब्दादन्यतोऽसम्भवाच्छब्द एवान्वितमभिधत्ते। न चापूर्वत्वम्, विशेषतः पदार्थान्तरघटितस्य तदन्वयविशेषरूपवाक्यार्थस्य प्रागनुपस्थितावपि अन्वितत्वादिसामान्यधर्मप्रकारेण प्राक् तदुपस्थितेः सुलभत्वात्।

'इतरान्विते शक्तिः' इति त्वयुक्तमेव, पदार्थान्तरस्य पदान्तरलभ्यतया तदंशान्तर्भावेण शक्तिग्रहस्यानुपयुक्तत्वात् । घट इत्यतो घटमात्रबोधस्तु शक्तिभ्रमादित्याहुः ।

तत्, न; घटादिपदज्ञानस्य घटान्वयोभयविषयकशाब्दत्वापेक्षया घटविषयकशाब्दत्वस्य कार्यतावच्छेदकत्वे लाघवात् ।

किञ्च, त्वन्मतेऽन्वये शक्तेः स्वीकारेऽपि विशेषबोधाय समभिव्याहारस्य कारणत्वस्वीकारे तथा कार्यकारणभावाग्रहवतो बोधवारणाय तद्ग्रहस्यापि कारणत्वस्वीकारे विपरीतगौरवापत्तेः, वाक्यशक्तेः सिद्धत्वाच्च । जिज्ञासापि पदार्थवाक्यार्थयोर्नियमस्य पूर्वं ग्रहात् फलविशेषदर्शने रसविशेषजिज्ञासावदुपपन्ना ।

ननु तद्वदेव तर्ह्यत्रापि जिज्ञासानियमो न स्यादिति चेत्, इष्टापत्तेः ।

किञ्च, अनयोः संसर्गविशेषज्ञानं मे भवत्वितीच्छायां तादृशज्ञानधर्मिकेष्टसाधनताज्ञानस्य हेतुत्वेन तस्य च विशिष्टवैशिष्ट्यबुद्धितया विशेषणतावच्छेदकसामान्यधर्मज्ञानस्येव तथाभूतविशेषज्ञानानुरोधाद् ज्ञानेच्छयोः समानविषयत्वेन हेतुहेतुमद्भावाच्च विशेषस्याप्युपस्थितिरावश्यकी ।

न च विशेषरूपेणापि ज्ञाने सिद्धिसत्त्वाद् जिज्ञासोच्छेदः, अज्ञातरूपेण तु कारणाभावादेव न जिज्ञासेति वाच्यम्, सिद्धिः स्वरूपतो न प्रतिबन्धिका, किन्तु सिद्धत्वप्रकारकज्ञानमेव तथा । अत एव चैत्रस्य ज्ञानं भवत्वितीच्छायामजाते च तस्य ज्ञाने तस्य ज्ञानं जातमिति सिद्धत्वज्ञानादिच्छानिवृत्तिः सङ्गच्छते ।

यदि तु अन्वयसामान्ये ज्ञाते तेन विशेषान्वयस्यानुमानमित्युच्यते, तर्हि अन्वयसामान्यस्यापि तथैवोपस्थितिसम्भवात् प्रस्थितमन्वितशक्त्या ।

न चैवमनुमानेनैव संसर्गोपस्थितिसम्भवेन शब्दप्रामाण्योच्छेदः, नानुमितम्, न साक्षात्कृतम्, किन्तु शब्दादेवावगतमित्यनुभवात्, आकाङ्क्षाज्ञाननिर्वाह्यविशेष्यविशेषणाभावानुरोधाच्च शब्दस्यातिरिक्तप्रमाणत्वात्, 'शृणोमि' 'शाब्दयामि' इत्याद्यनुव्यवसायप्रयोजिकाया विलक्षणानुभवसिद्धायाः शाब्दत्वजातेस्तदवच्छिन्ने आकाङ्क्षादिज्ञानहेतुत्वस्य च कल्पनावश्यकत्वे तद्वृत्त्यनुमितित्वकल्पने व्याप्तिस्मृत्यादिकल्पने मानाभावात्, गौरवाच्च ।

किञ्च, सिद्धिसत्त्वेऽपि शाब्दबोधोदयेनानुमितेश्चानुदयेन सिद्धिप्रतिबन्ध्यतावच्छेदककोटौ शाब्दबोधातिरिक्तत्वविशेषणदाने गौरवात् ।

अपि च—वह्न्यादेरशाब्दानुमितेरपरस्य शाब्दबोधोदयेनानुमितेश्चैकदोत्पत्तिवारणाय शाब्देतरानुमितित्वावच्छिन्ने शाब्दानुमितिसामग्रीत्वेन प्रतिबन्धकत्वे गौरवम् ।

मम तु—अनुमितित्वावच्छिन्नं प्रति शाब्दसामग्रीत्वेनैव तत्त्वमिति लाघवं स्पष्टमेव । अनुमितेरसम्भवाच्च ।

न च 'गौरस्तितावान्, स्वधर्मिकान्वयबोधानुकूलाकाङ्क्षाद्याश्रयपदोपस्थितत्वात्, घटवद्, इत्यनुमानं सुलभमिति वाच्यम्, गवादेः पदोपस्थापितत्वाद्यभावग्रहदशायां गौरस्तीत्यादितोऽन्वयबोधानापत्तेः । पदजन्या हि पदार्थोपस्थितिः स्वरूपसत्येवान्वयबुद्धावुपयुज्यते, न तु ज्ञाता, प्रमाणाभावात्, पदैरनुपस्थापितस्यापि तदुपस्थितत्वग्रहादन्वयधीप्रसङ्गाच्च ।

न च गौः, पदम्, अस्तित्ववद्, गोज्ञानपूर्वकोच्चारणविषयोऽस्ति, पदसाकाङ्क्षपदत्वात्, यन्नैवम्, तन्नैवम्, यथा आकाशम् इत्यनुमानमिति वाच्यम्, गवादिपदानां ज्ञानपूर्वकोच्चारितत्वाभावनिश्चयदशायां जायमानसर्वजनीनानुभवसिद्धबोधस्यासंगत्यापत्तेः, गवादिनिष्ठमुख्यविशेष्यताशालिबोधस्यैवमप्यनुपपादनाच्च ।

एतेन पठितविस्मृतशास्त्रस्य बोधादर्शनाच्छक्तिस्मरणं हेतुः, उद्बुद्धशक्तिसंस्कारो वेति मतद्वयेऽपि जनकतायाः शक्तित्वनये शब्दप्रामाण्योच्छेदः । जनकताया व्याप्तिघटितत्वात्, यन्नियतत्वाद्वा तत्तद्ज्ञाने व्याप्तिज्ञानं जातमेवेति अनुमानविधयैव प्रामाण्यं स्यादित्यपास्तम् । जनकताघटितव्याप्तेः कार्यकारणयोः सत्त्वेन तादृशज्ञायमानपदेन स्वकार्यतादृशबोधानुमितावपि विलक्षणविषयताशाल्यर्थबोधासम्भवात् । न हि व्यवसाये यादृशी विषयता, तादृशी अनुव्यवसाये, त्रिपुटीप्रत्यक्षवादिनामपि 'अयं घटः, घटमहं जानामि'इत्येव ज्ञानाकार इत्याहुः ।

यदि तु—अन्विते शक्तिरित्यस्य पदान्तरार्थेनान्वितः पदार्थ एव पदैरनुभाव्यते, न तु पदार्थमात्रमित्यर्थः । तथाहि—पदानामन्वयानुभवजनकत्वमेव शक्तिः, एकैकपदार्थोपस्थितिस्तु स्मृतिरूपा । एकसम्बन्धिज्ञानस्यापरसम्बन्धिस्मारकताया हस्तिपकादिसाधारणत्वात्, अन्वयानुभवजनकत्वरूपस्य मूलसम्बन्धस्य विद्यमानत्वादित्युच्यते—

तर्हि सिद्धैव वाक्यशक्तिः। तथाहि—सा शक्तिर्नैकपदे, केवलघटपदादपि अन्वयानुभवापत्तेः। अन्वितो घट इति बोधस्तु ततोऽनुभवविरुद्ध एव समुदाये, तत्स्वीकारे तु सिद्धमस्मन्मतमित्यन्यत्र विस्तरः।

यत्तु—पदार्थाः, तत्स्मृतिर्वा शाब्दबोधे हेतुः, न तु पदज्ञानम्, व्यभिचारात्। तथाहि—[1]अश्वत्वाद्यनुपहितश्वेतत्वं पश्यन् तस्मिन् देशे ह्रेषाशब्देनाश्वं खुरशब्देन गमनं चानुमिमानोऽनुपलब्धिप्रमाणेन तत्प्रदेशे श्वेताद्यन्वययोग्यस्य वस्त्वन्तरस्याभावं जानन् पुरुष एवं कल्पयति, अन्यान्वयसाकाङ्क्षाणां श्वेतत्वादीनां मिथोऽन्वयं विनाऽनुपपन्नत्वधीसहकृतमाकाङ्क्षाज्ञानादिसहकृतं च ज्ञानं तेषां मिथ्योऽन्वयशाब्दबोधे कारणमिति अनुपपन्नत्वधोश्चैवं श्वेतत्वं तद्देशे दृश्यमानमश्वान्यासंसर्गित्वेन प्रमीयमानमश्वसंसर्गित्वं विनानुपपन्नमिति। एवं धावनेऽप्यनुपपत्तिधीर्बोध्या।

अयं भावः—अर्थज्ञानं शाब्दसामान्ये कारणम्, विशेषकारणं तु क्वचित् पदज्ञानादिकम्। तत्कार्यतावच्छेदकञ्च तदुत्तरशाब्दत्वम्। क्वचिदनुपपत्तिज्ञानम्। तत्कार्यतावच्छेदके च तदुत्तरशाब्दत्वमिति न व्यभिचारः। उक्तञ्च—

पश्यतः श्वेतमारूपं ह्रेषाशब्दं च शृण्वतः।
खुरविक्षेपशब्दञ्च श्वेतोऽश्वो धावतीति धीः॥ इति।

तत्, न; अनुमानेनैव निर्वाहात्, 'शाब्दयामि' इत्यनुव्यवसायाभावाच्च।

नन्वेमपि वर्णसमूहरूपपदवाक्ययोर्ज्ञानमसंभवि, उत्पत्तिपक्षे, अभिव्यक्तिपक्षे वा एकदा तदभावात्, तयोः क्रमिकत्वादिति चेत्, न; उत्तरवर्णप्रत्यक्षकालेऽव्यवहितोत्तरत्वसम्बन्धेन पूर्वपूर्ववर्णवत्त्वं तदुत्तरवर्णे गृह्यते।

एवं तदुत्तरवर्णप्रत्यक्षकाल उपस्थितविशिष्टतद्वर्णवत्त्वं तदुत्तरवर्णे गृह्यते।

---

1. 'शाब्दबोधं प्रति उपस्थिताः पदार्थाः, तदुपस्थितिर्वा हेतुः, न तु पदज्ञानमपि' तद्विनापि शाब्दबोधोदयेन व्यभिचारात्। तदुक्तम्—

पश्यतः श्वेतमारूपं ह्रेषाशब्दञ्च शृण्वतः।
खुरविक्षेपशब्दञ्च श्वेतोऽश्वो धावतीति धीः॥ इति।

तत्, न; शब्दं विना जायमानस्य घटादिचाक्षुषस्यापि शाब्दत्वापत्तेः। यदि तत्र 'पश्यामि, न शाब्दयामि' इत्यनुव्यवसायाद् न शाब्दत्वम्, तर्हि प्रकृतेऽपि समम्। उक्तप्रतीतेरनुमानेनैव निर्वाहात् तत्र शाब्दप्रत्ययस्त्वसिद्ध एवेति प्रघट्टकार्थः।

एवमुत्तरोत्तरवर्णप्रत्यक्षकाले पूर्वपूर्वोपस्थितिविशिष्टतद्वर्णवत्त्वं गृह्यत इति तयोः सुग्रहत्वात् । अतः सरो रसः, नदी दीनजराराजेत्यादौ बोधविशेषः ।

यत्तु—प्रत्येकवर्णानुभवजनितसंस्कारसहकृतान्त्यवर्णप्रत्यक्षसामग्र्या सदसदनेकविषया पदप्रतीतिः स्मृतिप्रत्यक्षात्मिकाऽनुभवक्रमोपहितानामेव तेषां स्मृत्यवगाहनान् न क्रमव्युत्क्रमयोरविशेष इति ।

तत्, न; अनुभवस्मृत्योः क्रमे नियमाभावात् । दृश्यते च प्रपूर्वेद्युरनुभूतमस्मृत्वापि पूर्वेद्युरनुभूतस्य स्मरणम् ।

किञ्च, संस्कारस्मृत्योरसमानविषयत्वात् क्रमस्य च संस्काराविषयत्वेन स्मरणाविषयत्वाद्, इत्याहुः ।

अत्रेदं बोध्यम्—निरूपितस्फोटभेदत्रयं न वादिभेदेन व्यवस्थितम्, किन्तु वोद्धृभेदेन । कस्यचित् प्रकृतिप्रत्यययोः प्रत्येकं तत्तदर्थशक्तिग्रहाद् बोधेन; कस्यचित् पारिभाषिकसुबन्तादिपदे तद्ग्रहाद् बोधेन, कस्यचित् तत्समुदाये तद्ग्रहाद् बोधेन, त्रयाणाप्यावश्यकत्वात् । कार्यकारणभावे व्यभिचारस्तु अव्यवहितोत्तोरत्वादिनिवेशेन वार्यः ।

इयांस्तु विशेषः—सर्वस्यापि तत्तत्संसर्गविषयः शक्तिग्रहः, तत्तत्समुदाये । सोऽपि विजातीयबोधजनक एव, न स्मारक इति तत्त्वम् ।

इदमेवाभिप्रेत्य "आद्यन्तौ टकितौ" [१।१।४६] इति सूत्रे 'अथवा यत् तावदयं सामान्येनोपदेष्टुं शक्नोति, तत्तावदुपदिशति प्रकृतिम्, ततो वलाद्यार्धधातुकम्, ततः पश्चादिकारम्, तेनायं विशेषेण शब्दान्तरसमुदायं प्रतिपद्यते' इत्युक्तम् । 'बुद्धिकल्पितप्रकृतित्वप्रत्ययत्वागमत्वादेशत्वादिविशिष्टोपदेशे रूपेणोपायेन नित्यपदं तत्समुदायात्मकमन्वाख्यायते' इत्यर्थः ।

अत्र 'समुदाय' इत्यनेन सखण्डतोक्तम्, सखण्डत्वञ्च व्याकरणशास्त्रबोधितप्रकृतिप्रत्ययागमाद्यवयवकत्वम् ।

न चोच्चारणभेदेन वर्णानां भेदात्, तत्तदानुपूर्व्याश्च भेदात्; आनन्त्यव्यभिचाराभ्यां तत्र शक्तताग्रहो दुरुपपाद इति वाच्यम्, अवर्णादीनामेकत्वस्य विभुत्वस्य नित्यत्वस्य च स्वीकारे। तदवयवकप्रकृत्यादेस्तत्समुदायरूपस्याप्येकत्वेनानन्त्यव्यभिचारयोरभावात्, देशभेदेऽपि पटादीनां देशघटितसंनिवेशाभेदवत् कालभेदेऽपि तद्घटितानुपूर्वीभेदाभावाच्च ।

पटे तन्तुसंयोगारब्धत्ववद् वर्णसंयोगारब्धत्वं पदेऽपि तुल्यम्। गुणे गुणानाङ्गीकादिति तु 'एकरूपम्' इत्यादिव्यवहारादनादेयमेव। तद्वदेवात्रापि गौणो वा व्यवहारोऽस्तु।

अत एव "हलोऽनन्तराः संयोगः" [१।१।७] इति महासंज्ञाकरणं पाणिनेः सङ्गच्छते। एकविभुनित्यमते तस्य द्रव्यत्वाङ्गीकाराच्च।

न च जगतीतलवर्त्यवर्णानामेकत्वे च मानाभाव इति वाच्यम्, प्रहरात् पूर्वमनुद्भूतेऽधुनानुभूयमानस्य सोऽयमिति प्रत्यभिज्ञारूपाभेदप्रत्ययस्यैव मानत्वात्। न च गत्वावच्छिन्नप्रतियोगिताकभेदाभावस्तद्विषयः, व्यक्त्यरिक्तगत्वानङ्गीकारात्।

ननु व्यक्त्यभिन्नत्वे मतुपोऽनापत्तिः, अभेदे तदनङ्गीकारात्, नहि भवति घटवान् घट इति चेत्, न; गुणगुणिनोरभेदेऽपि रूपवान् घट इतिवदुपपत्तेः।

अस्तु वा अतिरिक्तम्, तथापि न दोषः, भिन्नेषु घटादिषु घटत्वावच्छिन्नप्रतियोगिताकभेदाभावसत्त्वात्। सोऽयमिति प्रतीत्यापत्त्या व्यक्त्यभेदस्यैव तत्र विषयत्वावश्यकत्वात्, प्रत्यभिज्ञाया व्यक्तिविषयत्वे बाधकभावाच्च।

न च गकार उत्पन्न इति प्रतीतिरेव बाधिका, तस्या व्यञ्जकध्वनिनिष्ठोत्पत्त्यादेः परम्परासम्बन्धेन वर्णनिष्ठतयाऽप्युपपत्तेरतिरिक्तत्वासाधकत्वात्, परम्परया वर्णनिष्ठत्वाभ्युपगमाच्च न भ्रमत्वम्। साक्षात्सम्बन्धांशे भ्रम इत्यवशिष्यते। तदपि—सोयमित्यत्र व्यक्त्यभेदांशे तव भ्रमत्ववत्तुल्यम्। परन्तु ममानन्तवर्णतत्प्रागभावध्वंसकल्पनेति लाघवमतिरिच्यते। तव तु तत् स्यादिति महदनिष्टम्।

एतेनोत्पत्तिविनाशप्रत्यययोर्द्वयोर्भ्रमत्वकल्पनापेक्षया प्रत्यभिज्ञामात्रस्य भ्रमत्वकल्पने लाघवमिति परास्तम्।

किञ्च, प्रागसत्त्वे सति सत्त्वरूपाया उत्पत्तेर्न वर्णेषु ग्रहणमानुभविकम्। अत एव वर्णमुच्चारयतीति प्रत्ययो व्यवहारश्च, न तूत्पादयतीति।

उच्चारितत्वञ्च ताल्वोष्ठपुटसंयोगादिजन्याभिव्यक्तिविशिष्टत्वम्। तथा च प्रागनुभूतेनेदानीन्तनानुभूतस्य अभेदसिद्धौ

तावत्कालं स्थिरं चैनं कः पश्चान्नाशयिष्यति।

इति न्यायेन नित्यतैव।

नन्वेवं स्त्रीप्रभवोऽयम्, शुकप्रभवोऽयमिति प्रतीतिः, तच्छ्रवणात् शुकाद्यनुमानं च न स्यात्।

किञ्च, 'सेयं गुर्जरी,' 'सेयं दीपकलिका' इत्यादिप्रतीतेस्तेषामपि नित्यता स्यादिति चेत्, न; स्त्रीशुकादिजन्यतावच्छेदकस्य वर्णव्यञ्जकध्वनिषु अनुभूयमानस्य वैजात्यस्य परम्परया वर्णेषु सत्त्वेनाक्षतेः।

एतेन सानुनासिकत्वनिरनुनासिकत्वोदात्तत्वानुदात्तत्वह्रस्वत्वदीर्घत्वतारत्वमन्द्रत्वादिविरुद्धधर्माध्यासाद् भेद इति निरस्तम्।

योऽयं रामेणोक्तः, स एवेदानीं कृष्णेनोच्यते, योऽयं तारो मया श्रुतः, स एवेदानीं मन्द इति प्रतीतेस्तारत्वादेर्विरोधाभावाच्च। यदेव पद्यं देवदत्तापेक्षया विष्णुनोच्चैः पठितम्, तदेवानेन तदपेक्षया मन्दं पठितम्, न त्विदं पद्यान्तरमिति सकलानुभवविरोधाच्च।

तत्र पद्यान्तरत्वापतेश्च। गुर्जरीदीपादिस्थलेऽपि मानान्तरेण नाशसिद्धेः सोऽयमित्यस्य भ्रमत्वम्।

न च नित्यत्वे वायुताल्वोष्ठसंयोगादेः ककारादिप्रत्यक्षत्वं कार्यतावच्छेदकं वाच्यम्, मम तु कत्वमेवेति लाघवमिति वाच्यम्, अनन्तप्रागभावध्वंसादिकल्पनापेक्षया लघुत्वात्, गुरुधर्मस्यापि अवच्छेदकतायाः स्थापितत्वाच्च, प्रत्यक्षत्वावच्छिन्नविषयतया गत्वस्यैव कार्यतावच्छेदकत्वाच्च।

नन्वेवं घटाद्यपि नित्यं स्यात्, कपालसंयोगादिकञ्च व्यञ्जकं भविष्यतीति चेत्, न; उत्पत्तिप्रतीतेर्विना बाधकं साक्षात् सम्बन्धांशे भ्रमत्वायोगात्। वर्णेषु तद्ग्रहविपरीतग्रहयोः सत्त्वेन तदयोगः, सत्कार्यवादे इष्टापत्तेश्च।

न च ककारादेर्विना व्यञ्जकमनुभवेऽन्धकारस्थघटवत् संदेहापत्तिरिति वाच्यम्, दोषाद्यभावात्, उत्पन्नत्वादिसंदेहस्य तवापि दुर्वारत्वाच्च।

नन्ववर्णस्थले ध्वनिसत्त्वे मानाभावः, शङ्खाद्यभावेन यदुत्पत्त्यसंभवश्चेति वाच्यम्, वर्णाग्रहणे ध्वनिग्रहणस्यानुभवसिद्धत्वात्। वर्णोच्चारणस्थले तत्तत्स्थाने जिह्वाया ईषदन्तरं याते वर्णानुपलब्धेर्ध्वन्युपलब्धेश्च दर्शनेन जिह्वाभिघातवायुकण्ठसंयोगादेस्तज्जनकत्वकल्पनाच्च, वर्णोत्पत्तौ तदनङ्गीकारे प्रतिबन्ध्यप्रतिबन्धकभावकल्पनागौरवापत्तेश्च।

न चैवं घटेन तरतीत्यर्थे द्व्यज्लक्षणष्ठन् न स्यादिति वाच्यम्, आवृत्तिकृतद्व्यज्व्यपदेशेन सिद्धेः। अश्वादिप्रतिषेधेन तद्विषये गौणस्यापि ग्रहणज्ञापनात्।

अत एव करिणेत्यादौ "सावेकाचः" [६।१।१६८] इति विभक्त्युदात्तत्वं न, आवृत्तिकृतद्व्यच्व्यपदेशेनैकाच्व्यपदेशस्य निवर्तितत्वात्। नहि त्रिपुत्रो द्विपुत्रव्यपदेशं लभते।

अनुबन्धसङ्करोऽपि न, एकस्यैव देवदत्तस्य देशभेदेन जटित्वमुण्डित्वाद्युपदेशे तेषां देशभेदेन व्यवस्थावत् टित्त्वकित्त्वादीनामप्युपपत्तेः।

न चैकत्वे एकस्य पुरुषस्य देशभेदेन ग्रहणानापत्तिः, तदधिकरणस्याकाशस्यैकत्वेन देशभेदस्यैवाभावात्। औपाधिकतद्भेदाङ्गीकारे तु वायुसंयोगोपाधिकभेदस्य वर्णेऽपि सत्त्वेनाक्षतेः। स्पष्टं चेदम् "अइउण्" सूत्रे भाष्यकैयटयोः।

न चाभिव्यक्तेः क्षणिकत्वेन पदप्रत्यक्षासंभवः, जन्यत्वेऽपि तुल्यत्वात्, पूर्वपूर्वसंस्कारसहकृतश्रोत्रेणाभिव्यक्तपूर्वपूर्ववर्णवैशिष्ट्यस्योत्तरोत्तरवर्णे ग्रहणेन तत्संभवाच्च।

अव्यवहितोत्तरत्वञ्चोत्पत्त्यनवच्छिन्नस्वज्ञानाधिकरणक्षणोत्पत्तिकज्ञानाविषयत्वम्। एवञ्च पदस्यैकत्वेनानुगमकाकाङ्क्षाया अभावेन कारणतावच्छेदकस्यावश्यकत्वाभावः। तादात्म्येन तदेव चावच्छेदकम्। तदर्थज्ञापकत्वज्ञानमपि अव्यवहितोत्तरसम्बन्धेन पूर्वपूर्ववर्णविशिष्टचरमवर्णश्रवण एव वर्णवैकल्पादिना श्रवणे न बोध इति दिक्।

इति सखण्डपदवाक्यस्फोटनिरूपणम्।

अथाखण्डपदवाक्यस्फोटनिरूपणम्

वर्णमालायाम् 'एकं पदम्' 'एकं वाक्यम्' इति प्रतीतेः 'तदेवेदं पटपदम्' 'तदेवेदं घटमानय' इति वाक्यमिति प्रतीतेश्च वर्णातिरिक्तम् 'एकमखण्डं प्रकृतिप्रत्ययादिविभाग-रहितं पदं वाक्यञ्च वर्णव्यङ्ग्यमवश्यं स्वीकार्यम्। तद्धीयमेकत्वधीर्वर्णविषयेति युक्तम्, तेषामनेकत्वात्। न चैकं वनमितिवत् सा, वनराश्यादेरप्यतिरिक्तत्वात्।

किञ्च, तत्रैकदेशावच्छिन्नत्वस्योपाधेरेकत्वेन सोपाधिस्तथाप्रतीतिरुप-पद्यते। प्रकृते चोपाधेरसम्भवः। न चैकार्थबोधहेतुत्वं तथा, व्याससमासयोरप्यै-क्यापत्तेः, वाक्येऽसंभवाच्च। वर्णसमुदायः पदमित्यादि "आद्यन्तवत्" सूत्रस्थभाष्यं तु समुदायोऽतिरिक्त इति मतेन।

किञ्चैवं सति वर्णेष्वप्यवयवानुभवसत्त्वात्तदतिरिक्तो वर्णोऽपि न सिध्येत्। यथा ऋकारे रेफो लृकारः, एकारैकारयोरकारेकारौ। ओकारौकारयोरकारो-कारौ। दीर्घादिष्वपि ह्रस्वाकारादयः।

किं बहुना, वर्णमात्रे "तस्यादित उदात्तम्" [१।२।३२] इत्यादिनाऽवयवसत्त्वं गम्यते। अत एव वर्णावयवानां वर्णग्रहणेन ग्रहणाग्रहणपक्षौ "एओङ्" सूत्रे भाष्ये व्युत्पादितौ।

किञ्चैवम् 'एकः पटः' इति व्यवहारस्यापि तन्तुसमुदायेनैवोपपत्तौ तत्राप्यतिरिक्तावयव्यसिद्ध्यापत्तिः। यदि तत्रैक इति व्यवहारादतिरिक्तावयवि-सिद्धिः, तर्हि प्रकृतेऽपि समम्। न च वर्णेष्ववयवा न सन्त्येव, तदवभासस्तु तत्त-दुच्चारणविशेषजन्यतत्तद्वर्णसमानाकारक्रमिकध्वनिविशेषसन्तानोपरागोपाधिरिति वाच्यम्, पदेऽपि वर्णावभासस्यैवमेवोपपत्तौ वर्णोच्छेद एव स्यात्। अखण्डत्वं तु प्रकृतिप्रत्ययाद्यवयवराहित्येनैव। सखण्डपदस्फोटाद्युक्तरीत्या समुदायशक्त्यैव बोधस्य जायमानत्वेन तत्र तत्सत्त्वे मानाभावात्। शास्त्रे तु 'रेखागवय' न्यायेनोपपन्नम्।

पस्पशायाम् 'अथ कः शब्दः' इति प्रघट्टके 'येनोच्चारितेन सास्नालाङ्गूल-ककुदखुरविषाणिनां सम्प्रत्ययः इति' भाष्ये एकवचनेनायं पक्षः सूचितः। स्पष्टश्च कैयटेनोक्तः तत्रैव। तदुक्तं हरिणा—

पदे न वर्णा विद्यन्ते वर्णेष्ववयवा इव।
वाक्यात् पदानामत्यन्तं प्रविवेको न कश्चन ॥ इति।

अत्र वर्णशब्देन प्रकृतिप्रत्ययादिकम्, वर्णस्फोट इत्यत्र वर्णपदेन तस्यैव प्रकृतत्वात्, "आद्यन्तौ" "आद्यन्तवत्" इत्यादिसूत्रस्थभाष्येण तथैव लाभाच्च ।

ये तु—'पदे वर्णा न सन्त्येव । यथा ऋकारादौ अवयवाः प्रतीयमाना अपि न सन्ति, तद्वदित्यर्थः' इति व्याचक्षते । तेषामनुभवविरोधः, अवयविनि पटे तन्तूनामिव पदे वर्णानामप्यनुभवसिद्धत्वात् । अखण्डत्वरूपधर्मैक्यात् पदवाक्यात् वाक्यपदयोरत्यन्तं भेदो नास्तीत्यर्थः ।

ननु वर्णसत्त्वे मानाभावः, पूर्वोक्तरीत्यानुभवेन च वर्णस्थले ध्वनीनामावश्यकत्वेन तैरेव स्फोटाभिव्यक्तिसंभवे ध्वनिस्फोटयोर्मध्ये वर्णाङ्गीकारे गौरवाद् इति चेत्, भवन्तु त एव वर्णा दूरगतकोलाहलश्रवणे वत्वादीनां श्रूयमाणध्वनिगतानामेव दूरत्वदोषेणानभिव्यक्तिसंभवात् । अत एव 'लोके प्रतीतपदार्थको ध्वनिःशब्दः' इति भाष्यं सङ्गच्छते । तत्र हि—कर्मधारयः । इदमेवाभिप्रेत्योक्तं **काव्यप्रकाशे** 'बुधैः वैयाकरणैः प्रधानभूतस्फोटरूपव्यङ्ग्यव्यञ्जकस्य ध्वनिरिति व्यवहारः कृतः' इति । अत्र प्रधानीभूतः स्फोटः पदवाक्यप्रकृत्यादिरूपः स्फोटः, तस्यार्थप्रत्यायकत्वेन प्रधानीभूतत्वम् ।

एवञ्चार्थे गृहीतसम्बन्धेन प्रागुक्तरीत्या गृहीतक्रमेण वर्णसमुदायेन व्यञ्जितोक्तरूपाद्वा अर्थविशेषेण गृहीतसम्बन्धात् स्फोटादर्थप्रत्ययः । पर्यायेषु च भिन्नैव शक्तिः । गौरवं तु प्रामाणिकत्वान्न दोषावहम् ।

एतेन किमयं स्फोटः स्वरूपतोऽर्थप्रत्यायकः, प्रतीतो वा ? नाद्यः, सर्वदार्थबोधापत्तेः । अन्त्ये, 'एकं पदम्'इत्यादिप्रत्यक्षं तदग्राहकं वाच्यम् । तत्र किमयं प्रत्ययो वर्णानवगाहते, न वा ? आद्ये, अस्तु तेषामेवानुपूर्व्यवच्छिन्नानां वाचकता, आवश्यकत्वात् । अन्त्ये प्रतीतिबाध एव ।

किञ्च, वर्णव्यङ्ग्यः स्फोटः । तत्र किं वर्णावली तत्तदर्थविशेषणे गृहीतसम्बन्धा स्फोटव्यञ्जिका, गृहीतसम्बन्धा वा ? नाद्यः, काव्यादिश्रवणे तत्तदर्थैरगृहीतसम्बन्धस्यापि 'इदमेकं पदम्' 'इदमेकं वाक्यम्' इत्यादिस्फोटप्रतीत्यापत्तेः । नान्त्यः, तैरेव बोधोपपत्तावतिरिक्ततत्स्वीकारस्य वैयर्थ्यापत्तेः । एकत्वप्रतीतिश्चैकबुद्धिविषयत्वौपाधिकी ।

न च तदेवेदं पदमिति प्रतीत्या तत्सिद्धिरिति वाच्यम्, पूर्वनखादिनाशोत्तरं पुनरुत्पन्ने नखादौ तदेवेदं नखम्, त एव इमे केशाः, स एवायं समुद्र इतिवत्

सादृश्येनोपपत्तेः। अतिरिक्तनखादिकमनुभवविरुद्धमिति चेत्, गौरित्यादौ गकारविसर्गातिरिक्तस्फोटोऽप्यनुभवविरुद्ध इति तुल्यम्।

किञ्च, पर्यायशब्देष्वेकः स्फोटः, नाना वा? नाद्यः, कलशघटादिपर्यायाभिव्यक्ते स्फोटे गृहीतशक्तिकस्य पुंसोऽप्रसिद्धपदश्रवणेऽप्यर्थप्रत्ययापत्तेः, प्राग्गृहीतशक्तिकस्यैव स्फोटस्य तेनाप्यभिव्यञ्जनात्।

न च तत्तत्पर्यायाभिव्यक्तस्फोटे शक्तिग्रहस्तत्तत्पर्यायश्रवणेऽर्थधीहेतुरिति वाच्यम्, एवं हि प्रतिपर्यायं शक्तिग्रहावश्यम्भावे तत्तत्पर्यायगतशक्तिग्रहहेतुताया एव युक्तत्वात्। तव तु तत्तत्पर्यायाभिव्यक्तगतशक्तिग्रहत्वेन हेतुत्वे गौरवात्।

नान्त्यः, अनन्तपदार्थानां तेषु शक्तेश्च कल्पनामपेक्ष्य क्लृप्तवर्णेष्वेव शक्तिकल्पनस्य लघुत्वात्।

अपि च, वर्णानां प्रत्येकं व्यञ्जकत्वम्, समुदितानां वा? नाद्यः, प्रत्येकात् स्फोटप्रतीतौ तावतैवार्थबोधापत्तेः। नान्त्यः, 'तद्धेतोः' इति न्यायेनार्थबोधस्यापि तत एवोपपत्तौ तत्कल्पनावैयर्थ्यापत्तिरिति निरस्तमित्याहुः।

अपरे तु—एक एव पदार्थः श्रोत्रग्राह्यः, अनन्तवर्णध्वनिकल्पने मानाभावात्, अवर्णानामैक्यम्, अवर्णककारादीनाश्चानेकत्वमित्यर्धजरतीयस्यान्याय्यत्वाच्च। कत्वादिकं चाभिव्यञ्जकवायुसंयोगनिष्ठमेव। विजातीयवायुसंयोगैस्तस्यैव कत्वादिनाऽभिव्यञ्जनम्, विजातीयैश्च तदनाक्रान्तध्वनिरूपेणेत्येव युक्तम्।

किञ्च, एकैकविजातीयवायुसंयोगैः केवलकत्वादिनैव तस्य व्यञ्जनम्। क्रमोत्पन्नैर्बहुभिस्तु तत्तत्पदवाक्यरूपेणाभिव्यक्तादर्थप्रत्ययः। तस्यैव पदादिरूपेणाभिव्यक्तस्यार्थप्रत्यायकत्वेन स्फोटत्वव्यवहारः।

न चेदमयुक्तम्, तत्तद्वर्णोत्पादकत्वादिनाभिमतविजातीयवायुसंयोगविशेषाभिव्यक्ताखण्डपदार्थरूपैकवर्णस्यैव तत्तद्वर्णजनकतावच्छेदकतया, व्यञ्जकतावच्छेदकतया वा परमतसिद्धस्य वायुसंयोगनिष्ठस्य वैजात्यस्य परम्परया वर्णवृत्तित्वमादायान्येषां मते तारत्वादिना प्रत्ययवद् अस्मन्मते कत्वादिनापि प्रतीतिसम्भवात्।

अत एव भामत्याम् 'तारत्वादिवायुनिष्ठं वर्णेष्वारोप्यते' इति देवताधिकरणेऽभिहितम्। 'सोऽयं गकारः' 'तदेवेदं पदम्' इत्यादिप्रत्यभिज्ञापि गत्वाद्यधिकरणवायुसंयोगाभिव्यक्तं दर्पणमुखवद् व्यञ्जकधर्मरूषिततया प्रतीयमानमेकं वर्णमादायैव बोध्या।

एवम् 'एकं पदम्' इत्याद्यपि, पदार्थस्यैकत्वात्। अस्य नित्यत्वेऽपि ककार उत्पन्न इति प्रत्ययस्तु व्यञ्जकनिष्ठोत्पत्तेः परम्परया तत्र सत्त्वादक्षत एव। साक्षात् सम्बन्धांशे तु प्राग्वदेव भ्रमत्वम्। एतेन बाधग्रहे तन्निष्ठजात्याद्यग्रहः।

किञ्च, येन यस्य धर्मो गृह्यते, तेन तदपीति नियमाद् वायुसंयोगानामपि श्रोत्रेण ग्रहणापत्तिरिति निरस्तम्, साक्षात् सम्बन्धेन बाधग्रहेऽपि परम्परया तदग्रहात्।

एतेन 'किञ्चेत्याद्यपि' अपास्तम्। रसनादेः रसादिमात्रग्राहकतायाः परैरभ्युपगमाच्च।

न च विलक्षणवायुसंयोग एव वाचकोऽप्यस्तु, श्रृणोमीत्याद्यनुभवेनातिरिक्तस्य श्रोत्रग्राह्यस्यावश्यकत्वात्। न च ककारहकारयोरैक्यापत्तिः, भिन्नत्वप्रतीत्यनापत्तिश्चेति वाच्यम्, व्यञ्जकगतवैजात्येन भेदात्। अद्वैतसिद्धान्ते विषयसम्बन्धजन्यवृत्तिवैचित्र्येण व्यङ्ग्य स्वरूपसुखवैचित्र्यवत्। विशेष्यांशमादायाभेद इष्ट एव। तत्प्रतीतिस्तु नापाद्या, उपाध्यनालिङ्गितवर्णप्रतीत्यभावात्।

एतेन 'योऽयं हकारः, स एवेदानीं गकार इति प्रतीतिः स्यात्। हकारोऽयं न गकार इति प्रतीतिश्च न स्यादित्यपास्तम्।

न च विलक्षणवायुसंयोगा एव श्रोत्रेन्द्रियग्राह्याः सन्तु, किमेकस्याप्यतिरिक्तस्य कल्पनयेति वाच्यम्, 'एको गकारः' 'एकं पदम्' इत्यादिप्रतीत्यनुरोधेन तस्यावश्यकत्वात्।

अत एव वाचस्पतिमिश्रास्तत्त्वबिन्दौ 'गकारादतिरिच्यमानमूर्तेः ककारस्याभावात्' इति स्फोटवादिमतमुपन्यास्थन्। अत एव "अइउण्" सूत्रे "अस्य चौ"[७।४।३२] इत्याद्यकारस्य वर्णसमाम्नायस्थाकारभिन्नत्वेनाण्त्वाभावात् सवर्णाग्राहकत्वमाशङ्क्य 'अवर्णस्यैकत्वात् सिद्धम्' इति प्रघट्टके एकत्वे एकस्य पुंसो युगपदनेकदेशेषूपलम्भो न स्यात्, उपलभते तु इत्याशङ्क्य 'अकारमपि नोपलभते, यतः 'श्रोत्रोपलब्धिर्बुद्धिनिर्ग्राह्यः प्रयोगेणाभिज्वलित आकाशदेशः शब्दः, एकञ्च पुनराकाशम्, श्रोत्रोपलब्धिरित्यनेन आकाशदेशत्वं शब्दस्य प्रतिपादयति। बुद्धिनिर्ग्राह्यः पूर्वपूर्वध्वन्युत्पादिताभिव्यक्तिजनितसंस्कारपरम्परासहकृतान्त्यबुद्धिनिर्ग्राह्यः, प्रयुज्यतेऽनेनेति प्रयोगो वायुसंयोगः, कण्ठताल्वाद्यभिघातो ध्वनिर्वा। तेनाभिज्वलितः अभिव्यङ्ग्य इति कैयटः।

तत्र 'बुद्धिभिर्निग्राह्यः' इति समासः। निर्ग्राह्यः, निश्शेषतो ग्राह्यः; शब्दतोऽर्थतश्चेत्यर्थः। अयमेवार्थः प्रयोगेणाभिज्वलित इत्यनेन स्फुटीक्रियते इत्यन्ये।

यत्र 'बुद्धिनिर्ग्राह्यः' इत्यस्य बुद्धिविषय इत्यर्थ इति। तत्, न; 'श्रोत्रोपलब्धिः' इत्यनेन पौनरुक्त्यापत्तेः। अनेन हि स्वरसत एकस्यैवाद्यध्वनिमारभ्य अन्तध्वन्यन्तेन व्यङ्ग्यता लभ्यत इति स्पष्टमेवाक्षरमार्मिकाणाम्।

न चेदं प्रागुक्तमतसिद्धातिरिक्तपदविषयमिति भ्रमितव्यम्, 'अकारमपि नोपलभते' इति उपक्रमविरोधात्।

अत्रापि पक्षे पदवाक्यग्रहणप्रक्रिया सखण्डवाक्यस्फोटवदेव। शक्तिग्रहशाब्दबोधप्रक्रियापि प्राङ्निरूपितरीत्यैव। साऽपि बोद्धृभेदेनानियतैवेति प्राहुः।

नन्वेवं शास्त्राप्रामाण्यप्रसङ्गः, पदवाक्ययोरखण्डत्वात्, शास्त्रस्य च प्रकृतिप्रत्ययाभ्यां व्युत्पादनपरत्वादिति चेत्, न; उत्तरमीमांसायाम् अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमयरूपपञ्चकोशावतरणस्य सर्वाधारब्रह्मबोधकत्ववत् प्रकृतिप्रत्ययादिविचारस्याखण्डस्फोटबोधनोपायत्वेनादोषत्वात्।

ननु शास्त्रज्ञानं विनापि गामानयेति वाक्यमात्रव्युत्पन्नस्य पामरादेरपि शाब्दबोधेन तत्र स्फोटज्ञानस्य जायमानत्वात् नैतच्छास्त्रं पञ्चकोशवत् स्फोटज्ञानोपाय इति चेत्, न; प्रकारान्तरेण तज्ज्ञानसम्भवेऽपि प्रकृतिप्रत्ययव्युत्पादनपूर्वकविजातीयतज्ज्ञानस्य स्वपूर्वप्रयोगद्वारा शरीरशुद्धिफलकस्य तत्फलत्वेनादोषात्। तदुक्तं हरिणा—

'तद्द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम्। इति।

एवञ्च विजातीयज्ञान एव शास्त्रस्योपयोग इति न तृणादिवद् व्यभिचारः। लघुनोपायेन सकलशब्दप्रतिपत्तौ च शास्त्रस्योपयोगो बोध्यः।

न च प्रकृतिप्रत्ययविभागस्य काल्पनिकत्वे शशविषाणप्रायत्वम्, पञ्चकोशादिवदस्यापि सदसद्विलक्षणत्वात्। एवम् 'रेखागवय'न्यायेनापि शास्त्रमुपायः।

एवञ्च सखण्डपदस्फोट इत्यस्य प्रकृतिप्रत्ययविभागतत्तदर्थज्ञानपूर्वकं पदं बोधकमित्यर्थः। एवं हरेऽवेत्यादौ प्रत्येकपदज्ञानपूर्वकं बोध इति सखण्डवाक्यस्फोटः। प्रकृतिप्रत्ययादिकल्पना 'रेखागवय'न्यायेन तद्बोधितमखण्डं प्रकृतिप्रत्ययादिविभागानाश्रयं पदादिबोधकमित्यखण्डपदवाक्यस्फोटाविति तत्त्वम्।

इत्यखण्डपदवाक्यस्फोटनिरूपणम्।

अथ जातिस्फोटनिरूपणम्

इत्थं पञ्च व्यक्तिस्फोटा निरूपिताः। जातिस्फोटवादिनस्तु—वर्णा अनन्ता एव, घटाकाशमठाकाशादिवदुपाध्यालिङ्गिताया एव तत्प्रतीतेरभावेनंवोपाधिको भेद इत्यस्य वक्तुं शक्त्वात्। सोऽयमित्यादिप्रत्यभिज्ञा तु साजात्यनिबन्धना।

न चैवं पदादीनां शक्तिग्रहे आनन्त्यव्यभिचारौ, आनुपूर्व्या तु न निर्वाहः, तस्या अपि पुरुषभेदेन कालभेदेनानन्तत्वादिति वाच्यम्, जातेः शक्यतावच्छेदकत्ववत् शक्ततावच्छेदिकाया अपि तस्या अङ्गीकारेण दोषाभावात्। 'इदं घटपदम्' 'इदं घटपदम्', 'इयं प्रकृतिः' 'इयं प्रकृतिः' इत्याद्येकाकारप्रतीत्या घटपदज्ञानत्वादिना कारणत्वे कारणतावच्छेदककोटिप्रविष्टतया च घटत्वाद्यर्थगतजातिवत् शब्दगतजातिविशेषस्याप्यावश्यकत्वात्। आनुपूर्व्या शक्ततावच्छेदकत्वे गौरवाच्च। तदुक्तम्—

'शक्यत्व इव शक्तत्वे जातेर्लाघवमीक्ष्यताम्'। इति।

शक्यत्वे इत्यादेस्तदवच्छेदकत्वे इत्यर्थः।

किञ्चानुपूर्व्यैव प्रतीतिकारणत्वयोर्निर्वाहे घटत्वादेरपि संयोगविशेषविशिष्टमृदादिभिरन्यथासिद्ध्यापत्तिः। न च क्रमिकवर्णसमुदायस्य यौगपद्यासम्भवेनानारब्धे तु गोशब्दे गशब्दत्वं कथं भवेदिति न्यायेन तत्र जातिर्दुरुपपादेति वाच्यम्, प्रागुक्तरीत्यैकबुद्धिविषयीकृते तत्सम्भवात्। जातिविशेषस्य चानुपूर्वीविशेषविशिष्टा वर्णा व्यञ्जका आकारविशेष इव घटत्वादेः। अतः सरो रस इत्यादौ न बोधाविशेषः।

ननु जातेः प्रत्येकं वर्णेषु सत्त्वे प्रत्येकादर्थबोधापत्तिरिति चेत्, न; अनेकव्यक्त्यभिव्यङ्ग्यवर्णसमुदाये तस्य व्यासज्यवृत्तित्वादक्षतेः। तदुक्तम्—

'अनेकव्यक्त्यभिव्यङ्ग्या जातिः स्फोट इति स्मृता' इति।

न च जातेः शक्ततावच्छेदकत्वेऽपि तस्याः शक्तत्वे मानाभावेन जातौ स्फोटव्यवहारानापत्तिः, शक्यतावच्छेदके विषयतया शक्तेरिव शक्ततावच्छेदके आश्रयतया तस्याः सत्त्वेनाक्षतेः। स्पष्टं चेदम् "अइउण्" सूत्रे। तस्मात् 'आन्यभाव्यमकारस्य' इति ग्रन्थे भाष्यकैयटयोः।

अन्ये तु—आकृत्यधिकरणन्यायेनावश्यकत्वाच्च शक्ताऽपि जातिरेव। तादात्म्येन तदवच्छेदिका च निरवच्छिन्नैव वा शक्तता, जातेरेकत्वेनानुगमकाकाङ्क्षाया अभावात्। सा च ज्ञातैव वाचिका, व्यक्तिवत्।

एतेन स्फोटस्य सदातनत्वादर्थबोधापत्तिरित्यपास्तम् ।

जातिश्चाविद्यको धर्मविशेषः । तत्र तदुपाध्यवच्छिन्नब्रह्मसत्तैव वा, तदुक्तम्—

सम्बन्धिभेदात् सत्तैव भिद्यमाना गवादिषु ।
जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः ॥
सा नित्या सा महानात्मा तामाहुस्त्वतलादयः ।
तां प्रातिपदिकार्थञ्च धात्वर्थञ्च प्रचक्षते ॥ इति ।

एवञ्च वाचकं ब्रह्मैव, शास्त्रीयप्रक्रिया तु जातिव्यञ्जकबोधनार्था प्राग्वदेवेति सर्वेष्टसिद्धिः ।

इति जातिस्फोटनिरूपणम् ।

अधीत्य फणिभाष्याब्धिं सुधीन्द्रहरिदीक्षितात् ।
न्यायतन्त्रं रामरामाद् वादिरक्षोघ्नरामतः ॥१॥
वैयाकरणनागेशः स्फोटायनऋषेर्मतम् ।
परिष्कृत्योक्तवांस्तेन प्रीयतामुमया शिवः ॥२॥
दृढस्तर्कोऽस्य नाभ्यास इति चिन्त्यं न पण्डितैः ।
दृषदोऽपि हि सन्तीर्णाः पयोधौ रामयोगतः ॥३॥
शब्देन्दुशेखरं पुत्रं मञ्जूषाञ्चैव कन्यकाम् ।
स्वमतौ सम्यगुत्पाद्य शिवयोरर्पितौ मया ॥४॥

इति श्रीमदुपाध्यायोपनामकशिवभट्टसुतनागेशभट्टकृतो
वैयाकरणसिद्धान्तमञ्जूषाख्यः
स्फोटवादः समाप्तः ।

वैयाकरणसिद्धान्तमञ्जूषा या कृता मया ।
तया श्रीभगवान साम्बः शिवो मे प्रीयतामिति ॥

॥ शुभमस्तु ॥

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्याभिनवप्रकाशनानि

क्रमसं० ग्रन्थनाम मूल्यम्

१. शुक्लयजुर्वेदकाण्वसंहिता-[उत्तरविंशतिः] संहितेयं सायणभाष्यसहिता प्रकाशिता। विविधैः खलु गवेषणाप्रधानैः भूमिका-टिप्पण-परिशिष्टैश्च समलङ्कृता- २६-२५

२. वाक्यपदीयम्-[वृत्तिसमुद्देशात्मकम्] ग्रन्थरत्नमिदं हेलाराजप्रणीतया प्रकाशव्याख्यया तथा च पं० श्रीरघुनाथशर्मविरचितया अम्बाकर्त्रीटीकया विभूषितं वर्तते- ६५-५०

३. वैयाकरणसिद्धान्तमञ्जूषा-[नागेशभट्टविरचिता] ग्रन्थोऽयं सर्वप्रथमं सम्पादककृतविविधैः सारभूतैः टिप्पण-भूमिका-परिशिष्टैश्च समलङ्कृत्य प्रकाशितो वर्तते- ३६-००

४. प्रक्रियाकौमुदी-[भागद्वयात्मिका] रामचन्द्राचार्यप्रणीतेयं प्रक्रियाकौमुदी सर्वप्रथमं श्रीकृष्णाचार्यप्रणीतया प्रकाशव्याख्यया विभूष्य प्रकाशिता। तृतीयो भागोऽपि अचिरादेव प्राकाश्यमेष्यतीति- प्रथमभागस्य-५२-००
द्वितीयभागस्य-६७-००

५. सरलत्रिकोणमितिः-[ज्यौतिषम्] म० म० श्रीबापूदेवशास्त्रिविरचितोऽयं ग्रन्थो गवेषणापूर्णैः उपोद्घात-परिशिष्टैश्च सम्भूष्य प्रकाशितः- २३-००

६. प्रशस्तपादभाष्यम्-[प्रशस्तपादाचार्यप्रणीतम्] न्यायदर्शनस्य प्राणभूतमिदं ग्रन्थरत्नं श्रीधरभट्टकृतन्यायकन्दलीव्याख्यया, श्रीदुर्गाधर झाकृतहिन्दीभाषानुवादेन च समलङ्कृत्य द्वितीयवारं प्रकाशितम्-

७. रसगङ्गाधरः-[पण्डितराजजगन्नाथविरचितः] साहित्यशास्त्रग्रन्थोऽयं पं० श्रीकेदारनाथ-ओझा प्रणीतया रसचन्द्रिकाख्यया व्याख्यया विभूष्य प्रकाशितः। द्वितीयभागोऽपि किलाचिरादेव प्राकाश्यमेष्यतीति- २२-००

८. नानकचन्द्रोदयमहाकाव्यम्-[श्रीदेवराजशर्मविरचितम्] गुरुनानकचरित-मुपजीव्यत्वेनाङ्गीकृत्य प्रतिभावता देवराजशर्मणा महाकविना विरचितमिदं महाकाव्यं कामं संस्कृतवाङ्मयस्य श्रियं समेधयति-

९. रसिकजीवनम्-[पण्डितश्रीरामानन्दपतित्रिपाठिविरचितम्] नायिका-भेदनिरूपणपरमिदं काव्यं सर्वप्रथमं विस्तृतगवेषणात्मिकया प्रस्तावनया समलङ्कृत्य प्रकाशितम्-

---

प्रकाशकः-निदेशकः, अनुसन्धानसंस्थानस्य, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी-२२१००२.